卐 श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम्-४१ 卐

धाराधीशासादितसरस्वतीबिरुदेन विप्रवर्गाग्रगेन कमनीय-
कवितालतालवालकल्पेन परमार्हतेन धनपालविदुषा

विरचिता—

तिलकम[illegible]री

[द्वितीयो विभागः]

तदुपरि—

पूर्णतल्लगच्छीय-विबुधशिरोमणि-श्रीशान्त्याचार्यविरचित टिप्पनकम्।

तथा

तपोगच्छाधिपति-सर्वतन्त्रस्वतन्त्र-शासनसम्राट्-
श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति-
शास्त्रविशारद-कविरत्नेतिपदालङ्कृतेन
श्रीविजयलावण्यसूरिणा विरचिता परागनामा विवृतिः।

वीरसं० २४८०] नेमिसं० ५ [विक्रमसं० २०१०

प्रकाशक—

श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिर, बोटाद, सौराष्ट्र.

Printer :—Laxmibai Narayan Chaudhari, the Nirnaya Sagar Press,
26-28, Kolbhat Street, Bombay 2.

Publisher :—Acharya Vijayalavanya Sureeshvara, Jnanamandir, Botad, Saurashtra.

प्राप्तिस्थान

[१]

श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिर,
बोटाद, सौराष्ट्र.

[२]

सरस्वतीपुस्तकभंडार,
ठे० रतनपोल, हाथीखाना,
अमदावाद.

श्रीतिलकमञ्जरीकथासारः

प्रणेता—पन्न्याससुशीलविजयो गणिः [क्रमशः]–

तत्राह्निकक्रियाकलापेन दिवसमवसाय्य सायमन्तःपुरं गत्वा मदिरावत्या समं विहितप्रेमपूर्णालापो भोजनोत्तरं तया सह सुष्वाप क्ष्मापः। स्वल्पावशिष्टायां रात्रौ च गगनतलादवतीर्य रजतगिरिशिखरमध्यासीनायाः श्वेतवस्त्रमाल्यानुलेपनालङ्कारवत्या मदिरावत्याः कुचकलशारोपितशुण्डादण्डेनाकृष्याकृष्य स्तन्यं पिबन्तमैरावतहस्तिनं स्वप्ने दृष्ट्वा सहर्षमुत्थाय प्रथमप्रबुद्धां मदिरावतीं स्वप्नमुपन्यास्थत्, सापि त्रपावनतेन शिरसा सावधानमश्रौषीत्। तदनु नातिबहुषु दिवसेष्ववसितेषु गर्भमाधाय नवसु मासेष्वतीतेषु शुभतमेऽहनि शुभमुहूर्ते यथायथमुच्चस्थानमधिष्ठितैः शुभग्रहैरवेक्षिते शुभलग्ने लग्नशुद्धिदर्शनकौतुकादिवोर्ध्वमुख्यां होरायामतिकमनीयाकृतिं तनयमजनयत्।

जनिते च तस्मिन् प्रमुदितविप्रजनजयजयध्वनिभिरुद्धुरो भूरिभेरीशङ्खझल्लरीमुरजपटहपटुनिनादपूरितदिगन्तरोऽन्तःपुरपौरनारीवृन्दनृत्यगीतगर्भबन्धुरो महानुत्सवः समजनि। समुपस्थिते च दशमेऽहनि देवद्विजसुहृद्बन्धुवर्गमभिवन्द्य स्वप्नदृष्टैरावतवाचकहरिशब्दपूर्वार्धकं स्वनामोत्तरार्धवाहनशब्दोत्तरार्धकं मेघशब्दपर्यायहरिघटितसमुदायवृत्त्या स्वनामसमानार्थकं च हरिवाहन इति तस्य शिशोर्नाम चकार।

तस्य धात्रीभिरनुपलमुपलालनापालनाभ्यामुपचर्यमाणस्य समग्रायुर्वेदविद्भिर्मन्त्रविद्भिश्च प्रतिक्षणं प्रतिक्रियमाणस्य ससम्भ्रमाभिरन्तःपुराङ्गनाभिः सततमाहूय दृढमालिङ्ग्यमानस्यान्तःपुर एव पञ्चसु वर्षेषु व्यतीतेषु, समवतीर्णे च षष्ठेऽब्दे मध्येराजकुलमेव कल्पितकमनीयविद्यालयो नृपतिरखिलशास्त्रपारावारपारीणान् निसर्गतः सन्मार्गोपासकान् श्रमक्षमाभ्यामनुशासकानाचार्यान् संगृह्य शुभदिनमुहूर्ते निर्वर्तितगृह्यसूत्रोक्तसर्वेतिकर्तव्यस्तेभ्य उपनिन्ये। तेभ्यश्चासौ चतुर्दशापि विद्यास्थानानि सह सर्वाभिरुपविद्याभिर्विदाञ्चकार, चित्रकर्मणि वीणावाद्यादिकलाकर्मणि च नितरां नैपुण्यमवाप।

एवमतिक्रान्ते षोडशेऽब्दे स्वभवनमानीय निर्वर्तितग्रहप्रवेशमङ्गलश्चास्य कृते मनोरमं कुमारभवनं चकार, प्रेषयामास चाधिगताशेषशास्त्रास्त्रविद्यं परिणततारुण्यलक्ष्मीपूर्णसर्वाङ्गं निरवद्यं हरिवाहनं यौवराज्येऽभिषेकुकामस्तत्साहाय्यार्थमवनीपतिकुमारमन्वेष्टुमवनिमण्डलमभितः प्रेष्यजनान्।

एकदा च प्रभातवेलायामेव सभामण्डपमध्यासीनं नृपमेघवाहनमागत्य "दक्षिणजनपदाधिपतेर्वज्रायुधस्य प्रीतिपात्रं विजयवेगनामा प्रधानपुरुषः श्रीमन्तं द्रष्टुमुत्कण्ठितो द्वारि तिष्ठति" इति चित्रकनकवेत्रलताभिधा प्रतीहारी सविनयं व्यजिज्ञपत्। नृपोऽपि स्मारं स्मारमङ्गुलीयकप्रेषणवृत्तान्तं प्रवेशयेति सादरमादिक्षत्। तदनु सवेगमागत्य कृताभिवादनं विजयवेगमन्तिकोपनीतासने सस्नेहमुपवेश्य भूमण्डलाप्रतिहतायुधस्य वज्रायुधस्य कुशलमप्राक्षीत्। विजयवेगोऽपि तदीयकुशलेन साकं तत्कृतप्रणाममावेद्य "भवत्प्रेषितदिव्याङ्गुलीयस्य महिम्ना निर्जिताखिलदाक्षिणात्यक्षोणीपतिना तेन परावर्तितं तदद्य मयाऽनवद्यमणिमयाभरणैः सह समग्ररत्नकोशाध्यक्षाय महोदधये ससाक्षिकं प्रत्यर्पितम्" इत्यवोचत्। तदनु राज्ञा सङ्गरेऽङ्गुलीयककृतोपकारं सविस्तारं पृष्टो विजयवेगो जगाद—

"देव! परुदुपरतासूपचितकृषीबलहर्षासु वर्षासु पच्यमानकलमकपिलकेदारकमनीयकान्तिमये शरत्समये सेनापतिरसौ कुसुमशेखरसंज्ञकं स्वरिपुमवनीपतिमभियियासुः कुण्डिनपुरात् काञ्चीनगरीमागत्य कटकं सव्यवीविशत्। तदवगत्यापि सगर्वजनशिरःशेखरः कुसुमशेखरस्तमाश्रयितुमसहमानो दुर्बलतया च योद्धुमनीहमानः कालयापनमेव कल्याणकरमवधार्य काञ्च्यां शिल्पशास्त्रोक्तदिशा दुर्गस्थानमुपकल्प्य तत्रात्मानं रक्षन् संगृहीतसमग्रसंग्रामोपकरणः समरसाहाय्याय सन्निहितनृपानुसन्धानाय

प्रत्यहं प्रमुखदूतान् प्राहैषीत्, परं सेनापतिस्तस्य तथाविधमुद्यमं गूढचरेभ्य उपलभ्यातीव कुपितः सरभसमापतन्तीभिः सेनाभिरागत्य काञ्चीनगरीमरौत्सीत्। दुर्गविघटनाय प्रवर्तितैः सज्जितमत्तदन्तिघटैः सामन्तैः सह प्राकारशिखरमध्यासीनस्य कुसुमशेखरराज्यलोकस्य प्रत्यहं संग्रामा अभूवन्।

एवं काञ्चीनगर्या आक्रमण-रक्षणाभिनिवेशाभ्यामतीते कियति काले, रात्रेरतिक्रान्ते च प्रथमप्रहरे प्रस्तुतोत्सवमग्नतयोपरतसंग्रामचिन्तोद्वृत्तमानसः सेनानायकः सहसैव प्रकटितमतीवोत्कटं कटककलकलमाकर्ण्य सञ्जाताक्रमणशङ्कस्तत्काललब्धावसरो महाप्रलयकल्पं संग्राममकार्षीत्। तृतीयभागावशिष्टायां रजन्यामनवस्थया जयपराजयावनुभवति प्रतिद्वन्द्विसैन्यद्वये, शत्रुसैन्यान्निर्गत्य कुमारकल्प एको नृपकुमारः सेनापतिपुरःपुञ्जितानां राज्ञां मध्यमुत्पत्य सगर्वमुच्चैः क्रोशन् सेनापतेरन्तिकमुपतस्थे। सेनापतिरपि प्रौढ्योपसृत्य तदीयदृष्टिपथमध्यतिष्ठत्। तयोश्चिरमतिभयङ्करे प्रवृत्ते महासङ्गरे सेनापतेरतीव शोच्यां दशामनुभूय तत्प्राणपरित्राणमार्गं मार्गयमाणः पार्श्वस्थमपि व्यग्रतया विस्मृतं देवेन प्रहितं बालारुणमङ्गुलीयकमस्मार्षम्, व्याहार्षं च तं तद् ग्रहीतुम्, परमसूयन्निव नासौ ग्रहीतुमुन्मना अजनीति जनिताभिनिवेशोऽहं तदीय कराग्रवर्तिनीमेकामङ्गुलीं गृहीत्वा तत्र तदङ्गुलीयकं न्यवीविशम्।

तदनु तदङ्गुलीयकमहिम्ना सपदि जृम्भामुद्भाव्य निद्रोद्रेकेण युगपदाकुलीकृते शत्रुसैन्ये राजकुमारोऽपि धनुषि योजितं शरं संहृत्योज्झितधनुर्यष्टिर्निद्रातिरेकमनुभूय रथोत्सङ्गमाशिश्रियत्। स सेनापतिस्तस्य भुवनत्रयातिशायिना शौर्येण विस्मयमानमानसस्तमभिधावतः सैनिकान् शपथशतेन निवार्य राजकुमाराधिशयितरथदेशमागतः सकलाङ्गसङ्गलद्रुधिरधारमुपरतप्राणसञ्चारममुं नृपकुमारमवेक्ष्य सन्निहितसामन्तजनैः साकमदसीयगुणगणं स्तुवंस्तं परिचाययितुं कमपि मृगयमाणस्तत्पक्षगतं नैकमपि चैतन्याश्रितमद्राक्षीत्, अगत्या च तच्चामरग्राहिणीं तत्परिचयमप्राक्षीत्। सापि स्रवदश्रुसलिलाप्लुतलोचना निःश्वस्य कथंकथमप्यचकथत्—'महानुभाव! अस्तं गच्छन्ती कथमस्य कथोपन्यासपथमवतरितुमर्हति तथापि श्रूयतां कथंकथमपि समासेनोपन्यस्यमानाऽनन्यजनसमाना।

अयमखिलद्वीपमहीपालमुद्धूयमानोदग्रकेतोः सिंहलद्वीपाधिपस्य चन्द्रकेतोरात्मजः संग्रामार्णवसेतुः समरकेतुर्नाम। अयं दुरतिक्रमविक्रमशालितया बाल्य एवानुभूतयौवराज्याभिषेकसौभाग्यः सकलद्वीपविजिगीषया प्रयातोऽपि पितुरादेशेनास्य राज्ञः साहाय्यसमीहया काञ्चीमागत्य पञ्चषाण्यहानि स्थित्वा प्रातरद्य शृङ्गारवेषं गृहीत्वा कामदेवमन्दिरमगमत्।

तत्रासीनश्च द्वारदेशमनुप्रविशन्तं पौरनारीजनमतिप्रीतिपुषा चक्षुषाऽवेक्षमाणो दिवसमवसाय्य कामदेवस्य पुरस्तात् कमलिनीदलमयीं शय्यामधिशय्य निशीथसमये सज्जितसमरसामग्रीकः प्रतिषिध्यमानोऽपि हितैषिभिः प्रवर्तितसङ्गरो दुरवस्थामिमामन्वभूत्' इत्थमावेदयन्त्यामेव तस्यामक्षैपीदसौ क्षपा। सर्वमपि प्रतिद्वन्द्विसैन्यमजागरीत्; स राजकुमारोऽपि क्षीणनिद्रस्तत्क्षणमीक्षणद्वयमुन्मीलनसौभाग्यमनैषीत्। सेनानीरपि तस्यातर्कितोपनतेन पुनरुज्जीवनेन कृतार्थः सन् मुहूर्तमवस्थाय शत्रुसैन्याश्वासनायाऽभयपटहं नादयित्वा स्वसैन्यमपि तदवस्कन्दनाद् व्यावर्त्य प्रधानजयवारणमारुह्य स्वपुरस्तान्नृपकुमारमारोप्य च शिबिरमानैषीत्।

अधिशायितशय्यं च तं व्रणपट्टबन्धनादिना परिचर्यासभिषगवासविविधोपचारवर्धमानबलमुत्तमेऽहनि सादरं निमन्त्र्य साकममात्यादिभिः स्वसदनमवाप्यानीय भोजयित्वा कुसुमानुलेपनवसनाभरणैरभिनन्द्य संग्रामगृहीतगजतुरगरथमपि प्रत्यर्प्य रचिताञ्जलिर्जगाद—

'कुमार! मया निर्जितमात्मानमवगम्य मनागपि नावमन्येथाः, न खलु त्वामधिज्यधन्वानमर्हति कोऽपि समरे पराङ्मुखीकर्तुम्, दूरतोऽपि दृष्टमात्रं यदीदृशीं दशां त्वामन्वनीभवत् तदन्यदेव वस्तु, त्वद्दृष्टिपथमवतारयामि' इत्यभिधाय तदङ्गुलीयकं तमदर्शयत्। कुतो लब्धमिदमिति पृष्टश्च भवतो मेघवाहनस्य शक्रावतारगमनादारभ्य ज्वलनप्रभवैमानिकवृत्तान्तं राजलक्ष्मीस्वस्थानप्रस्थानान्तं यथावृत्तमकथयत्। नृपकुमारोऽपि सर्वमेतन्निशम्य स्वस्मिन्नवज्ञां शिथिलयन्नवोचत्—

'दण्डाधिपते! नूनमसौ नरपतिरमरपतिस्तूयमानगुणगौरवः, यस्येदृशमसाधारणं माहात्म्यम्, यस्य च भवादृशाः स्वशात्रवेऽपि प्राणार्पणप्रवणाः स्वविक्रममप्यपह्नुत्यान्यदीयसामर्थ्योत्कीर्तनपरायणाः सचिवाः, तस्मादलमधिकतद्वार्तोपन्यासेन,

असीमसाहसाकृष्टराजलक्ष्मीवितीर्णतनयरत्नं तमाशु दर्शयित्वा कृतार्थय मामकीनं लोचनयुगलम्। तस्य तदवलोकनकौतुकमवगम्य सेनापतिः प्रत्यवोचत्—'कुमार! यद्येवमुत्कण्ठसे, तर्हि प्रस्थीयतामद्यैव' इत्यनुज्ञाप्य मया सार्धमसौ देवस्य पार्श्वं प्रेषितः सम्प्रति शक्रावतारोद्यानसन्निधानसुन्दरे सरयूपरिसरे सन्निवेश्य शिबिरमवतिष्ठते"।

सर्वमेतदाकर्ण्य विस्मयमनुभवन् मेघवाहनस्तदवलोकनोत्कलिकाकुलः सपदि तदाकारणाय हरदासनामानं महाप्रतीहारं प्राहैषीत्। स च सादरं तमानीयान्तः प्रावीविशत्। तमभिमुखमागच्छन्तं दूरादेव देव आहूयातिदूरमुत्क्षिप्ताभ्यां भुजाभ्यामाकृष्य स्वकीयमङ्कमारूरुपत्, गाढमाश्लिष्य प्रणयभरेणासन्नासने चोपवेश्य नृपः समन्दस्मितमभाषत—"तवागमनेन कृतार्थोऽहमस्मि, धन्यस्त्वमेवात्र जगति येनात्मनः पराजयमपि विजयमिवाद्रियते वैरिवर्गः। मन्ये मदीयशिरश्छेदसाहसावलोकनसन्तुष्टया राजलक्ष्म्या दिव्याङ्गुलीयकोपहरणव्याजेन दविष्ठदेशान्तरादाकृष्य मह्यमुपहृतोऽसि, मे द्वितीयस्त्वमात्मजन्मा। हरिवाहनेन सह निर्विशेषमुपभुङ्क्ष्व प्राज्यं राज्यमिदमात्मनः। परेणाहमिहानीत इति न मनागपि मन्येथाः, कस्यापि परस्याभावात् प्रत्युत समेषामेव राज्यलोकानां भवदीयत्वात्, सर्वथा स्थिरमवस्थीयतामत्र, सर्वमपि सेत्स्यति समीहितम्" इत्युक्त्वा निकटोपविष्टं हरिवाहनं जगाद—"वत्स! गुणैस्त्वत्समं त्वत्समधिकं वा मध्येवर्गं कमप्यनवलोक्य त्वत्सहचरान्वेषणप्रवणेन मयाऽद्य भाग्येनोपलब्धस्तव विस्रब्धः सहचरः। अयमतिसान्द्रसख्येनाध्यवसिततादात्म्यो न कदाचन विरहयितव्यः, अपि तु निशास्वपि शश्वत् सन्निधातव्यः प्राणप्रियः समरकेतुः" इत्यभिधाय नृपतिरासनादुदतिष्ठत्। कुमारोऽपि तदादेशमुररीकृत्य समरकेतुं हस्ते गृहीत्वा अन्तःपुरसञ्चारिणा परिचारकगणेन परिवृतो मदिरावतीभवनमनैषीत्।

तत्र च मातरमभिवाद्य समरकेतुं दर्शयित्वोपन्यस्तसमस्ततदीयगुणगणस्तदुपहृतवस्त्राभरणं तं स्वभवनमानैषीत्। तत्र च सम्पादितस्नानभोजनादिकाय हरिवाहनाय भुक्त्यर्थमशेषमुत्तरापथं, समरकेतवे चाङ्गादिजनपदान् पट्टकचित्रितानर्पयामास नृपेणादिष्टः सुदृष्टिनामाऽक्षपटलिकः। एवं स्वकुमारनिर्विशेषमुपदर्शितप्रसादेनावनिपतिना प्रतिक्षणं सत्क्रियमाणः, देव्यापि विचिन्त्यमानस्नानाशनादिसौख्यः समरकेतुः स्वगुणगणेन हरिवाहनमनुकुर्वन्नहर्निशमेवान्योन्यमन्वरज्यत्।

एकदा ग्रीष्मावसरे प्रभात एवोत्थाय कृतस्नानभोजनः समरकेतुना सह गजमारुह्य सरयूतटवर्ति मत्तकोकिलं नाम बाह्योद्यानमगमत्। गत्वा च तत्र कतिपयाप्तनृपकुमारपरिवृतः सरयूतीरपरिसरमुपसृत्य तत्र कामदेवमन्दिरसन्निहितप्रदेशे प्रथममेवागत्य परिजनेनोपकल्पितं सम्भूयोपस्थापितताभिरभिनवयौवनाभिर्वाराङ्गनाभिरधिष्ठितवातायनं जलमण्डपमगमत्। प्रविश्य तदन्तः कतिपयाप्तजनसमेतस्तस्य निर्माणरामणीयकमितस्ततो निरीक्ष्योपरतकौतुकः कुसुमतल्पमेकमनल्पमध्यासिष्ट। तत्रासीनमेव तं प्रतीहारप्रवेशितैरनेकविधविनोदव्यवसितैः राजपुत्रैस्तत्कालोचितकृतवरिवस्यैर्वयस्यैर्नृपजनैश्च यथास्थानमासीनैः प्रवर्तितायां वैदग्ध्यभूयिष्ठायां काव्यगोष्ठ्यां विचित्रालापमुपसृत्य काव्येषु निरतिशयरसिको मञ्जीरनामा बन्दितनयो विज्ञापयामास—"कुमार! अव्यवहितपूर्वस्य मधुमासस्य विशुद्धत्रयोदश्यामतीव व्ययेन नागरिकभुजङ्गजनेन प्रीत्या प्रवर्तितयात्रोत्सवदिदृक्षया कामदेवस्य मन्दिरमायातेन मया तत्प्राङ्गणवर्तिसहकारतरोरधस्तान्मृणालतन्तुनियन्त्रितग्रीवोद्देशं मध्यभागरचितरुचिरस्तनवदनाकृतिकेन शुष्कचन्दनद्रववेदिकावलयेन बद्धोभयपर्यन्तं ताडीपत्रखण्डमवलोक्य कौतुकेनादायोत्तरीयाञ्चले नियम्य च यात्रायामवसितायां रहसि कस्येदमिति निरूपयता मया तत्पृष्ठे नामाक्षराण्यनवेक्ष्य तत्क्षणमेवावरणमपसार्य तदुदघाटि। तदनु दिव्याक्षरैरुद्भासमाना दुरूहतात्पर्या व्यलोकि तत्रानुपदमेवोच्यमाना समन्तादार्या। परं तस्या मुहुर्मुहुरवहितेन मनसा विचारिताया अपि न किमपि तात्पर्यमवाधार्यत। तस्मात् कुमार एव सर्वमादिशतु यदिदं केन कस्य पार्श्वे किमभिप्रायकं प्रैषि पत्रम्"। इत्यभिधाय तामतिस्फुटमपाठीत्—

"गुरुभिरदत्तां वोढुं वाञ्छन् मामक्रमात् त्वमचिरेण। स्थातासि पत्रपादपगहने तत्रान्तिकस्थाग्निः॥"

पठ्यमानायामस्यामार्यायामवधाय तत्तात्पर्यमालोचयत्सु सभासत्सु कोशलेश्वरकुमारोऽब्रवीत्—"सखे! काञ्चिद् दिव्यकन्यकामुद्वोढुकामोऽपि कश्चन युवा तया वृतोऽपि तदीयगुरुजनैस्तद्दानेन नान्वग्राहीति मदनाग्निना दन्दह्यमानमानसोऽसौ तामनुचितेनापि विधिना प्राणप्रणयिनीं चिकीर्षुर्दूतीमुखेन स्वसाहसमावीविदत्। तत्पार्श्वे तया प्रेषितस्यास्योत्तरपत्रस्यायमभिसन्धिः—

अकारणविद्वेषिभिर्मे पित्रादिभिस्तुभ्यमप्रतिपादितामपि मां मानभङ्गमसहमानस्त्वं सामक्रममपहाय बलादपहरणादिना

क्रमेणाचिरमुद्वोढुकामोऽयोग्यकारी स्याः, अतो मा त्वरिष्ठाः, अन्यथापि सेत्स्यति तव समीहितम् । कथमित्याह—यत्रावयोरन्योन्यसम्मेलनमभूत् तत्र पत्रप्रचुरपादपवने मदीयदूतीकया निगुह्यमानस्त्वमुद्वाहोपकरणान्तरमनपेक्ष्य केवलमग्निमन्तिके कृत्वा स्थास्यसि, तमेवाग्निं साक्षीकृत्योद्वक्ष्यसि तत्र द्वित्राभिः सहचरीभिः सहाचिरमेवोपस्थास्यमानां मामतिसौकर्येण । वैगुण्यदृष्ट्या गुरुभिरप्रतिपादितामपि मामुद्वीक्षमाणस्त्वमन्यायेन क्षिप्रमेव नरकं गत्वा पार्श्वज्वलदग्निरसिरूपपत्रपूर्णपादपवने स्थाता–स्थितिशीलः स्या इति शापात्मकमर्थान्तरं तु न कथञ्चनौचितीमञ्चति, अपरक्तमनसां नायिकानामनभिमतनायकान्तिके तादृगतिललितलेखप्रेषणादरायोगात्, कुतस्तर्हि श्लेषभङ्गी तादृगङ्गीकृता तयेति चेत्? क्षीणामतितरलतया पत्रवाहिकया कौतुकेन तदावरणमपसार्य तत्संकेतितकार्यतत्त्वमवधार्य सम्भावितरहस्योद्घाटनवारणाय वाग्वैदग्ध्यप्रणयिनं स्वप्रणयिनं प्रति तद्वैदग्ध्यप्रकटनाय च तदुपपत्तेः" इत्युदीरितवति तस्मिन् समरकेतुवर्जं समेऽपि राजपुत्राः प्रसह्य सद्यस्तदीयप्रतिभां प्राशंसन् । समरकेतुस्तु स्रवदश्रुकणक्लिन्ननयनोऽतीवम्लानाननोऽधोमुखीभूय भूतलमलिखत् । तमस्थान एव तादृगवस्थमवलोक्य हासकेलिकोविदः कलिङ्गदेशाधिपतिकुमारः कमलगुप्तः स्मित्वोवाच—

"युवराज! कुमारस्य काव्यार्थतत्त्वोद्भावनशक्तेः प्रस्तावसरमपि कीर्तनमपहाय किमिति मत्सरीव मौनमालम्ब्य वर्तसे, न प्रवर्तसे च तमनुशोचितुं युवानं? योऽप्राप्य तत्पाणिग्रहणसौभाग्यमनुभूयमानानुतापः, किं करोतु विपाकोन्मुखपापः परमवराकः सः ।

वस्तुतस्तस्कराग्रणीरसौ मञ्जीर एव पापीयानत्रापराध्यति, यो यात्रोत्सवं द्रष्टुमागतं तं युवानं दूरादेव दर्शयितुकामया पत्रवाहिकया सहकारमूले न्यस्तमिदं पत्रमपहृत्य मकरध्वजेन दूरत एव पूरयित्वा परस्परप्रेमाणमिति झटिति संघट्यमानं मिथुनमकारणमेव व्यघटि, तस्मादयं केनापि कठिनदण्डेन विनेतव्यो जाल्मः कुमारेण, संयोज्यं च मिथोमिथुनमदस्तत इतो महताप्यायासेनान्वेष्य, यद् विरहवितर्कतीव्राग्निरन्तर्दहतीवाऽस्य युवराजस्य" इत्युक्तवति तस्मिन् मन्दस्पन्दमानाधरकमलगुप्तमभ्यसूयन्निवानुशोचनाद् व्यावर्त्य समरकेतुमवोचत्—

"सखे! किमर्थमेवमस्वस्थेनावस्थीयते त्वया, सर्यैते वाऽऽर्ययाऽनयोद्बोधितसंस्कारेण कयाचन दिव्यकुमारिकया स्वकटाक्षबाणैर्व्रणितस्यात्मनस्तदवेदितसंकेतस्थानस्यापि केनचिदनिवार्येण गरीयसा कार्येण तत्सम्पर्कसौभाग्याभावसमाचारः ।" तदाकर्ण्य मुहूर्तमुपरतवाग्व्यापारः स्थित्वा वक्तुमुपचक्रमे—"लोकोत्तरप्रतिभासार कुमार! पेशलं ते परकीयाशयप्रज्ञानकौशलं मनसि मे विस्मयमातनोति । तथापि यदि ते श्रोतुमतिकुतूहलं, श्रूयतामसौ वृत्तान्तः—

अस्ति सिंहलद्वीपे रङ्गशालानाम्नी नगरी । तद्वास्तव्यो मत्पिता चन्द्रकेतुः सुवेलगिरिनिकटवासिनां दुष्टसामन्तानां निग्रहाय दक्षिणापथगामि नौसैन्यमादिश्याधीतशस्त्र-शास्त्रविद्यं मां यौवराज्येऽभिषिच्य तन्नायकत्वेनाकल्पयत्, प्रधाननृपतिभिरमात्यैः सामन्तैश्च मां ससहायं सम्पाद्य शुभेऽहनि प्रैषयच्च । प्रयाणदिवसे च प्रातरेव स्नात्वा समर्चितेष्टदेवतो द्विजजन वसनाभरणाद्यर्पणेन सन्तर्प्य सभामण्डपमागत्य च तत्र महार्हहेमासने प्राङ्मुखमुपविश्यासादितान्तःपुरविलासिनीसम्पादितः प्रयाणकालोचितमाङ्गलिकक्रियो वज्राङ्कुशनाम्ना महामात्रेणोपस्थापितमस्त्रलभारख्यं गन्धगजमारुह्य राजकुलान्निर्गतः प्रतिपदमुदाशीराशिभिरभिनन्द्यमानो द्विजजनैर्वन्द्यमानः पौरजनैर्निभाल्यमानः पौराङ्गनाजनैर्नगरसीमानमतिक्रम्य क्रमेण महासमुद्रमद्राक्षम् । तस्य च सर्वतस्स्यन्दमानस्वादुसलिलबन्धुरे परिसरे द्वित्राणि दिनानि विश्रम्यान्यतरेद्युरपराह्णसमये श्रीमन्तमर्णवमपूजयत्, अन्येद्युश्च प्रविश्यावलोकितसमुद्रावतरणामार्गः प्रभात एव पौतिककृताकृतानुसन्धानाय प्रहितेन वेत्रिणा सत्रा समापतन्तमसुकृतविवर्तैरिव कैवर्तैः परिवृतं काककालाकृतिभिः पञ्चविंशतिवर्षदेशीयं कञ्चन नाविकयुवानपश्यम् ।

तस्य चोज्ज्वलवेषविभूषितमाकारं तत्परिवारं च प्रेताकारमवेक्ष्य विस्मितः सद्य एव पार्श्वोपविष्टमखिलनाविकनायकं यक्षपालितसंज्ञकं 'कोऽयम्' इति पृष्ट्वा 'निखिलकैवर्तगणनायकोऽयं नाविकः' इति तेन प्रत्युक्तोऽपि तदविश्वस्य पुनरप्राक्षम्—कथं तर्हि कैवर्तैरतिविसदृशोऽयमाकारेणावलोक्यते ।' सोऽपि पुनरगादीत्—'युवराज! नाकारेणैव, अपि तु सर्वप्रकारेण, नं चैभिरेव, अपि त्वन्यैरपि पुरुषैरयं विसदृशः प्रज्ञौदार्यधैर्यादिगुणैः । चेदस्ति कुतूहलमाकर्ण्यतामस्य समासेन वर्ण्यमानः पूर्ववृत्तान्तः ।

अस्ति सुवर्णद्वीपदेदीप्यमानमणिपुराभिधाननगरवास्तव्यो लोकयात्रायामतिमात्रनिपुणो वैश्रवणो नाम पोतवणिक् । तस्य धार्मिकधौरेयस्यान्तिमे वयसि वसुदत्ताभिधायां भार्यायां तारकनामाऽऽत्मजन्मा समजनि । स च शैशव एव श्रुताशेषशास्त्रः कलासुलब्धक्रमिककौशलः क्रमागतयौवनावस्थापन्नो यानपात्रमधिरुह्य द्वीपान्तरं प्रस्थितः सांयात्रिकैरनुगम्यमानो रङ्गशालां नगरीमागमत् । आगतस्य च तस्य नागरिकजनसम्मर्दवारणाय विस्तृतावकाशविकस्वरे जलनिधिपरिसरे सम्यगावासितस्य कैवर्तकुलाधिपेन जलकेतुनाम्ना कैवर्तेन सख्यं समवर्तत । क्रमेणोपारूढद्रढिमनि तयोः सख्ये कदाचनारूढनवयौवना परमरमणीयदर्शना प्रियदर्शना नाम जलकेतुकन्यका पितुरादेशेन मौक्तिकहारमुपहारमादाय तद्गृहमव्राजीत् । तत्र च तत्प्रथमदर्शन एव तदुज्ज्वललावण्यावलोकनप्ररूढदृढप्रीतिप्रेर्यमाणा सा प्रत्यहं केनापि व्याजेन तदन्तिकं गन्तुमारेभे । कदाचिदेकदा तदीयचन्द्रशालायां सख्या साकं क्रीडन्त्यास्तस्याः कथञ्चिदन्तिकमागतोऽसौ तदवलोकनोत्तरं संभ्रमेण धावन्त्याः पतन्त्याश्च तस्याः सत्वरमुपसृत्य दक्षिणपाणिं गृहीत्वा सान्त्वयामास, स्वगृहगमनाय प्रवर्तयामास च । तदनु तत्करग्रहणमहिम्ना दूरमपसृतसम्भ्रमा प्रीतिप्रथितप्रागल्भ्यप्रकटितविभ्रमाऽसौ कुमारिका किञ्चिद् विहस्य ‘कुमार ! त्वद्गृहीतपाणिरहं त्वामपहाय न पारयामि गृहान्तरमितो गन्तुम्, साम्प्रतं तु त्वत्सदनमेव त्वदीयाया मे सदनम्’ इत्यभिधाय वामपादाङ्गुष्ठलेखया मन्दं मन्दं कुट्टिमं लेखितुमारेभे । सांयात्रिकयुवाप्यसौ तत्कृतेनात्मसमर्पणेन प्रीयमाणस्तां मन्दमालिङ्ग्य ‘प्रणयिनि ! न खलु गृहमात्रम्, अपि तु शरीरेन्द्रियादिकमपि मामकं त्वदीयमेव’ इत्युदीर्य “दुष्कुलादपि कन्यारत्नं ग्राह्यम्” इत्याचार्यवाक्यं प्रामाण्येनास्थाय योजनगन्धामिव पराशरस्तां पत्नीमकार्षीत् । पाणिग्रहणदिनादारभ्य सर्वाङ्गसुभगया तया सह नवयौवनोपभोगमासेवमानः पर्यहार्षीदखिलमपि कार्यम् । कस्यचन पोतवणिजः कन्यकाऽसौ, भग्नतां गते तत्पोते जलकेतुना मध्येसागरादुद्धृत्य रक्षितेति श्रूयमाणादसीयवृत्तान्तोऽपि साकमागतैर्वणिग्जनैः स्वाभिजनपरावर्तनाय प्रवर्त्यमानोऽपि, बान्धवजनैरुपालम्भपूर्णैः सन्देशैराकृष्यमाणोऽपि न मनागपि गमनाय मतिमकार्षीत् ।

कदाचिदास्थानभूमिमागतस्य तस्याकाररामणीयकावलोकनाकृष्टमनसा राज्ञा चन्द्रकेतुना सादरमाभाष्य जामातृधिया भूयसीं जीविकां दत्त्वा सकलनाविकजनाधिपत्यापादनेनातीव प्रतिपत्तिरकारि । तदाधिपत्यमाचरन्नसौ निखिलां नौवहनविद्यामधिगत्य कर्णधारधौरेयतामधात् । तदयमतीव योग्यो निजतरणिकर्णधारतया नियुज्येत चेदतिसुखेन तारयेत् कुमारं पारावारम्, पारयेच्चापराण्यपि प्रयोजनानि निष्पादयितुम्” इत्थमुपवर्णयति तस्मिन्नसौ कैवर्तनाथः सविधमागत्य सादरं प्रणम्य चातिप्रणयेन प्रत्यपादयत्—

‘युवराज ! भवदीयविजययात्रोद्घोषणक्षण एवार्णवाभ्यर्णमागतेन मया अन्नोदकसर्पिस्तैलेन्धनादिपूर्णानि लघुबृहत्प्रवहणानि सज्जितानि सन्ति, विजययात्राभिधाना नौरपि कुमारस्य शत्रुविजयाय सज्जिता, अतः प्रस्थीयतामभ्युदयाय नास्ति चेत् प्रस्थानप्राकालिककार्यविलम्बः ।’ तदाकर्ण्य तत्क्षणमेव राजगणपरिवृतः समुद्रस्य तीरं गत्वा तत्प्रणामोत्तरमध्यरुक्षमधिरूढपूर्वेण तारकेणावलम्बितो नावम् । तत्र बद्धासने मयि समेऽपि राजपुत्राः स्वस्वयानपात्राण्यधिरुह्य मां परिवृत्य प्रातिष्ठन्त । तैः समं कियद्दूरमुल्लङ्घ्य सागरमन्तराऽन्तरोपस्थितद्वीपवर्तिनः सामन्तान् प्रातिस्विकप्रक्रियाभिर्दमयित्वा सुवेलाचलसंज्ञकमचलमुदचलम् ।

तस्य चातिरमणीयेषु पर्यन्तारण्येषु सूचिताखिलरामायणरमणीयवृत्तान्तैरुत्पाट्य रोपितैस्तत्रत्यसामन्तैरुपदर्शितान् लङ्कापुरीपरिसरप्रदेशान् सप्रमोदमवलोकमानः कतिचिदहान्यवात्सम्, एकदा तु तत्रावस्थितशिबिर एव प्रधानपार्थिवपुत्रैः पदातिपुरुषैश्चानुगम्यमानः सेतोः पश्चिमे नातिदूरं गत्वा सक्रौर्यचौर्यप्रवृत्तस्यातिगर्वितस्य पर्वतकनाम्नः किरातराजस्य राजधानीमवस्कन्द्य तस्य सर्वस्वमात्मसात्कृत्य स्वशिबिराभिमुखं प्रस्थितस्य मम प्रथमप्रस्थान एव तृतीयभागावशिष्टायां निशायामत्रिनामा भद्रपुत्रः ‘क्व युवराजः ?, इति पृच्छन्नतित्वरितवाहितया नौकया निकटमागत्यावोचत्—

“कुमारसेनानीर्विज्ञापयति यदयमनतिदूरवर्ती रामणीयकेन सर्वपर्वतानामग्रणी रत्नकूटो नाम गिरिः । अयं जानकीविरहानलजाज्वल्यमानमानसस्य भगवतो रामचन्द्रस्य लङ्कामभिप्रयातस्यादेशेन पर्वतानाहरद्भिः कपिनिकरप्रवरैरुत्पाट्य सुमेरोः सानुः सेनापतेर्नलस्य पुरस्तादुपस्थापितः, तेनापि हीरकमणिरिव साधारणमणिभिः पाषाणमयैः पर्वतैः समं नायमेकत्र सम-

वायमर्हतीत्यालोच्य सेतोः पृथक् पयोनिधौ स्थापितः, पयोधिनापि पुत्रप्रेम्णा क्रीडागिरित्वेनाङ्गीकृतः। नास्ति कश्चिदितः स्खलितानां विश्रामयोग्यः कश्चन प्रदेशः पर्वतो वा, प्रत्युत सर्वतो वेत्रलतावनकलिलं सलिलमेव केवलम्, तस्मादिहैव परिश्रान्तपरिवारेण युवराजेन त्रिचतुराण्यहानि विश्रम्यानुगामिनः सैनिकान् प्रतिपाल्य च प्रयातव्यमित्याकर्ण्य प्रभुरेव प्रमाणम्' इत्युदीर्य गते तस्मिन्नतीते च कतिपयक्षणे क्षोभिताशेषजलचरस्तारतरः शिविरोत्थितो भेरीभाङ्कारो दिगन्तराणि व्यापत्, तदनु च सविस्तरेऽप्यवतारमार्गेऽन्योन्यसंघट्टनविघट्टनाभ्यां कथङ्कथमप्यमवकाशमवाप्य पलाय्य ससम्भ्रमं तीरमवतरतां शिबिरवर्तिजनानां बहलः कोलाहलः समजनि।

अथ क्रमेणोत्तीर्णे राजलोके, तटनिकटमानीतेषु रिक्तयानपात्रेषु, पर्वतस्य पूर्वदक्षिणभागमावासाय प्रयातेषु सैनिकेषु, तमुद्देशमुपससारातीव दिव्यो माङ्गलिकगानध्वानः, तमश्रुतपूर्वं श्रुत्वा तदुत्थानस्थानानुसन्धानाय पार्श्ववर्तिनं नृपजनमात्मनः परिजनं च प्रेष्य तद्ध्वनिध्यानस्तिमितनयनतारकं तारकमगादिषम्—

'सखे! अतिमधुरिमधुरीणोऽयं गानध्वनिराकर्षतितरां मामकीनं मनः, तस्मान्मार्गातिक्रमणश्रमस्तव मनः प्रयाणे न प्रतिबध्नाति चेत्? प्रगुणीकृत्य नावं प्रस्थीयतामस्य ध्वनेरुद्गमस्थानम्, न खलु किमपि महोत्सवमन्तरेणेदृग् ध्वनिः सम्भवति' इत्याचक्षाणे मयि स क्षणमधोमुखस्तूष्णीमवस्थायावोचत्—

'युवराज! न केवलं कुमारस्यैव, अपि तु ममाप्येकदा ध्वनिमिममत्रैव श्रुतवतोऽस्ति तदुद्भवस्थानगमनकौतुकमुत्कटम्, किन्तु न पार्यते पर्वतस्यास्य पर्यन्तप्रवाही जलराशिर्महान्तमन्तरेण यत्नमुत्तरीतुम्, यतोऽत्र पदे पदे निमज्जद्भिरुन्मज्जद्भिश्च भीषणैर्जलजन्तुगणैरुद्वेलिता दुस्तरा आवर्ताः प्रतिबध्नन्ति गतिं प्रवहणानाम्, श्लथयन्ति च प्रस्थानोत्साहमत्यधिकप्रमाणास्तटं संघट्टमानाः पाषाणाः, तस्मान्मन्दायते मे मनाङ् मानसम्, तथापि यथादेशं तव शक्नोमि प्रवर्तितुम्' इति तेनोदीरिते प्रत्युत्पन्नकौतुकः प्रत्यवोचम्—

'सखे! निशम्यमानगानध्वनितत्त्वावगमनमन्तरा स्वावासमुपगतोऽपि तज्जन्यानुतापदवदहनदन्दह्यमानमानसो न स्वस्थः स्थास्यामि दिनमेकमपि, तस्माद् यदि शकुनशास्त्रं प्रमाणं, तर्हि नास्ति यात्रायामस्यामस्माकमपायशङ्का मनागपीति विश्वस्याविलम्बमुत्तिष्ठ गन्तुमनुतिष्ठ च कौतुकं विहन्तुमात्मनः' इत्यभिदधाने मयि क्षणमसौ दोलायमानमानसः—'कुमार! अलमियता प्रवर्तनाप्रपञ्चेन, प्रवृत्त एवाहमिङ्गितेनाऽपि तावकेन' इत्युक्त्वा प्रणम्याम्भोनिधिमभिमतशकुनोद्वेलितप्रयाणकौतुकः प्राचेतसेन प्रतस्थे दिङ्मार्गेण।

अथ पञ्चषैः सहायीकृतकर्णधारैरनुगम्यमानेन तेन जलचरेभ्यो भयावेदकं प्रत्येकं कर्तव्यावेदकं च वाक्यमुदीरयता परितोऽवहितदृष्टिमर्पयता च निरुक्ताचलतटसंघट्टनाद्रक्षित्वा पुरः पुरः प्रेरिता नौरतिदीर्घेऽपि समुद्रपथे प्रायः क्वचिदपि न च स्खाल, तं पर्वतं प्रदक्षिणीकृत्य क्रमेण तूर्यस्वनोद्भवस्य तत्प्रदेशस्याभिमुखीबभूव।

परमसौ प्रदेशोऽपि तामन्तिकागतामवेक्ष्येव तद्वाद्यध्वनिमुपसंहृतवान्, उपरते च तद्ध्वनौ नौकां सत्वरमाकृष्य तारको व्याहृतवान्—

'कुमार! मार्गं दर्शयित्वा ध्वनिरसावत्रैवोपारंसीत्, आज्ञाप्यतामतः परं पुरस्तात् प्रवर्त्यतामुत पश्चान्निवर्त्यतामियं नौः। मद्विचारेण तु रत्नकूटगिरिरेवायं पदे पदे विविधकौतुकानामास्पदतया युज्यते प्रतिप्रदेशमवलोकितुं, तेन सपरिग्रहस्य स्वस्य दर्शनीयदिदृक्षाप्यपनेतुम्' इत्युक्तवति तस्मिन् सहसैव प्रतिहतजिगमिषः प्रतिवचनमनुक्त्वैव 'क्लेश एव केवलमन्वभावि, न खलु लेशतोऽपि सुखमिष्टार्थसिद्ध्या' इति स्वस्य चापल्यमालोच्यानुतापमवापम्, कथमियन्तमम्बुधिमार्गमागत्यापूर्णमनोरथेन परावर्तनीयम्?, कथं च तदर्धपथदृष्टपार्थिवं प्रति मलिनमाननं दर्शयितव्यम्?, कथं चोल्लङ्घितवचनानां स्वबान्धवजनानां कर्णारुन्तुदानि रोषरूषितानि भर्त्सनानि सोढव्यानि मयेति चिन्तयन्नेव च रजनीमनैषम्। तदनु क्रमेणापनीततिमिरे मिहिरे परमाद्भुतं प्रभामण्डलमवेक्ष्य किमेतदिति वितर्कयन्नेव सुवेलाद्रिमार्गेणोच्चलितं खेचरेन्द्रवृन्दमपश्यम्।

तदनु च पुरः प्रवर्तय नावमिति तारकमादिश्य सपदि पुरः प्रस्थितस्तस्य गिरेरधस्तादेकं दिव्यमायतनमदर्शम्, तदवलोक्योत्पन्नविस्मयश्चिरमचिचिन्तं च—न जातु समीहितार्थसम्पादनप्रवणेन नीतिरनुसरणीया, यद्यहमपायशङ्कया नीतिमनुसरन्निदं स्थानं नायास्यं, तर्हि प्रासादप्रवरमिमं नावेक्षितुमशक्ष्यम्, यदवेक्षणेनान्यपदार्थसार्थदिदृक्षा तत्क्षणमेवोपारंसीत्?' मन्ये—एतदर्थमसामान्यकर्मणः कोटिविश्वकर्मणः स्रष्टा भगवान् प्रजापतिरलकापुरीमाक्रम्य राजराजमाजौ विजित्य

तदीयकोशमपजहार, त्रयस्त्रिंशत्त्रिदशकोटिकदर्थनया समूलमेव सुमेरुमाजहार च, नान्यथेदृगायतनं शक्येत निर्मातुम्, इत्थमालोचयत्येव मयि रभसप्रेरिता नौस्तदायतनदक्षिणप्राकारभित्तिमागमत् । क्रमेणाक्रम्य च तत्प्राकारभित्तेः प्राग्भागं क्षपितमार्गश्रमस्तारकमचकथम्—

'सखे ! अतः परं सन्तानकप्रभृतीनि विकसितदिव्यकुसुमान्यवचित्य निर्झरादानीय च पानीयमन्तःप्रतिष्ठितमस्यायतनस्य भगवन्तमर्चितुं यतनीयम्, येन मदीययात्रा फलशालिनी सम्पद्येत' इत्थमभिहितोऽसौ विहस्य कुमार ! तत् सर्वं सुकरम्, किन्तूभयतो दूरविततटङ्कवर्तितप्रकृताद्रिकटकसंसृष्टप्राकारप्रतिरुद्धमवतारद्वारमस्मान्निर्गमिष्यता केनचिदुपदेशमन्तरा दुर्निरूपमिति तत्प्रतिपालनमेव तावत् प्राप्तकालम् ।

नूनमेवास्यायतनस्याभ्यन्तरे कोऽपि तिष्ठति, चन्दनप्रवालवन्दनमालादिलिङ्गैरत्र यात्रोत्सवस्याचिरनिर्वृत्ततायाः प्रतीतेः, इति व्याहरत्येव तस्मिन्नकस्मादादिगन्तगामी सोपानमार्गेण सविधमापततः स्त्रीगणस्य नूपुरक्वणत्कारस्तारः पुरस्तादुच्चचार ।

तदनु च व्यापार्यमाणलोचनः प्राकारशिखरे राशीभूतानां लोकोत्तरलावण्यसम्पदा प्रत्यङ्गमनुस्यूतानां कन्यकानां मध्ये षोडशवर्षवयस्कां दिव्यामेकां कन्यकामद्राक्षम् ।

इत्थमपूर्वकथारसप्लुतचेतसा स्ववृत्तान्तविज्ञापनव्यासक्ते समरकेतौ सहसैव प्रमोदोत्फुल्लनयना प्रतीहारी प्रविश्य "कुमार ! पीतमतिस्फीतमधुना युवराजोपन्यस्तकथाकर्णामृतम्; अतः परं नयनामृतमपि क्षणमास्वाद्यताम्" इत्थं हरिवाहनमभिधायोत्तरीयाञ्चलनियन्त्रितं चित्रपटं दक्षिणकरेणादाय सादरमर्पयामास ।

[अपूर्णः]

તિલકમંજરી કથાનો અતિ સંક્ષિપ્ત
ભાવાર્થ:

લેખક—પંન્યાસ શ્રી સુશીલવિજયજી ગણી.

[ક્રમશઃ-]

રાજા મેઘવાહને તે રાજમંદિરમાં વિધિસર દિવસ પસાર કર્યો અને સાંજે અંતઃપુરમાં જઈ રાણી મદિરાવતી સાથે પ્રેમપૂર્વક વાર્તા વિનોદ કરી, ભોજન લઈ નિદ્રાવશ થયો. પાછલી રાતે રાજા મેઘવાહને સ્વપ્નમાં એક ઐરાવણ હાથીને જોયો. એ હાથી આકાશમાંથી ઊતરી રૂપાના પર્વત પર બેઠો અને શુણ્ડના અગ્રભાગથી રાણી મદિરાવતીના સ્તનનું પાન કરવા લાગ્યો. સ્વપ્નનું દૃશ્ય જોઈ રાજા ઝબકીને જાગી ગયો અને વહેલી ઊઠેલી રાણી મદિરાવતી પાસે જઈ હર્ષ ભેર સ્વપ્નમાં જોયેલી હકીકત જણાવી. રાણી તે એકાગ્રતાથી સાંભળતાં ખૂબ આનંદિત થઈ. કેટલાક દિવસો જતાં રાણીએ ગર્ભ ધારણ કર્યો અને નવ મહિના પૂર્ણ થતાં શુભદિવસે, શુભ-લગ્ને, ઉચ્ચસ્થાનમાં જ્યારે શુભ ગ્રહો હતા અને ઊર્ધ્વમુખી હોરા હતી ત્યારે અત્યંત મનોહર એવા એક દેદીપ્યમાન પુત્રરત્નને જન્મ આપ્યો.

રાજાએ સારી રીતે પુત્રનો જન્મોત્સવ ઉજવ્યો. સ્વપ્નની અને પોતાના નામની સ્મૃતિ તાજી રાખવા માટે પુત્રનું નામ 'હરિવાહન' પાડવામાં આવ્યું. ઐરાવણ હાથીનું નામ હરિવાહન છે, તેમાંનો 'હરિ' શબ્દ અને પોતાના મેઘવાહન નામમાંથી 'વાહન' શબ્દ જોડીને હરિવાહન નામ રાખવામાં આવ્યું.

પાંચ ધાવમાતાથી લાલનપાલન કરાતો પુત્ર બીજના ચંદ્રમાની જેમ પ્રતિદિન વધવા લાગ્યો. પાંચ વર્ષ પૂર્ણ થતાં છઠ્ઠા વર્ષની શરૂઆતમાં રાજમહેલમાં તૈયાર કરાયેલા વિદ્યાલયમાં તેને ભણવા મૂક્યો.

કુમાર પૂર્વે ભવના સંસ્કાર યોગે થોડા સમયમાં જ વિવિધ શાસ્ત્રને શીખ્યો અને ચિત્રકર્મ, ધનુર્વિદ્યા તથા વીણાવાદનાદિ કળામાં કુશળ થયો. લગભગ ચૌદે વિદ્યાનો એ પારંગત થયો.

રાજા મેઘવાહનને કુમારને યુવરાજ પદે અભિષેક કરવાનો મનોરથ જાગ્યો. આથી કુમારને સહાય કરે તેવા અને મોંથી મળતા આવે એવા રાજકુંવરની શોધ માટે અનેક સ્થળે શાણા માનવીઓને મોકલ્યા.

કુમાર સોળવર્ષનો થયો ત્યારે રાજાએ પોતાની પાસે બોલાવી લીધો, અને તેને રહેવા માટે નગરની બહાર એક કુમારભવન નામે મનોહર મહેલ કરાવી આપ્યો.

એક દિવસે સવારે રાજા પરિવાર સાથે રાજસભામાં બેઠો. એ જ સમયે ચિત્રકનકવેત્રલતા નામની પ્રતીહારીએ આવીને પ્રણામ કરી કહ્યું કે—સ્વામિન્! દક્ષિણદેશમાંથી હમણાંજ આવેલા દક્ષિણદણ્ડાધિપતિ વજ્રાયુધના પ્રીતિપાત્ર વિજયવેગ નામે પ્રધાન પુરુષ આપના દર્શનકાજે આવીને બહાર દરવાજા આગળ ઊભા છે. તો શી આજ્ઞા છે?' બાલારુણવીંટીનું સ્મરણ કરતાં રાજાએ કહ્યું 'અંદર આવવા દે.'

રાજઆજ્ઞાને માથે ચડાવી પ્રતીહારી બહાર ગઈ અને સઘળા વૃત્તાંતથી વાકેફ થયેલા વિજયવેગે રાજ-સભામાં પ્રવેશ કર્યો અને પ્રેમપૂર્વક પ્રણામ કરી યોગ્ય આસને બેઠો.

રાજાએ પૂછ્યુંઃ દંડનાયક વિજયવેગ! કુશળ છો ને?' "મહારાજા દક્ષિણદણ્ડાધિપતિ ખૂબ આનંદમાં છે. આપને પ્રણામ કહેવરાવ્યા છે. ભવદત્ત, ભીમ, ભાનુવેગ વગેરે રાજાઓએ પણ પ્રણામ કહેવરાવ્યા છે. આપે દંડનાયક પર મોકલાવેલી દેવતાઈ વીંટી આજ સુધી પોતાની પાસે રાખી હતી અને દક્ષિણનો દેશ જિતાયા પછી મને સોંપી હતી. એ વીંટી આપના રત્નકોશાધ્યક્ષ મહોદધિને અર્પણ કરી છે.

એ પછી રાજાએ જરા હસીને પૂછ્યું:-'વિજયવેગ! શું એ વીંટી સેનાપતિને ઉપયોગમાં આવી? એનાથી કંઈ લાભ થયો?'

'દેવ' એ દેવતાઈ વીંટીએ તો જે કાર્ય કર્યું છે તે કોણ કરી શકે તેમ છે?' વિજયવેગે આભાર સાથે કહ્યું.

'રાજન્' એ દિવ્ય વીંટીનો અદ્‌ભૂત ચમત્કાર જણાવું. ગયા વર્ષે શરદ્ ઋતુમાં આપણા શત્રુ કુસુમશેખરને શિક્ષા દંડનાયકે કુંડિનપુરથી કાચ્ચીનગરી તરફ પ્રયાણ કર્યું. વિશાળ સેનાસાથે ત્યાં આવી, નગરીને ચારેતરફ ઘેરો ઘાલ્યો. કુસુમશેખર સામનો કરી શકે તેમ ન હોવાથી નગરના દરવાજાઓ બંધ કરાવી યુદ્ધની બધી સામગ્રી એકઠી કરી કિલ્લામાં જ ભરાઈ રહ્યો.

ગુપ્તચરોથી આ હકીકત જાણીને તેમણે નગરના દરવાજા તોડી નાખ્યા અને સેનાધિપતિ અંદર પ્રવેશ કરવા જાય છે ત્યાં જ કુસુમશેખરે અંદરથી પોતાના બચાવની કોશીશ કરવા માંડી. આમ કરતાં કેટલોક સમય પસાર થઈ ગયો.

વસંત પંચમી (અનઙ્ગોત્સવતિથિ)ની રાતે જ્યારે દંડનાયક પરિવાર સાથે પલંગપર બેઠા હતા, સંગીત, ગીત, નૃત્ય ચાલી રહ્યું હતું, અને સહુ એમાં તલ્લીન થયા હતા, એટલામાં એકદમ કોલાહલનો શબ્દ સંભળાયો. કાચરક અને કાણ્ડરાત નામના બે ઘોડેસ્વારોએ આવીને ખબર આપી કે, 'દંડનાયક! કાંચીના ઉત્તરદિશાના દરવાજેથી શત્રુનું સૈન્ય સજ્જ થઈને આ તરફ ધસી રહ્યું છે.' આ સાંભળીને દંડનાયક સફાળા થયા અને સૈન્યને તૈયાર રહેવા રણવાદ્ય વગડાવ્યું. બંને સૈન્યનો વિશાળ મેદાનમાં ભેટો થયો. યુદ્ધ શરૂ થયું. ઘોર સંગ્રામ ખેલાયો. રાત્રિના બે ભાગ તો વીતી ગયા અને ત્રીજા ભાગના પ્રારંભમાં શત્રુના સૈન્યમાંથી એક શૂરવીર રાજકુમાર દંડનાયક સામે વેગથી ધસી આવ્યો. બંને વચ્ચે દ્વન્દ્વ યુદ્ધ જામ્યું. દંડનાયક મોટી આફતમાં સપડાયા. ત્યારે મેં સમયસૂચકતાથી આપે મોકલાવેલી દિવ્ય વીંટી તેમની આંગળીમાં પહેરાવી દીધી.

એના પ્રભાવથી શત્રુનું સૈન્ય તત્કાળ નિદ્રાધીન બન્યું. દંડનાયકસામે ઝઝૂમતો ભડવીર રાજકુમાર પણ ત્યાંને ત્યાં રથમાં સ્થિર બની ગયો. આપણા સૈન્યમાં આનંદ ફેલાઈ ગયો અને આગળ વધવા એ પ્રયત્ન કરવા લાગ્યું. દંડનાયકે આગળ વધતા સૈન્યને સોગન આપી રોકી દઈ તેઓ એકદમ પેલા રાજકુમારના રથ પાસે પહોંચી ગયા. તેની સ્થિતિ અત્યંત કરુણાજનક હતી. 'આ કોણ છે?' શાથી અહીં આવ્યો?' તે જાણવા દંડનાયકે તેને ચામર ઢાળતી નારીને પૂછ્યુંઃ તેણીએ પણ આંખમાંથી ટપકતાં અશ્રુબિંદુઓ લૂછી નાખી દંડનાયકને કહ્યું: હે મહાભાગ! મન્દભાગિની હું શું કહું! કહેવાથી તે કંઈ સજીવન થાય તેમ છે?, છતાં તમારે જાણવાની ઇચ્છા છે તો સાંભળો:-'સિંહલદ્વીપના અધિપતિ ચંદ્રકેતુ મહારાજાનો આ સમરકેતુ નામે યુવરાજ કુમાર છે. કુમારના પિતા ચંદ્રકેતુએ આ નગરીના રાજા કુસુમશેખરને મદદ કરવા આજ્ઞા કરી. તેથી આ કુમાર અહીં કાંચીમાં આવ્યો, અને પાંચ-છ દિવસ રહ્યો. આજે પ્રભાતમાં શૃંગારિક પોષાક પહેરી એ કામદેવના મંદિરમાં ગયો અને ત્યાં જ બારણામાં આસન જમાવી બેઠો. દર્શનાર્થે આવતી નગરીની નારીઓને તે સ્નેહપૂર્વક નીહાળતો સાંજ સુધી બેસી રહ્યો. રાતે પણ કમલ પત્રની પથારી બનાવી ત્યાં સૂઈ ગયો.

કોણ જાણે કેમ એને સૂજ્યું કે તરતજ અડધી રાતે એ પાછો આવ્યો, અને સૈન્યને એકદમ તૈયાર કર્યું. સહુએ ખૂબ સમજાવ્યો છતાં ન માન્યો, સૈન્ય સાથે અહીં આવી તેણે યુદ્ધ શરૂ કર્યું, અને આ હૃદય-દ્રાવક કરુણાજનક પરિસ્થિતિમાં મુકાયો.

રાત્રિ પૂર્ણ થઈ, સૂર્યનો ઉદય થયો, શત્રુસૈન્યના સૈનિકોની મૂર્છા વળી ગઈ. રાજકુમાર પણ જાગ્રત થયો. અને શત્રુના સકંજામાં સપડાયેલ પોતાની સ્થિતિ જોઈને, ફરીથી તે મૂર્છિત થઈ ઢળી પડ્યો. થોડીવારે વનનો

ઠંડો પવન વાયો અને કુમારની મૂર્છા દૂર થઈ. સ્વસ્થ બનેલા કુમારને દંડનાયકે આશ્વાસન આપ્યું. અભય પડહ વગડાવી ભાગતા શત્રુસૈન્યને તેણે રાખ્યું ને પોતાના સૈનિકોને લૂંટ કરતા અટકાવ્યા, ઘાયલ થયેલા સૈનિકોની શુશ્રૂષા કરવા યોગ્ય માણસોને આજ્ઞા કરી. ત્યાંથી દંડનાયક રાજકુમાર સમરકેતુ સાથે હાથી પર બેસી છાવણીમાં આવ્યા અને પોતાના જ નિવાસમાં રાજકુમારને લઈ ગયા. બંને એ સાથે ભોજન કર્યું. દંડનાયકે પોતાના હાથે રાજકુમારના શરીરમાં જ્યાં જ્યાં ઘા પડ્યા હતા ત્યાં ઔષધિનો લેપ કર્યો વધુમાં સારા વૈદ્યો પાસે તેના શરીરની ચિકિત્સા કરાવરાવી. જોતજોતામાં સમરકેતુ તદ્દન સાજો થઈ ગયો.

એક વેળા દંડનાયક અને સમરકેતુ ભોજન કરી સાથે બેઠા હતા ત્યારે દંડનાયકે રાજકુમારને કુસુમાનુલેપન, વસ્ત્રાભરણાદિથી સન્માન કરી યુદ્ધમાં પકડેલા હાથી, ઘોડા અને રથ આપી દંડનાયક હાથ જોડી કહેવા તેને લાગ્યા: "કુમાર! તમે મહાપરાક્રમી છો! મોટા મોટા મહારાજાઓ પણ તમારી સહાય ઈચ્છે છે. તમે મનમાં લેશમાત્ર પણ એમ ન લાવતા કે દંડનાયકે મને જીતી લીધો. આપને રણસંગ્રામમાં જીતવા માટે કોણ સમર્થ છે? આપ તો અજેય જ છો, છતાં આપની આ પરિસ્થિતિ થઈ એ પ્રભાવ મારો નહીં પણ કોઈ અનેરી દિવ્ય વસ્તુનો જ છે." એમ કહી તે દેવતાઈ મહા ચમત્કારિક વીંટી મંગાવી. એ જોઈને આશ્ચર્ય મુગ્ધ બનેલ સમરકેતુએ પૂછ્યું 'આવી મહા ચમત્કારિક વીંટી તમને ક્યાંથી મળી?'

ત્યારે 'મેઘવાહન મહારાજાને શક્રાવતાર તીર્થમાં જવું, જ્વલનપ્રભ દેવનું મળવું, વેતાળ અને રાજલક્ષ્મીનું આવવું' વગેરે વૃત્તાંત વિસ્તારથી કહી સંભળાવ્યો.

રાજકુમાર પણ આવું અદ્‌ભુત વૃત્તાંત સાંભળીને ખૂબ હર્ષિત થયો, થયેલ દુઃખ વિસરી જઈ સેનાધિપતિને કહેવા લાગ્યો. 'દંડાધિપતિ! શું કહું, શું વર્ણન કરું? ખરેખર, તમને અને તમારા મહારાજાને ધન્ય છે કે, જેને દેવો પણ સહાયતા કરે છે. તમારા જેવા બુદ્ધિશાળી દીર્ઘદર્શી અને ગુણાનુરાગી વ્યક્તિના ગુણ ગાઈએ તેટલા ઓછા જ છે. બસ, હવે તો મને એ સત્ત્વશાલી મહારાજા મેઘવાહનનાં દર્શન કરાવી મારાં નેત્રને કૃતાર્થ કરાવો!'

'કુમાર! આપની એજ અભિલાષા છે તો ખુશીથી આજે જ વિજયવેગ સાથે પધારો.' દંડનાયકે સ્મિતવદને સ્નેહપૂર્વક કહ્યું.

કુમાર શક્રાવતાર ઉદ્યાન નજીક સરયૂ નદીના કિનારે શિબિર નાખી રહ્યો અને વિજયવેગ મહારાજા મેઘવાહન પાસે પહોંચી ગયો અને પ્રેમપૂર્વક પ્રણામ કરી રાજવીને બધા વૃત્તાંતથી વાકેફ કર્યા.

વૃત્તાંત સાંભળીને રાજાના આશ્ચર્યનો પાર રહ્યો નહીં. શૌર્યશાલી કુમાર સમરકેતુ ઉપર અને નિમકહલાલ દંડનાયક પર રાજાને અનહદ પ્રેમ ઉદ્‌ભવ્યો. કુમારને મળવાની તીવ્ર ઉત્કંઠા થઈ આવી. તેમણે વિજયવેગને કહ્યું: 'ક્યાં છે એ કુમાર? ક્યારે મળશે?'

"દેવ! કુમાર શિબિર સહિત સરયૂકિનારે છે. જ્યારે આપની આજ્ઞા થશે ત્યારે મળી શકશે."

'હરદાસ! જાઓ, રાજકુમાર સમરકેતુને અહીં બોલાવી લાવો' મહારાજાની આજ્ઞા થતાં જ મુખ્ય પ્રતિહારી હરદાસ સરયૂકિનારે ગયો અને રાજકુમારને રાજવીના સમાચાર આપ્યા. કુમાર રાજપરિવાર સાથે ત્યાં આવ્યો અને તેને રાજસભામાં પ્રવેશ કરાવરાવ્યો.

કુમારને જોતાં જ રાજાએ 'આવ! આવ!' એમ દૂરથી ઉમળકાભેર બોલાવ્યો. કુમારે પણ તેમને પ્રેમપૂર્વક પ્રણામ કર્યા. નજીક આવતાં રાજા સિંહાસન પરથી ઊતર્યો અને રાજકુમારને ભેટીને પોતાના ઉત્સંગમાં (ખોળામાં) બેસાડ્યો. પછી કુમાર પાસેના આસન પર બેઠો.

મહારાજા મેઘવાહનને કહ્યું–"કુમાર! તારા આગમનથી આજ હું કૃતાર્થ થયો છું. સાચેજ તું ધન્યવાદને પાત્ર છે, કેમકે તારાથી હાર પામેલા શત્રુઓ પણ પોતે જાણે જીત્યા હોય તેમ હર્ષમાં આવી જઈ પોતાની પ્રશંસા કરે છે. રાજલક્ષ્મીએ તો બાલારુણ વીંટી સમર્પી મને જાણે બીજો પુત્ર અર્પ્યો છે. આ કુમારનો અને તારો રાજ્યમાં સમાન ભાગ છે. તેની સાથે સુખેથી તું રહે અને આનંદ કર. 'મને મારા શત્રુઓ પકડીને

અહીં લાવ્યા છે, તો હું કેમ રહી શકું?' એમ લેશમાત્ર પણ મનમાં લાવીશ નહીં. અહીંનો સમગ્ર વર્ગ તારી સેવામાં હાજર જ છે. તારી જે જે અભિલાષાઓ હશે તે તમામ પરિપૂર્ણ થશે."

પછી પાસે બેઠેલા સુપુત્ર હરિવાહનને જણાવ્યું: 'વત્સ! હજી સુધી તારા સરખો કે તારાથી અધિક ગુણવાળો આપણા કુટુંબમાં કોઈ પણ નરરત્ન થયો જોવાતો નથી, આજે સદ્‌ભાગ્યે આપણને સમરકેતુ કુમાર પ્રાપ્ત થયેલ છે, માટે તેને તારો સાચો મિત્ર સમજી સારી રીતે સાચવજે.'

એમ કહી મહારાજા મેઘવાહન સિંહાસનથી ઊઠ્યા અને સમરકેતુ પણ 'હે તાત! જેવી આપની આજ્ઞા' એમ કહી સમરકેતુનો હાથ પકડી હરિવાહન પરિવાર સાથે મદિરાવતીના મહેલે ગયા. ત્યાં માતુશ્રીને પ્રણામ કર્યાં, અને સમરકેતુનો પરિચય કરાવી પોતાના સ્થાનકે પહોંચી ગયા.

સ્નાન, ભોજન કરી બન્ને જણા ભોજનશાળાની બહાર બેઠા હતા, તેવામાં મહારાજા મેઘવાહનની આજ્ઞાથી આવેલા એવા સુદૃષ્ટિ નામના અક્ષપટલિકે આલેખેલ નકશો કાઢી ઉત્તરદિશાના દેશોની હદ બતાવતાં કહ્યું– 'આટલા દેશ યુવરાજ શ્રી હરિવાહનના ખાનગી ખર્ચ માટે અને તે સરહદમાં આવેલા અંગ વગેરે દેશો રાજકુમાર શ્રી સમરકેતુને માટે, આપવાનો મહારાજાનો આદેશ છે.' એમ કહી, બન્નેને પ્રણામ કરી, સુદૃષ્ટિ ત્યાંથી ચાલ્યા ગયા.

બન્ને કુમારો સાથે રહેવા લાગ્યા. બન્નેની ગાઢ મૈત્રી જામતી ગઈ. એ જોઈને રાજાના આનંદનો પાર ન રહ્યો. એમ આનંદમાં કેટલાયે દિવસો પસાર થઈ ગયા. ઉનાળાના એક દિવસે બન્ને રાજકુમારો સવારે ઊઠ્યા અને સ્નાન–ભોજનાદિક કરી, સુંદર પોષાકથી સજ્જ બન્યા. હાથી પર આરૂઢ થઈ સરયૂનદીને તીરે આવેલા મત્તકોકિલ નામના ઉદ્યાનમાં ગયા. ત્યાં બીજા અનેક પરિવારો પણ આવેલા હતા.

ઉદ્યાનમાં ફરતા ફરતા હરિવાહન અને સમરકેતુ તેમજ બીજો પરિવાર સરયૂને તીરે આવેલા કામદેવના મંદિરની નજીક અત્યંત સુશોભિત લતામંડપમાં (જળમંડપમાં) આવ્યો. બન્ને કુમારો બનાવેલી એક ફૂલની બેઠકપર બેઠા અને બીજો પરિવાર પણ પોતપોતાના સ્થાને બેસી ગયો. આમાં બીજા રાજકુમારો ઉપરાંત સાહિત્ય, પુરાણ, ઇતિહાસ, કાવ્ય, કથા, નાટક, સંગીત આદિ વિષયોના જ્ઞાતા અનેક વિદ્વાનો પણ જોવાતા હતા. પરસ્પર આનંદજનક વિવિધ પ્રકારનો કાવ્યવિનોદ ચાલી રહ્યો હતો, એવામાં કાવ્યરસિક એવા મંજીરક નામના બન્દિપુત્રે પાસે આવીને હરિવાહન કુમારને કહ્યું:—

"કુમાર! મધુમાસમાં ચૈત્રશુદિ તેરસે કામદેવના મંદિરમાં ચાલતા યાત્રોત્સવ પ્રસઙ્ગે હું ગયો હતો. અંદર જતાં જ આંગણામાં આંબાના ઝાડ નીચે, જેનું મોં કમલના તાંતણાથી બાંધેલું, બન્ને બાજુથી સફેદ ચંદનની લહીથી ચોંટાડેલું, સહેજ ઉષ્ણતાથી ચંદન સૂકાઈ જતાં કઠિન થયેલું, અને ઉપર મુગ્ધબાળાના સ્તન મુખના છાપવાળું એવું તાડપત્રનું એક પરબીડીઉં મારા જોવામાં આવ્યું. નીચે નમીને મેં એ લઈ લીધું, અને બેસના છેડે બાંધી દીધું. એ પછી ઘેર આવી એકાન્તમાં તપાસ્યું. ચારેતરફ ફેરવીને જોયું, પણ ન મળે કોઈનું નામ કે નિશાન. છેવટે ફોડ્યું. તો તેમાં ચારે તરફ ફરતી કુંકુથી ચીતરેલી વેલવાળો અને અગર ધૂપથી સુવાસિત કરેલો એવો કસ્તુરીના અક્ષરે લખાયેલો એક આર્યા છંદ મેં જોયો. શું એનો ભાવ છે? કોણે કોનાપર મોકલેલ છે?' તે હું સમજી શક્યો નહીં. એમ કહી તે આર્યા છંદ મધુરકંઠે મંજીરકે લલકાર્યો:—

"गुरुभिरदत्तां वोढुं, वाञ्छन्मामक्रमात् त्वमचिरेण ।
स्थातासि पत्रपादपगहने तत्रान्तिकस्थाग्निः ॥"

'વડિલોએ નહીં આપેલી એવી મને અવિધિએ પરણવાને તું ચાહે છે તો તું થોડા સમયમાં પત્રવાળા વૃક્ષના વનમાં [અથવા નરકમાં રહેલા અસિ પત્રવનમાં] જ્યાં નજીકમાં અગ્નિ છે ત્યાં તું રહેજે.

ત્યાં બેઠેલા બધાનું ધ્યાન તે તરફ ખેંચાયું. સાંભળતાંની સાથે જ અર્થ સ્ફુરી આવતાં બુદ્ધિશાળી હરિવાહન કુમારે સવિસ્તાર એનું સ્પષ્ટીકરણ કર્યું:

"મિત્ર, આ તો અનંગલેખ છે. કોઈ કુમારિકાએ પોતાને પરણવાની અભિલાષાવાળા કોઈ કુમાર પર આ પત્ર લખેલ છે. પોતાનું ધારેલું કામ પાર પડ્યું નહીં હોય ત્યારે જ આ પત્રથી પોતાના પ્રેમીને એણે સૂચન કર્યું છે. તેનો ભાવ આ રીતે છે:—

"જો કે મારા પિતા વગેરે એ તમારા તરફ ઉદારતા નથી દાખવી, છતાં પણ અનુચિત ક્રમથી મને હરણ કરીને લગ્ન કરવું એ યોગ્ય લાગતું નથી. ઉતાવળા થશો નહીં, ધીરજ રાખજો. થોડા જ સમયમાં આપણી અભિલાષા અવશ્ય પરિપૂર્ણ થશે. તેનો માર્ગ મેં શોધી કાઢ્યો છે. તે આ રીતે:—

'પ્રથમ આપણે જે વનમાં મળ્યાં હતાં, તે જ વનમાં મારી દૂતી જે સ્થાન બતાવે ત્યાં ગુપ્તરીતે આવીને રહેજો. અન્ય વિવાહોચિત કોઈ પણ સામગ્રીની જરૂર નથી, માત્ર સાક્ષીભૂત અગ્નિ જ સાથે લેતા આવજો. હું પણ મારી બે–ત્રણ સખીઓ સાથે ત્યાં આવી, તમારી સાથે અગ્નિની સાક્ષીએ સ્નેહપૂર્વક લગ્નગ્રંથિથી જોડાઈશ.'

વળી આ શ્લોકમાંથી બીજો પણ શાપરૂપ અર્થ નીકળી શકે છે કે.

'મારા પિતા વગેરેની સમ્મતિ સિવાય ગમે તે રીતે મારી સાથે લગ્ન કરવા ચાહતો હોય તો તું મહા પાપી છે. નરકમાં રહેલ અસિપત્રવનમાં તારો નિવાસ થશે અને ત્યાં તને દુઃખ દેવા તારી પાસે ભભકતો જાજ્વલ્યમાન અગ્નિ જણાશે.'

આ અર્થ અહીં નિરર્થક જણાય છે, કારણકે-વિરાગિણી નારીઓ આદર ભાવથી આવું શાપજનક લખાણ કોઈના પર પણ મોકલે નહીં.

'આ તો વિરાગિણી નહીં પણ વિદુષી વિયોગિની લાગે છે, તે પરબીડિયાના સૂક્ષ્મ નિરીક્ષણ પરથી જણાઈ આવે છે. પોતાની રચનાશક્તિનો પ્રેમીને પરિચય કરવા ખાતર જ આવો ગૂઢાર્થ રાખ્યો હોય એવી કલ્પના થઈ શકે છે.

રાજકુમાર હરિવાહનના આ વક્તવ્યથી સમરકેતુ સિવાય બધા આશ્ચર્યચકિત થયા અને કુમારની ખૂબ ખૂબ પ્રશંસા કરવા લાગ્યા. વળી, પાછા બધા કાવ્ય વિનોદમાં જોડાયા, પણ સમરકેતુ તો ખિન્નવદને આંસુ સારતો, નીચું મોં રાખીને ઊંડા નીસાસા મૂકતો ચૂપ બેસી રહ્યો. અને મોં નીચું કરીને જમીન પર પગના અંગુઠાથી જમીન ખોતરવા લાગ્યો.

કુમાર સમરકેતુની આવી અસ્વસ્થતા જોઈને, બધા એકદમ વિચારમાં પડી ગયા. કલિંગદેશના રાજકુમાર કમલગુપ્તે પૂછ્યું.

'યુવરાજ? આમ કેમ? શું હરિવાહન કુમારે કરેલું વક્તવ્ય તમને ન ગમ્યું? બધાયે કુમારની પ્રશંસા કરે છે, અને તમે કેમ એક પણ શબ્દ ઉચ્ચારતા નથી. આમ એકાએક શા માટે ગમગીન બની ગયા છો? પ્રિયાના વિરહે પેલો પ્રેમી યુવાન દુઃખી થતો હશે, તેથી શું તમને તેની દયા આવી? અથવા પ્રેમીયુવાન તેણીને હજી સુધી ન મળી શક્યો તેથી તે દુઃખાગ્નિમાં બળતી હશે, તેની તમને શું ચિંતા થઈ?' કમળગુપ્તના આ કથનથી હરિવાહન કુમાર સિવાય બધાયે હસી પડ્યા.

કુમારે કમળગુપ્તને કહ્યું–'આવું નિરર્થક હાસ્ય શા ખાતર?' એમ કહી કુમારે સમરકેતુ સામે દૃષ્ટિ કરી, અને કહ્યું: "પ્રિય મિત્ર! આવા આનંદજનક પ્રસંગે શોકાતુર કેમ બન્યા છો? શું આ સુંદર કાવ્યવિનોદ તમારા કાનને રુચતો નથી? મેં એ શ્લોકનું સ્પષ્ટીકરણ કર્યું ત્યારે તમને તમારા જીવનમાં બનેલ એવો કોઈ દુઃખજનક પ્રસંગ તો યાદ નથી આવ્યોને? તમે પણ તે યુવાનની માફક કોઈ કામિનીના કટાક્ષ બાણથી વીંધાયા તો નથી ને? સાંકેતિક સ્થાને નહીં મળવાથી નિષ્ફળ તો નિવડ્યા નથી ને?" ઇત્યાદિ હરિવાહનકુમારનું સત્ય કથન સાંભળીને, શાંત થઈ શોકાતુર ચહેરે સમરકેતુએ કહ્યું:

"હે અમાનુષી કુમાર! તમારા બુદ્ધિકૌશલ્ય માટે શું કહું? મને તો એજ આશ્ચર્ય થાય છે કે, હજી સુધી કોઈને પણ નહીં કહેલી એવી મારા મનની વિચારણા તમે કેવી રીતે જાણી લીધી? હવે તો તમારા આગ્રહથી મારે એજ વાતનું સ્પષ્ટીકરણ કરવાનું રહ્યું: સાંભળો.

"સિંહલદ્વીપમાં રંગશાલા નામે નગરી છે. ત્યાં ચંદ્રકેતુ નામે રાજા મારા પિતાશ્રી છે. સુવેલગિરિની સમીપના પ્રદેશમાં વસતા દુષ્ટસામન્તોને ઝેર કરવા મહારાજાએ દક્ષિણાપથમાં જનારા નૌકાસૈન્યને હુકમ કર્યો અને મને

તેનો નાયક બનાવી મારો યૌવરાજ્યાભિષેક કર્યો. મારી સાથે શુભ દિવસે કેટલાક સેનાપતિ સામંતો અને અમાત્યોને મોકલવા માટે ભલામણ કરી. પ્રયાણના દિવસે સવારે ઊઠી, સ્નાન કરી, ઇષ્ટદેવનું પૂજન કરી, બ્રાહ્મણવર્ગને વસ્ત્રાભૂષણાદિનું દાન કરી, મેં સુંદર વસ્ત્રાભૂષણ ધારણ કર્યાં અને સભામંડપમાં આવીને સોનાના સિંહાસન પર બેઠો. એ સમયે અંત:પુરની વારાંગનાઓએ પ્રયાણકાલોચિત મંગલક્રિયા કરી. તે પછી બહાર આવી વજ્રાંકુશ નામના માવતે શણગારીને તૈયાર રાખેલ અમરવલ્લભ નામના હાથી પર હું આરૂઢ થયો. વિશાલ પરિવાર સાથે રાજદરબારથી હું નીકળ્યો. નગરની જનતાના શુભાશીર્વાદો અને પ્રણામ ઝીલતો હું નગરની બહાર સીમાડા ઓળંગી આગળ વધ્યો. ત્યાં એક મહાસાગરને જોયો. કિનારે મેં પડાવ નાખ્યો. બે-ત્રણ દિવસ રોકાઈ, સમુદ્ર પ્રયાણની બધી વ્યવસ્થા કરવા સાથે વિશ્રાન્તિ લીધી. અને ચોથે દિવસે બપોર પછી વિવિધ સામગ્રીથી મહાસાગરનું પૂજન કર્યું. સવારે વહેલો ઊઠી કેટલાકને સાથે લઈ હું સભામંડપના વિશાલ તંબૂમાં ગયો. ત્યાં નાવિકોના ટોળામાંથી પચીશ વર્ષના એક સુંદર નવ જુવાન નાવિકને જોયો. તેના પ્રેત જેવા પરિવારને જોઈ હું તો આશ્ચર્યમાં ગરકાવ બની ગયો. પાસે બેઠેલા યક્ષપાલિત નામના નૌકાસૈન્યના મુખ્ય નાયકને પૂછ્યું કે-"આ કોણ છે?"

"કુમાર! એ એક નાવિક છે, અને બધા ખલાસીઓનો મુખ્ય નાયક છે. એમ કહેવા છતાં મને તો વિશ્વાસ ન જ આવ્યો. કેમકે, આવી ભવ્યાકૃતિ નાવિકમાં ક્યાંથી હોય! જિજ્ઞાસાથી ફરીને મેં પૂછ્યું કે-બધા કરતાં આનું રૂપ વિલક્ષણ કેમ છે? કુમાર! આ આકૃતિમાત્રથી જ અલગ છે એમ નહીં પણ ધૈર્ય અને બુદ્ધિવૈભવ વગેરે ગુણોથી પણ અલગ જ છે. તેનું વૃત્તાંત સાંભળો:

"સુવર્ણદ્વીપમાં આવેલ મણિપુર નગરમાં વૈશ્રવણ નામે એક વહાણવટી રહે છે. તેને વૃદ્ધાવસ્થામાં વસુદત્તા નામે પત્નીથી તારક નામે એક પુત્ર થયો. તે બાલ્યાવસ્થામાં બધું શિક્ષણ લઈ બધી કળામાં કુશળ બન્યો ત્યારે બુદ્ધિમાન, દેદીપ્યમાન અને મહાચાલાક તરીકે તેની ખ્યાતિ ફેલાઈ. જ્યારે તે યુવાવસ્થાને પામ્યો ત્યારે બીજા વહાણવટી વેપારીઓ સાથે તે પણ એક મોટું વહાણ ભરી રંગશાલા નગરીએ ગયો. ત્યાં તેને જળકેતુ નામના એક મુખ્ય નાવિક સાથે મૈત્રી થઈ સમુદ્રમાં મુસાફરી કરતાં મળી આવેલી એક કન્યાને ઘેર લાવી, પ્રિયદર્શના નામ આપીને રાખી, પુત્રી તરીકે ઉછેરી મોટી કરી. એક દિવસે જળકેતુએ પ્રિયમિત્ર તારકને ગૂંથેલો મોતીનો હાર ભેટ કરવા માટે પુત્રી પ્રિયદર્શનાને મોકલી. તારકને જોતાં જ તેના પર અનુરાગી બની. પિતાએ મોકલેલો મુક્તાહાર તેની આગળ મૂક્યો અને ચતુર તારકે સત્કારપૂર્વક તેનો સ્વીકાર કર્યો. અનુરાગિણી પ્રિયદર્શના કોઈ પણ બહાને અવારનવાર તારકને ત્યાં આવતી અને તેનું દર્શન કરી સ્નેહસાગરમાં સ્નાન કરતી. એક વખતે પ્રિયદર્શના તારકની ચંદ્રશાળામાં આવી, પણ તારક ત્યાં ન હોવાથી તેની રાહ જોતી અગાશીના વિભાગમાં સખીઓ સાથે ક્રીડા કરતી ઊભી રહી. એવામાં એકદમ તારકને આવતો જોઈ, સંભ્રમથી નાસતાં નિસરણી પાસે આવીને પડી. તારકે તરત તેનો જમણો હાથ પકડ્યો તે સ્વસ્થતા આવતાં છોડ્યો. પછી તેને કહ્યું કે-'હવે તું સુખેથી તારે ઘેર જા.'

પ્રિયદર્શનાએ હસીને જવાબ આપ્યો: "કુમાર! જ્યારથી તમે મારો હાથ પકડ્યો, ત્યારથી જ મેં તો નિર્ણય કરી લીધો છે કે હવે મારું મારું આજ છે! "[અર્થાત્ હું તમને વરી ચૂકી છું]" આ રીતે બોલીને ડાબા પગના અંગુઠાથી ધીરે ધીરે જમીન ખોતરવા લાગી.

તેનાં કામોત્તેજક મધુરાં અને પ્રેમાળ વચનો અને આવા આત્મસમર્પણથી તારક તો અંજાઈ જ ગયો, એટલું જ નહીં પણ આલિંગન પૂર્વક બોલી ઊઠ્યો:-'સુંદરી! આ ઘર તો શું પણ મારું તન, મન અને ધન બધુંયે તને સમર્પણ છે.' **'दुष्कुलादपि कन्यारत्नं ग्राह्यम्'** 'હીન કુળમાંથી પણ કન્યારત્ન લઈ શકાય છે' એવું આચાર્યનું [નીતિશાસ્ત્રજ્ઞોનું] વચન મનમાં વિચારીને, પારાશર મુનિએ જેમ યોજનગન્ધાની સાથે પાણી ગ્રહણ કર્યું હતું તેમ હૃદયમાં સળગતા મદનાગ્નિની સાક્ષીએ તારકે પણ પ્રિયદર્શના સાથે પાણિગ્રહણ કર્યું. ત્યારથી પતિ-પત્ની તરીકે તેમના દિવસો આનંદમાં પસાર થવા લાગ્યા. કોઈએ આવીને તારકને કહ્યું:

'કોઈક વહાણવટીની આ કન્યા સમુદ્રમાં વહાણ ભાંગી જવાથી ડૂબતી જળકેતુના હાથમાં આવેલી છે જેનું તેણે પુત્રી તરીકે પાલન કરી મોટી કરેલી છે.'

દેશમાં પાછો લઈ જવા માટે સાથે આવેલા સાથીદારોએ-વ્યાપારીઓએ પણ પુષ્કળ કહ્યું. દેશમાંથી પણ સગાંવહાલાંઓના ઠપકાના સંદેશાઓ આવ્યા, છતાં પણ પ્રિયદર્શનાને વશ પડેલો એ શરમનો માર્યો સ્થિર થઈને અહીંજ રહ્યો છે. પોતાના દેશમાં ગયો જ નથી.

એક વેળા આપના પૂજ્ય પિતાશ્રી ચંદ્રકેતુ મહારાજાની રાજસભામાં તે આવ્યો. તેના આગલા વૃત્તાંતથી વાકેફ થયેલા મહારાજાએ તેનાં રૂપ, ગુણ અને ભવ્ય આકૃતિ જોઈ પ્રેમપૂર્વક બોલાવ્યો અને નાવિકોનો મુખ્ય નાયક બનાવ્યો. થોડા જ સમયમાં વહાણ ચલાવવાની કળા તેણે શીખી લીધી, અને નાવિકના કામમાં પૂરેપૂરો પ્રવીણ બન્યો. સમુદ્રમાં ખૂબ ખૂબ મુસાફરી કરી. તેણે અનેક દ્વીપો જોયેલા છે. કોઈપણ જળમાર્ગ એનાથી અજ્ઞાત નથી.

'કુમાર સમરકેતુ! તે જ આ પોતે છે' ચાલાક અને યોગ્ય હોવાથી આપની નૌકા ચલાવવાનું કામ એનેજ સોંપો. સહેલાઈથી આપ આ સમુદ્ર તરી શકશો અને એની મદદથી મુશ્કેલીભરેલાં કાર્યો પણ સહેલાઈ પાર પાડી શકાશે.'

આમ પરસ્પર વાર્તાલાપ ચાલતો હતો, એટલામાં તો તારક મારી નજીક આવી, નમન કરી, નમ્રતાથી બોલ્યો-'યુવરાજ! આપની વિજયયાત્રાની ઉદ્‌ઘોષણા થતાંની સાથે જ સજ્જ થઈ અહીં આવેલો છું. બધાં વહાણો અન્ન, પાણી લાકડાં વગેરેની વિવિધ સામગ્રીથી ભરી દીધાં છે અને આપને માટે 'વિજયયાત્રા' નામનું મોટું વહાણ તૈયાર કરેલું છે. વિલંબ ન હોય તો સુખેથી આપ તેમાં પધારો.'

એ સાંભળીને તત્કાળ હું રાજકુટુંબ સાથે ત્યાંથી નીકળી સમુદ્રતીરે આવ્યો. વળાવા આવેલા સૌને વિસર્જન કર્યા. પછી સમુદ્રને પ્રણામ કરી તારકે તૈયાર કરેલા 'વિજયયાત્રા' વહાણમાં ઉચિત સ્થાને બેઠો. સાથે આવનારા રાજકુમારો પણ પોતપોતાના વહાણમાં બેઠા. મારા વહાણની સાથે તે બધાં વહાણો વીંટાઈ વળ્યાં. પ્રયાણનો મંગળશંખ ફૂંકાયો. બીજાં અનેક વાજિંત્રોના અવાજો ગગનમાં ગાજવા લાગ્યા. વહાણો જોસભેર ત્યાંથી રવાના થયાં, અને સુવેલ પર્વત નજીક આવી પહોંચ્યાં. ત્યાંજ પડાવ કર્યો. રામાયણ પ્રસિદ્ધ કેટલાંક લંકાનગરીના સીમાડામાં આવતાં સ્થળો જોવાયાં.

પહેલે જ દિવસે પર્વતક નામના ભિલ્લપતિને પરાસ્ત કરી, અત્રિ નામના ભટ્ટપુત્ર 'क युवराजः?' યુવરાજ ક્યાં છે? એમ પૂછતા મારી નૌકા પર આવ્યા અને કહ્યું:—

'કુમાર! સેનાધિપતિ વિજ્ઞપ્તિપૂર્વક જણાવે છે કે-આ ડાબી બાજુએ પંચશૈલક દ્વીપના અલંકારભૂત રત્નકૂટ નામે મોટો પર્વત છે. જાનકીના વિરહાનલથી જાજ્વલ્યમાન થયું છે મન જેનું એવા રામચંદ્રજીની આજ્ઞાથી હનુમાનજીએ મેરુમાંથી નલનામના સેનાધિપતિને લાવી આપ્યો હતો. એ સેનાધિપતિએ પણ પાષાણવાળા પર્વતોની સાથે પૂલરૂપે આને જોડવો વ્યાજબી નથી એમ સમજીને સમુદ્રમાં એકબાજુએ મૂક્યો હતો. તે આ રત્નકૂટનામે પર્વત તેમાં અનેક આશ્ચર્યો જોવા જેવાં છે. વિશ્રામને યોગ્ય પણ આ સ્થાન છે.'

ત્રણ-ચાર દિવસ અહીં સ્થિરતા કરવાથી થાક પણ ઊતરશે અને ખૂટી ગયેલી ચીજવસ્તુઓ પણ લઈ લેવાશે. કુમારને આ વાત રુચી ગઇ. પડાવ નાખવા માટે ભેરી વગાડવાનો હુકમ પણ કરી દીધો.

ભેરીનો ગગનભેદી નાદ સાંભળતાં જ સહુ થંભી ગયા. પડાવના સ્થાને પહોંચતાં લોકોનો કોલાહલ પુષ્કળ થઈ રહ્યો. તેવામાં એ પર્વતના અગ્નિ ખૂણામાંથી દિવ્યસંગીત સંભળાવવા માંડ્યું. એ સંગીતમાં એકતાન થયેલા તારકને મેં કહ્યું:-'તારક! આ અપૂર્વ સંગીત મારા મનને આકર્ષી રહ્યું છે, પણ તું થાકેલો છે એટલે હવે તને કહેવું યોગ્ય નથી; છતાં તું જો તૈયાર થતો હોય તો આપણે તે સ્થળે જઈએ અને જોઈએ તો ખરા કે શું છે? કારણકે, કોઈ પણ પ્રકારના મહોત્સવ વિના આવું સંગીત હોય નહીં.'

કુમારની ઇચ્છા સાંભળીને તારકે કહ્યું:—'યુવરાજ! પહેલાં પણ આવો ધ્વનિ અમે સાંભળ્યો હતો, અને ત્યાં જવાની ઉત્કટ ભાવના થઈ હતી, પરંતુ એ પર્વતની ચારેતરફ ફરતો સમુદ્રનો કોટ છે. મોટા મોટા

વહાણવટીઓને પણ ત્યાં જવું મુશ્કેલ પડે છે. ત્યાં જતાં વચ્ચે મોટી મોટી ભીષણ સેખડો આવે છે, અને એ તરફ પાણીના તરંગો પણ એટલા બધા ઊંચે ઉછળે છે કે ભલભલા વિચક્ષણ સુકાનીને પણ મુશ્કેલીમાં મુકાઈ જવું પડે. આથીજ મન જરા પાછું પડે છે, છતાં આપની ત્યાં જવાની ઉત્કટ ઇચ્છા જ હોય તો ખુશીથી પધારો.'

આ હકીકત સાંભળીને હું તો આશ્ચર્યમાં ગરકાવ થઈ ગયો. તારકે તે તરફ હોડી હંકારી. જોતજોતામાં તારકે સાવધાનીપૂર્વક ઘણો રસ્તો કાપી નાખ્યો. થોડીવારમાં તો તે પર્વતને પ્રદક્ષિણા કરી જે તરફથી વાજિત્રનો મધુરધ્વનિ સંભળાતો હતો તે તરફ હોડીને વાળી, એટલામાં તો સંભળાતો અવાજ એકદમ બંધ થઈ ગયો.

તારકે કહ્યું—"કુમાર! આપણને માર્ગ બતાવનાર સંભળાતો વાદ્યધ્વનિ બંધ પડ્યો છે, હવે આપણે શું કરવું? આમનેઆમ લક્ષ્યવિના નૌકા ચલાવ્યા જ કરવી કે પાછી વાળવી?

જો ત્યાં જવાનો આપે દૃઢનિર્ણય કર્યો હોય તો પર્વતની પાસે પાસે આ માર્ગ દેખાય છે. ત્યાંથી કદાચ તે સ્થાને પહોંચી શકાય પણ આવી ભયજનક પરિસ્થિતિમાં મૂકાવું ન હોય તો પાછા ફરવું એજ આપણને શ્રેયસ્કર છે. વળી, બધા આપણી રાહ જોઈ રહ્યા હશે? અને અનેક સંકલ્પ વિકલ્પમાં મશગૂલ બની શોકાતુર બન્યા હશે!

જો કે આ રત્નકૂટ પર્વતનું વર્ણન અદ્ભુત અનેક આશ્ચર્યોથી ભરેલું છે. એવાં અનેક દશ્યો છે. વધારે કહેવાથી શું? જોશો ત્યારેજ તેની અપૂર્વતા સમજાશે.

તારકની વાત સાંભળીને મારા દુઃખનો પાર રહ્યો નહીં. જાણે માથે વજ્ર પડ્યું હોય અને જે દુઃખ થાય તેના કરતાં પણ અધિક દુઃખ થયું. 'શું મારા મનની ભાવના મનમાં જ સમાઈ જશે? ના ના શરીરમાં જ્યાં સુધી પ્રાણ છે ત્યાં સુધી તો નહીં જ સમાવા દઉં' એ રીતે મેં મનને મક્કમ કરી તારકને કહ્યું: 'જે થવાનું હશે તે થશે? તું તો તે તરફ હોડીને હંકાર.'

એટલામાં તો રાત પણ જોતજોતામાં પસાર થવા આવી. પૂર્વદિશામાંથી સૂર્યનાં સહસ્રકિરણો પૃથ્વી પર પથરાવા લાગ્યાં અને સુવેલાદ્રિ પર ચાલતું ખેચરેન્દ્રોનું ટોળું દૃષ્ટિગોચર થયું. હોડી પણ એકદમ પર્વત પાસે આવી પહોંચી. પર્વતના નીચાણ પ્રદેશમાં દૂરથી એક દિવ્યમંદિર જોવામાં આવ્યું ત્યારે મારા આનંદનો પાર ન રહ્યો. મનની ઉત્કટ ભાવના મહા પરિશ્રમે પણ પૂર્ણ થશે અને આપણી યાત્રા સફળ થશે એવા આનંદ-જનક ઉદ્ગારો મેં તારકને સંભળાવ્યા.

તારકે પણ હસી કહ્યું:—'કુમાર! આપણે હવે આ દિવ્યમંદિરમાં કઈ રીતે જઈ શકીશું? જો આ ઊંચું દ્વાર દૃષ્ટિગોચર થાય છે, તેની પાસે જ મનોહર પગથિયાંની પંક્તિ છે; પરંતુ તેને ફરતો કિલ્લો આડે આવતો હોવાથી જવું મુશ્કેલ છે. વળી આ નાની નાની બારીઓ પણ ઘણી ઊંચી હોવાથી જવા માટે નકામી પડે છે. એટલે થોડીવાર આપણે અહીં જ થોભી જઈએ. કોઈ પણ બહાર આવે તો તેને પૂછીને આપણે અંદર જઈશું, અને પૂર્ણ ભક્તિથી દેવાર્ચન કરીશું. એટલામાં તો નારીઓના નૂપુરનો (ઝાંઝરનો) મધુર ઝંકાર સંભળાયો અને કિલ્લાના એક વિભાગ પર એ નારી સમૂહ જોવાયો. તેમાં સોળાવર્ષની એક સુંદર કન્યા પોતાના પરિવાર સાથે મારા જોવામાં આવી.'

આ રીતે સમરકેતુ અપૂર્વ કથારસનું સુંદર પાન સહુને કરાવી રહ્યો હતો, એટલામાં તો હસતી હસતી પ્રાતિહારીએ આવી હરિવાહનને કહ્યું—

'કુમાર! આપે યુવરાજ સમરકેતુની અપૂર્વ અને મધુરી અદ્ભુત વાર્તાનું કર્ણામૃત પીધું હશે પણ હવે આપ ક્ષણવાર નયનામૃત પણ પીઓ.'

એમ કહી જમણા હાથે વસ્ત્રના છેડામાંથી એક દિવ્ય ચિત્રપટ કાઢીની કુમારને આદર સાથે અર્પણ કર્યું.

[અપૂર્ણ.]

❁ ताजेतरमां प्रकाशित थयेल ग्रन्थरत्नो ❁

१ सिद्धहेमशब्दानुशासन, बृहद्वृत्ति-बृहन्न्यास-लघुन्यास-विविध-परिशिष्टसहित भाग १	मूल्य	१५—०—०
२ तिलकमञ्जरी टिप्पण तथा परागवृत्तिसहित भाग १	,,	६—०—०
३ नयोपदेश, नयामृततरङ्गिणी अने तरणिसहित भाग १	,,	६—०—०
४ अनेकान्तव्यवस्था प्रकरण, तत्त्वबोधिनी टीकासहित भाग १	,,	५—०—०
५ सिद्धहेमशब्दानुशासन लघुवृत्ति	,,	८—०—०
६ द्वात्रिंशिका किरणावलिटीकासहित भाग १	,,	१—०—०
७ ,, ,, ,, भाग २	,,	१—०—०

❁ ताजेतरमां बहार पडनार ग्रन्थो ❁

८ तिलकमञ्जरी, टिप्पण तथा परागवृत्तिसहित, भाग २	,,	६—०—०
९ शास्त्रवार्तासमुच्चय स्याद्वादवाटिकाटीकासहित भाग १	,,	४—०—०
१० धातुरत्नाकर भाग १ (निर्णयसागर प्रेसमां मुद्रित)	,,	१२—०—०

❁ छपाता ग्रन्थरत्नो ❁

१ सिद्धहेमशब्दानुशासन, बृहन्न्यासादिसहित भाग २

२ तिलकमञ्जरी, टिप्पण तथा परागवृत्तिसहित भाग ३

३ नयोपदेश नयामृततरङ्गिणी अने तरणिसहित भाग २

४ अनेकान्तव्यवस्था, तत्त्वबोधिनीटीकासहित भाग २

५ शास्त्रवार्तासमुच्चय, स्याद्वादवाटिकाटीकासहित भाग २

६ काव्यानुशासन, अलंकारचूडामणि अने प्रकाशसहित भाग १

७ द्वात्रिंशिका, किरणावलिसहित भाग ३

प्रस्तावयता देवद्विजप्रसादादिहापि सर्वं शुभं भविष्यतीति प्रकृते प्रयोजयता राजलोकेनातिवाह्यमानदिवसम् [स], आप्तोपदिष्टदृष्टप्रत्ययौषधपानप्रसक्ताभिः स्निग्धमधुराभ्यवहारिणीभिरनल्पगुणोपेतम् अपेतदोषैरपि वज्रमणिभिर्वर्जितं जात्यरत्नजातमाभरणकलापार्पितं कलयन्तीभिर्वक्रतादिदोषवन्ध्यानि श्रद्धाप्रवणेन चेतसा ज्ञातीनां द्विजातीनां च गृहेषु प्रशस्तफलानि प्रहिण्वतीभिर्लक्षणाभिज्ञतया गृहीतवामकरतलाङ्गुष्ठमूलस्थूलरेखासंख्यानां सखीनां मुहुर्मुहुः श्रुतेन श्रुतिसुखेन वचसा स्मयमानमुखमृगाङ्काभिः प्रथमालापजिघृक्षया च देव्याः पुत्रो भविष्यति नवेति संनिधावेव परिचारिकाभिरनुयुज्यमानानामप्रगल्भशिशूनां भीतभीतेन मनसा वचनमाकर्णयन्तीभिरुज्झितान्यकर्तव्येन वृद्धसंप्रदायागतानि विविधौषधानि प्रयुञ्जानेन महानरेन्द्रलिखितानि मन्त्रकण्डकानि बध्नता दृष्टप्रत्ययप्रतीतपरिव्राजकोपदिष्टनीत्या स्नपनमङ्गलानि प्रवर्तयता शुद्धान्तजरतीजनेन शश्वत्क्रियमाणगर्भ-

---

टिप्पनकम्—नरेन्द्रः—मन्त्रवादी [ह] ॥

सेवाप्रभावम् अभीष्टदेवतायाः—स्वेष्टदेवतायाः, सेवाप्रभावं—सेवामाहात्म्यम्, **उद्भावयता** प्रकटयता, पुनः **निरपत्यपूर्वनृपतिपुत्रलाभोपायप्रधानाः** निरपत्याः—सन्तानशून्याः, ये पूर्वे—प्राचीनाः, नृपतयः, तत्पुत्रलाभोपायः—तत्पुत्रप्राप्तिसाधनमेव, प्रधानभूतः—मुख्यभूतोऽर्थो यासां ताः, **पौराणिककथाः** पुराणोक्तवार्ताः, **प्रस्तावयता** प्रवर्तयता, पुनः **देवद्विजप्रसादात्** देवताब्राह्मणप्रसन्नतावशात्, **इहापि** अस्मिन्नपि राजकुले, **सर्वं** सकलम्, शुभं—कल्याणमेव, भविष्यति, इति **प्रकृते** प्रस्तुतराजपुत्रोत्पत्तिविषये, **प्रयोजयता** कथयता [स]। पुनः **पुत्रकाम्यन्तीभिः** स्वस्वपुत्रमिच्छन्तीभिः, **अन्तःपुरकामिनीभिः** अन्तःपुरवधूभिः, **विधीयमानविविधव्रतविशेषं** विधीयमानाः—क्रियमाणाः, विविधाः—अनेकप्रकाराः, व्रतविशेषाः—नियमविशेषा यस्मिंस्तादृशम्, कीदृशीभिस्ताभिः ? **आप्तोपदिष्टदृष्टप्रत्ययौषधपानप्रसक्ताभिः** आप्तैः—शिष्टैः, यथार्थवक्तृभिर्न तु प्रतारकैरित्यर्थः, उपदिष्टानि—पातव्यत्वेन प्रतिपादितानि, एवं दृष्टप्रत्ययानि—परीक्षितविश्वासानि, यानि औषधानि, तेषां पाने—तद्रसपाने, प्रसक्ताभिः—आसक्ताभिः, पुनः **स्निग्धमधुराभ्यवहारिणीभिः** स्निग्धं—सरसं, न तु रूक्षम्, मधुरं—माधुर्ययुक्तं वस्तु, अभ्यवहर्तुं—भोक्तुं शीलं यासां तादृशीभिः, पुनः **आभरणकलापार्पितम्** अलङ्करणगणविहितम्, **जात्यरत्नजातं** रुचिररत्नसमूहम्, **कलयन्तीभिः** धारयन्तीभिः, कीदृशं तत् ? **अनल्पगुणोपेतम्** अधिकगुणान्वितम्, पुनः **अपेतदोषैरपि** दोषशून्यैरपि, **वज्रमणिभिः** वज्राख्यमणिविशेषैः, **वर्जितं** रहितम्, पुनः **वक्रतादिदोषवन्ध्यानि** कौटिल्यादिदूषणशून्यानि, **प्रशस्तफलानि** उत्तमोत्तमफलानि, **श्रद्धाप्रवणेन** श्रद्धान्वितेन, **चेतसा** हृदयेन, **ज्ञातीनां** बन्धूनाम्, **द्विजातीनां** विप्राणां च, गृहेषु **प्रहिण्वतीभिः** उपहारविधया प्रेषयन्तीभिः, पुनः **लक्षणाभिज्ञतया** सन्तानादिचिह्नावगमननिपुणतया, **गृहीतवामकरतलाङ्गुष्ठमूलस्थूलरेखासंख्यानां** गृहीता—सन्तानचिह्नत्वेन परिचिता, वामकरतलाङ्गुष्ठस्य वामहस्ताङ्गुष्ठस्य, मूले—मूलभागस्थितानाम्, स्थूलरेखानां—विस्पष्टरेखानां संख्या याभिस्तादृशीनाम्, **सखीनां** सहचरीणाम्, तादृशसखीप्रतिपादितेनेत्यर्थः, **श्रुतिसुखेन** श्रवणप्रियेण, **मुहुर्मुहुः** अनेकवारम्, **श्रुतेन** श्रवणगोचरीकृतेन, **वचसा** पुत्रोत्पत्त्यावेदकवाक्येन, **स्मयमानमुखमृगाङ्काभिः** स्मयमानः—किञ्चिद्धसन्, मुखमृगाङ्कः—मुखचन्द्रो यासां तादृशीभिः, **च** पुनः, **प्रथमालापजिघृक्षया** प्राथमिकभाषणशुश्रूषया, **देव्याः** राज्याः, **पुत्रो भविष्यति** उत्पत्स्यते, नवेति **सन्निधावेव** तासां समक्ष एव, **परिचारिकाभिः** दासीभिः, **अनुयुज्यमानानां** पृच्छ्यमानानाम्, **अप्रगल्भशिशूनां** मुग्धबालकानाम्, **वचनं** तदुत्तरवाक्यम्, **भीतभीतेन** अनभिमतोत्तरश्रवणादतीव भीतेन, मनसा, **आकर्णयन्तीभिः** शृण्वतीभिः, पुनः कीदृशीभिः ? **शुद्धान्तजरतीजनेन** अन्तःपुरवृद्धाजनेन, **शश्वत्** अनवरतम्, **क्रियमाणगर्भग्रहणोपचाराभिः** क्रियमाणः—विधीयमानः, गर्भग्रहणस्य—गर्भधारणस्य, उपचारः—उपायो यासां तादृशीभिः, कीदृशेन वृद्धाजनेन ? **उज्झितान्यकर्तव्येन** उज्झितं—त्यक्तम्, अन्यत्—गर्भग्रहणोपचारातिरिक्तम्, कर्तव्यं—कार्यं, येन तादृशेन, पुनः **वृद्धसम्प्रदायागतानि** वृद्धपरम्पराप्राप्तानि, **विविधौषधानि** बहुविधगर्भधारणौषधानि, **प्रयुञ्जानेन** उपयुञ्जानेन, पुनः **महानरेन्द्रेण** महता मन्त्रविदा राज्ञा, लिखितानि, **मन्त्रकण्डकानि** मन्त्राङ्कितभूर्जपत्रादीनि यन्त्राणि, **बध्नता** तासां वामभुजे नियन्त्रयता, पुनः **दृष्टप्रत्ययप्रतीतपरिव्राजकोपदिष्टनीत्या**

ग्रहणोपचाराभिः पुत्रकाम्यन्तीभिरन्तःपुरकामिनीभिर्विधीयमानविविधव्रतविशेषम् [ह], पञ्जरशुकैरपि प्रस्तुतवादिभिर्वन्दिभिरिवोच्चार्यमाणमङ्गलम् अन्तःपुरसारिकाभिरपि परिमितव्याहारिणीभिराराध्यजरतीभिरिव वितीर्यमाणराजवनिताशीर्वादम् अर्भकैरपि विनयनिभृतैः प्रवीणपुरुषैरिव निवार्यमाणक्षुद्रदासीपरस्परकलहम् [क्ष]। सर्वतश्च प्रशान्तेन शुचिना शुद्धवेषधारिणा परिजनेनाधिष्ठितम् उत्साहमयमिव प्रयत्नमयमिव श्रद्धामयमिव विनयमयमिवाचारमयमिव राजकुलमव्रजत् [ज्ञ]।

तत्र च समाहृतसमस्तोपकरणेन परिजनेन यथाविधिविहितमज्जनोपचारः सकललोकाचारकुशलाभिः ससंभ्रममितस्ततो विचरन्तीभिर्वारवनिताभिः कृतावतारणकमङ्गलः क्षणमात्रं विलम्ब्य ताम्बूलकर्पूरातिसर्जनविसर्जितपुरोधःप्रमुखमुख्यद्विजातिः 'उत्तिष्ठत ! व्रजामो देवतायतनेषु' इत्यभिदधानः संनिधानभाजं प्रणयिजनमासनादुत्तस्थौ [अ]। अनूत्थितासन्नराजलोकपरिवृतश्च तत्कालमेकहेलयोच्छलितेन संमूर्च्छतां दिगन्तरेषु मुहुर्मुखन्यस्तकरतलप्रतिस्फलनविस्फारितनिनादानां बन्दिनां जयशब्दकलकलेन कथितनिर्गमो द्विजावसर-

---

दृष्टः–अनुभूतः, प्रत्ययः–विश्वासो येषां तादृशाः, प्रतीताः–प्रख्याताः, ये परिव्राजकास्तैः, उपदिष्टा–उपदर्शिता, या नीतिः–पद्धतिः, तया, **स्नपनमङ्गलानि** अभिषेककृतमङ्गलानि, **प्रवर्तयता** प्रादुर्भावयता [ह]। पुनः कीदृशं राजकुलम्? बन्दिभिरिव, **प्रस्तुतवादिभिः** प्रकृतपुत्रोत्पत्तिसंवादिभिः, पक्षे प्रकर्षेण स्तुतं स्तुतिः, तद्वादिभिः–तत्पाठिभिः, पञ्जरशुकैरपि, **उच्चार्यमाणमङ्गलम्** उद्घोष्यमाणमाङ्गलिकवाक्यम्। पुनः **आराध्यजरतीभिरिव** पूज्यवृद्धाभिरिव, **परिमितव्याहारिणीभिः** परिमितभाषणशीलाभिः, **अन्तःपुरसारिकाभिरपि** अन्तःपुरस्थपक्षिविशेषैरपि, **वितीर्यमाणराजवनिताशीर्वादं** वितीर्यमाणः–दीयमानः, क्रियमाण इति यावत्, राजवनितानां–राज्ञीनाम्, आशीर्वादः–शुभाशंसनं यस्मिंस्तादृशम्। पुनः **प्रवीणपुरुषैरिव** सभ्यजनैरिव, **विनयनिभृतैः** विनयनिश्चलैः, **अर्भकैरपि** बालकैरपि, **निवार्यमाणक्षुद्रदासीपरस्परकलहं** निवार्यमाणः–निरुध्यमानः, क्षुद्रदासीनां–नीचदासीनाम्, परस्परकलहः–अन्योऽन्यविवादो यस्मिंस्तादृशम् [क्ष]। पुनः **सर्वतः** सर्वप्रकारेण, **प्रशान्तेन** शान्तिशालिना, **शुचिना** पवित्रेण, **शुद्धवेषधारिणा** निर्मलवेषावृतेन, **परिजनेन** परिवारेण, **अधिष्ठितम्** आश्रितम्। पुनः **उत्साहमयमिव** उत्साहपूर्णमिव, **श्रद्धामयमिव** श्रद्धासमृद्धमिव, **आचारमयमिव** चारुचरित्रपूर्णमिवेति सर्वत्रोत्प्रेक्षा [ज्ञ]॥

तत्र तस्मिन्, राजकुल इत्यर्थः, **समाहृतसमस्तोपकरणेन** समाहृतं–संगृहीतम्, समस्तं–सर्वम्, उपकरणं–स्नानोपकरणं येन तादृशेन, **परिजनेन** परिवारेण, **यथाविधिविहितमज्जनोपचारः** यथाविधि–विधिपूर्वकम्, विहितः–कृतः, मज्जनोपचारः–स्नपनरूपसेवा यस्य तादृशः; पुनः **सकललोकाचारकुशलाभिः** निखिललौकिकव्यवहारनिपुणाभिः, **ससम्भ्रमं** सत्वरम्, **इतस्ततः** तत्र तत्र, **विचरन्तीभिः** विहरन्तीभिः, **वारवनिताभिः** वेश्याभिः, **कृतावतारणकमङ्गलः** कृतम्, अवतारणकमङ्गलं–वस्त्राञ्चलादिना अर्चनरूपं मंगलं स्वागतमङ्गलगानं वा यस्य तादृशः; **क्षणमात्रं** मुहूर्तमात्रं, **विलम्ब्य** स्थित्वा, **ताम्बूलकर्पूरातिसर्जनविसर्जितपुरोधःप्रमुखमुख्यद्विजातिः** ताम्बूलानि–नागवल्लीपत्राणि, कर्पूराः–सुगन्धिद्रव्यविशेषाः, तेषाम्, अतिसर्जनेन–दानेन, विसर्जिताः–त्यक्ताः, प्रस्थापिता इति यावत्, पुरोधःप्रमुखाः–पुरोहितप्रभृतयः, मुख्यद्विजातयः–विशिष्टब्राह्मणा येन तादृशः; **सन्निधानभाजं** निकटस्थितं, **प्रणयिजनं** स्वस्नेहास्पदव्यक्तिम्, **उत्तिष्ठत** स्वस्थानादुत्थानं कुरुत। **देवतायतनेषु** देवतामन्दिरेषु, **व्रजामः** वयं गच्छामः, **इति** एवम्, **अभिदधानः** ब्रुवन्, **आसनात्** उपवेशनस्थानात्, **उत्तस्थौ** उत्थितवान् [अ]। **च** पुनः, **अनूत्थितासन्नराजलोकपरिवृतः** अनूत्थितैः–पश्चादुत्थितैः, आसन्नैः–पार्श्ववर्तिभिः, राजलोकैः–राजकीयजनैः, परिवृतः–परिवेष्टितः सन्, **तत्कालं** तत्क्षणम्, **एकहेलया** एकवारं युगपदित्यर्थः, **उच्छलितेन** सवेगं प्रधावितेन, पुनः **दिगन्तरेषु** दिङ्मध्येषु, **सम्मूर्च्छतां** सञ्चीभवताम्, **मुहुर्मुखन्यस्तकरतलप्रतिस्फलनविस्फारितनिनादानां** मुहुः–अनेकवारम्, मुखेषु, न्यस्तानि–विक्षिप्तानि, यानि करतलानि, तेषां प्रतिस्फलनेन–अभिघातेन, विस्फारितः–वर्धितः, निनादः–ध्वनिर्यैस्तादृशानाम्, **बन्दिनां** स्तुतिपाठका-

मण्डपान्निर्जगाम [आ] । सत्वरनिषादिढौकितकरेणुकारूढश्च पश्चादधिरूढेन ताम्बूलकरङ्कवाहिना विधूयमानचामरः पुरःप्रधावितोर्ध्वीकृतकनकवेत्रप्रतीहारनिर्दिश्यमानमार्गेण गृहीतविविधहेतिना पदातिनिवहेन विराजमानः पृष्ठतः प्रचलितेन च संभ्रमोत्तालगतिना गन्धोदकक्षीराज्यदधिभृतशातकुम्भकुम्भानुद्वहता जलार्द्रकर्पटावगुण्ठितविचित्रकुसुमदामगर्भान् वेत्रकरण्डकान् कलयता मलयजकाश्मीरकृष्णागुरुकर्पूरपूर्णानि रत्नभाजनानि बिभ्रता स्कन्धदेशारोपितांश्च विचित्ररूपान् महार्हवस्त्रभारकान् धारयता गृहीतशस्त्राप्तपुरुषाधिष्ठितेन प्रेष्यलोकेनानुगम्यमानो राजकुलान्निरगच्छत् [इ] । गत्वा च शक्रावतारे प्रथममेव विहितपूजासत्कारो नगरदेवतायतनेषु सर्वेष्वानुपूर्व्या विचचार [ई] । चिरदर्शनादभिनवीभूतकौतुकस्य चास्य यदृच्छया पुरप्रासादसुरसदनकूपोद्यानवापीसहस्रसंकुलामकाल एव प्रकटितोत्सवैः पौरलोकैः प्रतिभवनमुत्तम्भितानेकराग-

---

नाम्, **जयशब्दकलकलेन** जयकारकोलाहलेन, **कथितनिर्गमः** सूचितनिष्क्रमणः, **द्विजावसरमण्डपात्** ब्राह्मणसभामण्डपात्, **निर्जगाम** निष्क्रान्तः [आ] ।

च पुनः, **सत्वरनिषादिढौकितकरेणुकारूढः** सत्वरं-शीघ्रम्, निषादिना-हस्तिपकेन, ढौकिताम्-आनीताम्, करेणुकां-हस्तिनीम्, आरूढः-अध्यासितः, "करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे" इति मेदिनी, **पश्चात्** पृष्ठभागे, **अधिरूढेन** आरूढेन, **ताम्बूलकरङ्कवाहिना** ताम्बूलानां यः करङ्कः-पात्रविशेषः, तद्वाहिना तद्धारिणा भृत्येन, **विधूयमानचामरः** विधूयमानः-उद्धूयमानः, चामरो यस्य तादृशः । पुनः **पदातिनिवहेन** पादचारिसैन्येन, **विराजमानः** शोभमानः, कीदृशेन ? **पुरःप्रधावितोर्ध्वीकृतकनकवेत्रप्रतीहारनिर्दिश्यमानमार्गेण** पुरः-अग्रे, प्रधाविताः-सत्वरं प्रेषिताः, ये ऊर्ध्वीकृतकनकवेत्राः-उद्धृतकनकदण्डाः, प्रतीहाराः-द्वारपालाः, तैः निर्दिश्यमानः-सङ्केत्यमानः, मार्गो यस्य तादृशेन, पुनः **गृहीतविविधहेतिना** धृतबहुविधबाणेन, पुनः **पृष्ठतः** पश्चाद्भागे, **प्रचलितेन** प्रस्थितेन, **प्रेष्यलोकेन** भृत्यजनेन, **अनुगम्यमानः** अनुस्रियमाणः, **राजकुलात्** राजभवनात्, **निरगच्छत्** निर्गतः, कीदृशेन प्रेष्यलोकेन ? **सम्भ्रमोत्तालगतिना** सम्भ्रमेण-वेगेन, उत्ताला-उद्धता, गतिः-गमनं यस्य तादृशेन; पुनः **गन्धोदक-क्षीराऽऽज्य-दधिभृतशातकुम्भकुम्भान्** गन्धोदकं-सुगन्धिजलम्, क्षीरं-दुग्धम्, आज्यं-घृतम्, दधि च, तैः भृतान्-पूर्णान्, शातकुम्भकुम्भान्-सुवर्णकलशान्, **उद्वहता** उद्बिभ्रता "तपनीयं शातकुम्भम्" इत्यमरः, पुनः **जलार्द्रकर्पटावगुण्ठितकुसुमदामगर्भान्** जलार्द्रकर्पटेन-जलक्लिन्नपटखण्डेन, अवगुण्ठिताः-आच्छादिताः, कुसुमदामानः-पुष्पमाल्यानि गर्भे येषां तान्, **वेत्रकरण्डकान्** वेत्ररचितपात्रविशेषान्, **कलयता** धारयता; पुनः **मलयज-काश्मीरकृष्णागुरुकर्पूरपूर्णानि** मलयजैः-चन्दनैः, काश्मीरैः-कुङ्कुमैः, कृष्णागुरुभिः-कालागुरुभिः, कर्पूरैश्च, पूर्णानि, **रत्नभाजनानि** रत्नमयपात्राणि, **बिभ्रता** धारयता; पुनः **स्कन्धदेशारोपितान्** स्कन्धोपरिस्थापितान्, **विचित्ररूपान्** नानारूपान्, **महार्हवस्त्रभारकान्** बहुमूल्यकवस्त्रसमूहान्, **धारयता** वहता; पुनः **गृहीतशस्त्राप्तपुरुषाधिष्ठितेन** गृहीतं-धृतम्, शस्त्रं-खड्गादिकं यैस्तादृशैः, आप्तपुरुषैः-विश्वस्तपुरुषैः, अधिष्ठितेन-आश्रितेन [इ] । **च** पुनः, **शक्रावतारे** तन्नाम्नि तीर्थे, **प्रथममेव** सर्वतः प्रागेव, **गत्वा** उपस्थाय, **विहितपूजासत्कारः** विहितः-कृतः, पूजया तत्रत्यदेवताया अर्चनेन, सत्कार आदरो येन तादृशः सन्, **सर्वेषु** समस्तेषु, **नगरदेवतायतनेषु** नगरान्तर्वर्तिदेवतामन्दिरेषु, **आनुपूर्व्या** क्रमेण, **विचचार** भ्रमणं कृतवान् [ई] ।

चिरदर्शनात् चिरकालोत्तरदर्शनसौभाग्यानुभवाद्धेतोः, **अभिनवीभूतकौतुकस्य** अभिनवीभूतं-नवतामापन्नम्, कौतुकं-दिदृक्षारसो यस्य तादृशस्य, **अस्य** राज्ञः, **तीव्रतिग्मांशुकरोपनिपातोपतापितः** तीव्रः-तीक्ष्णः, असह्यताप इति यावत्, यः, तिग्मांशुः-सूर्यः, तस्य कराणां-किरणानाम्, उपनिपातेन-परितः समुद्गमेन, उपतापितः-सन्तापमनुभावितः, **स्वदुःखं** स्वसन्तापम्, **आचिख्यासुरिव** आख्यातुं-कथयितुमिच्छुरिव, **मध्याह्नः** दिनमध्यभागः, **प्रत्यासन्नः** सन्निहितो बभूव । कीदृशस्य राज्ञः ? **यदृच्छया** यथेच्छम्, **अयोध्यां** तन्नाम्नीं, **पुरीं** नगरीं, **पश्यतः** दृष्टिगोचरतां नयतः, कीदृशीम् ? **पुरप्रासादसुरसदनकूपोद्यानवापीसहस्रसङ्कुलां** पुरप्रासादानां-नगरान्तर्वर्तिराजमन्दिराणाम्, सुरसद-

वस्त्रध्वजप्रभाविस्तारितापूर्वसंध्यामयोध्यां पुरीं पश्यतः, क्वचिददर्शनादुन्मनीभूतमानसं मान्यमृषिजनं गत्वा तदाश्रयेषु दर्शनेनानन्दयतः, क्वचिदुत्थाय सादरमग्रतः कृतनमस्काराञ्जलिबन्धान्नगरवृद्धान् सगौरवमालपतः, क्वचित् सितकुसुमदामदर्शनपुरःसरमावेदितनिजप्रयोजनद्विजातिजनमवधानदानेनानुगृह्णतः, क्वचिद्दर्शनपथावतीर्णेषु शीर्णदेवतायतनेषु कर्मारम्भाय सपदि संपादितपूजासत्कारान् सूत्रधारान् व्यापारयतः, क्वचिदासन्नसेवकनिवेदितदानविच्छेदासु दानशालासु दीनानाथपथिकसार्थस्य सविशेषमन्नपानशयनौषधादिदानमधिकृतैः प्रवर्तयतः, क्वचित् स्वखानितेषु सरस्सु तटरोपितानां वटाश्वत्थादिविटपिनां पालनार्थमुद्यानपालानुद्यमयतः मार्गघटितं च सूक्तवादिनं दरिद्रयाचकसार्थमर्थसंभारेण भूरिणा कृतार्थीकुर्वतः, तीव्रतिग्मांशुकरोपनिपातोपतापितः स्वदुःखमाचिख्यासुरिव प्रत्याससाद मध्याह्नसमयः [उ] । सयत्नमुद्धृतहरित्कुशेन प्रातरेव धव-

---

टिप्पनकम्—उद्धृतहरितकुशेन कुशाः—दर्भाः, अन्यत्र कुशा—वल्गा [ऊ] ।

नानां—देवमन्दिराणाम्, कूपानाम्, उद्यानानां—क्रीडाकाननानाम्, वापीनां—जलाशयविशेषाणां च, सहस्रेण—दशशतसंख्यया संकुलां-व्याप्ताम्; पुनः **अकाल एव** अनवसर एवेति सन्ध्यायामन्वेति, **प्रकटितोत्सवैः** आविष्कृतोत्सवैः, **पौरलोकैः** पुरवासिजनैः, **प्रतिभवनं** प्रतिगृहम्, **उत्तम्भितानेकरागवस्त्रध्वजप्रभाविस्तारितापूर्वसन्ध्याम्** उत्तम्भितानाम्—उपरि लम्बितानाम्, अनेकरागवस्त्रध्वजानां—विविधवर्णविशिष्टवस्त्ररचितपताकानाम्, प्रभाभिः—दीप्तिभिः, विस्तारिता—प्रकटिता, अपूर्वसन्ध्या—विलक्षणसन्ध्या, यस्यां तादृशीम् । पुनः कीदृशस्य? **क्वचित्** कस्मिंश्चित् स्थले, **अदर्शनात्** दर्शनाभावाद्धेतोः, **उन्मनीभूतमानसम्** उत्सुकीभूतहृदयम्, **मान्यम्** आदरणीयम्, **ऋषिजनं** मुनिजनम्, **तदाश्रयेषु** तदाश्रमेषु, **गत्वा** उपस्थाय, **दर्शनेन** स्वकर्मकावलोकनेन, **आनन्दयतः** प्रमोदयतः । पुनः **क्वचित्** कुत्रचित् स्थले, **उत्थाय** आसनादुत्थानं कृत्वा, **अग्रतः** अग्रे, **सादरम्** आदरपूर्वकम्, **कृतनमस्काराञ्जलिबन्धान्** कृतः—सम्पादितः, नमस्काराय, अञ्जलिबन्धः—करद्वयसम्पुटनं यैस्तादृशान्, **नगरवृद्धान्** नगरसम्बन्धिनो वृद्धजनान्, **सगौरवं** सादरं यथा स्यात् तथा, **आलपतः** प्रीत्या किमपि ब्रुवतः, पुनः **क्वचित्** कस्मिंश्चित् स्थाने, **सितकुसुमदामदर्शनपुरस्सरं** शुभ्रपुष्पमाल्यावलोकनापूर्वकम्, **आवेदितनिजप्रयोजनद्विजातिजनम्** आवेदितं-विज्ञापितम्, निजप्रयोजनं—स्वकार्यं येन तादृशं द्विजातिजनं—ब्राह्मणजनम्, **अवधानदानेन** तत्प्रयोजनश्रवणावहितहृदयदानेन, **अनुगृह्णतः** अनुकम्पयतः । पुनः **क्वचित्** कस्मिंश्चित् स्थले, **शीर्णदेवतायतनेषु** भग्नदेवमन्दिरेषु, **दर्शनपथावतीर्णेषु** दृष्टिपथमागतेषु सत्सु, **कर्मारम्भाय** जीर्णोद्धारात्मककार्यारम्भाय, **सपदि** तत्क्षणे, **सम्पादितपूजासत्कारान्** सम्पादितः—कृतः, पूजया—प्रीत्या, सत्कारो येषां तादृशान्, **सूत्रधारान्** गृहनिर्माणशिल्पिविशेषान्, **व्यापारयतः** प्रवर्तयतः । पुनः **क्वचित्** कुत्रचित् स्थाने, **आसन्नसेवकनिवेदितदानविच्छेदासु** आसन्नसेवकेन—निकटवर्तिसेवकेन, निवेदितः—सूचितः, दानविच्छेदः—अन्नादिदाननिवृत्तिर्यासु तादृशीषु, **दानशालासु** दानालयेषु, **दीनानाथपथिकसार्थस्य** दीनानां—दरिद्राणाम्, अनाथानाम्—निराश्रयाणां च, पथिकानां—मार्गगामिनाम्, सार्थस्य—समूहस्य, **सविशेषम्** असाधारणम्, **अन्नपानशयनौषधादिदानं** अन्नानि—तण्डुलचूर्णादीनि, पानानि—जलदुग्धादिपेयवस्तूनि, शयनानि—खट्वा-कटादिशय्याः, औषधानि—रोगनाशकद्रव्याणि, आदयो येषां तेषां वस्तूनां, दानम्—अर्पणम्, तत्र **अधिकृतैः** नियुक्तजनद्वारा, **प्रवर्तयतः** निर्विच्छेदं कारयतः । पुनः **क्वचित्** कस्मिंश्चित् स्थाने, **स्वखानितेषु** खानयित्वा स्वनिर्मापितेषु, **सरस्सु** जलाशयविशेषेषु, **तटरोपितानां** तटोपरि प्रादुर्भावितानाम्, **वटाश्वत्थादिविटपिनां** न्यग्रोधपिप्पलादिवृक्षाणाम्, **पालनार्थं** रक्षणार्थम्, **उद्यानपालान्** उद्यानरक्षकान्, **उद्यमयतः** प्रेरयतः । **च** पुनः, **मार्गघटितं** मार्गे मिलितम्, **सूक्तवादिनं** प्रियवादिनम्, **दरिद्रयाचकसार्थं** निर्धनयाचकसमूहम्, **भूरिणा** अधिकेन, **अर्थसम्भारेण** विभवौघेन, **कृतार्थीकुर्वतः** सन्तोषयतः [उ] । **सयत्नं** यत्नपूर्वकं यथा स्यात् तथा, **उद्धृतहरित्कुशेन** उद्धृताः—अन्धकारमण्डलान्निष्काशिताः, प्रकाशिता इति यावत्, हरितः—दिश एव, कुशाः—दर्भा येन तादृशेन, पक्षे हरित्कुशा—अश्ववल्गा, पुनः **प्रातरेव** प्रातःसमय एव, **धवलितोदयाचलद्रुमशिखरं**

लितोदयाचलद्रुमशिखरमवचित्य तारकाकुसुमविसरमुल्लसितेन मन्दमन्दमरुणेन प्रेर्यमाणस्यन्दनो नाकमन्दाकिनीस्नानमिव संप्रधार्य मनसि विहायसो मध्यमध्यारुरोहाम्बुरुहिणीनाथः [ऊ]।

क्षितिपालशिथिलितकरग्रहाः खेदनिःश्वासानिव समुत्स्रष्टुमुष्णान्नभस्वतः स्वैरस्वैरमारेभिरे ककुभः [ऋ]। तरुमूलदृश्यमानश्यामपरिमण्डलच्छायावलया बलवदातपदाहविच्छेदाय देहनिहितार्द्रपद्मिनीदला इवालक्ष्यन्त नगरोपान्तवनभुवः [ॠ]। पर्याकुलितपर्यन्तगृहनिवासिगणिकाजनाः सवेदना इव सुरगृहाङ्गणेषु रेसुरश्रान्तदेवलकवदनवातनिर्भराध्मातकुक्षयो विशृङ्खलं धूपवेलाशङ्खाः [ऌ]। प्रभिन्नशङ्खक्षरन्मदासारसिक्तराजपथाः प्रतस्थिरे जलावगाहाय सलयमग्रतः प्रहतपटुमृदङ्गपटहाः पट्टहस्तिनः [ॡ]। कपाटदारुपाशकनिर्दयास्फालनवाचालानि गृहोन्मुखापणिकसंवृतपण्यासु विपणिवीथीषु प्रत्यापणद्वारमघटन्त कालायसतालकानि [ए]।

टिप्पनकम्— लयः-ताललयविशेषः [ॡ]।

धवलितम्-उद्भासितम्, उदयाचलस्य-उदयगिरेः, ये द्रुमाः-वृक्षास्तेषां शिखरं येन तादृशम्, **तारकाकुसुमं** तारकाख्यपुष्पम्, **अपचित्य** उपसंहृत्य, **उल्लसितेन** प्रसन्नेन, कुशकुसुमरूपगङ्गास्नानोपकरणधारिणेत्यर्थः, **अरुणेन** सूर्यसारथिना-**मन्दं मन्दं** शनैः शनैः, **प्रेर्यमाणस्यन्दनः** वाह्यमानरथः, **अम्बुरुहिणीनाथः** कमलिनीपतिः सूर्य इत्यर्थः, **नाकमन्दाकिनीस्नानं** स्वर्गङ्गायां स्नानम्, **मनसि** हृदि, **सम्प्रधार्य इव** निश्चित्येवेत्युत्प्रेक्षा, **विहायसः** आकाशस्य, **मध्यं** मध्यभागम्, **अध्यारुरोह** आरूढवान्, मध्याह्नवेला समुपस्थितेति भावः [ऊ]।

तस्यां वेलायां **क्षितिपालशिथिलितकरग्रहाः** क्षितिपालेन-राज्ञा मेघवाहनेन, तद्रूपनायकेनेत्यर्थः, शिथिलितः-शैथिल्यमापादितः, करग्रहः-राजग्राह्यभागग्रहणं पक्षे हस्तग्रहणं यासां तादृश्यः, **ककुभः** दिशः किन्तु लिङ्गसाम्येन समासोक्त्या नायिकाश्च, **खेदनिःश्वासानिव** श्रमजनितनासामारुतानिवेत्युत्प्रेक्षा, **उष्णान्** ग्रीष्मान्, **नभस्वतः** पवनान्, **स्वैरं स्वैरं** मन्दं मन्दम्, **समुत्स्रष्टुम्** सम्यङ् मोक्तुम्, **आरेभिरे** आरब्धवत्यः, मध्याह्नवेलायां वहतामुष्णपवनानां करग्रहशैथिल्यहेतुकखेदनिःश्वासरूपत्वेनोत्प्रेक्षा बोध्या [ऋ]। तथा **तरुमूलदृश्यमानश्यामपरिमण्डलच्छायावलयाः** तरूणां-वृक्षाणाम्, मूले-अधःस्थले, दृश्यमानाः, श्यामाः-कृष्णवर्णाः, परिमण्डलच्छायाः-वृक्षानुगुण्येन वर्तुलाकारा मध्याह्नकालिक्यश्छाया एव, वलयानि मणिबन्धालङ्करणानि यासां तादृश्यः, **नगरोपान्तवनभुवः** नगरनिकटवर्तिवनभूमयः, लिङ्गसाम्येन तद्रूपाः कामिन्य इत्यर्थः, **बलवदातपदाहविच्छेदाय** बलवता-तीव्रेण, आतपेन यो दाहः-तापः, तद्विच्छेदाय-तत्प्रशमनाय, **देहनिहितार्द्रपद्मिनीदला इव** देहेषु-शरीरेषु, निहितानि-निवेशितानि, आर्द्रपद्मिनीदलानि-सरसकमलिनीपत्राणि यासां तादृश्य इव, **अलक्ष्यन्त** प्रतीयन्ते स्म [ॠ]। तथा **सुरगृहाङ्गणेषु** देवमन्दिरमध्यभागेषु, **धूपवेलाशङ्खाः** धूपवेलायां-धूपदानसमये, नाद्यमानाः शङ्खाः, **विशृङ्खलं** निर्विच्छेदं यथा स्यात् तथा, **सवेदना इव** मध्याह्नकसन्तापपीडिता इवेत्युत्प्रेक्षा, **रेसुः** ध्वनिं चक्रुः, कीदृशाः? **अश्रान्तदेवलकवदनवातनिर्भराध्मातकुक्षयः** अश्रान्ताः-अविरता ये, देवलकानां-देवसेवोपजीविनाम्, वदनवाताः-मुखपवनाः, तैः निर्भरम्-अत्यन्तं यथा स्यात् तथा, ध्माताः-अभिहता, कुक्षयो मध्यभागा येषां तादृशाः, पुनः **पर्याकुलितपर्यन्तगृहनिवासिगणिकाजनाः** पर्याकुलिताः-स्वध्वनिभिरुद्वेजिताः, पर्यन्तगृहनिवासिनः-निकटगृहवास्तव्याः, गणिकाजनाः-वेश्याजना यैस्तादृशाः [ऌ]। तथा तस्यां वेलायां **पट्टहस्तिनः** प्रधानगजाः, गजेन्द्रा इति यावत्, **जलावगाहाय** जलमज्जनाय, **प्रतस्थिरे** प्रस्थिताः, कीदृशाः? **प्रभिन्नशङ्खक्षरन्मदासारसिक्तराजपथाः** प्रभिन्नः-यौवनेन विदारितो यः, शङ्खः-ललाटास्थि, तस्मात् क्षरता-स्रवता, मदासारेण-दानजलधारया, सिक्तः-आर्द्रीकृतः, राजपथः-राजमार्गो यैस्तादृशाः, पुनः **अग्रतः** अग्रे, **सलयं** नृत्यगीतवाद्यानामेकतानता लयः, तेन सहितं यथा स्यात् तथा, **प्रहतपटुमृदङ्गपटहाः** प्रहताः-प्रणादिताः, पटवः-स्फुटनादिनः, मृदङ्गाः मुरजाख्यवाद्यविशेषाः, पटहाः-ढक्काख्यवाद्यविशेषाश्च येषां तादृशाः [ॡ]। तथा **गृहोन्मुखापणिकसंवृतपण्यासु** गृहोन्मुखैः-स्नानभोजनार्थं गृहगमनोद्यतैः, आपणिकैः-वणिग्जनैः, संवृतानि-अन्तःपिहितानि, पण्यानि-विक्रेतव्यवस्तूनि यासु तासु, **विपणिवीथीषु** आपणपङ्क्तिषु, **प्रत्यापणद्वारं** प्रतिहट्टद्वारम्,

क्रमेण च कठोरतां प्रपन्ने दिवसतारुण्ये किञ्चिदुपरतपौरकोलाहलायां नगर्यां विनिर्गतग्रामलोकस्तोकसंगमेषु शृङ्गाटकेषु, सुप्रहृष्टबठरच्छात्रसत्वरोच्चार्यमाणग्रन्थादिग्रथितदेवतास्तुतिश्लोकासु वन्दिताचार्यचरणशिष्यगण-संम्रियमाणनिजनिजपुस्तकासु क्षणमात्रप्रवृत्तयदृच्छालापरमणीयासूत्तिष्ठन्तीषु विद्यामठव्याख्यानमण्डलीषु, अनुचरगृहीततैलामलककङ्कतेषु प्रस्थितेषु स्नानाय सरयूतटानि तिलदर्भपत्रिकापूर्णपत्रपुटपवित्रपाणिषु श्रोत्रियेषु, न्यञ्चच्चञ्चुशकुनिपीयमाननिम्नविश्रान्तसारणिजलासु विरतारघट्टक्रमसमुच्छ्वसत्सलिलमज्जत्सोपानासु गृहकर्मविरताभिर्गेहिनीभिरवगाह्यमानासु भवनवापीषु, तृषितकलविङ्कचक्रवालाकुलितपर्यन्तेषु पूर्यमाणेषु द्विजकुमारिकाभिः कुटजलेन निष्कुटलतामण्डपावलम्बिषु प्रपिकाकर्परेषु, करार्पितोन्मृष्टतारताम्रभाजनासु

टिप्पनकम्—शृङ्गाटकं–चतुष्पथः । निष्कुटः–गृहवाटिका । गलन्तिका–कुण्डिका [ऐ] ।

कालायसतालकानि कालायसं–लौहविशेषः, तन्निर्मितानि तालकानि–द्वारपिधानयन्त्राणि, **अघटन्त संघटन्ते** स्म, संलग्नानीत्यर्थः, कीदृशानि? **कपाटदारुपाशकनिर्दयास्फालनवाचालानि** कपाटदारूणां–कपाटफलकानाम्, यत् पाशकं–परस्परसंघटकयन्त्रविशेषो, जञ्जीरपदव्यवहृतः, तस्य यन्निर्दयम्–अतिमात्रम्, आस्फालनम्–आकर्षणम्, तेन वाचालानि–शब्दायमानानि [प] । **क्रमेण** शनैः शनैः, **दिवसतारुण्ये** दिनप्रागल्भ्ये, **कठोरतां** दिनकरकिरण-सम्पन्नतीव्रताम्, **प्रपन्ने** प्राप्ते सति, **भूमिपतिः** राजा मेघवाहनः, शनैः शनैः **स्वनिवासं** निजमन्दिरम्, **आगन्तुम्** आगमनाय, **प्रवर्तते** प्रवृत्तः । कस्यां कस्मिंश्च कथम्भूतायां कथम्भूते च सति? **नगर्याम्** अयोध्यायाम्, **किञ्चिदुपरत-पौरकोलाहलायाम्** किञ्चिदुपरतः–ईषन्निवृत्तः, पौराणां–पुरवासिनाम्, कोलाहलो यस्यां तथाभूतायां सत्याम्, तथा **शृङ्गाटकेषु** चतुष्पथेषु, **विनिर्गतग्रामलोकस्तोकसंगमेषु** विनिर्गतः–निवृत्तः, ग्रामलोकानां–ग्रामीणजनानाम्, स्तोकः-ईषत्, संगमः–सम्मेलनं येषु तादृशेषु सत्सु, तथा **विद्यामठव्याख्यानमण्डलीषु** विद्यामठेषु–विद्यालयेषु, या व्याख्यान-मण्डल्यः–व्याख्यानाय–अध्यापनाय, घटिता मण्डल्यः सच्छात्राध्यापकमण्डल्य इत्यर्थः, तासु, **सुप्रहृष्टबठरच्छात्र-सत्वरोच्चार्यमाणग्रन्थादिग्रथितदेवतास्तुतिश्लोकासु** सुप्रहृष्टैः–अनध्यायावसरप्राप्तितोऽतिप्रमुदितैः, बठरैः–मूर्खैः, अभ्यासरुचिरहितैरिति यावत्, छात्रैः, सत्वरं–ससम्भ्रमं यथा स्यात् तथा, उच्चार्यमाणाः–पठ्यमानाः, गीयमाना इति यावत्, ग्रन्थादिषु–ग्रन्थारम्भेषु, ग्रथिताः–निवेशिताः, श्लोका यासु तादृशीषु, पुनः **वन्दिताचार्यचरणशिष्यगणसंम्रियमाण-निजनिजपुस्तकासु** वन्दितौ–अभिवादितौ आचार्यस्य–विद्याचार्यस्य, चरणौ–पादौ येन तादृशेन, शिष्यगणेन–विद्यार्थिसमूहेन, संम्रियमाणं–विधीयमानम्, आवरणबध्यमानमिति यावत्, निजं निजं–स्वं स्वं, पुस्तकं यासु तादृशीषु, पुनः **क्षणमात्रप्रवृत्त-यदृच्छालापरमणीयासु** क्षणमात्रं प्रवृत्तेन–मुहूर्तमात्रप्रवृत्तेन, यदृच्छालापेन–यथेच्छालापेन, रमणीयासु–रुचिरासु, **उत्तिष्ठन्तीषु** गृहगमनार्थमुत्सुकासु सतीषु । तथा **श्रोत्रियेषु** वेदाध्येतृजनेषु, **अनुचरगृहीततैलामलककङ्कतेषु** अनुचरैः–भृत्यैः, गृहीतानि–धृतानि, तैलं–तिलानां तदुपलक्षिततिलसर्षपादीनां स्नेहः, आमलकं–शिरसि लेपनाय आमलकीद्रवश्च, कङ्कतं–तन्नामकं केशमार्जनोपकरणं च येषां तादृशेषु; पुनः **तिलदर्भपत्रिकापूर्णपत्रपुटपवित्रपाणिषु** तिलैः–दिव्यान्न-विशेषैः, दर्भपत्रिभिः–कुशपत्रैश्च, पूर्णेन, पत्रपुटेन–पत्रमयपुटेन, पवित्रः, पाणिः–हस्तो येषां तादृशेषु च, **स्नानाय** मज्जनाय, **सरयूतटानि** सरय्वाख्यनदीतीराणि, **प्रस्थितेषु** प्रयातेषु सत्सु । तथा **भवनवापीषु** गृहनिकटवर्तिवापीषु, **गृहकर्मविर-ताभिः** गृहकार्यनिवृत्ताभिः, **गेहिनीभिः** स्त्रीभिः, **अवगाह्यमानासु** प्रविश्यमानासु सतीषु, कीदृशीषु तासु? **न्यञ्चच्चञ्चु-शकुनिपीयमाननिम्नविश्रान्तसारणिजलासु** न्यञ्चन्त्यौ–तिर्यगधोच्छन्त्यौ, चञ्चू–ओष्ठौ येषां तादृशैः, शकुनिभिः–पक्षिभिः, पीयमानानि, निम्नायाः–गभीरायाः, विश्रान्तायाः–प्रवाहरहितायाः, सारण्याः–कृत्रिमक्षुद्रनद्याः, जलानि यासां तादृशीषु, "चञ्चुश्चोटिरुभे स्त्रियाम्" इत्यमरः । पुनः **विरतारघट्टक्रमसमुच्छ्वसत्सलिलमज्जत्सोपानासु** विरतेभ्यः–निवृत्तचलनेभ्यः, अरघट्टेभ्यः–जलोद्धरणयन्त्रेभ्यः, क्रमेण–मन्दगत्या, समुच्छ्वसता–निःसरता, सलिलेन, मज्जन्ति–क्रियमाण-स्नानानि, सोपानानि–निःश्रेणिका यासां तादृशीषु । पुनः **निष्कुटलतामण्डपावलम्बिषु** निष्कुटेषु-गृहनिकटोद्यानेषु, ये लतामण्डपाः–लतागृहाः, तदवलम्बिषु–तदूर्ध्वावस्थायिषु, **प्रपिकाकर्परेषु** प्रपा नाम पानीयशाला, "प्रपा पानीयशालिका'

दिवसलक्ष्मीष्विव सभास्वन्मण्डलासु हिण्डन्तीषु देवतायतनमण्डलेषु विमलाम्बरधरासु वृद्धासु, भर्तृसन्ध्योपासनोत्सुकासु गृह्णन्तीष्वभ्युक्षणमनुक्षणावलोकितगलन्तिकामूलसंगलज्जलकणासु द्विजातिगृहिणीषु, गृहाभिमुखतरुशाखासीनवायसकुलावलोकितबलिषु हूयमानेषु वैश्वदेवानलेषु, अध्ययनमुखरेष्वितस्ततो भ्रमत्सु गृहपतिभवनवनखण्डभ्रमरेषु भिक्षाचरेषु, प्रवातपट्टशालावलम्बितपञ्जरे पाकपिञ्जराणि शकलयति तरुफलानि संवृतालापे शुकसारिकाकलापे, निवृत्तरसवतीधूमेषु समुपलिप्यमानाजिरभूमिषु प्रक्षाल्यमानासनेषु मार्ज्यमानकांस्यरजतादिभाजनेषु भोजनशालासंचार्यमाणविविधाहारपाकेषु प्रतोलीशिखराधिरूढपुरोहितपरीक्ष्यमाणाध्ययनमुखरोन्मुखद्विजेषु सर्वतः संवृतेषु सत्रिणां भवनेषु, भूमिपतिरवलोकिताभिमतनगरीप्रदेशः समासा-

---

इत्यमरः, तत्सम्बन्धिषु, कर्परेषु–जलाधारकपालेषु, **द्विजकुमारिकाभिः** विप्रबालिकाभिः, **कुटजलेन** स्वोपनीतघटोद्धृतजलेन, **पूर्यमाणेषु** क्रियमाणपूरणेषु सत्सु, कीदृशेषु? **तृषितकलविङ्कचक्रवालाकुलितपर्यन्तेषु** तृषितानां–पिपासितानाम्, कलविङ्कानां–चटकानाम्, चक्रवालेन–मण्डलेन, आकुलितः व्याप्तः, पर्यन्तः–प्रान्तप्रदेशो येषां तादृशेषु । तथा **वृद्धासु** वृद्धस्त्रीजनेषु, **सभास्वन्मण्डलासु** सूर्यमण्डलसहितासु, **दिवसलक्ष्मीषु** दिनशोभासु इव, **करार्पितोन्मृष्टतारताम्रभाजनासु** करेषु–स्वस्वहस्तेषु अर्पितानि–क्षिप्तानि, उन्मृष्टानि–प्रक्षालितानि, तारताम्रभाजनानि–उत्कृष्टताम्रपात्राणि याभिस्तादृशीषु, पक्षे कराणां–सूर्यकिरणानाम्, अर्पितेन–सूर्यकर्तृकेन अर्पणेन, उन्मृष्टानि–विशोधितान्धकाराणि, प्रकाशितानीति यावत्, तारताम्रभाजनानि याभिस्तादृशीषु; पुनः **विमलाम्बरधरासु** विमलं–स्वच्छम्, अम्बरं–वस्त्रं पक्षे आकाशं च धरन्ति यास्तादृशीषु; पुनः **देवतायतनमण्डलेषु** देवमन्दिरवृन्देषु, **हिण्डन्तीषु** गच्छन्तीषु सतीषु, तथा **भर्तृसन्ध्योपासनोत्सुकासु** भर्तुः–पत्युः, यत् सन्ध्योपासनं–सन्ध्यावन्दनम्, तत्रोत्सुकासु; **अनुक्षणावलोकितगलन्तिकामूलसंगलज्जलकणासु** अनुक्षणं–प्रतिक्षणम्, अवलोकिता–दृष्टा, या गलन्तिका–स्वमूलतः स्वल्पजलधारास्रावकः पात्रविशेषः, तन्मूलात्–तन्मूलस्थच्छिद्रद्वारा, संगलन्तः–संस्रवन्तः, जलकणा यासां तादृशीषु, **द्विजातिगृहिणीषु** ब्राह्मणीषु, **अभ्युक्षणम्** अभिषेकं, **गृह्णतीषु** प्राप्नुवतीषु । तथा **गृहाभिमुखतरुशाखासीनवायसकुलावलोकितबलिषु** गृहाभिमुखाः–स्वस्वावासगमनोन्मुखाः, ये तरुशाखासु, आसीनाः–उपविशन्तः, वायसाः–काकाः, तेषां कुलेन–समूहेन, अवलोकितः–दृष्टः, बलिः–स्वभक्ष्यभागो येषु तादृशेषु, **वैश्वदेवानलेषु** विश्वदेवोद्देश्यकयज्ञाग्निषु, **हूयमानेषु** प्रक्षिप्तहविषोद्दीप्यमानेषु सत्सु, मध्याह्नकालविहितवैश्वदेवयज्ञे काकवितरणस्येतिकर्तव्यतात्वात् । तथा **अध्ययनमुखरेषु** अध्ययनवाचालेषु, **गृहपतिभवनवनखण्डभ्रमरेषु** गृहपतीनां–गृहस्थानाम्, यानि भवनानि–गृहाः, तद्रूपा ये वनखण्डाः–वनविशेषाः, उपवनानीति यावत्, तत्सम्बन्धिभ्रमररूपेषु, **भिक्षाचरेषु** भिक्षुकेषु, **इतस्ततः** अत्र तत्र, **भ्रमत्सु** विचरत्सु सत्सु । तथा **प्रवातपट्टशालावलम्बितपञ्जरे** प्रवाताः–प्रकृष्टा वाताः पवना यस्यां तादृश्याम्, पट्टशालायां–प्रधानप्रासादे, चित्रशालायामिति यावत्, अवलम्बितानि–उपरि स्थापितानि, **पञ्जराणि** पक्षिनियन्त्रणयन्त्रविशेषा यस्य तादृशे, **संवृतालापे** मध्याह्नवेलायां निरुद्धाभाषणे च, **शुकसारिकाकलापे** तदाख्यपक्षिगणे, **पाकपिञ्जराणि** पाकेन–पाकवशेन, पिञ्जराणि–किञ्चिद्रक्तपीतवर्णानि, तरुफलानि, **शकलयति** भक्षयति सति, **सत्रिणां** याज्ञिकानां भोजनादिदानक्षेत्राध्यक्षाणां वा, **भवनेषु** गृहेषु, **सर्वतः** सर्वप्रकारेण, **संवृतेषु** पिहितद्वारेषु सत्सु, "सत्रं यज्ञे सदादानाच्छादनारण्यकैतवे" इति मेदिनी, कीदृशेषु? **निवृत्तरसवतीधूमेषु** निवृत्ताः–पाकसमाप्त्या विश्रान्ताः, रसवतीधूमाः–पाकालयसम्बन्धिधूमा येषु तादृशेषु, "रसवत्यां तु पाकस्थानमहानसे" इत्यमरः; पुनः **समुपलिप्यमानाजिरभूमिषु** सम्यक् उपलिप्यमाना–द्विजभोजनार्थं गोमयोदकविशोध्यमाना, अजिरभूमिः–प्राङ्गणभूमिर्येषां तादृशेषु; पुनः **प्रक्षाल्यमानासनेषु** प्रक्षाल्यमानानि–जलेन मार्ज्यमानानि, आसनानि–काष्ठफलकाद्युपवेशनस्थानानि येषु तादृशेषु; पुनः **मार्ज्यमानकांस्यरजतादिभाजनेषु** मार्ज्यमानानि–प्रक्षाल्यमानानि, कांस्यरजतादिद्रव्यनिर्मितानि, भाजनानि–भोजनपात्राणि च येषु तादृशेषु; पुनः **भोजनशालासंचार्यमाणविविधाहारपाकेषु** भोजनशालायां–भोजनगृहे, सञ्चार्यमाणाः–आनीयमानाः, विविधाः–बहुविधाः, आहारपाकाः–भोजनीयवस्तूनि येषु तादृशेषु, पुनः **प्रतोलीशिखराधिरूढपुरोहितपरीक्ष्यमाणाध्ययनमुखरोन्मुखद्विजेषु** प्रतोल्याः–'पोळ' इतिप्रसिद्धस्य द्वारगेहस्य, शिखरे–उपरिभागे, अधिरूढैः–आरूढैः,

दितावसरैः श्रवणमूलमागत्य मध्याह्नकृत्याय प्रवर्तितो मागधश्लोकैरधिकृतैश्च राजलोकैः प्रवघृते शनैः शनैः स्वनिवासमागन्तुम् [ऐ] । अवहिताधोरणचालितवारणश्चोर्ध्वीकृत्य विधृतेन तत्कालमाक्रान्तचूडामणिं दिवसमणिमदृष्टपूर्वमादराद् द्रष्टुमागतेन पौर्णमासीहिमगभस्तिनेव निवारितललाटंतपातपः सितातपत्रेण हयखुरोद्धूतरथ्यारेणुधूसरितनेपथ्यैरातपम्लानमौलिदामभिः सर्वतोऽनुगम्यमानो नृपतिभिरुपर्युपरि संदानितानेकवन्दनमालमूर्ध्वविधृतवेत्रयष्टिभिः प्रथममेव सत्वरप्रविष्टैरितस्ततः प्रहितदृष्टिभिर्द्वारपालैर्निरीक्षिताशेषकक्षान्तरमन्तरिक्षोल्लेखिभिरनेकशतसंख्यैः सितप्रासादैः सर्वतः समाकुलं राजकुलमाससाद [ओ] ॥

द्वारदेशे च तस्य विधृतवाहनस्तिमितमावासगमनाय तिर्यगुन्नमितमुखसंज्ञया प्रस्थाप्योभयतः पार्थिवसमूहमन्तः प्रविश्य द्वितीये द्वारे वारणादवततार [औ] । निवारितपरिवारलोकश्च द्वारपालैः परिमिताप्त-

---

पुरोहितैः–राजपुरस्कृतजनैः, परीक्ष्यमाणाः–क्रियमाणपरीक्षणाः, अध्ययनमुखराः–अध्ययनवाचालाः, उन्मुखाः–अध्ययनतत्पराश्च, द्विजाः–ब्राह्मणा येषु तादृशेषु, भूमिपतिः कीदृशः ? **अवलोकिताभिमतनगरीप्रदेशः** अवलोकिताः–निरीक्षिता, अभिमताः–द्रष्टुमभीष्टाः, नगर्याः–अयोध्यायाः, प्रदेशाः–स्थानानि येन तादृशः । पुनः **समासादितावसरैः** प्राप्तप्रवर्तनावसरैः, **मागधश्लोकैः** मागधानां–बन्दिनाम्, श्लोकैः, **अधिकृतैः** प्रकृतकार्यनियुक्तैः, **राजलोकैः** राजकीयजनैश्च, **श्रवणमूलं** कर्णविवरं पक्षे कर्णसमीपम्, **आगत्य** उपस्थाय, **मध्याह्नकृत्याय** मध्याह्नोचितस्नानादिकार्याय, **प्रवर्तितः** प्रेरितः [ऐ] **अवहिताधोरणचालितवारणः** अवहितेन–सावधानेन, आधोरणेन–हस्तिपकेन, चालितः–चलितुं प्रेरितः, वारणः–हस्ती यस्य तादृशः स राजा, **राजकुलं** राजमन्दिरम्, **आससाद** प्राप्तवान्, गतवानिति यावत्, "आधोरणा हस्तिपकाः" इत्यमरः । कीदृशः ? **ऊर्ध्वीकृत्य** राज्ञ उपरि लम्बयित्वा, **विधृतेन** हस्तगृहीतेन, **सितातपत्रेण** श्वेतच्छत्रेण, **निवारितललाटन्तपाऽऽतपः** निवारितः–निवर्तितः, ललाटन्तपस्य–सूर्यस्य, आतप–तापो यस्य तादृशः, केनेव ? **आक्रान्तचूडामणिम्** आक्रान्तः–व्याप्तः, चूडामणिः–मुकुटो येन तादृशम्, चूडामणेरभिमुखमुद्रासमानमित्यर्थः, **अदृष्टपूर्वम्** भिन्नकालोदयेन पूर्वमदृष्टम्, **दिवसमणिं** सूर्यम्, **आदरात्** स्नेहात्, **तत्कालं** तत्क्षणम्, **द्रष्टुम्** निरीक्षितुम्, **आगतेन** अवतीर्णेन, **पौर्णमासीहिमगभस्तिनेव** पूर्णिमाचन्द्रेणेवेत्युत्प्रेक्षा । पुनः **नृपतिभिः** स्वाधिकृतभूपतिभिः, **सर्वतः** समन्ततः, **अनुगम्यमानः** अनुस्रियमाणः, कीदृशैः ? **हयखुरोद्धूतरथ्यारेणुधूसरितनेपथ्यैः** हयानाम्–अश्वानाम्, खुरैः–शफैः, उद्धूताः–उत्क्षिप्ताः, ये रथ्यारेणवः–रथमार्गधूलयः, तैः धूसरितं–किञ्चित्पीतश्वेततामापादितम्, मलिनीकृतमिति यावत्, नेपथ्यं–वेषो येषां तादृशैः, पुनः **आतपम्लानमौलिदामभिः** आतपेन–सूर्यतापेन, म्लानिमापन्नानि, मौलिदामानि–शिरोमाल्यानि येषां तादृशैः । कीदृशं राजकुलम् ? **उपर्युपरि** ऊर्ध्वोर्ध्वभागे, **सन्दानितानेकवन्दनमालं** सन्दानिताः–निबद्धाः, अनेकाः–बह्वः, वन्दनमालाः–तोरणस्रजो यत्र तादृशम्; पुनः **द्वारपालैः** द्वाररक्षकैः, **निरीक्षिताशेषकक्षान्तरं** निरीक्षितानि–अवलोकितानि, अशेषाणि–समग्राणि, कक्षान्तराणि–प्रासादप्रकोष्ठाभ्यन्तराणि यस्य तादृशम्, "कक्षा स्पर्धा पदे काञ्च्यां रथगेह-प्रकोष्ठयोः" इति धरणिकोशः; कीदृशैस्तैः ? **ऊर्ध्वविधृतवेत्रयष्टिभिः** उपर्युत्थापितवेत्रदण्डैः; पुनः **प्रथममेव** राज्ञः प्रवेशात् प्रागेव, **सत्वरप्रविष्टैः** कृतशीघ्रप्रवेशैः; पुनः **इतस्ततः** अत्र तत्र, **प्रहितदृष्टिभिः** व्यापारितलोचनैः; पुनः कीदृशम् ? **अन्तरिक्षोल्लेखिभिः** गगनमण्डलोद्धर्षिभिः, **अनेकशतसंख्यैः** बहुशतसंख्याकैः, **सितप्रासादैः** श्वेतमन्दिरैः, **सर्वतः** समन्ततः, **समाकुलं** व्याप्तं वेष्टितमिति यावत् [ओ] ।

च पुनः, **तस्य** राजकुलस्य, **द्वारदेशे** द्वारस्थाने, **विधृतवाहनस्तिमितं** विधृतं–निरुद्धम्, स्थिरीकृतमिति यावत्, वाहनं यस्य तादृशम्, अत एव स्तिमितं–स्थिरीभूतम्, **पार्थिवसमूहं** नृपमण्डलम्, **तिर्यगुन्नमितमुखसंज्ञया** तिर्यक्–कुटिलं यथा स्यात् तथा, उन्नमितेन–उत्थापितेन, मुखेन, या संज्ञा–संकेतः, तेन आवासगमनाय, **उभयतः** उभयभागतः, **प्रस्थाप्य** प्रस्थानार्थमनुमन्य, **अन्तः** मध्ये, **प्रविश्य** प्रवेशं कृत्वा, **द्वितीये** अपरस्मिन्, द्वारे, **वारणात्** गजात्, **अवततार** अधस्तादागतः [औ] । **च** पुनः, **द्वारपालैः** द्वाररक्षकभृत्यैः, **निवारितपरिवारलोकः** निवर्तितानुगामिजनः, **परिमिताप्तराजपुत्रपरिवृतः** परिमितैः–अल्पसंख्यकैः, आप्तैः–विश्वस्तैः, राजपुत्रैः, परिवृतः–परिवेष्टितः सन्,

राजपुत्रपरिवृतश्चरणाभ्यामेव गत्वा मध्यमां मण्डपिकां तन्मध्यभागे तत्क्षणोपलिप्तायाः निरन्तरक्षिप्तसरसपुष्पप्रकरसुरभेरास्थानवेदिकायाः पृष्ठभागे प्रतिष्ठापितमुभयतः संयोजितमृगाङ्कमणिदारुनिर्मितोदारमत्तवारणकमनुपृष्ठमाहितोच्चकाञ्चनपीठमीषज्जरठकुमुदगर्भदलावदातमच्छधवलधौतपट्टांशुकपटाच्छादितं दन्तपट्टमध्यास्त [अं] । व्यपास्तसकलविहारकालकल्पितवेषः प्रक्षालितचरणपल्लवश्च परिचारकगणेन सत्वरोपसृतधृतकरककिङ्करकरावर्जितेन शिशिरवारिणा प्रक्षाल्य बलसंक्षोभधूलिधूसरश्रमस्वेदलवलेखं मुखेन्दुमग्रतः स्थापिते मणिपतद्ग्रहके प्रक्षिप्य कतिपयानुदकगण्डूषानुपस्पृश्य परिमृज्य चाभ्यग्रहस्तशाटकग्राहिसत्वरोपढौकितेन वस्त्रपल्लवेन सहस्तपल्लवं वदनमादरगृहीतजलार्द्रतालवृन्तेनान्यतमपरिचारकेण मन्दमन्दमुपवीज्यमानो मुहूर्तमिव स्थित्वा द्वारदेशस्थकटककटुरवाकृष्टधावमानसंभ्रान्तवारिकम्, उत्सारितक्रान्तपुष्पबलितलिनायमानकुट्टिमोत्सङ्गम्,

---

टिप्पनकम्—उपस्पृश्य आचम्य । अभ्यग्रः-समीपवर्ती । आरालिकः-सूपकारः [अः] ।

मध्यमां मध्यवर्तिनीम्, **मण्डपिकां** लघुमण्डपम्, **चरणाभ्यामेव** पादाभ्यामेव, गत्वा, **तन्मध्यभागे** तन्मध्यस्थाने, **तत्क्षणोपलिप्तायाः** तत्क्षणकृतगोमयोदकोपलेपनायाः, पुनः **निरन्तरक्षिप्तसरसपुष्पप्रकरसुरभेः** निरन्तरं–निबिडं यथा स्यात् तथा, क्षिप्तानां–विकीर्णानाम्, सरसानां–स्निग्धानाम्, पुष्पाणाम्, प्रकरेण–समूहेन, सुरभेः–सुगन्धाढ्यायाः, **आस्थानवेदिकायाः** सभासम्बन्धिवेद्याः, **पृष्ठभागे** पश्चाद्भागे, **प्रतिष्ठापितं** संस्थापितम्, **दन्तपट्टं** हस्तिदन्तमयं फलकम्, **अध्यास्त** उपविष्टवान्, "पट्टः पेषणपाषाणे व्रणादीनां च बन्धने । चतुष्पथे च राजादिशासनान्तरपीठयोः" इति मेदिनी, कीदृशम्? **उभयतः संयोजितमृगाङ्कमणिदारुनिर्मितोदारमत्तवारणकम्** उभयतः–पार्श्वद्वये, संयोजितौ–सन्निवेशितौ, मृगाङ्कमणिषु–चन्द्रकान्तमणिषु मध्ये, यद्दारु–सारभूतं वस्तु, तेन उत्तमचन्द्रकान्तमणिनेत्यर्थः, निर्मितौ, उदारौ–महान्तौ, मत्तवारणौ–मत्तगजौ, यस्मिंस्तादृशम्, पुनः **अनुपृष्ठं** पृष्ठभागे, **आहितोच्चकाञ्चनपीठम्** आहितं–स्थापितम्, उच्चम्-उत्तुङ्गम्, काञ्चनपीठं-सुवर्णमयमासनं यस्मिंस्तादृशम्, पुनः **ईषज्जरठकुमुदगर्भदलावदातम्** ईषत्–किञ्चित्, जरठानि परिणतानि, यानि कुमुदगर्भदलानि–कुमुदान्तर्वर्तिपत्राणि, तद्वत् अवदातम्–उज्ज्वलम्, पुनः **अच्छधवलधौतधवलपट्टांशुकपटाच्छादितम्** अच्छेन–निर्मलेन, धवलेन–शुभ्रेण, धौतेन–प्रक्षालितेन, पट्टेन–कौशेयरूपेण उत्तमेन, अंशुकपटेन–सूक्ष्मवस्त्रेण, आच्छादितम्, "अंशुकं श्लक्ष्णवस्त्रे स्यात्" इति मेदिनी [अं] । **व्यपास्तसकलविहारकालकल्पितवेषः** व्यपास्तः–त्यक्तः, सकलः–समस्तः, विहारकालकल्पितः–नगरीभ्रमणावसररचितः, वेषः–कृत्रिमरूपं, येन तादृशः, **च** पुनः, **परिचारकगणेन** सेवकसमूहेन, **प्रक्षालितचरणपल्लवः** धौतपल्लवकोमलपादः, स राजा, **बलसंक्षोभधूलिधूसरश्रमस्वेदलवलेखं** बलसंक्षोभधूलिभिः–सेनासञ्चारोद्धतरेणुभिः, धूसरा-धूसरवर्णा, श्रमस्वेदलवलेखा-श्रमजन्यस्वेदबिन्दुरेखा, यस्मिंस्तादृशम्, **मुखेन्दुं** स्वकीयमुखचन्द्रम्, **सत्वरोपसृतधृतकरककिङ्करकरावर्जितेन** सत्वरोपसृतस्य शीघ्रमुपागतस्य, धृता–गृहीता, करका–तुषारतोयं येन तादृशस्य, किङ्करस्य–भृत्यस्य, करेण–हस्तेन, आवर्जितेन–समर्पितेन, शिशिरवारिणा–शीतलजलेन, **प्रक्षाल्य** विशोध्य, **अग्रतः** अग्रे, **स्थापिते** धृते, **मणिपतद्ग्रहके** मणिमये, पतद्ग्रहके–पतन्तं गण्डूषं गृह्णातीत्यर्थकतत्संज्ञके गण्डूषपात्रे, **कतिपयान्** परिमितान्, **गण्डूषान्** चुलुकान्, **प्रक्षिप्य** विसृज्य, **सहस्तपल्लवं** हस्तपल्लवेन सहितम्, वदनम्, **उपस्पृश्य** जलेन स्पृष्ट्वा, **च** पुनः, **अभ्यग्रहस्तशाटकग्राहिसत्वरोपढौकितेन** अभ्यग्रः- नृपाग्राभिमुखो हस्तो यस्य तादृशेन, शाटकग्राहिणा–मार्जनवस्त्रधारिणा भृत्येन, सत्वरं–शीघ्रम्, उपढौकितेन–उपनीतेन दत्तेन, **वस्त्रपल्लवेन** पल्लवसदृशश्लक्ष्णवस्त्रेण, **परिमृज्य** परि–सर्वतोभावेन, मार्जनं कृत्वा, **आदरगृहीतजलार्द्रतालवृन्तेन** आदरेण–प्रीत्या, गृहीतं–धृतम्, जलार्द्रं–जलाप्लुतम्, तालवृन्तं–तालव्यजनं येन तादृशेन, **अन्यतमपरिचारकेण** बहूनां मध्ये केनचिदेकेन सेवकेन, **मन्दमन्दं** शनैः शनैः, **उपवीज्यमानः** क्रियमाणोपवीजनः, **मुहूर्तमिव** क्षणमिव, स्थित्वा **आहारमण्डपं** भोजनाऽऽगारम्, **अयासीत्** गतवान् । कीदृशम्? **द्वारदेशस्थकटककटुरवाकृष्टधावमानसम्भ्रान्तवारिकं** द्वारदेशस्थस्य–द्वारदेशनियुक्तस्य, कटकस्य–सैन्यस्य, कटुरवेण–कठोरशब्देन, आकृष्टाः–प्रेरिताः, धावमानाः–शीघ्रं गच्छन्तः, सम्भ्रान्ताः–त्वराऽऽकुलाः, वारिकाः–जलवाहका यस्मिंस्तादृशम् । पुनः **उत्सा-**

अङ्गणोपान्तपुञ्जीभूतभूरिभुञ्जानकलोकम्, औत्सुक्यतरलारालिकश्रेणिसंचार्यमाणानेककाञ्चनस्थालीसहस्रम्, आदरव्यापृताक्षपौरोगवनिरीक्ष्यमाणक्षुद्रपरिजनप्रवेशनिर्गमावस्थानम्, अनिलताडितोद्दण्डकाण्डपटकप्रस्तुताकाण्डताण्डवमाहारमण्डपमयासीत् [अः] ॥

तत्र च विविधवितीर्णविततरत्नस्थालशतशबलितक्षितितले नृपासनासन्ननिषण्णभिषजि संनिधापितशुकसारिकाचकोरक्रौञ्चकोकिलप्रमुखपत्त्रिणि तत इतः प्रेङ्खदरुणसुकुमारपाणिपल्लवाभिः कल्पलताभिरिव संचारिणीभिश्चित्ररत्नाभरणदिव्यांशुकधराभिर्वाररमणीभिरुपनीयमानमनोभिलषितानेकभक्ष्यपेयप्रकरो यथास्थानमुपविष्टेन प्रधानपार्थिवगणेनान्येन च प्रणयिना राजलोकेन परिवृतः कुर्वन्नन्तरान्तरा सह सुहृद्भिर्नर्म भोजनकर्म

रितक्लान्तपुष्पावलितलिनायमानकुट्टिमोत्सङ्गम् उत्सारितेन- पूजनाऽऽगाराान्निष्कासितेन, क्लान्तेन-म्लानिमापन्नेन, पुष्पावलिना-पुष्पप्रचुरपूजोपचारेण, तलिनायमानः-शय्यायमानः, कुट्टिमोत्सङ्गः-मणिबद्धभूमिमध्यभागो यस्मिंस्तादृशम्। पुनः **अङ्गणोपान्तपुञ्जीभूतभूरिभुञ्जानकलोकम्** अङ्गणोपान्ते- प्राङ्गणप्रान्ते, पुञ्जीभूताः-सङ्घीभूताः, भूरयः-बहवः, भुञ्जानकलोकाः-भोक्तजनाः, यस्मिंस्तादृशम्। पुनः **औत्सुक्यतरलारालिकश्रेणिसञ्चार्यमाणानेककाञ्चनस्थालीसहस्रम्** औत्सुक्येन-सम्भ्रमेण, तरलया-चञ्चलया, आरालिकश्रेण्या-सूपकारसमूहेन, सञ्चार्यमाणं-तत्र तत्रानीयमानम्, अनेकासां-बहुविधानाम्, काञ्चनस्थालीनां-सुवर्णमयपात्रविशेषाणाम्, सहस्रं यस्मिंस्तादृशम्, "सूपकारास्तु बल्लवा आरालिकाः" इत्यमरः। पुनः **आदरव्यापृताक्षपौरोगवनिरीक्ष्यमाणक्षुद्रपरिजनप्रवेशनिर्गमावस्थानम्** आदरेण-प्रीत्या, व्यापृते-दर्शनासक्ते, अक्षिणी-नेत्रे, यस्य तादृशेन, पौरोगवेन-पाकशालाध्यक्षेण, निरीक्ष्यमाणः-अवलोक्यमानः, क्षुद्रपरिजनानां- साधारणपरिवाराणाम्, प्रवेशः- भोजनशालायामागमनम्, निर्गमः-ततो निष्क्रमणम्, अवस्थानं-तत्रावस्थितिर्यस्मिंस्तादृशम्। पुनः **अनिलताडितोद्दण्डकाण्डपटकप्रस्तुताकाण्डताण्डवम्** अनिले-पवने, ताडिता-उद्धूताः, ये उद्दण्डाः-उच्छ्रिताः, काण्डपटकाः-काण्डाकारेण लम्बितानि वस्त्राणि, तैः प्रस्तुतं-प्रारब्धम्, अकाण्डताण्डवम्-अनवसरनृत्यं, यस्मिंस्तादृशम् [अः]।

च पुनः, **तत्र** तस्मिन्, आहारमण्डप इत्यर्थः, राजा मेघवाहनः, **भोजनकर्म** भोजनरूपां क्रियाम्, **निरवर्तयत्** सम्पादितवान्। कीदृशे? **विविधवितीर्णविततरत्नस्थालशतशबलितक्षितितले** विविधानि-अनेकविधानि, वितीर्णानि-दत्तानि, स्थापितानीति यावत्, यानि विततानि-विस्तृतानि, रत्नस्थालानि-रत्नमयभोजनपात्रविशेषाः, तेषां शतेन, शबलितं-चित्रितम्, क्षितितलं-भूतलं, यस्मिंस्तादृशे। पुनः **नृपासनासन्ननिषण्णभिषजि** नृपासनस्य-राजासनस्य, आसन्ने-निकटस्थाने, निषण्णः-उपविष्टः, भिषक्-भोज्याभोज्यविवेचनार्थं वैद्यो यस्मिंस्तादृशे। पुनः **सन्निधापितशुक-सारिका-चकोर-क्रौञ्च-कोकिलप्रमुखपतत्त्रिणि** सन्निधापिताः "दृष्ट्वान्नं सविषं चकोरविहगो धत्ते विरागं दृशोः, हंसः कूजति सारिका च वमति क्रोशत्यजस्रं शुकः। विष्ठां मुञ्चति मर्कटः परभृतः प्राप्नोति मृत्युं क्षणात्, क्रौञ्चो माद्यति हर्षवांश्च नकुलः प्रीतिं च धत्ते द्विकः॥" इत्यादिना पक्षिभिः सविषान्नपरीक्षणात् सविषभोज्यवस्तुपरीक्षणाय समीपमुपवेशिताः, शुकादिप्रमुखाः-शुकादयः, पतत्त्रिणः-पक्षिणो यस्मिंस्तादृशे। राजा कीदृशः? **वाररमणीभिः** वेश्याभिः, **उपनीयमानमनोऽभिलषितानेकभक्ष्यपेयप्रकरः** उपनीयमानः-समीपमानीयमानः, मनोऽभिलषितानां-मनोऽभिवाञ्छितानाम्, अनेकेषां भक्ष्य-पेयानां-भोक्तव्यप-तव्यवस्तूनाम्, प्रकरः-समूहो यस्य तादृशः, कीदृशीभिः? **इतस्ततः** अत्र तत्र, **प्रेङ्खदरुणसुकुमारपाणिपल्लवाभिः** प्रेङ्खन्ति-प्रचलन्ति, अरुणानि-रक्तानि, सुकुमाराणि-अतिकोमलानि, पाणिपल्लवानि-हस्तपल्लवानि, यासां तादृशीभिः, अत एव **सञ्चारिणीभिः** जङ्गमाभिः, **कल्पलताभिरिव** कल्पाख्यदिव्यलताभिरिवेत्युत्प्रेक्षा, पुनः **चित्ररत्नाभरणदिव्यांशुकधराभिः** चित्राणि-अनेकवर्णानि, यानि, रत्नाभरणानि-रत्नमयालङ्करणानि, दिव्यांशुकानि-मनोहरवस्त्राणि च तद्धारयित्रीभिः। पुनः **यथास्थानं** यथोचितस्थानम्, **उपविष्टेन** कृतोपवेशनेन, **प्रधानपार्थिवगणेन** मुख्यमुख्यनृपसमूहेन, **च** पुनः, **अन्येन** तद्भिन्नेन, **प्रणयिना** स्नेहिना, **राजलोकेन** राजकीयजनेन, **परिवृतः** परि-

निरवर्तयत् । उपस्पृश्य च समाघ्रातधूपधूमवर्तिरुद्वर्त्य दूरं कर्पूरमृगनाभिसंभेदसंभृतामोदेन घ्राणेन्द्रियानन्दिना चन्दनद्रवेणाग्रहस्तो गृहीत्वा च ताम्बूलमप्रतिकूलभाषिभिरशेषकलाशास्त्रकृतपरिचयैः परचित्तविद्भिः सुहृद्भिरनुगम्यमानो गन्धसलिलच्छटासेकशिशिरीकृतसकलभित्तिक्षणामनुक्षणापतत्पवनपुञ्जगुञ्जन्मणिगवाक्षगुञ्जामपराह्णरम्यामावासहर्म्यशिखरप्रान्तवर्तिनीं दन्तवलभिकामगच्छत् [क] ॥

तत्र च सितस्वच्छमृदुदुकूलोत्तरच्छदमुदग्ररत्नप्रतिपादुकप्रतिष्ठमुभयपार्श्वविन्यस्तचित्रसूत्रितनेत्रगण्डोपधानमध्यासितविशालमणिशिलावेदिकाङ्कं विद्रुमदारुपर्यङ्कमधिशयानस्तत्कालसेवागतैर्गीतशास्त्रपरिज्ञानदूरारूढगर्वैर्गान्धर्विकोपाध्यायैः सह वेणुवीणादिवाद्यविनोदेन दिनशेषमनयत् [ख] । अस्तशिखरपर्यस्तमण्डले च तरणावुत्तीर्य कृतसकलसान्ध्यकृत्यो विधाय देवतासपर्यामागृहीतविकटशृङ्गारवेषो घटितपरिवेषैः सर्वतः परि-

---

वेष्टितः, पुनः **अन्तरा अन्तरा** मध्ये मध्ये, **सुहृद्भिः** स्वमित्रैः, सह, **नर्म** हास्यं, कुर्वन् । **च** पुनः, **उपस्पृश्य** हस्तमुखं प्रक्षाल्य, **समाघ्रातधूपधूमवर्तिः** समाघ्राता-सम्यक् घ्राणेन्द्रियगृहीतगन्धा, धूपधूमवर्तिः-धूपसम्बन्धिधूमरेखा, येन तादृशः, **कर्पूरमृगनाभिसम्भेदसम्भृतामोदेन** कर्पूरस्य-तदाख्यप्रसिद्धद्रव्यविशेषस्य, मृगनाभेः-कस्तूरिकायाश्च, सम्भेदेन-सम्मिश्रणेन, सम्भृतः-संवर्धितः, आमोदः-सौगन्ध्यं, यस्मिंस्तादृशेन, **घ्राणेन्द्रियाऽऽनन्दिना** घ्राणेन्द्रियोल्लासकेन, **चन्दनद्रवेण** चन्दनपङ्केन, **दूरं** चिरम्, **उद्वर्त्य** अङ्गं विलिप्य, **अग्रहस्तः** पुरस्कृतहस्तः, **ताम्बूलं** नागवल्लीदलम्, गृहीत्वा, **अप्रतिकूलभाषिभिः** प्रियंवदैः, **अशेषकलाशास्त्रकृतपरिचयैः** अशेषेषु-समस्तेषु, कलाशास्त्रेषु-शिल्पविद्यासु, कृतः परिचयः-अभिज्ञानं यैस्तादृशैः, **परचित्तविद्भिः** अन्यदीयमनोवृत्त्यभिज्ञैः, **सुहृद्भिः** मित्रजनैः, **अनुगम्यमानः** अनुस्रियमाणः; **दन्तवलभिकां** हस्तिदन्तरचितशिरोगृहम्, अगच्छत्-गतवान् । कीदृशीम् ? **गन्धसलिलच्छटासेकशिशिरीकृतसकलभित्तिक्षणां** गन्धसलिलानां-सुगन्धिजलानाम्, छटया-धारया, यः सेकः-सेचनम्, आप्लावनमिति यावत्, तेन शिशिरीकृतः- शीतलीकृतः, **सकलभित्तीनाम्** अशेषकुड्यानाम्, क्षणः-मध्यभागो यस्यां तादृशीम्, पुनः **अनुक्षणापतत्पवनपुञ्जगुञ्जन्मणिगवाक्षगुञ्जाम्** अनुक्षणं-प्रतिक्षणम्, आपतताम्-आगच्छताम्, पवनानां-वायूनाम्, पुञ्जेन-समूहेन, गुञ्जन्ती-अव्यक्तशब्दं कुर्वती, मणिगवाक्षगुञ्जा-मणिमयवातायनलम्बितलताविशेषो यस्यां तादृशीम्, पुनः **अपराह्णरम्यां** मध्याह्नरमणीयाम्, पुनः **आवासहर्म्यशिखरप्रान्तवर्तिनीम्** आवासस्य-स्वनिवासाधिकरणभूतस्य, हर्म्यस्य-प्रासादस्य, शिखरप्रान्ते-शिरोभागान्ते, वर्तिनीम्-वर्तमानाम् [क] ।

च पुनः, **तत्र** तस्यां दन्तवलभिकायामित्यर्थः, **विद्रुमदारुपर्यङ्कं** विद्रुमः-प्रवालाख्यरत्नप्रसवी वृक्षविशेषः, तदीयं यद्, दारु-काष्ठम्, तद्रचितपर्यङ्कम्-ऊर्ध्वशय्याविशेषम्, **अधिशयानः** तदुपरि स्वपन्, **वेणुवीणादिवाद्यविनोदेन** वेणुः-वंशी, वीणा-विपञ्ची, तत्प्रभृतिवाद्यस्य, विनोदेन-कौतुकेन, **दिनशेषं** दिनावशिष्टभागम्, **अनयत्** व्यतीतवान् । कीदृशं पर्यङ्कम् ? **सितस्वच्छमृदुदुकूलोत्तरच्छदं** सितं-शुभ्रवर्णम्, स्वच्छं-निर्मलम्, मृदु-श्लक्ष्णं च, यद् दुकूलं-वस्त्रम्, तदेवोत्तरच्छदः-ऊर्ध्वास्तरणं यस्मिंस्तादृशम्, पुनः **उदग्ररत्नप्रतिपादुकप्रतिष्ठम्** उदग्रम्-उन्नतम्, रत्नप्रतिपादुकं-रत्नमयप्रत्येकपादुका, प्रतिष्ठा-आधारो यस्य तादृशम्, पुनः **उभयपार्श्वविन्यस्तचित्रसूत्रितनेत्रगण्डोपधानम्** उभयपार्श्वविन्यस्ते-दक्षिणवामपार्श्वनिहिते, चित्रसूत्रिते-बहुविधचित्रबद्धे, नेत्रगण्डयोः नयनगण्डस्थलयोः, उपधाने-स्थापनाऽऽधारौ, यस्मिंस्तादृशम्, पुनः **अध्यासितविशालमणिशिलावेदिकाऽङ्कम्** अध्यासिता-निवेशिता, विशालमणिशिलायाः-विस्तृतमणिरूपप्रस्तरस्य वेदिका-चतुरस्रभूमिर्यस्मिंस्तादृशः, अङ्कः-मध्यभागो यस्य तादृशम्, कैः सह ? **तत्कालसेवागतैः** तत्काले-तस्मिन्नवसरे, सेवार्थमुपस्थितैः, **गीतशास्त्रपरिज्ञानदूरारूढगर्वैः** गीतशास्त्रपरिज्ञानेन-गानग्रन्थविज्ञानेन, दूरारूढगर्वैः-चिरस्थिराभिमानैः, **गान्धर्विकोपाध्यायैः** गान्धर्वविद्याध्यापकैः, सह [ख] ।

च पुनः, **तरणौ** सूर्ये, **अस्तशिखरपर्यस्तमण्डले** अस्तशिखरे-अस्ताचलोर्ध्वभागे, पर्यस्तं-व्याप्तम्, मण्डलं-बिम्बं, यस्य तादृशे, अस्ताचलाधिरूढे सतीत्यर्थः, **उत्तीर्य** शिरोगृहादवतीर्य, **कृतसकलसान्ध्यकृत्यः** सम्पादिताशेषसायन्तनकर्मा, **देवतासपर्यां** देवतापूजाम्, **विधाय** सम्पाद्य, **आगृहीतविकटशृङ्गारवेषः** आगृहीतः-समन्ताद्

वृतो धृतासिपट्टप्रभापटलपोषितप्रदोषतिमिरैः शरीररक्षाविधावधिकृतैर्वीरपुरुषैर्द्वारदेशोपविष्टसोपायनानेकप्रधाननगरलोकमनेकभङ्गरचितरङ्गावलीतरङ्गितमसृणमणिकुट्टिमोत्सङ्गमविरलप्रकीर्णपुष्पप्रकरमखिललोकप्रार्थनीयसंगमाभिर्मर्त्यलोकलक्ष्मीभिरिव राजलक्ष्मीं द्रष्टुमेकहेलयोपगताभिरनर्घ्यरत्नाभरणभूषिताङ्गयष्टिभिर्वारयोषाभिरापूर्यमाणपर्यन्तं क्वचित् सुखासीनसचिवपुत्रविचार्यमाणनव्यकविनिबद्धकाव्यगुणदोषविभागं क्वचिदाबद्धमण्डलीकवैपञ्चिकप्रपञ्चयमानललितपञ्चमग्रामरागं क्वचिद्वाञ्छिताधिकारसेवकवारपरिचर्यमाणविकटवेत्रासनोपविष्टप्रधानसचिवं क्वचिल्लिख्यमाननिःसंख्यराजाज्ञालेखमुद्रासिन्दूरपूरारुणीकृतदिवं क्वचिच्चतुरपरिहासरञ्जित-

---

टिप्पनकम्—वैपञ्चिकः—वैणिकः [ग]।

धृतः, विकटः–स्फुटः, शृङ्गारवेषः–शृङ्गारोद्दीपकस्वरूपं, येन ता शः स राजा, **आस्थानमण्डपं** सभागृहम्, **अगच्छत्** गतवानिति दूरेणान्वेति। कीदृशः? **वीरपुरुषैः** उद्भटजनैः, **सर्वतः** समन्ततः, **परिवृतः** परिवेष्टितः, कीदृशैः? **घटितपरिवेषैः** बद्धमण्डलीकैः, पुनः **धृतासिपट्टप्रभापटलपोषितप्रदोषतिमिरैः** धृतस्य–करगृहीतस्य, असिपट्टस्य–खड्गफलकस्य, प्रभापटलेन–कान्तिकलापेन, पोषितं–संवर्धितम्, प्रदोषतिमिरं–सायन्तनान्धकारो यैस्तादृशैः; पुनः **शरीररक्षाविधौ** शरीररक्षणकार्ये, **अधिकृतैः** नियुक्तैः। कीदृशमास्थानमण्डपम्? **द्वारदेशोपविष्टसोपायनानेकप्रधाननगरलोकं** द्वारदेशे–अन्तःप्रवेशनिर्गमप्रदेशे, उपविष्टाः–आसिताः, सोपायनाः–उपहारसहिताः, प्रधानाः–मुख्याः, नगरलोकाः–नागरिकजना यस्य तादृशम्; पुनः **अनेकभङ्गरचितरङ्गावलीतरङ्गितमसृणमणिकुट्टिमोत्सङ्गम्** अनेकभङ्गैः–बहुप्रकारैः, रचिताः–निर्मिताः, ये रङ्गाः–नृत्यमण्डपाः, नील-पीतादिवर्णा वा, तेषामावल्या, तरङ्गितः–तरङ्गत्वेन लक्षितः, मसृणमणिकुट्टिमस्य–चिक्कणमणिबद्धभूमेः, उत्सङ्गः–मध्यभागो यस्मिंस्तादृशम्; पुनः **अविरलप्रकीर्णपुष्पप्रकरम्** अविरलं–निरन्तरम्, प्रकीर्णः–प्रक्षिप्तः, पुष्पप्रकरः–पुष्पसमूहो यस्मिंस्तादृशम्; पुनः **वारयोषाभिः** वाराङ्गनाभिः, वेश्याभिरिति यावत्, **आपूर्यमाणपर्यन्तम्** आपूर्यमाणः–व्याप्यमानः, पर्यन्तः–प्रान्तभूमिर्यस्य तादृशम्, कीदृशीभिः? **अखिललोकप्रार्थनीयसङ्गमाभिः** अखिललोकैः–सर्वजनैः, प्रार्थनीयः–स्पृहणीयः, सङ्गमः–सम्पर्को यासां तादृशीभिः; पुनः **राजलक्ष्मीं** राजशोभां, **द्रष्टुं** साक्षात्कर्तुम्, **एकहेलया** युगपत, **उपगताभिः** आगताभिः, **मर्त्यलोकलक्ष्मीभिरिव** मर्त्यभुवनसम्बन्धिनीभिर्लक्ष्मीदेवीभिरिवेत्युत्प्रेक्षा; पुनः **अनर्घ्यरत्नाभरणभूषिताङ्गयष्टिभिः** अनर्घ्यैः–अमूल्यैः, रत्नाभरणैः–रत्नमयालङ्करणैः, भूषिता–उद्भासिता, अङ्गयष्टिः–शरीरयष्टिर्यासां तादृशीभिः; पुनः **क्वचित् सुखासीनसचिवपुत्रविचार्यमाणनव्यकविनिबद्धकाव्यगुणदोषविभागं** क्वचित्–कुत्रचित्स्थाने, सुखेन–आनन्देन, आसीनैः–उपविशद्भिः, सचिवपुत्रैः,–मन्त्रिपुत्रैः, विचार्यमाणः–आलोच्यमानः, नव्यकविनिबद्धस्य–नवीनकविप्रणीतस्य, काव्यस्य, गुणदोषविभागः–गुण-दोषयोर्विभागः–पार्थक्यं, यस्मिंस्तादृशम्; पुनः **क्वचिदाबद्धमण्डलीकवैपञ्चिकप्रपञ्चयमानललितपञ्चमग्रामरागं** क्वचित्–कस्मिंश्चित् स्थाने, आबद्धमण्डलीकैः–रचितमण्डलिकैः, वैपञ्चिकैः–विपञ्ची–वीणा, तद्वादनं शिल्पं येषां तैः, वीणावादिभिरित्यर्थः, प्रपञ्चयमानाः–स्फुटीक्रियमाणाः, पञ्चमः–"वायुः समुत्थितो नाभेरुरोहृत्कण्ठमूर्धसु। विचरन् मध्यमस्थानप्राप्त्या पञ्चम उच्यते॥" इत्यभियुक्तोक्तः, स्वरसन्दोहरूपो ग्रामश्च, रागो लयश्च यस्मिंस्तादृशम्; पुनः **क्वचिद्वाञ्छिताधिकारसेवकवारपरिचर्यमाणविकटवेत्रासनोपविष्टप्रधानसचिवं** क्वचित्–कस्मिंश्चित् स्थाने, वाञ्छितः–अभिलषितः, अधिकारः–उच्चाधिकारो यैस्तादृशानां सेवकानां–परिचारकाणाम्, वारेण–समूहेन, परिचर्यमाणः–सेव्यमानः, विकटे–विस्तृते, वेत्रासने–वेत्ररचितासने, उपविष्टः प्रधानसचिवः–प्रधानमन्त्री, यस्मिंस्तादृशम्, "स्तोमौघ-निकर-व्रात-वार-संघात-संचयाः" इत्यमरः; पुनः, **क्वचिल्लिख्यमाननिःसंख्यराजाज्ञालेखमुद्रासिन्दूरपूरारुणीकृतदिवं** क्वचित्–कुत्रचित् स्थाने, लिख्यमानानां, निःसंख्यानां–संख्यारहितानाम्, राजाज्ञानां–राजकीयादेशानाम्, ये लेखाः–तद्बोधकाक्षराणि, तेषां यानि मुद्रासिन्दूराणि–मसीशोषणार्थमक्षररञ्जनार्थं च तदुपरि विकीर्यमाणारुणरेणवः, तेषां पूरेण–पुञ्जेन, अरुणीकृता द्यौराकाशं यस्मिंस्तादृशम्, "सिन्दूरं रक्तचूर्णके" इति मेदिनी; पुनः **क्वचिच्चतुरपरिहासरञ्जितराजगणिकाकटाक्षवीक्षणकृतार्थीकृतपूर्वसंसृष्टविटसामन्तं** क्वचित्–कस्मिंश्चित् स्थले, चतुरेण–वैदग्ध्यपूर्णेन, परिहासेन,

राजगणिकाकटाक्षवीक्षणकृतार्थीकृतपूर्वसंसृष्टविटसामन्तं क्वचिददानरुष्टदुष्टप्रतीहारहठनिर्धार्यमाणरोषदष्टौष्ठावण्ठव्रातं सर्वतश्च प्रकटिताहङ्कारैः परुषहुङ्कारवित्रासितजनैरुद्धतांस्तर्जयद्भिर्मान्यलोकं कृताञ्जलिपुटैरावर्जयद्भिरूर्ध्वस्थितानुपवेशयद्भिरनुपयुक्तान्निष्काशयद्भिरधिकृतान् स्वकर्मसु व्यापारयद्भिर्वावदूकान् मूकव्रते धारयद्भिर्महाप्रतीहारैः कृतावेक्षणं द्वारदेशादपक्रान्तसकलपदातिपरिवारैरुदंशुमणिमुकुटभास्वरशिरोभिराखण्डलच्छिन्नपिच्छैर्गिरिभिरिव शिखरदीप्यमानवज्राग्निभिरितस्ततो निषण्णैरेकैकानुचरकृतसाहायकैर्महादण्डनायकैरध्यासितमध्यमतिभूयस्तया च राजलोकस्य कृच्छ्रलभ्यनिर्गमप्रवेशावस्थानमास्थानमण्डपमगच्छत् [ग] ॥

तत्र च नृपतिदेवताराधनव्यतिकरेण चिरकाललब्धावसरमतिदूरदर्शितादरैः प्रधानदौवारिकैः प्रवेश्य

टिप्पनकम्—प्रणयिलोकं दूतजनम् । **कृतालोकेन** एकत्र विहितालोकशब्देन, अन्यत्र कृतप्रकाशेन । **गतिरभसदोलायमानकज्जलस्निग्धनीलशिखाकलापेन** एकत्र गमनौत्सुक्येन चलन् कज्जलस्निग्धः चूडासमूहो यस्य स तथोक्तस्तेन, अन्यत्र कज्जलस्निग्धः इन्द्रमणितेजोज्वालाकलापो यस्य स तथोक्तस्तेन [घ] ।

रञ्जिताः–प्रसादिताः, या राजगणिकाः–राजवेश्याः, तासां कटाक्षेण–अपाङ्गभङ्ग्या, यद् वीक्षणं–दर्शनम्, तेन कृतार्थीकृताः–प्रमोदिताः, पूर्वसंसृष्टाः–पूर्वसम्मिलिताः, विटसामन्ताः–लम्पटक्षुद्रनृपा यस्मिंस्तादृशम्; पुनः **क्वचिददानरुष्टदुष्टप्रतीहारहठनिर्धार्यमाणरोषदष्टौष्ठावण्ठव्रातं** क्वचित्–कस्मिंश्चित् स्थाने, अदानेन–दानाभावेन, रुष्टः–क्रुद्धः, पुनः दुष्टप्रतीहारेण–दुष्टद्वारपालेन, हठेन–बलात्, निर्धार्यमाणः–समुदायात् पृथक् क्रियमाणः, रोषेण–अमर्षेण, दष्टौ ओष्ठौ यैस्तादृशानाम्, अवण्ठानां– दुर्बलानाम्, व्रातः–समूहो यस्मिंस्तादृशम्; पुनः **सर्वतः** सर्वांशतः, **महाप्रतीहारैः** प्रधानद्वारपालैः, **कृतावेक्षणं** कृतनिरीक्षणम्, कीदृशैस्तैः ? **प्रकटिताहङ्कारैः** आविष्कृताभिमानैः, पुनः **परुषहुङ्कारवित्रासितजनैः** परुषेण–तीव्रेण, हुङ्कारेण, वित्रासिताः–विभीषिता जना यैस्तादृशैः; पुनः **उद्धतान्** अविनीतजनान्, **तर्जयद्भिः** बिभीषयद्भिः; पुनः **मान्यलोकं** माननीयजनम्, **कृताञ्जलिपुटैः** रचिताञ्जलिपुटैः, **आवर्जयद्भिः**, नमस्कुर्वद्भिः; पुनः **ऊर्ध्वस्थितान्** उत्थितान्, **उपवेशयद्भिः** उपवेशनं कारयद्भिः; पुनः **अनुपयुक्तान्** अनावश्यकजनान्, **निष्काशयद्भिः** बहिरपसारयद्भिः; पुनः **अधिकृतान्** तत्तत्कार्येषु नियुक्तजनान्; **स्वकर्मसु** स्वस्वकार्येषु, **व्यापारयद्भिः** प्रेरयद्भिः; पुनः **वावदूकान्** वाचालजनान्, **मूकव्रते** मौनव्रते, **धारयद्भिः** स्थापयद्भिः; पुनः कीदृशमास्थानमण्डपम् ? **महादण्डनायकैः** प्रधानदण्डनीत्यध्यक्षैः, **अध्यासितमध्यम्** अधिष्ठितमध्यभागम्, कीदृशैः? **द्वारदेशादपक्रान्तसकलपदातिपरिवारैः** द्वारदेशात्–प्रवेशनिर्गमस्थानविशेषात्, अपक्रान्ताः–निष्क्रान्ताः, सकलाः–सर्वे, पदातयः–पादचारिणः, परिवाराः- सैनिका येषां तादृशैः; पुनः **उदंशुमणिमुकुटभास्वरशिरोभिः** उदंशुभिः–उद्गताः, अंशवः–किरणा येषां तादृशैः, मणिमुकुटैः–मणिमयमस्तकाभरणैः, भास्वराणि–दीप्यमानानि, शिरांसि–मस्तकानि येषां तादृशैः, अतः **आखण्डलच्छिन्नपिच्छैः** आखण्डलेन–इन्द्रेण, छिन्नाः खण्डिताः, पिच्छाः–पक्षा येषां तादृशैः, पुनः **शिखरदीप्यमानवज्राग्निभिः** शिखरे–उपरिभागे, दीप्यमानः–ज्वलन्, वज्राग्निः-वज्रनिर्गताग्निर्येषां तादृशैः, **गिरिभिरिव** पर्वतैरिवेत्युत्प्रेक्षा; **पुनः** कीदृशैः ? **इतस्ततः** अत्र तत्र, **निषण्णैः** उपविष्टैः; पुनः **एकैकानुचरकृतसाहाय्यकैः** एकैकेन, अनुचरेण–भृत्येन, कृतं, साहाय्यं–सहायता, येषां तादृशैः; पुनः कीदृशमास्थानमण्डपम् ? **राजलोकस्य** राजकीयजनस्य, **अतिभूयस्तया** अत्यन्ताधिक्येन, **कृच्छ्रलभ्यनिर्गमप्रवेशावस्थानं** कृच्छ्रलभ्यानि–स्थलसंकीर्णतया क्लेशसाध्यानि, निर्गमप्रवेशावस्थानानि-प्रवेशः–तत्रागमनम्, निर्गमः–ततो निष्क्रमणम्, अवस्थानं–तत्रावस्थितिश्च यत्र तादृशम् [ग]

च पुनः, **तत्र** सभामण्डपे, **नृपतिदेवताराधनव्यतिकरेण** नृपतेः–राज्ञः, देवताराधनव्यतिकरेण–देवताराधनव्यासङ्गवशेन, **चिरलब्धावसरं** चिरेण–दीर्घकालेन, प्राप्तावसरम्, **अतिदूरदर्शितादरैः** अतिदूरादेव, दर्शितः–प्रकटितः, आदरः–सम्मानो यैस्तादृशैः, **प्रधानदौवारिकैः** प्रधानद्वारपालैः, **प्रवेश्य प्रवेश्य** प्रवेशं कारयित्वा कारयित्वा, **प्रत्येकशः**

प्रवेश्य प्रत्येकशः कारितप्रणाममुपनीतविविधोपायनकलापं द्वीपान्तरायातमवनीपतीनां प्रधानप्रणधिलोकमवलोकनासनदानसंभाषणादिना यथोचितं प्रयुक्तेनोपचारेण पूजयित्वा स्थित्वा च क्षणं विसर्जितास्थानलोकः स्तोकशुचिसमाचारपरिचारकपरिवृतः सर्वतः कृतालोकेन पुरतः प्रसर्पता गतिरभसदोलायमानकज्जलस्निग्धनीलशिखाकलापेन दीपिकानिवहेन वेत्रधारीसमूहेन च समकालमावेद्यमानवर्त्मा शुद्धान्तमगच्छत् [घ] ॥

तत्र चाविरलविप्रकीर्णपुष्पबलिशबलितातिमसृणमणिकुट्टिमे विकटपत्रभङ्गचित्रितचामीकरस्तम्भविरचनाचारुण्युपरिविस्तारिततारनेत्रपटविताने वितानकप्रान्तलम्बमानलोलमुक्तास्रजि ज्वलदकम्पयष्टिप्रदीपप्रकटितप्रशस्तभित्तिचित्रे सुकल्पिताचरणतल्पतलोपशोभिनि शय्याशिरोभागनिहितधौतकलधौतनिद्राकलशे विशालवेश्मनि कृतावस्थानाम्, निवर्तितनिरन्तराहारग्रहणेन निगृहीतवृत्तिना सकलराज्यसुखोपभोगेष्वतिदुष्करेण व्रतच-

---

एकैकशः, **कारितप्रणामं** विधापिताभिवादनम्, **उपनीतविविधोपायनकलापम्** उपनीतः–आनीतः, विविधानाम्–अनेकविधानाम्, उपायनानां–प्राभृतानाम्, कलापः–समूहो येन तादृशम्, **द्वीपान्तरायातम्** अन्यद्वीपेभ्य आगतम्, **अवनीपतीनाम्** राज्ञाम्, **प्रधानप्रणधिलोकं** प्रधानदूतजनम्, **यथोचितं** यथायोग्यम्, **प्रयुक्तेन** अनुष्ठितेन, **अवलोकनासनदानसम्भाषणादिना** दर्शनोपवेशनाऽऽलापप्रभृतिना, **उपचारेण** पूजोपकरणेन, पूजयित्वा, **च** पुनः, **क्षणं** मुहूर्तम् **स्थित्वा,** विलम्ब्य, **विसर्जितास्थानलोकः** त्यक्तसभोपविष्टजनः सन्, **शुद्धान्तम्** अन्तःपुरम्, **अगच्छत्** गतवान्; कीदृशः ? **स्तोकशुचिसमाचारपरिचारकपरिवृतः** शुचिः–पूतः, समाचारः–चरितं, यस्य तादृशेन, स्तोकेन–परिमितेन, परिचारकेण–सेवकेन, परिवृतः–परिवेष्टितः; पुनः **दीपिकानिवहेन** दीपिकासमूहेन, **वेत्रधारीसमूहेन** द्वारपालिकासमूहेन च, **समकालं** युगपत्, **आवेद्यमानवर्त्मा** आवेद्यमानं–दर्श्यमानम्, वर्त्म–मार्गो यस्य तादृशः; कीदृशेन तेन ? **सर्वतः** सर्वदिक्षु, **कृतालोकेन** कृतः, आलोकः–प्रकाशः, पक्षे अवलोकनं, जयशब्दो वा येन तादृशेन, पुनः **पुरः** अग्रे, **प्रसर्पता** प्रसरता, पक्षे प्रकर्षेण गच्छता, पुनः **गतिरभसदोलायमानकज्जलस्निग्धनीलशिखाकलापेन** गतिरभसेन–स्फुरणवेगेन, दोलायमानः–दोलावदितस्ततः सञ्चलनशीलः, कज्जलस्निग्धः–कज्जलवत् श्लक्ष्णः, नीलः–इन्द्रनीलमणिकृतः, शिखाकलापः–ज्वालासमूहो यस्य तादृशेन, पक्षे गतिरभसेन–गमनवेगेन, दोलायमानः, कज्जलवत् स्निग्धः–श्लक्ष्णः, नीलः–श्यामवर्णश्च शिखाकलापः–शिरःस्थितकेशपाशो यस्य तादृशेन [घ] ॥

तत्र तस्मिन्, अन्तःपुर इत्यर्थः, **मदिरावतीं** तन्नाम्नीं निजभार्याम्, **अपश्यत्** दृष्टवान् कीदृशीं ? **विशालवेश्मनि** विशालभवने, **कृतावस्थानां** कृतस्थितिम्, कीदृशे ? **अविरलविप्रकीर्णपुष्पबलिशबलितातिमसृणमणिकुट्टिमे** अविरलविप्रकीर्णेन–निरन्तरप्रक्षिप्तेन, पुष्पबलिना–पुष्पप्रचुरपूजोपचारेण, शबलितः–चित्रितः, अतिमसृणमणिकुट्टिमः–अतिचिक्कण; मणिखचितभूमिर्यस्मिंस्तादृशे; पुनः **विकटपत्रभङ्गचित्रितचामीकरस्तम्भरचनाचारुणि** विकटैः–प्रकटैः, पत्रभङ्गैः–पत्ररचनाभिः, चित्रिताः–चित्रान्विताः, ये चामीकरस्तम्भाः–सुवर्णमयस्तम्भाः, तेषां रचनाभिः–निर्माणैः, चारुणि–मनोहरे- पुनः **उपरिविस्तारिततारनेत्रपटविताने** उपरि–ऊर्ध्वभागे, विस्तारितः, तारनेत्रः–तारं-विशालं, नेत्राकृतिर्यस्मिंस्तादृशः, पटवितानः–वस्त्ररूप उल्लोचो यस्मिंस्तादृशे; पुनः **वितानकप्रान्तलम्बमानलोलमुक्तास्रजि** वितानकप्रान्ते-उल्लोचपार्श्वे, लम्बमाना–अवनमन्ती, लोला–चञ्चला, मुक्तास्रक्–मौक्तिकमाला यस्मिंस्तादृशे; पुनः **ज्वलदकम्पयष्टिप्रदीपप्रकटितप्रशस्तभित्तिचित्रे** ज्वलन्तः–दीप्यमानाः, अकम्पाः–निश्चलाः, ये यष्टिप्रदीपाः–यष्ट्युपरि निहिताः प्रदीपाः, तैः प्रकटितानि, प्रशस्तानि, भित्तिचित्राणि–कुड्यस्थितचित्राणि, यस्मिंस्तादृशे; पुनः **सुकल्पितास्तरणतल्पोपशोभिनि** सुष्ठु कल्पितं–रचितम्, आस्तीर्णमिति यावत्, आस्तरणम्–आवरणं, यस्मिन् तादृशेन, तल्पेन–शय्यया, उपशोभिनि–मनोहारिणि; पुनः **शय्याशिरोभागनिहितधौतकलधौतनिद्राकलशे** शय्यायाः शिरोभागे-मस्तकभागे, निहितः–सन्निवेशितः, धौतः–स्वच्छः, कलधौतस्य–सुवर्णस्य, निद्राकलशः–सुखेन निद्राजनकः कुम्भो यस्य तादृशे, पुनः कीदृशीम् ? **प्रकामकर्शितशरीरां** प्रकामम्–अत्यन्तम्, कर्शितं–कृशतामापादितम्, शरीरं यस्यास्तादृशीम्, केन ? **व्रतचरणेन** नियमाचरणेन, कीदृशेन ? **निवर्तितनिरन्तराहारग्रहणेन** निवर्तितं–निवारितम्, निरन्तरं–सार्वदिकम्, आहारग्रहणं–भोजनग्रहणं यस्मिंस्तादृशेन;

रणेन भर्तुरदर्शनेन च प्रकामकर्शितशरीराम्, उज्झितालङ्कारामप्यकृत्रिमेण कान्तिसुकुमारतादिगुणपरिगृहीतेनाङ्गमाधुर्येण सुकविवाचमिव सहृदयानां हृदयमावर्जयन्तीम्, ज्योत्स्नावदातनिर्मलाम्बरधारिणीं राकारजनिमिव, वारंवारमधिगताधिकविकाशसंपदा मुखेन परिपूर्णमिन्दुमण्डलं तुलयन्तीम्, उपनीतविविधवस्त्राभरणमुत्सवागतं बन्धुवनितावर्गं सहस्रगुणमूल्यैरंशुकै रत्नालङ्कारैश्च संभावयन्तीम्, शक्रावतारगमने सबहुमानेन वैमानिकदर्शने सविस्मयेन दिव्यहाराङ्गुलीयकालङ्कारलाभे सपरितोषेण वैतालरूपव्यावर्णने सत्रासेन कण्ठच्छेदसमये समासादितमूर्च्छेन राजलक्ष्मीनर्मभाषितश्रवणे सहासोल्लासेन भाविखेचरचक्रसाम्राज्यसुतवरप्राप्त्यवसरे समारूढपरमानन्दनिःष्यन्देन मनसा पार्श्ववर्तिपरिजननिवेद्यमानं पत्युरतिक्रान्तयामिनीवृत्तान्तमाकर्णयन्तीम्,

---

पुनः **सकलराज्यसुखोपभोगेषु** सकलानि—समस्तानि, यानि राज्यसुखानि, तेषामुपभोगेषु—अनुभवेषु, **निगृहीतवृत्तिना** निरुद्धमनोवृत्तिना; पुनः **अतिदुष्करेण** अतिदुःखसाध्येन; **च** पुनः, **भर्तुः** पत्युर्मेघवाहनस्य, **अदर्शनेन** दर्शनाभावदुःखेन; पुनः कीदृशीम्? **उज्झितालङ्कारामपि** त्यक्ताभरणामपि, पक्षे त्यक्तानुप्रासोपमाद्यलङ्कारामपि, **सुकविवाचमिव** सत्कविवाणीमिव, **अकृत्रिमेण** स्वाभाविकेन, **कान्तिसुकुमारतादिगुणपरिगृहीतेन** कान्तिः—देहद्युतिः, सुकुमारता—अतिकोमलता च आदिर्येषां तादृशैः गुणैः, परिगृहीतेन—अन्वितेन, **अङ्गमाधुर्येण** शरीरसौन्दर्येण, पक्षे कान्तिः—औज्वल्यम्, हालिकादिपदविन्यासवैपरीत्येन विजातीयशोभाशालित्वमिति यावत्, सुकुमारता—अक्षराणामपारुष्यम्, तत्प्रभृतयो ये गुणाः—आत्मनः शौर्यादय इव रसस्योत्कर्षका धर्माः, तैः परिगृहीतेन, **अङ्गमाधुर्येण** अङ्गस्य—काव्यशरीरभूतस्य शब्दस्य, यन्माधुर्यं—श्रुतिसुखाधायकत्वं तेन, **सहृदयानां** हृदयवताम्, चेतनानामित्यर्थः, पक्षे काव्यार्थपरिशीलनपरिणतमतीनाम्, **हृदयम्** अन्तःकरणम्, **आवर्जयन्तीम्** आकर्षन्तीम्, पुनः **राकारजनिमिव** पूर्णिमारात्रिमिव, **ज्योत्स्नावदातनिर्मलाम्बरधारिणीं** ज्योत्स्नावत्—चन्द्रिकावत्, अवदातः—धवलः, निर्मलः—स्वच्छश्च, योऽम्बरः—वस्त्रम्, तद्धारिणीम्, पक्षे ज्योत्स्नया—चन्द्रिकया, अवदातं निर्मलं च यदम्बरम्—आकाशम्, तद्धारिणीम्, पुनः **अधिगताधिकविकाससम्पदा** अधिगता—प्राप्ता, अधिका—विपुला, विकाससम्पत्—प्रकाशसम्पत्तिर्येन तादृशेन, मुखेन, **वारं वारं** पुनः पुनः, परिपूर्णं—सम्पूर्णम्, **इन्दुमण्डलं** चन्द्रमण्डलम्, **तुलयन्तीम्** उपमिन्वतीम्, पुनः **उपनीतविविधवस्त्राभरणम्** उपनीतानि—उपहृतानि, विविधानि वस्त्राणि, आभरणानि-आभूषणानि च येन तादृशम्, **उत्सवागतम्** उत्सवप्रसङ्गेनागतम्, **बन्धुवनितावर्गं** स्वबन्धुरूपनारीगणम्, **सहस्रगुणमूल्यैः** तदुपनीतवस्त्राभरणमूल्यापेक्षया सहस्रगुणानि—सहस्रगुणाधिकानि, मूल्यानि—निष्क्रयद्रव्याणि, येषां तादृशैः, **अंशुकैः** श्लक्ष्णवस्त्रैः, कौशेयवस्त्रैरिति यावत्; **च** पुनः, **रत्नालङ्कारैः** रत्नमयाभूषणैः, **सम्भावयन्तीं** सत्कुर्वतीम्। पुनः **पार्श्ववर्तिपरिजननिवेद्यमानं** पार्श्ववर्तिपरिजनेन—निकटवर्तिपरिवारेण, बोध्यमानम्, **पत्युः** मेघवाहनस्य, **अतिक्रान्तयामिनीवृत्तान्तं** व्यतीतरात्रिसमाचारम्, **मनसा** हृदयेन, **आकर्णयन्तीं** शृण्वतीम्, कीदृशेन मनसा? **शक्रावतारगमने** शक्रावताराख्यतीर्थप्रयाणश्रवणक्षणे, **सबहुमानेन** बहुमानसहितेन; पुनः **वैमानिकदर्शने** विमानवासिदेवदर्शनश्रवणक्षणे, **सविस्मयेन** आश्चर्यान्वितेन; पुनः **दिव्यहाराङ्गुलीयकालङ्कारलाभे** परमोत्तमहाराङ्गुलीयकरूपाभरणप्राप्तिश्रवणक्षणे, **सपरितोषेण** सन्तुष्टेन; पुनः **वेतालरूपव्यावर्णने** वेतालसम्बन्धिभयङ्कराकृतिवर्णनश्रवणक्षणे, **सत्रासेन** भीतेन; पुनः **कण्ठच्छेदसमये** कण्ठकर्तनश्रवणक्षणे, **समासादितमूर्च्छेन** मूर्च्छितेन; पुनः **राजलक्ष्मीनर्मभाषितश्रवणे** राजलक्ष्म्याः—राजवैभवाधिष्ठातृदेव्याः, नर्मणा—हासेन, यद् भाषितम्—उक्तम्, तस्य श्रवणे—श्रवणक्षणे, **सहसोल्लासेन** सहसा—शीघ्रम्, उल्लासः—आनन्दो यस्य तादृशेन, **सहासोल्लासेने**ति पाठे हासेन सहितः सहासः, हासपूर्वक उल्लासो यस्य तादृशेन; पुनः **भाविखेचरचक्रसाम्राज्यसुतवरप्राप्त्यवसरे** खेचरचक्रस्य—विद्याधरसमूहस्य, यत् साम्राज्यं—सम्राट्त्वम्, तद् भावि—भविष्यद् यस्य तादृशो यः सुतः—पुत्रः, तदर्थवरलाभश्रवणक्षणे, **समारूढपरमानन्दनिःस्यन्देन** समारूढः—समासादितः, परमानन्दस्य—अत्यानन्दामृतस्य, निःस्यन्दः—प्रस्रवणम्, प्रादुर्भाव इति यावत्, येन तादृशेन। पुनः कीदृशीम्? **अन्तःपुरविलासिनीभिः** अन्तःपुरवधूभिः, **परिवृतां** वेष्टिताम्, कीदृशीभिः? **अनतिदूरवर्तिनीभिः** निकटवर्तिनीभिः; पुनः **संनिधापितसितकुसुमदामदूर्वाक्षतदधिलवाभिः** संनिधापिताः—मङ्गलार्थमुपस्थापिताः, सितकुसुमदाम्नः—श्वेतपुष्पमाल्यस्य, दूर्वायाः—तदाख्यतृणविशेषस्य,

अनतिदूरवर्तिनीभिः संनिधापितसितकुसुमदामदूर्वाक्षतदधिलवाभिरमलकाञ्चनस्थालविनिहितोच्छिखज्वलत्पिष्टमयमङ्गलप्रदीपाभिः प्रत्यग्रविरचितचतुष्कचारुणि मणिवितर्दिकापृष्ठपीठे प्रतिष्ठापितविततहेमपट्टाभिर्मुहुर्मुहुर्द्वारदेशप्रहितलोचनाभिः प्रतिपालयन्तीभिः क्षोणीपालागमनमतिरुचिरवेषाभिरन्तःपुरविलासिनीभिः परिवृतां मदिरावतीमद्राक्षीत् [ङ] ॥

दृष्ट्वा च दूरविकसितस्मितार्द्रदृष्टिस्तां ससंभ्रमकृताभ्युत्थानां करे गृहीत्वा तत्र मणिवेदिकापृष्ठवर्तिनि समीपोपविष्टैर्युगपदुत्थाय विहितप्रणामैः प्रधानान्तर्वंशिकैः सादरमुपदर्शिते स्पर्शवति हेमविष्टरे न्यवेशयत् [च]। उपविष्टश्च दक्षिणं पार्श्वमाश्रित्य तस्याः क्रमेणैताभिः सकललौकिकाचारकुशलाभिर्वारवनिताभिः प्रयुक्तमवतारणकमङ्गलमन्वभवत् [छ] ॥

अथ पुरोहितपुरःसरेषु विहितसायंतनस्वस्त्ययनकर्मस्वपक्रान्तेषु, प्रमोदसलिलप्लुतेक्षणासु दत्त्वाऽक्षतानुदीरिताशीष्षु निर्गतासु बान्धववृद्धासु, प्रस्थितेषु यथास्वमधिकारसदनानि सौविदल्लेषु, प्रारब्धपरिहासपेशल-

---

अक्षतस्य—आर्द्रतण्डुलस्य, दध्नश्च, लवाः—अंशा याभिस्तादृशीभिः; पुनः **अमलकाञ्चनस्थालविनिहितोच्छिखज्वलत्पिष्टमयमङ्गलप्रदीपाभिः** अमलेषु—निर्मलेषु, काञ्चनस्थालेषु—सुवर्णमयपात्रेषु, विशेषेण निहिताः—स्थापिता , उच्छिखाः—उद्-ऊर्ध्वं, शिखा—ज्वाला, येषां तादृशाः, पिष्टमयाः—स्निग्धचूर्णमयाः, मङ्गलप्रदीपा याभिस्तादृशीभिः; पुनः **प्रत्यग्रविरचितचतुष्कचारुणि** प्रत्यग्रं—नूतनं यथा स्यात् तथा, विरचितेन—निर्मितेन, चतुष्केण—चतुःस्तम्भेन मण्डपेन, चारुणि—मनोहरे, **मणिवितर्दिकापृष्ठपीठे** मणिमयवेदिकापृष्ठभागरूपासने, **प्रतिष्ठापितविततहेमपट्टाभिः** प्रतिष्ठापितानि—संस्थापितानि, विततानि—विस्तृतानि, हेमपट्टानि—सुवर्णमयोच्चपीठानि याभिस्तादृशीभिः; पुनः **द्वारदेशप्रहितलोचनाभिः** द्वारदेशं प्रहिते—प्रेरिते, लोचने याभिस्तादृशीभिः; पुनः **क्षोणीपालागमनं** क्षोणीपालस्य—राज्ञः, आगमनं **प्रतिपालयन्तीभिः** प्रतीक्षमाणाभिः; पुनः **अतिरुचिरवेषाभिः** अतिमनोहरवेषशालिनीभिः [ङ] ॥

दृष्ट्वा च तां तथाविधामवलोक्य तु, **दूरविकसितस्मितार्द्रदृष्टिः** दूरादेव विकसिता—उत्फुल्ला, स्मितेन—मन्दहासेन, आर्द्रा—सरसा, यद्वा स्मिता—मन्दहासान्विता, सरसा—अश्रुभिरार्द्रा, दृष्टिर्यस्य तादृशः, **ससम्भ्रमकृताभ्युत्थानां** सवेगमभ्युत्थिताम्, **तां** मदिरावतीम्, **करे** हस्ते, गृहीत्वा, **तत्र** तस्मिन्, **हेमविष्टरे** सुवर्णपट्टे, **न्यवेशयत्** उपवेशितवान्, स राजेति शेषः। कीदृशे? **मणिवेदिकापृष्ठवर्तिनि** मणिवेदिकोपरि विद्यमाने; पुनः **युगपदुत्थाय** सहैवोत्थाय, **विहितप्रणामैः** कृताभिवादनैः, **समीपोपविष्टैः** समीपस्थितैः, **प्रधानान्तर्वंशिकैः** अन्तः-अभ्यन्तरः, वंशः—गृहम्, तत्र नियुक्तैः, मुख्यभूतैरन्तःपुराधिकृतजनैरिति यावत्, **सादरं** सबहुमानम् , **उपदर्शिते** दृष्टिगोचरीकारिते, पुनः **स्पर्शवति** प्रशस्तस्पर्शने, "अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः" इत्यमरः [च]। **तस्याः** मदिरावत्याः, **दक्षिणपार्श्वं** दक्षिणभागम्, **आश्रित्य** अधिष्ठाय, **उपविष्टः** स्वयमपि कृतोपवेशनः स राजा, **सकललौकिकाचारकुशलाभिः** अशेषलौकिकव्यवहारनिपुणाभिः, **एताभिः** अनुपदमुक्ताभिः, **वारवनिताभिः** वेश्याभिः, **प्रयुक्तं** कृतपूर्वम्, यद् **अवतारणकमङ्गलं** वस्त्राञ्चलादिना पूजनरूपमङ्गलं स्वागतमङ्गलगानं वा, तत् **अन्वभवत्** अनुभूतवान् [छ]।

अथ अनन्तरम्, **पुरोहितपुरस्सरेषु** पुरोहितप्रमुखेषु, **षट्कर्मसु** अध्ययनाऽध्यापन-यजन-याजन-दान-प्रतिग्रहरूपाणि षट् कर्माणि येषां ते षट्कर्माणो विप्रास्तेषु, **विहितसायन्तनस्वस्त्ययनकर्मसु** विहितम्-अनुष्ठितम्, सायन्तनं—सायंकालिकम्, स्वस्त्ययनं—कल्याणफलककर्मविशेषः, स्वस्तिपदघटितमन्त्रपाठ इति यावत्, यैस्तादृशेषु, अत एव **अपक्रान्तेषु** निष्क्रान्तेषु सत्सु, तथा **प्रमोदसलिलप्लुतेक्षणासु** प्रमोदसलिलैः—आनन्दजलैः, प्लुते व्याप्ते, ईक्षणे नेत्रे यासां तादृशीषु, **बान्धववृद्धासु** बन्धुभूतवृद्धस्त्रीजनेषु, **अक्षतान्** शुभाशीर्व्यञ्जकार्द्रतण्डुलान्, **दत्त्वा** उत्क्षिप्य, **उदीरिताशीष्षु** उक्ताशीर्वादासु, अत एव **निर्गतासु** निष्क्रान्तासु सतीषु, तथा **सौविदल्लेषु** अन्तःपुररक्षकजनेषु, **यथास्वं** यथायोग्यम्, **अधिकारसदनानि** रक्षणाय स्वस्वाधिकृतगृहान्, **प्रस्थितेषु** कृतप्रस्थानेषु। तथा **प्रारब्धपरिहासपेशलकथासु**

कथासु स्थित्वा मुहूर्तमपसृतासु सव्याजं प्रियासहचरीषु, प्रकटिताङ्गरागशुक्तिषु प्रमृष्टमणिदर्पणासु समुत्सर्पित-विलासदीपवर्तिषु संनिधापितकुसुमपटवासताम्बूलरत्नालङ्कारपटलकासु निर्यातासु शुद्धान्तशय्यापालिकासु, विविक्ततामुपगते द्वारकपाटसंघटनघनविसर्पदगरुघनसारधूपोद्गारसौरभे वासभवने, भूमिपालस्तिर्यगावलित-कण्ठकाण्डेन वदनपुण्डरीकेण प्रत्यवयवं विलोक्य स्पृष्ट्वा च करतलेन मन्दमन्दमानन्दनिर्यत्पुलककलिकाकोर-कितानि मदिरावतीगात्राणि किञ्चिदाकुञ्चितेक्षणः सकृप इव खिन्नाक्षरोद्गारं शनैर्व्याजहार—'देवि! दृढ-मायासितासि, मयैव गाढकृतनिश्चयेन त्वदर्थसिद्ध्यर्थमध्यवसिते देवतासमाराधनविधौ किमिति निष्कारण-मियन्ति वासराणि प्रकृतिकर्कशजनोचितैर्व्रतकर्मभिः कदर्थितोऽयं सततसुखोचितस्त्वयात्मा, किमर्थमेषा मदङ्कशय्याशयनलालिता ललिताङ्गि! शायिता निरावरणासु स्थण्डिलस्थलीषु स्थलारविन्दकेसरसरससुकुमारा काययष्टिः, किमिति निर्दये! निसर्गपेलवं मध्यभागमनुदिवसमुपवासैः कर्शयन्त्या कृतं प्रकृतिकर्कशस्यास्य

प्रारब्धा—वक्तुमुपक्रान्ता, परिहासपेशला—हास्यमनोहरा, कथा—वाक्यप्रबन्धो याभिस्तादृशीषु, **प्रियासहचरीषु** प्रियासखीषु, **मुहूर्तं** क्षणम्, **स्थित्वा** विलम्ब्य, **सव्याजं** केनचिच्छद्मना, **अपसृतासु** निर्गतासु। तथा **शुद्धान्तशय्यापालिकासु** अन्तःपुरशय्यारक्षिकासु, तद्विन्यासिकास्विति यावत्, **निर्यातासु** निर्गतासु सतीषु, कीदृशीषु? **समुत्सर्पितविलासदीपवर्तिकासु** समुत्सर्पिता—समुत्तेजिता, विलासदीपस्य—सुरतप्रदीपस्य, वर्तिः—दशा, याभिस्तादृशीषु; पुनः **प्रकटिताङ्गरागशुक्तिषु** प्रकटिताः—मञ्जूषादेरुद्धृताः, अङ्गरागस्य—अङ्गविलेपनद्रव्यस्य, आधारभूताः शुक्तयो याभिस्तादृशीषु; पुनः **प्रमृष्टमणिदर्पणासु** प्रकर्षेण मृष्टाः—विशोधिताः, मणिदर्पणाः—मणिमयदर्पणा याभिस्तादृशीषु; पुनः **सन्निधापितकुसुमपटवासताम्बूलरत्नालङ्कारपटलकासु** सन्निधापितम्—उपस्थापितम्, कुसुमानां—पुष्पाणाम्, पटवासानां—वसनवासकानां—कुङ्कुमादिचूर्णानाम्, ताम्बूलानां—नागवल्लीदलानाम्, रत्नालङ्काराणां—रत्नमयाभरणानाम्, पटलं—समूहो याभिस्तादृशीषु। तथा **द्वारकपाटसंघटनघनविसर्पदगरुघनसारधूपोद्गारसौरभे** द्वारकपाटयोः—द्वारवर्तिकपाटयोः, संघटनेन—संयोजनेन, घनं—सान्द्रं यथा स्यात् तथा, विसर्पत्—अन्तः प्रसरत्, अगुरु—सुगन्धिद्रव्यविशेषः, घनसारः—कर्पूरः, तयोर्धूपस्योद्गारेण—प्रसारेण, सौरभम्—आमोदो यस्मिंस्तादृशे, **वासभवने** वासगृहे, **विविक्ततां** निर्जनताम्, **उपगते** प्राप्ते सति, **भूमिपालः** राजा मेघवाहनः, **तिर्यगावलितकण्ठकाण्डेन** तिर्यक्—कुटिलं यथा स्यात् तथा, आवलितः—आनमितः, कण्ठकाण्डः—कण्ठरूपः काण्डः—नालो यस्य तादृशेन, **वदनपुण्डरीकेण** मुखकमलेन, **आनन्दनिर्यत्पुलककलिकाकोरकितानि** आनन्देन निर्यतीभिः—निःसरन्तीभिः, पुलककलिकाभिः—रोमाञ्चकोरकैः, कोरकितानि—व्याप्तानि, **मदिरावतीगात्राणि** मदिरावतीशरीराणि, **प्रत्यवयवं** प्रत्यङ्गम्, **विलोक्य** दृष्ट्वा, **च** पुनः, **करतलेन** हस्ततलेन, **मन्दं मन्दं** किञ्चित् किञ्चित्, **स्पृष्ट्वा** स्पर्शं कृत्वा, **किञ्चिदाकुञ्चितेक्षणः** किञ्चित्सङ्कोचितनयनः, **सकृप इव** सदय इव, **खिन्नाक्षरोद्गारं** खिन्नः—खेदान्वितः, अक्षरोद्गारः—अक्षरोच्चारणं यस्मिंस्तादृशं यथा स्यात् तथा, **शनैः** मन्दम्, **व्याजहार** उक्तवान्, किमित्याह—**देवि**! राज्ञि!, त्वं **दृढम्** अत्यन्तम्, **आयासिता** क्लेशिता, **असि** वर्तसे, **त्वदर्थसिद्ध्यर्थं** त्वत्पुत्ररूपार्थसिद्ध्यर्थम्, **गाढकृतनिश्चयेन** कृतदृढनिश्चयेन, मयैव, **अध्यवसिते** संकल्पिते, **देवतासमाराधनविधौ** देवतार्चनकार्ये, **निष्कारणं** वृथैव, **इयन्ति** एतावन्ति, **वासराणि** दिनानि, **प्रकृतिकर्कशजनोचितैः** प्रकृत्या—स्वभावेन, कर्कशाः—कठोरकलेवराः, ये जनाः, तदुचितैः—तद्योग्यैः, **व्रतकर्मभिः** नियमाचरणैः, **सततसुखोचितः** अनवरतसुखानुभवयोग्यः, अयमात्मा, **किमिति** किमर्थं **त्वया** भवत्या, **कदर्थितः** क्लेशितः। हे **ललिताङ्गि**! सुन्दरशरीरे!, **स्थलारविन्दकेसरसरससुकुमारा** स्थलारविन्दस्य—स्थलकमलस्य, ये केसराः—किञ्जल्काः, तद्वत् सरसा—स्निग्धा, सुकुमारा—अतिकोमला, **मदङ्कशय्याशयनलालिता** मदीयोत्सङ्गरूपशय्यायां शयनेन—स्वपनेन, लालिता—प्रसादिता, एषा **काययष्टिः** स्वशरीरयष्टिः, **निरावरणासु** आवरणरहितासु, **स्थण्डिलस्थलीषु** चत्वरभूमिषु, किमर्थं **शायिता** स्वापिता,। हे **निर्दये**! दयारहिते!, **निसर्गपेलवं** स्वभावतः कोमलम्, **मध्यभागं** शरीरमध्यावयवम्, **अनुदिनं** प्रतिदिनम्, **उपवासैः** अनशनैः, **कर्शयन्त्या** कृशतामा-

कुचयुगलस्य साहायकम्, अहो ते बालिशत्वम्, अहोऽनालोचकत्वम्, अहो यदृच्छाकारिता' इत्यभिधाय सत्वराकृष्टसंनिकृष्टविलासोपकरणपटलकः सविलेपनां सालङ्कारां सतिलकां सावतंसां सशेखरां स्वकरेण तां चकार [ज] ॥

दृष्ट्वा च विरतनिमेषया दृष्ट्या सुचिरमतिचारुणा तेन वेषग्रहणेन तैश्च तत्कालमाविर्भूतैः प्रियप्रेमातिशयजन्मभिः स्मरविकारैर्द्विगुणतररम्यदर्शनां सुदृढमाश्लिष्य शयनीयमनयत, तत्रैव च तया सह सुष्वाप [झ]। स्वल्पावशेषायां च क्षपायामधोमुखविषाणकोटिनोर्ध्वचरणेन लाञ्छनमृगेण विधृतमूलाग्रभागव्यत्यये व्रजत्यस्तमस्ताचलचकोरकामिनीमन्दमन्दाचान्तविच्छायविरसचन्द्रिके चन्द्रमसि, प्रतिवेलमुन्नतनतशिखेषु तत्क्षणमुदयमानमरुणमिव वातायनान्तरेणावलोकयत्सु निजप्रभापहारभीतेषु वासभवनप्रदीपेषु, प्रभातपरुषमारुताहतासु तनुतमिस्रच्छेदपल्लवकृतनिवेशमवश्यायजलबिन्दुजालमिव नक्षत्रनिवहमजस्रमुज्झतीष्वाशालतासु, पर्याय-

---

पादयन्त्या, त्वयेति शेषः, **प्रकृतिकर्कशस्य** स्वभावतः कठोरस्य, अस्य **कुचयुगलस्य** स्तनद्वयस्य, साहाय्यकं सहायत्वम्, स्थौल्यार्थ उपकार इति यावत्, **किमिति** किमर्थं **कृतं** विहितम्, शरीरमध्यभागस्य कार्श्ये कुचस्थौल्यस्यावश्यम्भावात्। **ते** तव, **बालिशत्वं** मूर्खत्वम्, **अहो** खेदजनकम्, **अनालोचकत्वम्** अविचार्यकार्यकारित्वम्, **अहो** खेदजनकम्, **यदृच्छाकारिता** स्वेच्छया कार्यकारित्वमपि, **अहो** खेदजनकम्। **इति** इत्थम्, **अभिधाय** उक्त्वा, **सत्वराकृष्टसन्निकृष्टविलासोपकरणपटलकः** सत्वरं-शीघ्रम्, आकृष्टम्-आकृष्य गृहीतम्, सन्निकृष्टानां-निकटस्थितानाम्, विलासोपकरणानां-विलासोपयोगिनां विलेपनद्रव्यादीनाम्, पटलं-समूहो येन तादृशः स राजा, **स्वकरेण** स्वहस्तेन, **तां** राज्ञीम्, **सविलेपनां** विलेपनद्रव्येण विलिप्ताम्, पुनः **सालङ्काराम्** अलङ्कारैरलङ्कृताम्, पुनः **सतिलकां** रचिततिलकाम्, पुनः **सावतंसाम्** अवतंसेन-कर्णपूरेण सहिताम्, **सशेखरां** मस्तकाभरणयुताम्, **चकार** कृतवान्, "पुंस्युत्तंसाऽवतंसौ द्वौ कर्णपूरे च शेखरे" इत्यमरः [ज]। **अतिचारुणा** अतिमनोहरेण, **तेन** अनुपदमुपवर्णितेन, **वेषग्रहणेन** वेषधारणेन, **च** पुनः, **तत्कालं** तत्क्षणम्, **आविर्भूतैः** उद्भूतैः, **प्रियप्रेमातिशयदर्शनजन्मभिः** प्रियस्य-भर्तुः, यः प्रेमातिशयः-स्नेहातिशयः, तस्माज्जन्म येषां तादृशैः, **तैः** प्रसिद्धैः, **स्मरविकारैः** कामविकारैः, **द्विगुणतररम्यदर्शनां** द्विगुणतरम्-अतिद्विगुणम्, रम्यं-मनोहरम्, दर्शनं यस्यास्तादृशीम्, मदिरावतीमिति शेषः, **विरतनिमेषया** निमेषशून्यया, दृष्ट्या-नेत्रेण, **सुचिरम्** अतिदीर्घकालम्, **दृष्ट्वा** निरीक्ष्य, **सुदृढम्** अत्यन्तम्, **आश्लिष्य** आलिङ्ग्य, **शयनीयं** शय्याम्, **अनयत** नीतवान्। **च** पुनः, **तत्रैव** तस्यामेव शय्यायाम्, **तया** मदिरावत्या सह, **सुष्वाप** सुप्तवान् [झ]। **च** पुनः, **स्वल्पावशेषायां** स्वल्पः-अत्यल्पः, अवशेषो यस्यास्तादृश्याम्, किञ्चिदवशिष्टायामिति यावत्, **क्षपायां** रात्रौ, **स्वप्ने** स्वप्नावस्थायाम्, राजा **सुरेन्द्रवाहनम्** इन्द्रवाहनभूतम्, **वारणं** हस्तिनम्, ऐरावतमित्यर्थः, **अपश्यत्** दृष्टवानिति दूरेणान्वेति। कस्मिन्नवसरे? **चन्द्रमसि** चन्द्रे, अस्तं, **व्रजति** गच्छति सति, कीदृशे तस्मिन्? **अधोमुखविषाणकोटिना** अधोमुखी विषाणकोटिः-शृङ्गाग्रभागो यस्य तादृशेन, पुनः **ऊर्ध्वचरणेन** ऊर्ध्वौ-ऊर्ध्वस्थितौ, चरणौ-पादौ, यस्य तादृशेन, **लाञ्छनमृगेण** चिह्नभूतमृगेण, **विधृतमूलाग्रभागव्यत्यये** विधृतः-गृहीतः, मूलाग्रभागयोः-मूलभागोर्ध्वभागयोः, व्यत्ययः-वैपरीत्यं यस्मिंस्तादृशे, पुनः **अस्ताचलचकोरकामिनीमन्दमन्दाचान्तविच्छायविरसचन्द्रिके** अस्ताचले-पश्चिमपर्वते, याश्चकोरकामिन्यः-चकोरस्त्रियः, ताभिः, **मन्दं मन्दं** शनैः शनैः, आचान्ताः-समन्तादुपभुक्ता, विच्छाया-विगतप्रकाशा, विरसा-दर्शने वैरस्यावहा, चन्द्रिका-ज्योत्स्ना यस्य तादृशे। तथा **प्रतिवेलं** तस्मिन् तस्मिन् पवनास्फालनसमये, **उन्नतनतशिखेषु** ऊर्ध्वाधोभावेन पवनान्दोलितज्वालेषु, **निजप्रभापहारभीतेषु** निजप्रभायाः-स्वकान्तेः, योऽपहारः-सूर्येणाभिभवः, तद्भीतेषु, **वासभवनप्रदीपेषु** वासगृहस्थितप्रकृष्टदीपेषु, **तत्क्षणं** सद्यः, **उदयमानम्** उद्यन्तम्, **अरुणं** सूर्यसारथिम्, **वातायनान्तरेण** गवाक्षमध्येन, **अवलोकयत्स्विव** पश्यत्सु इवेत्युत्प्रेक्षा, नेत्रस्थानीयाभिः पवनोद्धूतशिखाभिः स्वप्रभापहारिणः सूर्यस्योदयमवलोकितवन्त आसन् प्रदीपा इत्यर्थः। तथा **प्रभातपरुषमारुताहतासु** प्रभाते-प्रातःकाले, यः परुषः-कठोरः, मारुतः-पवनः, तेन आहतासु-कृताघातासु, **आशालतासु** दिग्रूपलतासु, **तनुतमिस्रच्छेदपल्लवकृतनिवेशं** तनुतमिस्रस्य-कृशान्धकारस्य, छेदाः-खण्डा एव,

विघटमानाष्टदिग्भागदलं विकटायमानकुक्षिकोटरमरविन्दमिव मधुपङ्कदिग्धेष्वलिकुलेषु गगनमपहाय तत इतः प्रयात्सु संध्यारागरञ्जितेषु रजनीतमस्सु, राजा राजतगिरिशिखरमधिरूढायाः श्वेतवसनस्रग्विलेपनालङ्कारकमनीयमूर्तेर्मदिरावत्याः शैलराजदुहितुरिव हेरम्बमम्बरादवतीर्य पुरःस्थितमपारपरिमलान्धैः सर्वतो निपतद्भिरश्रान्तझङ्कारमुखरिताशामुखैरहमहमिकया विलुप्यमानकपोलमदवारिनिर्झरमलिकुलैः कुचकुम्भविन्यस्तविकटपुष्करेण करेणाकृष्याकृष्य स्तन्यमापिबन्तं स्वप्ने सुरेन्द्रवाहनं वारणमपश्यत् [ञ]। उपशान्तनिद्रश्च मङ्गलतूर्यनिर्घोषेण सप्रहर्षमुत्थाय प्रथमतरमुत्थितायाः 'देवि! संपन्नास्ते गुरुजनाशिषः, प्रसन्ना समासन्नैव देवी राजलक्ष्मीः, भविष्यत्यशेषभूभृच्चक्रचूडारत्नमचिरेणैव सूनुः' इत्युदीर्य प्रकटितादरो मदिरावत्याः स्वप्नमाचचक्षे, सापि बद्धावधाना सविस्मयव्रीडमवनतेन शिरसा तमश्रौषीत् [ट]॥

पल्लवाः—वर्णसाम्याच्चूतनदलानि, तत्र कृतो निवेशः—समावेशो येन तादृशम्, **अवश्यायजलबिन्दुजालमिव** हिमजलबिन्दुपुञ्जमिवेत्युत्प्रेक्षास्पदम्, **नक्षत्रनिवहं** तारासमूहम्, **अजस्रं** सततम्, **उज्झतीषु** मुञ्चन्तीषु सतीषु। तथा **मधुपङ्कदिग्धेषु** मधुपङ्केन—मकरन्दद्रवेण, दिग्धेषु—उपलिप्तेषु, **अलिकुलेषु** भ्रमरमण्डलेषु, **अरविन्दमिव** कमलमिव, **गगनम्** आकाशमण्डलम्, **अपहाय** त्यक्त्वा, **सन्ध्यारागरञ्जितेषु** सन्ध्याकालिकरक्तवर्णव्याप्तेषु, **रजनीतमस्सु** निशान्धकारेषु, **तत इतः** अत्र तत्र, **प्रयात्सु** प्रयाणमाचरत्सु, कीदृशमरविन्दम्? **पर्यायविघटमानाष्टदिग्भागदलं** पर्यायेण—क्रमेण, विघटमानानि—विश्लिष्यमाणानि, पक्षे पृथगवभासमानानि, अष्टदिग्भागदलानि—अष्टदिग्भागावलम्बिपत्राणि, पक्षे अष्टदिग्भागरूपपत्राणि यस्मिंस्तादृशम्, पुनः **विकटायमानकुक्षिकोटरं** विकटायमानः—प्रकटायमानः, कुक्षिकोटरः—मध्यभागरूपगुहा, यस्मिंस्तादृशम्। कीदृशम् वारणमपश्यत्? **अम्बरात्**—आकाशात्, **अवतीर्य** अधस्तादागत्य, **पुरः** अग्रे, **स्थितम्** उपविष्टम्। पुनः कीदृशम्? **राजतगिरिशिखरमधिरूढायाः** राजतः—रजतसंबन्धी, यो गिरिः—कैलासपर्वतः, तस्य शिखरम्, अधिरूढायाः—आरूढायाः, पुनः **श्वेतवसनस्रग्विलेपनालङ्कारकमनीयमूर्तेः** श्वेतवसनेन—शुभ्रवस्त्रेण, स्रजा—माल्येन, विलेपनेन—अङ्गरागेण, अलङ्कारैः—हाराद्याभूषणैश्च, कमनीया—मनोहरा, मूर्तिः—शरीरं, यस्यास्तादृश्याः, **स्तन्यं** दुग्धम्, **पिबन्तं** पानकर्मतामापादयन्तम्, कस्याः कमिव किं कृत्वा? **शैलराजदुहितुः** पार्वत्याः, **हेरम्बं** गणेशमिव, **कुचकुम्भविन्यस्तविकटपुष्करेण** कुम्भाविव यौ कुचौ—स्तनौ, तत्र विन्यस्तं—स्थापितम्, विकटं प्रकटम्, पुष्करम्—अग्रभागो यस्य तादृशेन करेण—शुण्डादण्डेन, **आकृष्याकृष्य** पुनः पुनराकृष्य। पुनः कीदृशम्? **अहमहमिकया** अहमहम्भावेन, **अलिकुलैः** भ्रमरसमूहैः, **विलुप्यमानकपोलमदवारिनिर्झरं** विलुप्यमानः—पानद्वारा निरुध्यमानः, कपोलमदवारिणः—गण्डस्थलनिष्पन्दिमदजलस्य, निर्झरः—प्रवाहो यस्य तादृशम्, कीदृशैरलिकुलैः? **अपारपरिमलान्धैः** अपारेण—बहुतरेण, परिमलेन—मदजलसौरभेण, अन्धैः—व्यामुग्धैः, पुनः **सर्वतः** सर्वदिग्भ्यः, **निपतद्भिः** मदजलप्रवाहे निमज्जद्भिः, पुनः **अश्रान्तझङ्कारमुखरिताशामुखैः** अश्रान्तैः—अविरतैः, झङ्कारैः—ध्वनिविशेषैः, मुखरितानि—प्रतिध्वानितानि, आशामुखानि—दिङ्मुखानि यैस्तादृशैः [ञ]। **च** पुनः, **मङ्गलतूर्यनिर्घोषेण** मङ्गलतूर्याणां—माङ्गलिकवाद्यविशेषाणाम्, यो निर्घोषः—ध्वनिः, तेन उपशान्तनिद्रः—भग्ननिद्रः, **सहर्षं** हर्षपूर्वकम्, **उत्थाय** जागरित्वा, **प्रथमतरं** पूर्वतरम्, **उत्थितायाः** प्रबुद्धायाः, मदिरावत्याः, देवि! **ते** तव, **गुरुजनाशिषः** श्रेष्ठजनशुभैषणाः, **संपन्नाः** सिद्धाः, **समासन्नैव** सन्निहितैव, **राजलक्ष्मीः देवी** राजवैभवाधिष्ठात्री लक्ष्मीनाम्नी देवी, **प्रसन्ना** प्राप्तप्रसादा, यतः **अशेषभूभृच्चक्रचूडारत्नम्** अशेषाणां भूभृतां—राज्ञाम्, यच्चक्रं-समूहः, तस्य चूडारत्नं-मुकुटरूपः, **सूनुः** पुत्रः, **अचिरेणैव** अविलम्बेनैव, **भविष्यति** उत्पत्स्यते, **इत्युदीर्य** इत्युक्त्वा, **प्रकटितादरः** प्रदर्शितादरः, **स्वप्नं** तद्विषयकस्वाप्नज्ञानम्, **आचचक्षे** उक्तवान्। **सापि** मदिरावत्यपि, **बद्धावधाना** कृतावधाना सती, **अवनतेन** नम्रतां गतेन, **शिरसा** मस्तकेन, **सविस्मयव्रीडं** साश्चर्यलज्जम्, **तं** स्वप्नम्, **अश्रौषीत्** श्रुतवती [ट]।

आनन्दभरविजृम्भमाणोद्दामपुलकोपचितसर्वावयवा च प्रतिपन्नेव सद्यो गर्भेण द्विगुणमुपजातशोभा तत्क्षणमजायत [ठ]। स्थित्वा च किञ्चित्कालमुत्थिते च राज्ञि निर्गत्य रतिगृहाद्यथाक्रियमाणमुचितव्यापारमन्वतिष्ठत् [ड]। अनतिबहुषु च व्यतीतेष्वहस्स्वनन्तरे ऋतौ स्नाता शरद्दिवसकरमूर्तिरिव भास्वरं तेजो बभार गर्भमुदरेण [ढ]। निवृत्तरजःसङ्गापि पाण्डुतामगच्छत्, चलितुमसहापि खेलालसपदन्यासमकरोत्, दधत्यापि तनुतामुपचिता बभूव गात्रयष्ट्या, कृष्णतारोचितामपि क्षीरधवलामधत्त दृष्टिम् [ण]। तथा च प्रकृतिमन्दापि तस्या गतिरमन्दायत, पीनापि जघनमण्डली पीनतामभजत, सततमात्मनाधःकृतस्य मध्यस्य गौरवं पश्यन्तौ श्लथत्वमासेदुषो दयितनिर्दयाश्लेषसुखरसस्य च स्मरन्तौ शुचेव श्याममुखतां जग्मतुः स्तनौ, प्रवृद्धयोश्च काम-

---

टिप्पनकम्—निवृत्तरजःसंगापि एकत्र रजः–धूलिः, अन्यत्र रजः–पापम्। खेला–लीला। तनुता–कृशता, स्वरूपेण, गर्भवशाद् **उपचिता** स्थूला। **कृष्णतारोचितामपि** या कृष्णत्वेन शोभिता सा कथं दुग्धश्वेता? अन्यत्र कालतारयोपेता [ण]।

च पुनः, **आनन्दभरविजृम्भमाणोद्दामपुलकोपचितसर्वावयवा** आनन्दभरेण-हर्षातिशयेन, विजृम्भमाणाः–आयम्यमानाः, उद्दामभिः-उच्छ्रितैः, पुलकैः–रोमाञ्चैः, उपचिताः–वर्धिताः, सर्वे अवयवाः–अङ्गानि, यस्यास्तादृशी सती, गर्भेण-शुक्रशोणितपिण्डविशेषेण, **सद्यः** तत्क्षणम्, **प्रतिपन्नेव** युक्तेव, **तत्क्षणं** स्वप्नश्रवणक्षणे, **द्विगुणं** स्वाभाविकशोभापेक्षया द्विगुणाधिकं यथा स्यात् तथा, **उपजातशोभा** उत्पन्नशोभा, **अजायत** समपद्यत [ठ]।

च पुनः, **किञ्चित्कालम्** ईषत्कालम्, **स्थित्वा** स्थितिं विधाय, **राज्ञि** मेघवाहने, **उत्थिते** कृतोत्थाने सति, **रतिगृहात्** विलासगृहात्, **निर्गत्य** बहिर्गत्वा, **यथाक्रियमाणं** यथाक्रमं प्राप्तम्, **उचितव्यापारम्** उचितकार्यम्, **अन्वतिष्ठत्** कृतवती [ड]। **अनतिबहुषु** कतिपयेषु, **अहस्सु** दिनेषु, **व्यतीतेषु** अतिक्रान्तेषु, **अनन्तरे** अव्यवहिते, **ऋतौ** मासिकरजःस्यन्दनावस्थावसाने, पक्षे शरदृतौ, **स्नाता** कृतस्नाना, **शरद्दिवसकरमूर्त्तिः** शरदि–शरदृतुसम्बन्धिनी, दिवसकरस्य–सूर्यस्य, मूर्तिः–बिम्बम् **भास्वरं** दीप्तम्, तेज इव, **उदरेण** उदरद्वारा, गर्भं, **बभार** दधौ [ढ]। **निवृत्तरजःसंगापि** धूलिसम्पर्करहितापि, **पाण्डुतां** केतकीधूलितुल्यपाण्डुवर्णताम्, **अगच्छत्** प्राप्तवतीति विरोधः, तदुद्धारे तु निवृत्तः–निरुद्धः, रजःसंगः–पापसंगः, यद्वा रजःसङ्गः–स्त्रीधर्मशोणितोदयो यस्यास्तादृशी, **पाण्डुताम्** गर्भप्रयुक्तपाण्डुवर्णताम्। पुनः **चलितुं** गन्तुम्, **असहापि** अक्षमापि, **खेलालसपदन्यासं** खम्–आकाशम्, इला–पृथिवी, तयोर्लसेन–विलासेना पदन्यासं पादविक्षेपम्, चलनमिति यावत्, **अकरोत्** कृतवतीति विरोधः, चलितुमक्षमत्वे चलनासम्भवात्, तदुद्धारे तु खेलायां–क्रीडायाम्, अलसं–गर्भभारेणालस्यान्वितमित्यर्थः। पुनः **तनुतां** कृशताम्, **दधत्या** धारयन्त्यापि, **दधत्यपीति** पाठे धारयन्त्यपीत्यर्थः, **गात्रयष्ट्या** शरीरयष्ट्या, **उपचिता स्थूला**, बभूवेति विरोधः, शरीरयष्टेः कृशत्वे स्थूलत्वासम्भवात्, तदुद्धारस्तु भागान्तरावच्छेदेन कृशत्वेऽपि गर्भवशान्मध्यभागावच्छेदेन स्थूलत्वोपपत्त्या बोध्यः। पुनः **कृष्णतारोचितामपि** कृष्णतया–कृष्णवर्णेन, रोचितामपि–रुचिरामपि, **क्षीरधवलां** दुग्धतुल्यश्वेतवर्णाम्, **दृष्टिं** नेत्रगोलकम्, **अधत्त** धृतवतीति विरोधः, कृष्णवर्णत्वे दुग्धधवलत्वासम्भवात्, तदुद्धारे तु कृष्णाभ्यां–कृष्णवर्णाभ्याम्, ताराभ्यां–कनीनिकाभ्याम्, उचितामपि–परिचितामपि, क्षीरधवलां–कनीनिकां परितो दुग्धश्वेतवर्णामिति व्याख्येयम् [ण]। **तथा च** उक्तप्रकारेण च, **तस्याः** मदिरावत्याः, **प्रकृतिमन्दापि** ज्ञानिपुरुष-वृष-हंस-गज-वरस्त्रीणां मन्दगामितया स्वभावतो मन्दापि, **गतिः** गमनम्, **अमन्दायत** मन्देवाचरत्, गर्भभारादतिमन्दत्वमवापदित्यर्थः। पुनः **पीनापि** वरस्त्रीत्वेन प्रकृत्या स्थूलापि, तस्या **जघनमण्डली** मण्डलाकारकटिपुरोभागः, **पीनतां** गर्भवशादतिस्थूलताम्, **अभजत** प्राप्तवती, पुनः **आत्मना** स्वेन, **अधःकृतस्य** स्थूलत्वादिना तिरस्कृतस्य, **मध्यस्य** मध्यभागस्य, उदरभागस्येति यावत्, **गौरवं** गुरुताम्, **सततं** निरन्तरम्, **पश्यन्तौ** अवलोकमानौ, **च** पुनः, **श्लथत्वमासेदुषः** तदानीं शिथिलत्वमापन्नस्य, **दयितनिर्दयाश्लेषसुखरसस्य** दयितेन–प्रियेण, यो निर्दयः–आत्यन्तिकः, श्लेषः–आलिङ्गनम्, तज्जन्यस्य सुखरसस्य–आनन्दरसस्य, स्मरन्तौ, स्तनौ, **शुचेव** शोकेनेव, **श्याम-**

मनयोः स्वेन रूपेण भारमुद्वोढुमक्षमेव क्षामतां मुमोच मध्यलक्ष्मीः, अनपत्यतादर्शनदुःखतप्तां निर्वापयितुमिव बन्धुतामायताः प्रसस्रुः पदन्यासेषु निःश्वासाः [त]। प्रतिदिवसमुपचीयमानगर्भा च सा सकललोकाश्चर्यकारिणोऽभिलाषविभ्रमानभृत, तथा हि—वासभवनाङ्गणभ्रमिषु खिन्ना शरत्प्रसन्ने मानससरःपयसि ससखीजना स्नातुमियेष, मध्यन्दिननिदाघजनिताऽऽयल्लका पल्लवितकल्पपादपलताकुलेषु कुलगिरिनितम्बारामेषु रन्तुमभिललाष, विबुधवृन्दपरिवृता शाश्वतेषु सागरान्तरद्वीपसिद्धायतनेषु सान्ध्यमारब्धमप्सरोभिः प्रेक्षानृत्यमीक्षितुमाकाङ्क्षत्, अग्रतः प्रपञ्चितविचित्राख्यानकेन श्रव्यवचसा कथकनारीजनेन विविधं विनोद्यमानापि दिव्यकथासु कर्णं ददौ, विधृतविकोशपुष्करे न तथा निजकरे यथा सुभटनिकरे दृष्टिमनयत्, अपास्तरणपरिकरं प्रकामगुणवन्तमपि भृत्यलोकं पर्यङ्कमिव सावज्ञमैक्षत, सर्वदिग्व्यापिना पत्युरपि प्रतापेन समतप्यत,

---

टिप्पनकम्—बन्धुतां बन्धुसमूहम् [त]। आयल्लकः—खेदः। **विधृतविकोशपुष्करे** एकत्र विधृतविगतप्रतिवारासिफलके, अन्यत्र विधृतविकसितपद्मे। **अपास्तरणपरिकरं** निरस्तसंग्रामपरिच्छदम्, अन्यत्र अपगतास्तरणपरिकरम् [थ]॥

मुखतां श्यामं–कृष्णम्, मुखम्–अग्रभागो यस्य तत्ताम्, **जग्मतुः** प्रापतुः, अन्तर्वत्नीनामुदरगौरवस्य आलिङ्गनानन्दशैथिल्यस्य स्तनाग्रभागश्यामत्वस्य चौत्सर्गिकत्वात्। **च** पुनः, **कामम्** अत्यन्तम्, **प्रवृद्धयोः** स्थौल्यमापन्नयोः, **अनयोः** स्तनयोः, भारं, **स्वेन** आत्मीयेन, **रूपेण** कृशाकारेण, **उद्वोढुम्** उद्वहनाय, **अक्षमा इव** असमर्था इवेत्युत्प्रेक्षा, **मध्यलक्ष्मीः** मध्यावयवशोभा, **क्षामतां** कृशताम्, **मुमोच** तत्याज, स्वाभाविककृशतामपहाय स्तनभारोद्वहनोपयोगिनीं गुरुतां जग्राहेत्यर्थः। **अनपत्यतादर्शनदुःखतप्ताम्** अनपत्यतायाः–अपत्यराहित्यस्य, दर्शनेन यद् दुःखं–परितापः, तेन तप्ताम्, **बन्धुतां** स्वबन्धुजनताम्, **निर्वापयितुं** शमयितुमिव, **आयताः** दीर्घाः, **निश्वासाः** नासावायवः, **पदन्यासेषु** पादविक्षेपेषु चलनवेलायामित्यर्थः, **प्रसस्रुः** प्रसरन्ति स्म; अन्तर्वत्नीनां चलनश्रमेण निःश्वासोद्गमस्य प्रकृतिसिद्धत्वात् [त]। **च** पुनः, **प्रतिदिवसं** प्रतिदिनम्, **उपचीयमानगर्भा** वर्धमानगर्भा सती, **सकललोकाश्चर्यकारिणः** सर्वलोकाश्चर्यजनकान्, **अभिलाषविभ्रमान्** मनोरथविलासान्, **अकृत** कृतवती, **अभृते**ति पाठे धृतवतीत्यर्थः। तान् विभ्रमान् दर्शयति—**तथाही**ति। **वासभवनाङ्गणभ्रमिषु** वासभवनस्य–निवासमन्दिरस्य, यानि अङ्गणानि–चत्वराणि, तेषु या भ्रमयः–भ्रमणानि, तासु **खिन्ना** अनुभूतखेदा सती, **ससखीजना** सखीजनसहिता, **शरदागमात्** शरदृतोरागमनात्, **प्रसन्ने** निर्मले, **मानससरःपयसि** मानसाख्यसरोवरजले, **स्नातुं** निमज्जितुम्, **इयेष** अभिलषितवती। **मध्यन्दिननिदाघजनिताऽऽयल्लका** मध्यन्दिने–मध्याह्ने, यो निदाघः–घर्मः, तेन जनितः–उत्पादितः, आयल्लकः–खेदो यस्यास्तादृशी सती, **पल्लवितकल्पपादपलताकुलेषु** पल्लविताभिः–नूतनदलव्याप्ताभिः, कल्पपादपलताभिः–कल्पवृक्षलताभिः, आकुलेषु–व्याप्तेषु, यद्वा पल्लवितं कल्पपादपलतानां कुलं–समूहो येषु तादृशेषु, **कुलगिरिनितम्बारामेषु** कुलगिरीणां–कुलपर्वतानाम्, नितम्बारामेषु–मध्यभागस्थोद्यानेषु, **रन्तुं** क्रीडितुम्, **अभिललाष** अभिलषितवती, मदिरावतीति शेषः। **विबुधवृन्दपरिवृता** विबुधवृन्देन–पण्डितमण्डलेन, देवमण्डलेन वा, परिवृता–परिवेष्टिता सती, **शाश्वतेषु** सदातनेषु, **सागरान्तरद्वीपसिद्धायतनेषु** सागरान्तराः समुद्रान्तर्गताः, ये द्वीपाः–स्थलप्रदेशाः, तत्रत्येषु सिद्धायतनेषु–सिद्धमन्दिरेषु, **अप्सरोभिः** स्वर्वेश्याभिः, **आरब्धं** प्रवर्तितं, **सान्ध्यं** सायंकालिकं, **प्रेक्षानृत्यं** नृत्यविशेषम्, **ईक्षितुं** द्रष्टुम्, **अकाङ्क्षत्** आकाङ्क्षितवती। **अग्रतः** अग्रे, **प्रपञ्चितविचित्राख्यानकेन** प्रपञ्चितं–विस्तारितम्, विचित्रं–विविधम्, आख्यानकम्–अमृतमन्थनादिकथानकं येन तादृशेन, **श्रव्यवचसा** श्रव्यं–श्रवणप्रियं, वचो यस्य तादृशेन, **कथकनारीजनेन** कथानककुशलो यो नारीजनः–स्त्रीजनः, तेन, **विविधं** नानाप्रकारकं यथा स्यात् तथा, **विनोद्यमानापि** प्रसाद्यमानापि, **दिव्यकथासु** दैविकोपाख्यानकेषु, मनोहरकथासु वा, कर्णं, **ददौ** प्रवर्तयामास, **विधृतविकोशपुष्करे** विधृतं–निहितम्, विकोशं–विकसितम्, पुष्करं–कमलं, यस्मिंस्तादृशे, **निजकरे** स्वहस्ते, तथा दृष्टिं न, **अनयत्** प्रेरितवती, यथा विधृतं, विकोशं–प्रत्याकाररहितम्, पुष्करं–कृपाण, फलकं येन तादृशे, **सुभटनिकरे** सुयोधसमूहे। **प्रकामगुणवन्तमपि** अत्यन्तगुणशालिनमपि, पक्षे मनोहररज्जुबद्धमपि-

प्रह्वीकृताशेषभूभुजा गुरुजनस्यापि गौरवेण ग्लानिमगमत्, अप्रणयिनापि प्रार्थिता सर्वस्वमदित, कृतापकारेऽपि करुणापरा प्राणिनिवहे बभूव [थ]॥

पूर्णेषु च क्रमेण किञ्चित्सातिरेकेषु नवसु मासेषु सारतिथिवारकरणाश्रितेऽतिश्रेयस्यहनि पुण्ये मुहूर्ते यथास्वमुच्चस्थानस्थितैः कौतुकादिव शुभग्रहैरवलोकिते विशुद्धे लग्ने लग्नचारुतादर्शनजातपरितोषायामिवोर्ध्वमुख्यां होरायामग्रत एव जातेन सहितमखिलप्रजाप्रमोदेनाद्वितीयरूपमजनयत् तनयम् [द]। उत्पन्नमात्र एव च कार्यान्तरनियन्त्रितोऽप्यननुपालितपरस्परः सरभसपदन्यासरणितनूपुरैः पुत्रजन्म स्वयमाख्यातुमुत्सुकैरिव पुरः पुरोभवद्भिः पादपल्लवैः प्रकटितसंभ्रमः पूर्णपात्रग्रहणाय भूमिपालाभिमुखमचलत् सकञ्चुकिकिरातकुब्जकवामनमूक-

---

अपास्तरणपरिकरम् अपास्तः–त्यक्तः, रणपरिकरः–रणोचितदृढगात्रबन्धो येन तादृशम्, पक्षे अपगतम् आस्तरणम्–आच्छादनं यस्य तादृशम्, **भृत्यलोकं** सेवकजनम्, **पर्यङ्कमिव** पल्यङ्कमिव, **सावज्ञम्** अनादरपूर्वकं यथा स्यात् तथा, **ऐक्षत** दृष्टवती। **सर्वदिग्व्यापिना** सर्वदिग्व्यापनशीलेन, **पत्युरपि** भर्तुरपि, **प्रतापेन** क्षात्रतेजसा, पक्षे प्रकृष्टतापेन, **समतप्यत** सम्यक् तप्ता अभवत्। पुनः **प्रह्वीकृताशेषभूभुजा** प्रह्वीकृताः–अवनमिताः, अशेषाः–समस्ताः, भूभुजः–राजानो येन तादृशेन, **गुरुजनस्यापि** भर्त्रादेरपि, **गौरवेण** महत्त्वेन, पक्षे भारेण, **ग्लानिं** खेदम्, **अगच्छत्** प्राप्तवती। पुनः **अप्रणयिनापि** स्नेहानास्पदेनापि जनेन, **प्रार्थिता** याचिता सती, **सर्वस्वं** समस्तसम्पत्तिम्, **अदित** दत्तवती, पुनः **कृतापकारेऽपि** कृतप्रतिकूलेऽपि, **प्राणिनिवहे** प्राणिसमूहे, **करुणापरा** दयाशीला, **बभूव** जाता, गर्भिणीनां कायेन मनसा चातीवकोमलत्वात् [थ]। **क्रमेण** यथाक्रमम्, **किञ्चित्सातिरेकेषु** किञ्चिदधिकेषु, **नवसु** नवसंख्यकेषु, मासेषु, **पूर्णेषु** पूर्त्तिमापन्नेषु सत्सु, **सारतिथिवारकरणाश्रिते** सारैः–श्रेष्ठैः, शुभभूतैरिति यावत्, तिथिवारकरणैः–तिथिः–सूर्याचन्द्रमसोर्द्वादशान्तरांशः, वारं–दिनम्, करणं–तिथ्यर्धम्, तैराश्रिते–युक्ते, **अतिश्रेयसि** परमशुभावहे, **अहनि** दिने, **पुण्ये** शुभे, **मुहूर्ते** पञ्चदशधा विभक्तस्य दिनस्य पञ्चदशे भागे, किञ्चिन्न्यूनाधिकघटिकाद्वयात्मककाले, **यथास्वं** यथायोग्यम्, **उच्चस्थानस्थितैः** उच्चस्थानाश्रितैः, ग्रहाणामुच्चत्वं चैवम्–"अर्काद्युच्चान्यज १-वृष २-मृग ३-कन्या ४-कर्क ५-मीन ६-ऽवणिजोंऽशैः। दिग् १० दहना ३ ऽष्टाविंशति २८ तिथी १५ षु ५ नक्षत्र २७-विंशतिभिः २०॥" अयं भावः–मेषादिराशिस्थाः सूर्यादय उच्चास्तत्रापि दशादीनंशान् यावत् परमोच्चाः। **शुभग्रहैः** गुरुबुधप्रभृतिग्रहैः, **कौतुकादिव** अपूर्वदिदृक्षारसादिव, **अवलोकिते** आभिमुख्येन निरीक्षिते, **विशुद्धे** शुभे, **लग्ने** राश्युदये सतीति शेषः। **लग्नचारुतादर्शनजातपरितोषायामिव** लग्नस्य–राशीनामुदयरूपस्य, चारुतायाः–शुभावहतायाः, दर्शनेन, जातः–प्रादुर्भूतः, परितोषः–सन्तोषो यस्यास्तादृश्याम्, **होरायां** घटिकार्धकालरूपायाम्, **ऊर्ध्वमुख्याम्** मङ्गलोन्मुख्यां सत्याम्, **अग्रत एव** प्रथमत एव, **जातेन** उत्पन्नेन, **अखिलप्रजाप्रमोदेन** सकलप्रजाहर्षेण, **सहितं** सह, **अद्वितीयरूपम्** अपूर्वरूपम्, **तनयं** पुत्रम्, **अजनयत्** उदपादयत् [द]। **उत्पन्नमात्र एव** पुत्रोत्पत्त्यनन्तरमेव, **कार्यान्तरनियन्त्रितोऽपि** अन्यकार्यासक्तोऽपि, **शुद्धान्तचारस्त्रीजनः** अन्तःपुरगणिकाजनः, **पूर्णपात्रग्रहणाय** पूर्णपात्रं नाम पुत्रजन्मादिमहोत्सवे वस्त्रमाल्यादिपूर्णं सुहृज्जनैः पारितोषिकतया बलादादीयमानं पात्रम्, तदुक्तम्–"उत्सवेषु सुहृद्भिर्यद् बलादाकृष्य गृह्यते। वस्त्रमाल्यादि तत्पूर्णपात्रं पूर्णानकं च तत्" इति, **भूमिपालाभिमुखं** राज्ञोऽन्तिकम्, **अचलत्** अगच्छत्। कीदृशः सन्? **अननुपालितपरस्परः** अप्रतीक्षितपरस्परः; पुनः **सरभसपदन्यासरणितनूपुरैः** सरभसः–सत्वरो यः, पदन्यासः–पादविक्षेपः, तेन रणितानि–ध्वनितानि, नूपुराणि–पादाङ्गदानि येषु तादृशैः, पुनः **स्वयं** साक्षादेव, न त्वन्यद्वारा, **पुत्रजन्म** राजकीयपुत्रोत्पत्तिवार्ताम्, **पुरः** पूर्वम्, **आख्यातुं** कथयितुम्, **उत्सुकैः** उत्कण्ठितैरिव, **पुरोभवद्भिः** अग्रे सञ्चरद्भिः, **पादपल्लवैः** पल्लवोपमपादैः, **प्रकटितसम्भ्रमः** प्रदर्शितसंवेगः; पुनः कीदृशः? **सकञ्चुकि-किरात-कुब्ज-बधिर-मूक-वामनः** कञ्चुकिनः–अन्तःपुरद्वारपालाः, किराताः–आरण्यकम्लेच्छजातीयाः, कुब्जाः–"हृदयं यदि वा पृष्ठमुन्नतं क्रमतः सरुक् क्रुद्धो वायुर्यदा कुर्यात् तदा तं कुब्जमादिशेत्॥" इत्युक्तलक्षणा जनाः, बधिराः–श्रवणशक्तिशून्याः, मूकाः–वाक्शक्तिशून्याः, वामनाः–ह्रस्वकलेवराः, तैः सहितः; पुनः **अनेकशतसंख्यः** बहुशतसंख्यकः [ध]।

वामनोऽनेकशतसंख्यः शुद्धान्तवारस्त्रीजनः [ध]। प्रमुदितपौरजनजयजयारावपीवरः प्रतिभवनमाहतानामसंख्यकाहलाशङ्खझल्लरीमुरजपटहानामनुसृतः पटीयसा झात्कृतेन वादित्राणामाह्वयन्निव नर्तनाय व्योम्नि वैमानिकवधूवृन्दमाकारयन्निव महोत्सवालोकनाय दिक्षु लोकपालपरिषदमादिशन्निव रङ्गावलीयोग्यरत्नानयनाय पृथ्वीतलोपान्तेषु पाथोनिधीन् बभ्राम मथनभ्रान्तमन्दरविघूर्णितमहार्णवध्वानघर्घरो जगति नान्दीघोषः [न]। प्रसर्पन्नितस्ततः प्रस्तुतपरीहास इव तत्कालमधिगतविकाशासु प्रमुदितास्विव दिक्षु चिक्षेप पिष्टातरजःपिञ्जरं सरोजकिञ्जल्कजालमुद्यानानिलः [प]। कृताध्ययनभङ्गविद्वज्जनविसर्जितानि प्रष्ठीकृतैकैकबठरच्छात्रहस्तार्पितविशालपूर्णकलशानि युगपदुच्चारिताशीःपरम्परावचनवाचालानि चेलुरन्तःपुराभिमुखमखिलानि विद्यासत्रशालान्तेवासिमण्डलानि [फ]। प्रचलितारुणपाणिमणिपल्लवमान्दोलितालिनीललीलालकभङ्गमाभङ्गुरमुरोज-

---

नान्दीघोषः—"देवद्विजनृपादीनामाशीर्वादपरायणाः । नन्दन्ति देवता यस्मात् तस्मान्नान्दी प्रकीर्तिता ॥" इत्युक्तमङ्गलध्वनिः, **जगति** भुवने, **बभ्राम** भ्राम्यति स्म, कीदृशः? **प्रमुदितपौरजनजयजयारावपीवरः** प्रमुदितानां प्रहृष्टानाम्, पौरजनानां—तत्पुरवासिजनानाम्, **जयजयारावैः** जयजयकारैः, **पीवरः** स्थूलः, प्रवृद्ध इति यावत्, पुनः **प्रतिभवनं** प्रतिगृहम्, **आहतानां** ताडितानाम्, **असंख्यकाहला-शङ्ख-झल्लरी-मुरज-पटहानाम्**, असंख्याः—अनियतसंख्याकाः, बहव इति यावत्, ये काहलाः—महाढक्काः, शङ्खाः—समुद्रोत्पन्नमुखवाद्यविशेषाः, झल्लर्यः—कांस्यवाद्यविशेषाः, मुरजाः—मृदङ्गाः, पटहाः—दुन्दुभयः, तेषाम्, **वादित्राणां** वाद्यविशेषाणाम्, **पटीयसा** मनोहरेण, **झात्कृतेन** ध्वनिविशेषेण, **अनुसृतः** अन्वितः, किं कुर्वन्निव? **व्योम्नि** आकाशे, स्थितमिति शेषः, **वैमानिकवधूवृन्दं** विमानवासिदेवाङ्गनागणम्, **नर्तनाय** नृत्यार्थम्, **आह्वयन्निव** आकारयन्निवेत्युत्प्रेक्षा; पुनः **दिक्षु** दशदिशासु स्थितामिति शेषः, **लोकपाल परिषदं** दिक्पालदेवसभाम्, **महोत्सवालोकनाय** राजपुत्रजन्ममहोत्सवदर्शनाय, **आकारयन्निव** आह्वयन्निवेति चोत्प्रेक्षा; पुनः **रङ्गावलीयोग्यरत्नानयनाय** रज्यत्यस्मिन्निति रङ्गः—नृत्यमण्डपः, तस्य आवली—पङ्क्तिः, तद्योग्यानि—तन्निवेशनयोग्यानि, यानि रत्नानि, तेषामानयनाय—उपहरणाय, **पृथ्वीतलोपान्तेषु** पृथ्वीतलप्रदेशेषु, **आदिशन्निव** आज्ञापयन्निवेति चोत्प्रेक्षा; कीदृशः? **मथनभ्रान्तमन्दरविघूर्णितमहार्णवध्वानघर्घरः** मथने—सुरासुरकृतसमुद्रविलोडने, भ्रान्तः—प्राप्तभ्रमणः, यो मन्दरः—मेरुः, तेन विघूर्णितः—विक्षोभितः, यो महार्णवः—महासमुद्रः, तस्य यो ध्वानः—ध्वनिः, तद्वद् घर्घरः—स्वरविशेषान्वितः [न]। **इतस्ततः** अत्र तत्र प्रदेशे, **प्रसर्पन्** प्रवहन्, **उद्यानानिलः** आरामवातः **पिष्टातरजःपिञ्जरं** पिष्टातरजोवत्—पटवासचूर्णवत् पिञ्जरं—किञ्चिद्रक्तपीतवर्णम्, **सरोजकिञ्जल्कजालं** सरोजानां—कमलानाम्, किञ्जल्कजालं—केसरसमूहम्, **दिक्षु** सकलदिशासु, **चिक्षेप** विक्षिपति स्म। कीदृशीषु दिक्षु? **तत्कालं** तत्क्षणम्, **अधिगतविकासासु** प्राप्तविकासासु, विकसितास्वित्यर्थः, अत एव **प्रमुदितास्विव** प्राप्तप्रमोदास्विवेत्युत्प्रेक्षा। कीदृश इव? **प्रस्तुतपरिहास इव** प्रस्तुतः—प्रारब्धः, परिहासः—परि सर्वतोभावेन हासो येन तादृश इवेत्युत्प्रेक्षा, यथा नायको होलिकोत्सवे परिहासेन नायिकोपरि रक्तचूर्णानि विक्षिपति तथेत्यर्थः [प]। **अखिलानि** सकलानि, **विद्यासत्रशालान्तेवासिमण्डलनि** विद्यासत्रशालायाः—विद्यादानशालायाः, ये अन्तेवासिनः—छात्राः, तेषां मण्डलानि—समूहाः, **अन्तःपुराभिमुखं** राजस्त्रीनिवासभवनाभिमुखम्, **चेलुः** जग्मुः, कीदृशानि? **कृताध्ययनभङ्गविद्वज्जनविसर्जितानि** कृतोऽध्ययनस्य भङ्गो विच्छेदो यैस्तादृशैः, विद्वज्जनैः—अध्यापकजनैः, विसर्जितानि—परित्यक्तानि दत्तावकाशानीत्यर्थः; पुनः **प्रष्ठीकृतैकैकबठरच्छात्रहस्तार्पितविशालपूर्णकलशानि** प्रष्ठीकृतस्य—एकैकेन मण्डलेन स्वाग्रे गमितस्य, एकैकस्य बठरच्छात्रस्य—मूर्खच्छात्रस्य, हस्ते, अर्पितः—निहितः, विशालः—बृहदाकारः, पूर्णकलशः—जलपूरितपल्लवावृतमुखकुम्भो यैस्तादृशानि, पुनः **युगपदुच्चारिताशीःपरम्परावचनवाचालानि** युगपदुच्चारितैः—एककालावच्छेदेनोक्तैः, आशीःपरम्परावचनैः—शुभैषणासमूहार्थकवाक्यैः, वाचालानि—शब्दायमानानि [फ]। **सान्तःपुरम्** अन्तःपुरेण—तात्स्थ्येनोपचारादन्तःपुरस्त्रीजनेन सहितम्, **नगरनारीवृन्दं** प्रकृतनगरवास्तव्यस्त्रीसमूहः, **अनिलाहतकल्पलतावनमिव** अनिलेन—वायुना, आहतम्—आस्फालितम्, कल्पलतावनं—कल्पवृक्षसमूह इव, **ननर्त** नृत्यं चकार। कीदृशम्? **प्रचलितारुणपाणिमणिपल्लवं** प्रचलितानि—प्रकम्पितानि, अरुणानि—रक्तवर्णानि, पाणिमणिरूपाणि—मनोहरहस्तरूपाणि, पल्लवानि—नवपत्राणि यस्य तादृशम्,

स्तबकभारेण रणरणिततारररत्नाभरणमालमनिलाहतकल्पलतावनमिव ननर्त सान्तःपुरं नगरनारीवृन्दम् [ब] ॥

अवनीश्वरोऽपि परमोत्पन्ननिर्वृतिर्जलकटाहक्रोडनिक्षिप्तनाडिकानिहितचक्षुषा गणकनिवहेन निश्चित्य देव्याः प्रसवलग्नमागतेन मुहुर्मुहुरनेकप्रकारैः कृतोपवर्णनमाकर्ण्य जन्मग्रहबलं बालकस्य कृतमज्जनादिकृत्यः शुभे मुहूर्ते निवर्तितानुचरलोकः परिगतप्रान्तमुत्खातखड्गैः समन्ततो वीरपुरुषैः प्रशस्ततरुपल्लवास्तृतमुखेन द्वारशाखासङ्गिना मङ्गलकलशयुगलेनावभासितमुदारगन्धोद्गारगुग्गुलुधूपधूमान्धकारदूरीकृतदुष्टचक्रवक्राक्षीसंचारमचिरधौतचरणाभिः प्रविश्य साशीर्वादमन्तःप्रकीर्णकुसुमाक्षतकणाभिर्बन्धुवृद्धाभिराबद्धमङ्गलगीतकोलाहलमदत्तबाह्यपरिजनप्रवेशेन प्रशस्तालापिना सकललौकिकाचारकुशलेन 'कुरुत हरिचन्दनोपलेपहारि मन्दिराङ्गणम्, रचयत स्थानस्थानेषु रत्नचूर्णस्वस्तिकान्, दत्त द्वारि नूतनं चूतपल्लवदाम, विकिरतान्तरुत्फुल्लपङ्कजोपहारम्,

---

समासोत्तरपदभूतमण्यादिशब्दानां पूर्वपदार्थगतसौन्दर्यबोधकत्वात्; पुनः **आन्दोलितालिनीललीलालकभङ्गम्** आन्दोलिताः–उत्क्षिप्ताः, अलिनीलाः–भ्रमरसदृशश्यामवर्णाः, लीलालकभङ्गाः–क्रीडार्थकल्पितकुटिलकेशा यस्य तादृशम्; पुनः **उरोजस्तबकभारेण** उरसि वक्षसि, जायत इत्युरोजः–स्तनः, तद्रूपस्य स्तबकस्य–पुष्पगुच्छस्य, भारेण, **आभङ्गुरं** समन्तान्नम्रम्; पुनः **रणरणिततारररत्नाभरणमालं** रणरणितानि–ध्वनिविशेषान्वितानि, तारररत्नानाम्–उत्तमरत्नानाम्, आभरणानि–कटकनूपुराद्यलङ्करणानि माला च यस्य तादृशम् [ब] ॥

अवनीश्वरोऽपि राजापि, **परमोत्पन्ननिर्वृतिः** परमम्–अत्यन्तं यथा स्यात् तथा, उत्पन्ना निर्वृतिः–हर्षो यस्य तादृशः; पुनः **जलकटाहक्रोडनिक्षिप्तनाडिकानिहितचक्षुषा** जलकटाहस्य–जलपूर्णमहाभाजनविशेषस्य, क्रोडे–मध्ये, निक्षिप्ता–स्थापिता, या नाडिका–कालप्रमापकयन्त्रविशेषः, तत्र निहितानि–निवेशितानि, चक्षूंषि येन तादृशेन, **देव्याः** मदिरावत्याः, **प्रसवलग्नं** प्रसवकालिकलग्नम्, **निश्चित्य** निर्णीय, **आगतेन** तत्रोपस्थितेन, **गणकनिवहेन** दैवज्ञसमूहेन, **मुहुर्मुहुः** पुनः पुनः, **अनेकप्रकारैः** विविधप्रकारैः, **कृतोपवर्णनम्** उपवर्णितम्, **बालकस्य** जातकस्य, **जन्मग्रहबलं** जन्मकालिकोच्चस्थानस्थितग्रहरूपं बलम्, **आकर्ण्य**–श्रुत्वा, **कृतमज्जनादिकृत्यः** कृतस्नानादितात्कालिककार्यः सन्, **निवर्तितानुचरलोकः** परित्यक्तभृत्यजनः, **शुभे** उत्तमे, **मुहूर्ते** समये, **प्रियायाः** मदिरावत्याः, **प्रसूतिगृहं** प्रसवालयम्, **अविक्षत्** प्रविष्टवान्। कीदृशम् ?, **उत्खातखड्गैः** उद्धृतखड्गैः, वीरपुरुषैः, **समन्ततः** सर्वतः, **परिगतप्रान्तं** व्याप्तप्रान्तप्रदेशम्। पुनः **प्रशस्ततरुपल्लवास्तृतमुखेन** प्रशस्तैः–उत्तमैः, तरुपल्लवैः–वृक्षनवदलैः, प्रशस्तानां वा तरूणां पल्लवैः, आस्तृतम्–आवृतम्, मुखम्–ऊर्ध्वभागो यस्य तादृशेन, पुनः **द्वारशाखासङ्गिना** द्वारशाखा–द्वारस्य ऊर्ध्वभागः, तत्सङ्गिना–तत्र स्थितेन, **मङ्गलकलशयुगलेन** मङ्गलोद्देश्यकघटद्वयेन, **अवभासितम्** उद्दीपितम्। पुनः **उदारगन्धोद्गारगुग्गुलुधूपधूमान्धकारदूरीकृतदुष्टचक्रवक्राक्षीसञ्चारम्** उदारः–महान्, गन्धोद्गारः–गन्धाविर्भावो यस्य तादृशो यो गुग्गुलुधूपस्य–गुग्गुलधूपसम्बन्धी, धूमः, तद्रूपान्धकारेण, दूरीकृतः–निरुद्धः, दुष्टानां–बालघातनदोषवतीनाम्, चक्रवक्राक्षीणां–चक्रवक्राकारनेत्राणां स्त्रीणाम्, सञ्चारो यस्मिंस्तादृशम्। पुनः **अचिरधौतचरणाभिः** तत्क्षणप्रक्षालितपादाभिः, **साशीर्वादम्** आशीर्वादेन सहितं यथा स्यात् तथा, **अन्तः** प्रसूतिगृहाभ्यन्तरम्, **प्रविश्य** प्रवेशं कृत्वा, **प्रकीर्णकुसुमाक्षतकणाभिः** प्रकीर्णानि–प्रक्षिप्तानि, कुसुमानि–पुष्पाणि, अक्षतकणाः–तण्डुलकणाश्च याभिस्तादृशीभिः, **बन्धुवृद्धाभिः** स्वबन्धुभूतवृद्धस्त्रीभिः, **आबद्धमङ्गलगीतकोलाहलम्** आबद्धः–आयोजितः, कृत इति यावत्, मङ्गलगीतानां–मङ्गलगानानाम्, कोलाहलः–शब्दविशेषो यस्मिंस्तादृशम्। पुनः **शुद्धान्तजरतीजनेन** अन्तःपुरसम्बन्धिवृद्धस्त्रीजनेन, **क्रियमाणविविधशिशुरक्षाविधानं** क्रियमाणं–विधीयमानम्, विविधम्–अनेकप्रकारकम्, **शिशुरक्षाविधानं** शिशुरक्षाप्रयोजकं कार्यं यस्मिंस्तादृशम्। कीदृशेन तेन ? **अदत्तबाह्यपरिजनप्रवेशेन** अदत्तः–अवरुद्धः, बाह्यपरिजनस्य–बाह्यस्वजनस्य, प्रवेशः–अन्तरागमं येन तादृशेन; पुनः **प्रशस्तालापिना** प्रियालापशीलेन; पुनः **सकललौकिकाचारकुशलेन** समग्रलौकिकव्यवहाराभिज्ञेन; पुनः **जल्पता** प्रतिपादयता, किमित्याह–**मन्दिराङ्गणं** राजभवनप्राङ्गणम्, **हरिचन्दनोपलेपहारि** हरिचन्दनस्य–चन्दनविशेषस्य, यद्वा–"घृष्टं च तुलसीकाष्ठं कर्पूरागुरुयोगतः। अथवा केसरैर्योज्यं हरिचन्दनमुच्यते ॥" इत्युक्तस्य मिश्रितद्रव्यविशेषस्य, उपलेपेन–विलेपनेन, हारि–मनोहरम्, **कुरुत** सम्पादयत; पुनः **स्थानेषु स्थानेषु** तत्तत्स्था-

कारयत सर्वतः शान्तिसलिलक्षेपमकृतकालक्षेपम्, आहरत भगवतीं षष्ठीदेवीम्, आलिखत जातमातृपटलम्, आरभध्वमार्यवृद्धासपर्याम्, निधत्त पर्यन्तेषु शयनस्य सद्योऽभिमन्त्रितां रक्षाभूतिरेखाम्' इत्यादि जल्पता तल्पनिकटोपविष्टेन शुद्धान्तजरतीजनेन क्रियमाणविविधशिशुरक्षाविधानमविरलचलत्तालवृन्तनिर्वाप्यमाणसनागरक्षोदपानोदकशरावमधिकोदञ्चितात्मभिरचञ्चलावस्थानैरुत्थाय विस्मितैरिव त्रिभुवनातिशायिशोभमर्भकरूपमवलोकयद्भिर्मङ्गलप्रदीपैः प्रकाशिताभ्यन्तरमदूरस्थितात्मव्यापारसत्वरसूतिकं प्रियायाः प्रसूतिगृहमविशत् [भ] ॥

प्रविश्य च सतर्षमुद्भूतप्रहर्षस्मितो विस्मयस्तिमितपक्ष्मणा लोचनयुगेन स्फुटविभाव्यमानसकलचक्रवर्तिलक्षणां शस्यां प्रतिक्षणमवलोक्य सूनोस्त्रिभुवनविलक्षणामवयवश्रियममन्दनिर्गतानन्दाश्रुबिन्दुरप्रतिपादनीयां

नेषु, **रत्नचूर्णस्वस्तिकान्** रत्नानां चन्द्रकान्तादीनाम्, यानि चूर्णानि–कणाः, तैः स्वस्तिकान्–माङ्गलिकाकारविशेषान्, **रचयत** कल्पयत; पुनः **द्वारि** द्वारोपरि, **नूतनं** नवीनम्, **चूतपल्लवदाम** आम्रपल्लवमयतोरणमालाम्, **बध्नीत** स्थापयत, बध्नीतेत्यर्थः; पुनः **अन्तः** अभ्यन्तरे, **उत्फुल्लपङ्कजोपहारम्** उत्फुल्लानि उद्विकसितानि, यानि पङ्कजानि–कमलानि, तद्रूपम्, उपहारं–माङ्गलिकप्राभृतम्, **विकिरत** विक्षिपत; पुनः **अकृतकालक्षेपं** न कृतः कालक्षेपः–कालातिक्रमः, विलम्ब इति यावत्, यस्मिंस्तादृशं यथा स्यात् तथा, **सर्वतः** सर्वत्र, **शान्तिसलिलक्षेपं** शान्तिजनकजलसेकम्, **कारयत** भृत्यद्वारा सम्पादयत; पुनः **भगवतीम्** ऐश्वर्यशालिनीम्, **षष्ठीदेवीं** षोडशमातृकासु षष्ठीं बालपालनशीलाम्, "मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्तिता । शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी । तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनीम्" इत्याद्युक्तां देवीम्, **आहरत** आवाहयत; पुनः **जातमातृपटलं** जातं नाम गोघृतप्राशनादिना संस्कारविशेषः, तदधिष्ठातृभूतं मातृपटलं–गौरीपद्मादिदेवीषोडशकम्, **आलिखत** चित्रयत; पुनः **आर्यवृद्धासपर्याम्** आर्याणां–श्रेष्ठानाम्, वृद्धानां–वृद्धस्त्रीणाम्, सपर्यां पूजाम्, **आरभध्वं** प्रारभध्वम्; पुनः **शयनस्य** जातकशय्यायाः, **पर्यन्तेषु** प्रान्तभूमिषु, **सद्यः** तत्क्षणम्, **अभिमन्त्रितां** मन्त्रेण संस्कृताम्, **रक्षाभूतिरेखां** रक्षार्थभस्मरेखाम्, **निधत्त** स्थापयत, रचयतेत्यर्थः, **इत्यादि** इत्याद्यादेशवाक्यम् । पुनः कीदृशेन शुद्धान्तजरतीजनेन ? **तल्पनिकटोपविष्टेन** जातकशय्यासमीपोपविष्टेन । पुनः कीदृशं प्रसूतिकागृहम् ? **अविरतचलत्तालवृन्तनिर्वाप्यमाणसनागरक्षोदपानोदकशरावम्** अविरतं–निरन्तरम्, चलद्भिः उद्गच्छद्भिः, तालवृन्तैः–तालव्यजनैः, निर्वाप्यमाणाः–शीतलतामापाद्यमानाः, सनागरक्षोदाः शुण्ठीचूर्णसहिताः, पानोदकशरावाः–पेयजलाधारभूतपात्रविशेषा यस्मिंस्तादृशम् । पुनः **मङ्गलप्रदीपैः** मङ्गलार्थप्रकल्पितप्रदीपैः, **प्रकाशिताभ्यन्तरं** प्रकाशितम्–उद्भासितम्, अभ्यन्तरं–मध्यं यस्य तादृशम् । कीदृशैः ? **अधिकोदञ्चितात्मभिः** अधिकम्–अत्यन्तं यथा स्यात् तथा, उदञ्चितः–उद्वेलितः, आत्मा–स्वरूपं येषां तादृशैः, पुनः **अचञ्चलावस्थानैः** निश्चेष्टं संतिष्ठमानैः, अत एव **उत्थाय** उद्बुध्य, **विस्मितैरिव** सञ्जाताश्चर्यैरिवेत्युत्प्रेक्षा, **त्रिभुवनातिशायिशोभं** त्रिभुवनातिशायिनी–भुवनत्रयोत्कृष्टा, शोभा यस्य तादृशम्, **अर्भकरूपं** जातकस्वरूपम्, **अवलोकयद्भिः** पश्यद्भिः । पुनः कीदृशम् ? **अदूरस्थितात्मव्यापारसत्वरसूतिकम्** अदूरे–समीपे स्थिता, आत्मव्यापारे–प्रसवसम्बन्धिस्वकार्ये, सत्वरा–ससम्भ्रमा, सूतिका–कृतप्रसवा यस्मिंस्तादृशम् [भ] ।

च पुनः, **सतर्षं** साभिलाषम्, **प्रविश्य** अन्तःप्रवेशं कृत्वा, **उद्भूतप्रहर्षस्मितः** उद्भूतम्–उत्पन्नम्, प्रहर्षेण–अतिहर्षेण, स्मितं–मन्दहासो यस्य तादृशः, यद्वा उद्भूतेन प्रहर्षेण स्मितः–मन्दं हसितः सन्, **विस्मयस्तिमितपक्ष्मणा** विस्मयेन–आश्चर्येण, स्तिमिते–निःस्पन्दे, पक्ष्मणी–नेत्रोपरितनरोमलेखे यस्य तादृशेन, **लोचनयुगेन** नयनद्वयेन, **स्फुटविभाव्यमानसकलचक्रवर्तिलक्षणाम्** स्फुटं यथा स्यात् तथा, विभाव्यमानानि–प्रतीयमानानि, सकलानि–समस्तानि, चक्रवर्तिनां–षट्खण्डाधिपानाम्, लक्षणानि–जातकीयहस्तादिगतचक्रादिचिह्नानि यस्यां तादृशीम्, **शस्यां** प्रशंसनीयाम्, **सूनोः** सुतस्य, **त्रिभुवनविलक्षणां** भुवनत्रयादुत्कृष्टाम्, **अवयवश्रियम्** अङ्गशोभाम्, **प्रतिक्षणं** क्षणे क्षणे, **अवलोक्य** विलोक्य, **अमन्दनिर्गतानन्दाश्रुबिन्दुः** अमन्दं यथा स्यात् तथा, निर्गताः–नयनाभ्यां निःसृताः, आनन्दाश्रुबिन्दवः–

सुखमयीं कामपि दशां प्राप [म]। निर्गत्य च विमोचिताशेषबन्धनः सदृशमाधिपत्यस्य भूतेरुदारतायाः प्रमोदस्य च निजस्य विस्मापितजगत्त्रयं मासमात्रमनुदिवसमुत्सवमकारयत् [य] ॥

अतिक्रान्ते च षष्ठीजागरे समागते च दशमेऽह्नि कारयित्वा सर्वनगरदेवतायतनेषु पूजाम्, मानयित्वा मित्रज्ञातिवर्गम्, अभ्यर्च्य गुरुजनम्, दत्त्वा समारोपिताभरणाः सवत्साः सहस्रशो गाः सुवर्णं च प्रचुरमारम्भनिःस्पृहेभ्यो विप्रेभ्यः स्वप्ने शतमन्युवाहनो वारणपतिर्दृष्ट इति संप्रधार्य तस्यैव स्वप्नस्य सदृशमात्मीयनाम्नश्चैकदेशेन समुदायवाच्येन चार्थेन समर्थितानुहारं हरिवाहन इति शिशोर्नाम चक्रे [र] ॥

क्रमेण च प्रसवदिवसादारभ्य तत्कालोपजातप्रसवाभिरभिनवयौवनोपचितपरिमण्डलस्तनीभिरव्यङ्गनीरोगाङ्गयष्टिभिरिष्टविप्रयोगादिभिर्दुःखैरनुपतप्ताभिराप्ततया निपुणमवधृताभिर्धात्रीभिरनवरतमुपचर्यमाणस्य शुक्लपक्षचन्द्रमस इव प्रतिदिवसोपचीयमानदेहावयवकान्तेरखिलवेदोक्तविधिविदा वेधसेवापरेण स्वयं पुरोधसा

आनन्दजनिताश्रुकणा यस्य तादृशः सन्, **अप्रतिपादनीयाम्** अवर्णनीयाम्, **कामपि** विचित्राम्, **सुखमयीम्** आनन्दमयीम्, **दशाम्** अवस्थाम्, **प्राप** अनुबभूव [म]।

च पुनः, **निर्गत्य** प्रसूतिगृहान्निष्क्रम्य, **विमोचिताशेषबन्धनः** विमोचितानि–कारागाराध्यक्षद्वारा विश्लेषितानि, अशेषाणि–सर्वाणि, बन्धनानि–तस्करादीनां निगडनियन्त्रणानि येन तादृशः सन्, **निजस्य** स्वस्य, **आधिपत्यस्य** जगत्स्वामित्वस्य, **भूतेः** ऐश्वर्यस्य, **उदारतायाः** दानशीलतायाः, **प्रमोदस्य** सुतरत्नोद्भवजन्यानन्दस्य च, **सदृशम्** अनुरूपम्, पुनः **विस्मापितजगत्त्रयं** विस्मापितम्–आश्चर्यमापादितम्, जगत्त्रयं–लोकत्रयं येन तादृशम्, **मासमात्रं** मासप्रमितम्, मासव्यापकमित्यर्थः, **उत्सवं** सुतजन्मोत्सवम्, **अनुदिवसं** प्रतिदिनम्, **अकारयत्** कारितवान् [य]। **च** पुनः, **षष्ठीजागरे** षष्ठ्यां–देव्याः पूजनार्थं षष्ठ्यां रात्रौ, जागरे–जागरणे **अतिक्रान्ते** व्यतीते, निष्पन्ने सतीति यावत्, दशमे **अहनि** दिने, **समागते** समुपस्थिते च सति, **सर्वनगरदेवतायतनेषु** सर्वाणि-समस्तानि, यानि नगरस्य देवताऽऽयतनानि–देवमन्दिराणि, तेषु, **पूजां** देवताऽऽराधनं कारयित्वा, पुनः **मित्रज्ञातिवर्गं** मित्राणां–सुहृदाम्, ज्ञातीनां–बन्धूनां च, वर्गं–समूहम्, **मानयित्वा** सत्कृत्य, पुनः **गुरुजनं** "धर्मज्ञो धर्मकर्ता च सदा धर्मपरायणः। सत्त्वेभ्यो धर्मशास्त्रार्थदेशको गुरुरुच्यते ॥" इत्येवं परिभाषितं मुनिजनम्, **अभ्यर्च्य** पूजयित्वा, पुनः **आरम्भनिःस्पृहेभ्यः** लौकिककृत्यपारविरक्तेभ्यः, **विप्रेभ्यः** ब्राह्मणेभ्यः, **समारोपिताभरणाः** समारोपितानि–समर्पितानि, आभरणानि–अलङ्करणानि याभ्यस्तादृशीः, **सवत्साः** वत्ससहिताः, **सहस्रशः** सहस्रसंख्यकाः, **गाः** धेनूः, **प्रचुरं** बहु, **सुवर्णं** च दत्त्वा, **स्वप्ने** स्वप्नावस्थायाम्, **शतमन्युवाहनः** इन्द्रवाहनभूतः, **वारणपतिः** गजाधिराजः, ऐरावत इत्यर्थः, **दृष्टः** अवलोकित इति **संप्रधार्य** शुभफलेन निर्णीय, तस्यैव **स्वप्नस्य** स्वप्नदृष्टवस्तुनाम्नः, सदृशम्, **आत्मनाम्नः** मेघवाहनेतिस्वनाम्नः, **एकदेशेन** वाहनेत्येकदेशावच्छेदेन, सदृशम् पुनः **समुदायवाच्येन** हरिवाहनेतिसमुदायप्रतिपाद्येन, **अर्थेन** हरेरिन्द्रस्य वाहन इत्याकारकेण, **समर्थितानुहारं** समर्थितः–इन्द्रवाचकहरिशब्दपर्यायविधया मेघवाहनशब्दस्योपस्थित्या तद्वाहनत्वेनोपपादितः, अनुहारः–पितृसादृश्यं यत्र तादृशम्, वाह्यवाहनभावस्य किञ्चित्सादृश्यनियतत्वेन हरिपदोपस्थितमेघवाहनवाहनत्वेन मेघवाहनसादृश्यस्य सुतरामुपपत्तेरिति भावः। हरिवाहन इति **शिशोः** जातकस्य, नाम, **चक्रे** कृतवान्, अत्र सर्वत्र वाक्ये राजेति शेषो बोध्यः [र]। **क्रमेण** क्रमशः, **अन्तःपुरे** राजस्त्रीभवने, **तस्य** शिशोर्हरिवाहनस्य, पञ्च वर्षाणि, **अतिचक्रमुः** व्यतीतानि। कीदृशस्य ? **प्रसवदिवसात्** गर्भविमोचनदिनात्, **आरभ्य** प्रभृति, **धात्रीभिः** उपमातृभिः, **अनवरतं** निरन्तरम्, **उपचर्यमाणस्य** निषेव्यमाणस्य। कीदृशीभिः ? **तत्कालोपजातप्रसवाभिः** नवप्रसूताभिः; पुनः **अभिनवयौवनोपचितपरिमण्डलस्तनीभिः** अभिनवयौवनेन–नूतनतारुण्यावस्थया, उपचितौ–प्रवृद्धौ, परिमण्डलौ–वर्तुलौ, स्तनौ यासां तादृशीभिः; पुनः **अव्यङ्गनीरोगाङ्गयष्टिभिः** अव्यङ्गा अविकृताङ्गा, नीरोगा–रोगरहिता च, अङ्गयष्टिः–शरीररूपा यष्टिर्यासां तादृशीभिः; पुनः **इष्टविप्रयोगादिभिः** इष्टजनविरहादिभिः, दुःखैः, **अनुपतप्ताभिः** अनभिभूताभिः; पुनः **आप्ततया** विश्वसपात्रतया, **निपुणं** दृढं यथा स्यात् तथा, **अवधृताभिः** निर्धारिताभिः। पुनः कीदृशस्य ? **शुक्लपक्षचन्द्रमस इव** शुक्लपक्षस्थचन्द्रस्येव, **प्रतिदिवसोपचीयमानदेहावयवकान्तेः** प्रतिदिवस-प्रतिदिनम्, उत्तरोत्तरमिति यावत्, उपचीयमाना–

निवर्तितान्नप्राशनादिसकलसंस्कारस्य समाहृतसमग्रमङ्गलोपकरणाभिरन्तःपुरवृद्धाभिस्त्रिसंध्यामारभ्यमाणावतारणकक्रियस्य सर्वायुर्वेदपारगैर्भिषग्भिर्मन्त्रसिद्धिलब्धप्रसिद्धिभिश्च महानरेन्द्रैरतन्द्रितैर्मुहुर्मुहुः प्रतिजागर्यमाणस्य प्रकटितसंभ्रमाभिरन्तःपुरिकाभिराहूयाहूय गाढमाश्लिष्यमाणस्य स्थानस्थानारोपितमहाप्रभावानेकमणिभिः प्रधानभूषणैः प्रसाधितललितसर्वाङ्गस्य धृतायुधान्तर्वंशिकव्रातसततानुगम्यमानमार्गस्य स्वभावरम्येषु मणिकुट्टिमेषु क्रीडाशैलकटकेषु नन्दनवनप्रासादकेषु कृत्रिमापगापुलिनेषु च कपोलदोलायमानकमनीयकाकपक्षैः क्षितिपालदारकैः सह क्रीडासुखमनेकप्रकारमनुभवतो निरङ्कुशप्रचारस्य पञ्च वर्षाणि तस्यान्तःपुरेऽतिचक्रमुः [ल] ॥

अवतीर्णे च षष्ठे किञ्चिदुपजातदेहसौष्ठवस्य व्यक्तवर्णवचनप्रवृत्तेर्विनयारोपणाय राजा राजकुलाभ्यन्तर एव कारितानवद्यविद्यागृहः सम्यगासेवितगुरुकुलानामवगताखिलशास्त्रमर्मनिर्मलोक्तियुक्तीनामुत्तमाम्नायलब्ध-

---

वर्धमाना, अवयवकान्तिः—अङ्गशोभा यस्य तादृशस्य । पुनः **अखिलवेदोक्तविधिविदा** वैदिकाशेषविधानाभिज्ञेन, **अपरेण** द्वितीयेन, **वेधसा** ब्रह्मणेवेत्युत्प्रेक्षा, **पुरोधसा** पुरोहितेन, **स्वयम्** आत्मना, **निर्वर्तितान्नप्राशनादिसंस्कारस्य** निर्वर्तिताः—निष्पादिताः, अन्नप्राशनादयः संस्कारा यस्य तादृशस्य । पुनः **समाहृतसकलमङ्गलोपकरणाभिः** समाहृतानि—संगृहीतानि, सकलानि सर्वाणि, मङ्गलोपकरणानि—मङ्गलसाधनवस्तूनि याभिस्तादृशीभिः, **अन्तःपुरवृद्धाभिः** अन्तःपुरस्थवृद्धस्त्रीभिः, **त्रिसन्ध्यं** प्रातर्मध्याह्नसायंरूपासु तिसृषु सन्ध्यासु **आरभ्यमाणावतारणकक्रियस्य** आरभ्यमाणा—अनुष्ठीयमाना अवतारणकक्रिया—लवणाद्यवतारणात्मकमाङ्गलिकक्रियाविशेषो यस्य तादृशस्य पुनः **सर्वायुर्वेदपारगैः** सर्वः—समग्रः, य आयुर्वेदः वेदोपाङ्गभूतं चिकित्साशास्त्रम्, तत्पारगैः—तदन्तगैः, **मन्त्रसिद्धिलब्धप्रसिद्धिभिश्च** मन्त्रसिद्ध्या लब्धा—प्राप्ता, प्रसिद्धिः—लोके ख्यातिर्यैस्तादृशैश्च, **अतन्द्रितैः** अनलसैः, **महानरेन्द्रैः** महामन्त्रवादिभिः, विशिष्टनृपैश्च, **मुहुर्मुहुः** पुनः पुनः, **प्रतिजागर्यमाणस्य** प्रतिक्रियमाणस्य । पुनः **प्रकटितसम्भ्रमाभिः** प्रकटितः—प्रदर्शितः, सम्भ्रमः-वात्सल्यातिशयजन्यमौत्सुक्यं याभिस्तादृशीभिः, **अन्तःपुरिकाभिः** अन्तःपुरस्त्रीभिः, **आहूयाहूय** पुनः पुनराहूय, **गाढम्** अत्यन्तम्, **आश्लिष्यमाणस्य** आलिङ्ग्यमानस्य, पुनः **स्थानस्थानारोपितमहाप्रभानेकमणिभिः** स्थाने स्थाने—तत्तदंशे आरोपिताः निवेशिताः, महाप्रभाः—उत्कृष्टप्रभाशालिनः, अनेके मणयो येषु तादृशैः, **प्रधानभूषणैः** उत्तमालङ्करणैः, **प्रसाधितललितसर्वाङ्गस्य** प्रसाधितानि—अलङ्कृतानि, ललितानि—मनोहरणानि सर्वाणि समस्तानि, अङ्गानि—हस्तपादादीनि यस्य तादृशस्य । पुनः **धृतायुधान्तर्वंशिकव्रातसततानुगम्यमानमार्गस्य** धृताः—तद्रक्षार्थं गृहीताः, आयुधाः—बाणा यैस्तादृशा ये अन्तर्वंशिकाः-अन्तःपुररक्षकाः कुब्ज-वामनादयः, तेषां व्रातेन—समूहेन, सततं-सर्वदा, अनुगम्यमानः—अनुस्त्रियमाण, मार्गो यस्य तादृशस्य । पुनः **स्वभावरम्येषु** स्वभावतो मनोहरेषु, **मणिकुट्टिमेषु** मणिबद्धभूमिषु, **क्रीडाशैलकटकेषु** क्रीडार्थं ये शैलाः—पर्वताः, तत्कटकेषु—तन्नितम्बोपरि, **नन्दनवनप्रासादकेषु** नन्दनवनं नाम—मेरुपर्वतोपरितनमिन्द्रवनम्, तत्सदृशं यद् वनम्, तत्रत्याः प्रासादाः—राजगृहा एव प्रासादकास्तेषु, यद्वा नन्दयति—आनन्दयतीति नन्दनं यद् वनं तत्रत्यप्रासादेषु, **प्रसादकेष्वि**ति पाठकल्पे तु नन्दनवनवत्प्रसादजनका ये क्रीडाशैलकटकास्तेष्विति विशेषणविधया व्याख्येयम् । **च** पुनः, **कृत्रिमापगापुलिनेषु** कृत्रिमाः—क्रियया निर्वृत्ताः, क्रीडार्थमुत्खाता इत्यर्थः, या आपगाः—नद्यः, तत्पुलिनेषु-तदीयसैकतप्रदेशेषु, **कपोलदोलायमानकमनीयकाकपक्षैः** कपोलेषु—गण्डस्थलेषु, दोलायमानाः—इतस्ततश्चलन्तः, कमनीयाः मनोहराः,काकपक्षाः—मस्तकोभयपार्श्वलम्बमानाः "बालानां तु शिखा प्रोक्ता काकपक्षः" इत्युक्तबालककेशपाशा येषां तादृशैः, **क्षितिपालदारकैः** राजशिशुभिः सह, **अनेकप्रकारं** बहुविधम्, **क्रीडासुखं** क्रीडाजन्यमानन्दम्, **अनुभवतः** अनुभवगोचरीकुर्वाणस्य । पुनः **निरङ्कुशप्रचारस्य** निर्बाधगमनस्य, स्वेच्छाचारिण इत्यर्थः [ल] । **च** पुनः, **षष्ठे** षष्ठवर्षे **अवतीर्णे** प्रारब्धे सति, **किञ्चिदुपजातदेहसौष्ठवस्य** किञ्चिदुपजातम्—ईषदुत्पन्नम्, देहसौष्ठवं-शरीरसौन्दर्यं यस्य तादृशस्य; पुनः **व्यक्तवर्णवचनप्रवृत्तेः** व्यक्तानां-स्फुटानाम्, वर्णानाम्, वचने प्रतिपादने, प्रवृत्तिर्यस्य तादृशस्य तस्य बालकस्य, **विनयारोपणाय** विनयशिक्षणाय, **राजा** मेघवाहनः, **राजकुलाभ्यन्तर एव** राजधानीमध्य एव, **कारितानवद्यविद्यागृहः** कारितं—निर्मापितम्, अनवद्यं—मनोहरम्, विद्यागृहं—विद्याध्ययनगृहं येन तादृशः सन्, **अहरहः** प्रतिदिनम्, **विद्यागुरूणां** विद्याध्यापकानाम्, **संग्रहं** सञ्चयम्, **अकरोत्** कृतवान् । कीदृशानाम्? **सम्य**

जन्मनामसन्मार्गगतिनिसर्गविद्विषां विद्यागुरूणामहरहः संग्रहमकरोत् [व]। उपनिन्ये च तेभ्यः शोभने दिन-मुहूर्ते निवर्तितसमस्तेतिकर्तव्यः स्नातमनुपहतसूक्ष्मक्षौमकल्पितोत्तरासंगमनुलिप्ताङ्गमामोदिना मलयजरसेन प्रत्युरसमामुक्तमुक्ताकलापमुपरचितरोचनातिलकरुचिरललाटमुत्तमाङ्गघटितमालतीमुकुलगण्डमालमवदातवेष-तया सविशेषदर्शितादरमभ्युत्थितायाः पुनः सरस्वत्याः सितांशुधवलया शरीरच्छाययेव च्छुरितमात्मज-मवनिपतिः [श]। पूजाविशेषवर्धितप्रीतयश्च ते लिपिविशेषदर्शनपुरःसरमशेषाण्यपि व्याकरणादीनि शास्त्राणि तस्मै क्रमेणोपादिक्षन् [ष] ॥

कुमारोऽपि सतताभियुक्ततया गुरूणां नियन्त्रणपरतया पितुरविद्यमानतया दुर्विनीतसंनिधेः स्वाधीनतया सर्वागमोपनिबन्धानां कुशाग्रीयतया च निजबुद्धेरल्पेनैव कालेन तेषामभ्यन्तरोऽभवत् [स]। अमुक्ताभि-योगश्च दशभिरब्दैश्चतुर्दशापि विद्यास्थानानि सह सर्वाभिरुपविद्याभिर्विदाञ्चकार। कलाशास्त्रं च निरवशेषं

गासेवितगुरुकुलानां सम्यक्-पूर्णशिक्षापर्यन्तम्, आसेवितं-श्रद्धया सेवितम्, गुरुकुलं यैस्तादृशानाम्; पुनः **अवगताखिलशास्त्रमर्मनिर्मलोक्तियुक्तीनाम्** अवगताः-ज्ञाताः, अखिलशास्त्रमर्मणां-समस्तशास्त्रतात्पर्याणाम्, या निर्मलोक्तयः-निर्दुष्टनिर्वचनानि, तद्युक्तयः-तदुपपत्तयो यैस्तादृशानाम्; पुनः **उत्तमाम्नायलब्धजन्मनाम्** उत्तमाम्नाये-सत्कुले, लब्धं जन्म यैस्तादृशानाम्; पुनः **असन्मार्गगतिनिसर्गविद्विषाम्** असन्मार्गे-उत्पथे, या गतिः-गमनम्, तद्विद्विषां-तद्वैरिणाम् [व]। **च** पुनः, **निर्वर्तितसमस्तेतिकर्तव्यः** निर्वर्तिता-सम्पादिता, समस्ता इतिकर्तव्यता-उपनयनाङ्गक्रियाकलापो येन तादृशः, **अवनिपतिः** राजा, **शोभने** ज्योतिषशास्त्रोक्तशुभलक्षणान्विते **दिनमुहूर्ते** दिने मुहूर्ते च **आत्मजं** पुत्रम्, **तेभ्यः** विद्यागुरुभ्यः, **उपनिन्ये** विधिना समर्पयामास, गुरुकुले वासयामास, कीदृशम्? **स्नातं** कृतस्नानम्; पुनः **अनुपहतसूक्ष्मक्षौमकल्पितोत्तरासङ्गम्** अनुपहतेन-विशुद्धेन, सूक्ष्मेण सूक्ष्मतन्तुमयेन, क्षौमेण-कौशेयवस्त्रेण, कल्पितः-रचितः, उत्तरासङ्गः-उत्तरीयाच्छादनं येन तादृशम्; पुनः **आमोदिना** सुगन्धाढ्येन, **मलयजरसेन** चन्दनपङ्केन, **अनुलिप्ताङ्गम्** अनुलिप्तशरीरम्; पुनः **प्रत्युरसं** वक्षःस्थले, **आमुक्तमुक्ताकलापम्** आमुक्तः-धृतः, मुक्ताकलापः-मुक्ताहारो येन तादृशम्; पुनः **उपरचितरोचनातिलकरुचिरललाटम्** उपरचितेन-विन्यस्तेन, रोचनातिलकेन,-गोरोचनामयतिलकेन, रुचिरः-मनोहरः, ललाटः-भालस्थलं यस्य तादृशम्; पुनः **उत्तमाङ्गघटितमालतीमुकुलगण्डमालम्** उत्तमाङ्गे मस्तके, घटिता स्थिता, मालत्याः-तदाख्यलतायाः, यानि मुकुलानि-किञ्चिद्विकसितकलिकाः, तन्मयी गण्डमाला-गण्डस्थललम्बिनी माला यस्य तादृशम्; पुनः **अवदातवेषतया** शुभ्रवेषेण, **सविशेषदर्शितादरं** सविशेषं-सातिशयं यथा स्यात् तथा, दर्शितः-अभिव्यक्तः, आदरः-सम्मानो यस्य तादृशम्; अत एव **पुरः** अग्रे, **अभ्युत्थितायाः** कृताभ्युत्थानायाः, **सरस्वत्याः** विद्याधिष्ठातृदेव्याः, **सितांशुधवलया** चन्द्रवच्छुभ्रया, **शरीरच्छायया** शरीरकान्त्या **छुरितमिव** व्याप्तमिवेत्युत्प्रेक्षा [श]। **पूजाविशेषवर्धितप्रीतयः** पूजाविशेषेण-सम्मानातिशयेन, वर्धिता-प्रचुरिता, प्रीतिः-प्रसादो येषां तादृशाः, **ते** विद्यागुरवः, **लिपिविशेषदर्शनपुरस्सरं** लिपिविशेषाणां-लेख्याक्षररूपाणां ब्राह्म्यादीनामष्टादशभेदानाम् दर्शनपूर्वकं-परिचयपूर्वकम्, **अशेषाण्यपि** सर्वाण्यपि, **व्याकरणादीनि** शब्दशास्त्रप्रभृतीनि शास्त्राणि, **क्रमेण** यथाक्रमम्, **तस्मै** राजपुत्राय, **उपादिक्षन्** उपदिष्टवन्तः [ष]। **कुमारोऽपि** राजपुत्रोऽपि, **गुरूणां** विद्यागुरूणाम्, **सततं** सर्वदा, **अभियुक्ततया** शिक्षणपरतया, तथा **पितुः** मेघवाहनस्य **नियन्त्रणपरतया** निग्रहपरतया, तथा **दुर्विनीतसन्निधेः** दुर्जनसंपर्कस्य, **अविद्यमानतया** असत्त्वेन, तथा **सर्वागमोपनिबन्धानां** सर्वेषां शास्त्रीयग्रन्थानाम्, **स्वाधीनतया** स्वायत्ततया, तथा **निजबुद्धेः** स्वबुद्धेः **कुशाग्रीयतया** कुशाग्रवदतिसूक्ष्मतया, **अल्पेनैव** कियतैव, कालेन, **तेषां** विद्यागुरूणाम्, **अभ्यन्तरः** अन्तर्गतः, तदन्तरवगाहनकुशल इत्यर्थः, **अभवत्** बभूव [स]। **च** पुनः, **अमुक्ताभियोगः** अत्यक्ताभ्यासः, दशभिः **अब्दैः** वर्षैः, **चतुर्दशापि** "षडङ्गवेदाश्चत्वारो मीमांसाऽऽन्वीक्षकी तथा। धर्मशास्त्रं पुराणं च विद्या एताश्चतुर्दश ॥" इत्यादिना चतुर्दशत्वेन संख्यातानि, विद्यास्थानानि, **सर्वाभिः** सकलाभिः, **उपविद्याभिः** काव्यनाटकादिभिः **सह**, **विदाञ्चकार** अधिजगे। **च** पुनः, **निरवशेषं** समग्रम्, **कलाशास्त्रम्**, **विवेद**

विवेद, विशेषतश्चित्रकर्मणि वीणावाद्ये च प्रवीणतां प्राप [ह] । भुजबलं चास्य विस्मापितसुरासुरं केसरिकिशोरस्येव सहजं शारीरमभवत्, आरब्धकार्यस्य त्रिभुवनेऽप्यशक्यमविजेयमसाध्यं च किमपि न प्रायेणाभूत् [क्ष] । एवं च परिणताशेषशास्त्रमासादितसकलास्त्रविद्यापारमुपलब्धसर्वबुधजनसाधुवादमारूढनवतारुण्यलक्ष्मीलब्धपरिपूर्णसर्वावयवशोभमनुमोदितविद्यागुरुजनेन हरिवाहनमतिक्रान्ते षोडशे वर्षे हर्षनिर्भरो राजा विसर्जितैराकारणाय सादरमुदाराकारवेषैः प्रधानपुरुषैरनुगम्यमानमतिभूयसा विभवेन स्वभवनमानिनाय [ज्ञ]॥

निवर्तिताखिलगृहप्रवेशमङ्गलश्चास्य नगरबाह्यायामलघुवप्रालङ्कृतप्राकारलङ्घिताभ्रमदभ्रतोरणस्तम्भमुभयतो निखातशातकुम्भपूर्णकुम्भोद्भासितद्वारदेशमनेकगजतुरङ्गशालाभिरामं कुमारभवनमकारयत [अ] । कर्तुकामश्च यौवराज्याभिषेकं तस्य साहाय्यकार्थमाज्ञाभरसहं प्रज्ञया पराक्रमेणाकारेण विनयेन वचनविन्यासेनोद्यमेन-

---

विदितवान् । च पुनः, विशेषतः विशेषेण, चित्रकर्मणि चित्रणकलायाम्, च पुनः, वीणावाद्ये वीणारूपवाद्यवादनकलायाम्, प्रवीणतां कुशलताम्, प्राप प्राप्तवान् [ह]। च पुनः, अस्य राजपुत्रस्य, भुजबलं बाहुबलम्, विस्मापितसुरासुरं विस्मापिताः- विस्मयमापादिताः, सुराः–देवाः, असुराः–राक्षसाश्च येन तादृशम्, अभवत्, किमिव? केसरिकिशोरस्य सिंहशिशोः सहजं स्वाभाविकम्, शारीरं शरीरसम्बन्धि, बलमिव । आरब्धकार्यस्य प्रारब्धव्यापारस्य तस्य कुमारस्य, त्रिभुवनेऽपि लोकत्रयेऽपि, किमपि अशक्यं शक्त्यसाध्यम्, अविजेयं विजेतुमशक्यम्, असाध्यं साधयितुमशक्यं च, प्रायेण बाहुल्येन, न, अभूत् आसीत् [क्ष] । एवम् अनेन प्रकारेण षोडशे वर्षे अतिक्रान्ते व्यतीते सति, हर्षनिर्भरः आनन्दपूर्णः, राजा मेघवाहनः, अतिभूयसा अत्यधिकेन, विभवेन वित्तमाध्योत्सवेन, हरिवाहनं तन्नामकं स्वकुमारम्, स्वभवनं स्वगृहम्, आनिनाय आनीतवान् । कीदृशम्? परिणताशेषशास्त्रं परिणतानि–परिपक्वानि, दृढमभ्यस्तीकृतानीति यावत्, अशेषाणि–समस्तानि, शास्त्राणि–ग्रन्था यस्य तादृशम्; पुनः आसादितसकलास्त्रविद्यापारम् आसादितः–प्राप्तः, सकलायाः–समग्रायाः, अस्त्रविद्यायाः–बाणविद्यायाः, पारः–अन्तो येन तादृशम्; पुनः उपलब्धसर्वबुधजनसाधुवादम् उपलब्धः–प्राप्तः, सर्वेषां बुधजनानां–विद्वज्जनानाम्, साधुवादः–'अयं कुमारः साधुः, विद्यावतामुत्तमः' इत्याकारकः प्रशंसावादो येन तादृशम्; पुनः आरूढनवतारुण्यलक्ष्मीलब्धपरिपूर्णसर्वावयवशोभम् आरूढया–आपन्नया, नवतारुण्यलक्ष्म्या–नवयौवनसंपदा, लब्धा–प्राप्ता, सर्वेषामवयवानाम्–अङ्गानाम्, शोभा–सौन्दर्यं येन तादृशम्; पुनः विद्यागुरुजनेन, अनुमोदितं गृहं गन्तुमनुमतम्; पुनः आकारणाय तत्स्वागमनाय, सादरम् आदरपूर्वकम्, विसर्जितैः प्रेषितैः, उदाराकारवेषैः समृद्धाकारवेषशालिभिः, प्रधानपुरुषैः मन्त्रिजनैः, अनुगम्यमानम् अनुस्रियमाणम् [ज्ञ] ।

अस्य हरिवाहनस्य, निवर्तिताखिलगृहप्रवेशमङ्गलः निवर्तितं–सम्पादितम्, अखिलं–समग्रम्, गृहप्रवेशाय–कुमारस्य गृहद्वान्तरागमनाय, मङ्गलं–माङ्गलिकमनुष्ठानं येन तादृशः, राजेति शेषः, नगरबाह्यायां नगराद्बहिर्भूतायां भूमौ, कुमारभवनं कुमारप्रासादम्, अकारयत् निरमापयत् । कीदृशम्? अलघुवप्रालङ्कृतप्राकारलङ्घिताभ्रमदभ्रतोरणस्तम्भम् अलघुना–महता, वप्रालङ्कृतेन–परिखोद्धृतमृत्तिकास्तूपभूषितेन, प्राकारेण, लङ्घितानि–अधःकृतानि, आभ्रमन्ति–समन्तादितस्ततश्चलन्ति, अभ्राणि–मेघा एव तोरणस्तम्भाः–द्वारस्तम्भा यस्य तादृशम्; मेघावधुन्नतमित्यर्थः; यद्वा अलघुवप्रालङ्कृतेन प्राकारेण लङ्घितानि अभ्राणि मेघा येन तादृशम्, पुनः अदभ्रतोरणस्तम्भम्–अनल्पद्वारस्तम्भम्; पुनः उभयतः पार्श्वद्वये, निखातशातकुम्भपूर्णकुम्भोद्भासितद्वारदेशं निखाताः–निखननेन निवेशिताः, ये शातकुम्भस्य–सुवर्णस्य पूर्णकुम्भाः–पूर्णकलसाः, तैरुद्भासितः–उद्दीपितः द्वारदेशो यस्य तादृशम्; पुनः अनेकगजतुरङ्गशालाभिरामम् अनेकेषां–बहूनाम्, गजानां–हस्तिनाम्, तुरङ्गानाम्–अश्वानां च, शालाभिः–गृहैः, अभिरामं–मनोहरम् [अ] । च पुनः, तस्य कुमारस्य, यौवराज्याभिषेकं युवराजत्वाभिषेकविधिम्, कर्तुकामः चिकीर्षुः, साहाय्यकार्थं तत्साहाय्यार्थम्, आदरप्रेषितैः आदरेण प्रस्थापितैः प्रणिधिपुरुषैः अनुचरजनैः, उर्वीपतिकुमारं कमपि राजकुमारम्, अनिशं सततम्, अन्विष्येष अन्विष्यति स्म । कीदृशम्? आज्ञाभरसहम् तदाज्ञापालनभारक्षमम्, प्रज्ञया विवेकेन, पराक्रमेण सामर्थ्येन, आकारेण आकृत्या, विनयेन प्रभुभक्तिनम्रतया, वचनविन्यासेन वाक्यरचनाचातुर्येण, उद्यमेन उद्योगेन,

परैश्च त्यागशौर्यगाम्भीर्यादिभिः प्रभुगुणैर्धृतानुकारमुर्वीपतिकुमारमादरप्रेषितैः प्रणिधिपुरुषैरनिशमुर्व्यामन्वियेष [आ] ॥

एकदा च तं प्रातरेवास्थानमण्डपोपविष्टमध्यासितविकटहेमविष्टरमुत्खातखड्गैः कृतनिरन्तरावस्थितिभिरूर्ध्वस्थितैराबद्धपङ्क्तिभिः शरीररक्षाधिकारनियुक्तैर्वीरपुरुषैरुभयतः परिक्षिप्तमनतिनिकटनिरन्तरासीननिभृतवल्लभराजलोकमभ्यर्णवर्तिनीभिरनवरतचामरोत्क्षेपचलितकलाचिकाकाञ्चनवलयाभिर्वारविलासिनीभिरुपवीज्यमानवपुषमुषःकालसेवागतेन सहप्रविष्टकतिपयप्रणयिराजसूनुना प्रणम्य सविनयमवनीतलोपविष्टेन पितृचरणविन्यस्तनिश्चलदृष्टिना हरिवाहनेनोपास्यमानमागृहीतचित्रकनकवेत्रलता प्रतीहारी प्रविश्य क्षितितलन्यस्तजानुहस्तयुगला सविनयं व्यजिज्ञपत् —'देव ! संप्रत्येव दक्षिणापथादागतो दक्षिणदण्डाधिपतेर्वज्रायुधस्य प्रसादभूमिर्विजयवेगनामा प्रधानपुरुषः सकलपुरुषार्थसिद्धिसंपादकं देवस्य पादपद्मयुगलं द्रष्टुमुत्कण्ठितो द्वारि तिष्ठतीत्याकर्ण्य देवः प्रमाणम्' [इ]। अवनिपालस्तु संस्मृत्य वचनेन तस्याः पूर्ववृत्तमङ्गुलीयकप्रेषणवृत्तान्तमधि-

---

अपरैः अन्यैश्च, त्यागशौर्यगाम्भीर्यादिभिः औदार्य-शौर्यगाम्भीर्यप्रमुखैः, प्रभुगुणैः राजगुणैः, धृतानुकारं गृहीततत्सादृश्यम् [आ]।

एकदा एकस्मिन् समये, तं राजानम्, प्रातरेव प्रातःकाल एव, प्रतिहारी, प्रविश्य सभामण्डपान्तः प्रवेशं कृत्वा, सविनयं विनयपूर्वकम्, व्यजिज्ञपत् विज्ञापितवती; कीदृशी ? आगृहीतचित्रकनकवेत्रलता आगृहीता, चित्रा-विलक्षणा, कनकस्य-सुवर्णस्य, वेत्रलता-वेत्रयष्टिर्यया तादृशी; पुनः क्षितितलन्यस्तजानुहस्तयुगला क्षितितले-भूतले, न्यस्तं-निहितम्, जानुयुगलम्-ऊरु-जङ्घामध्ययुगलम्, हस्तयुगलं च यया तादृशी, कीदृशं तम् ? आस्थानमण्डपोपविष्टं सभामण्डपोपविष्टम्; पुनः अध्यासितविकटहेमविष्टरम् अध्यासितः-अधिष्ठितः, विकटः-प्रकटः, हेमविष्टरः-सुवर्णमयमासनं येन तादृशम्; पुनः वीरपुरुषैः सुभटजनैः, उभयतः पार्श्वद्वये, उपक्षिप्तं व्याप्तम्। कीदृशैः ? उत्खातखड्गैः उद्यतखड्गैः; पुनः कृतनिरन्तरावस्थितिभिः अनवरतमवस्थितैः; पुनः ऊर्ध्वस्थितैः उत्थितैः; पुनः आबद्धपङ्क्तिभिः पङ्क्तिबद्धैः; पुनः शरीरक्षाधिकारनियुक्तैः तदीयशरीररक्षणरूपकार्यनियुक्तैः। पुनः अतिनिकटनिरन्तरासीननिभृतवल्लभराजलोकम्, अतिनिकटे-अतिसमीपे, निरन्तरम्-अविरतम्, आसीनाः-उपविशन्तः, निभृताः-निश्चलाः, वल्लभराजलोकाः-प्रियनृपजना यस्य तादृशम्; पुनः वारविलासिनीभिः वाराङ्गनाभिः, उपवीज्यमानवपुषम् उपवीज्यमानं व्यजनपरिशील्यमानम्, वपुः-शरीरं यस्य तादृशम्। कीदृशीभिः ? अभ्यर्णवर्तिनीभिः समीपवर्तिनीभिः; पुनः अनवरतचामरोत्क्षेपचलितकलाचिकाकाञ्चनवलयाभिः अनवरतं निरन्तरम्, चामरोत्क्षेपेण चामरस्य चमरजातीयमृगविशेषपुच्छरचितव्यजनस्य, उत्क्षेपेण-उद्वेलनेन, चलिताः-दोलिताः, कलाचिकाकाञ्चनवलयाः-कलाचिकायां-प्रकोष्ठे, स्थिताः सुवर्णमया वलया यासां तादृशीभिः। पुनः कीदृशम ? उषःकालसेवागतेन प्रातःकालिकसेवार्थमुपस्थितेन, कतिपयप्रणयिभिः कतिपयस्नेहिभिः सह, प्रविश्य सभामण्डपे प्रवेशं कृत्वा, प्रणम्य स पितरं राजानमभिवन्द्य, सविनयं विनयपूर्वकम्, अवनीतलोपविष्टेन पृथ्वीतलोपविष्टेन; पुनः पितृचरणविन्यस्तनिश्चलदृष्टिना पितुः-मेघवाहनस्य, चरणयोः, विन्यस्ते-निहिते, निश्चले, दृष्टी नेत्रे येन तादृशेन, राजसूनुना राजसुतेन, हरिवाहनेन, उपास्यमानं सेव्यमानम्। किं व्यजिज्ञपदित्याह — देव ! राजन् ! सम्प्रत्येव इदानीमेव, दक्षिणापथात् दक्षिणदेशात्, आगतः, दक्षिणखण्डाधिपतेः दक्षिणदेशाधिपतेः, वज्रायुधस्य तन्नाम्नः सेनापतेः, प्रसादभूमिः प्रेमास्पदम्, विजयवेगनामा तत्संज्ञकः, प्रधानपुरुषः, सकलपुरुषार्थसिद्धिसम्पादकं सकलानां-समस्तानाम्, पुरुषार्थानां-धर्मार्थकाममोक्षाणाम्, सिद्धेः-निष्पत्तेः, सम्पादकं-जनकम्, देवस्य भवतः, पादपद्मयुगलं चरणपङ्कजद्वयम्, द्रष्टुम् अवलोकितुम्, उत्कण्ठितः उत्कण्ठावान्, द्वारि द्वारदेशे, तिष्ठति वर्तते, इत्याकर्ण्य इति श्रुत्वा, देवः भवान्, प्रमाणं स्वकर्तव्ये स्वयम्प्रमाणभूतः [इ]। अवनिपालस्तु मेघवाहननृपस्तु, तस्याः द्वारपालिकायाः, वचनेन वाक्येन, पूर्ववृत्तं पूर्वनिष्पन्नम्, अङ्गुलीयकप्रेषणवृत्तान्तम् अङ्गुलिभूषणप्रेषणसमाचारम्, संस्मृत्य सम्यक् स्मृत्वा, अधिगतप्रीतिः प्राप्तप्रमोदः, प्रवेशाय तस्य

गतप्रीतिः 'प्रवेशय' इति तां सादरमवदत् [ई]। अथ पार्थिववचनानन्तरमेव सा 'यदाज्ञापयति देवः' इत्युक्त्वा सत्वरमास्थानमण्डपान्निर्जगाम [उ]। क्षणमात्रनिर्गतायां च तस्यां द्वारदेशप्रहितलोचनो महीपतिः प्रविशन्तमीषत्क्षामवपुषमुपरचितराजदर्शनोचितवेषमचिरस्नातमपि मार्गवातातपप्लुष्टगात्रत्वक्कया मलिनमिवोपलक्ष्यमाणमतिचिरदर्शनादपरिचितमिव परकीयमिवान्यथाभूतमिव राजकुलमाकलयन्तमवनिपालदर्शनोत्सुकतया च संभाषणगोचरागतानिष्टानपि सकृद्दृष्टानिव राजपुंगवानल्पविस्तरमालपन्तमुत्तरीयपटगोपायितोपायनेन पश्चाद्व्रजता पुरुषेणानुगम्यमानं विजयवेगमपश्यत् [ऊ]॥

दृष्ट्वा च कृतस्मितो दूरादेव संभ्रमवता संभाषणेनैनमनुजग्राह । सरभसोपसृतं च तं कृतप्रणाममासक्तकुट्टिमरजोधूसरललाटजानुकरपुटमुपविष्टमन्तिकोपनीते सविनयमासने प्रीतिप्रसन्नतारकेण चक्षुषा क्षणमात्रमवलोक्य जगाद—'विजयवेग! कुशलमखिलवीरचक्रप्रकाण्डस्य महादण्डाधिपतेः पृथिव्यामप्रतिहतायुधस्य सराजलोकस्य वज्रायुधस्य' [ऋ]। स च किञ्चिदुज्झितासनो विनयविरचिताञ्जलिः प्रणम्याब्रवीत्—

प्रवेशं कारय, इति, **तां** द्वारपालिकाम्, **सादरम्** आदरपूर्वकम्, **अवादीत्** उक्तवान् [ई]। **अथ** अनन्तरम्, **पार्थिववचनानन्तरमेव** पार्थिवस्य–राज्ञः, वचनानन्तरमेव–प्रवेशानुमतिप्रतिपादनानन्तरमेव, **सा** द्वारपालिका, **देवः** भवान्, यत्, **आज्ञापयति** आदिशति, तत् करोमीति शेषः, इति **उक्त्वा** कथयित्वा, **सत्वरं** शीघ्रम्, **आस्थानमण्डपात्** सभामण्डपात्, **निर्जगाम** निर्गता [उ]। **तस्यां** द्वारपालिकायाम्, **क्षणमात्रनिर्गतायां** क्षणमात्रनिष्क्रान्तायां सत्याम्, **द्वारदेशप्रहितलोचनः** द्वारदेशप्रेरितदृष्टिः, **महीपतिः** मेघवाहनः, **विजयवेगं** तन्नामानं प्रधानपुरुषम्, **अपश्यत्** दृष्टवान्। कीदृशम्? **प्रविशन्तम्** अन्तःप्रवेशमाचरन्तम्, **ईषत्क्षामवपुषं** किञ्चित्कृशकलेवरम्; पुनः **उपरचितराजदर्शनोचितवेषम्** उपरचितः–विरचितः, राजदर्शनोचितः–राजदर्शनयोग्यो वेषो येन तादृशम्; पुनः **अचिरस्नातमपि** सद्यःस्नानमपि, **मार्गवातातपप्लुष्टगात्रत्वक्कया** मार्गस्य यो वातः–पवनः, आतपः–सूर्यकिरणश्च, ताभ्यां प्लुष्टा–दग्धा, सन्तप्तेति यावत्, गात्रत्वक्–शरीरत्वक् यस्य तद्भावस्तत्ता तया, मलिनमिव **उपलक्ष्यमाणं** प्रतीयमानम्; पुनः **अतिचिरदर्शनात्** अतिदीर्घकालोत्तरमवलोकनात्, **अपरिचितमिव** अजातपरिचयमिव, **परकीयमिव** अन्यदीयमिव, **अन्यथाभूतमिव** प्रकारान्तरप्राप्तमिव, राजकुलम्, **आकलयन्तम्** अवगच्छन्तम्; पुनः **अवनिपालदर्शनोत्सुकतया** अवनिपालस्य–राज्ञः, यद्दर्शनं तत्रोत्सुकत्वेन हेतुना, **सम्भाषणगोचरागतान्** प्रतिपाद्यरूपेणागतान्, **इष्टान्** प्रियान्, अपि, असकृद्दृष्टानपीति यावत्, **सकृद्दृष्टानिव** एकवारमेवावलोकितानिव, **राजपुङ्गवान्** नृपश्रेष्ठान्, **अल्पविस्तरम्** अनतिविस्तरम्, परिमितमिति यावत्, **आलपन्तम्** आभाषमाणम्; पुनः **उत्तरीयपटगोपायितोपायनेन** उत्तरीयपटेन–उत्तरीयवस्त्रेण, गोपायितम्–आच्छादितम्, उपायनं–प्राभृतं येन तादृशेन, पश्चाद् व्रजता पुरुषेण, **अनुगम्यमानम्** अनुस्रियमाणम् [ऊ]।

दृष्ट्वा च तमवलोक्य च, **कृतस्मितः** कृतमन्दहासः, **दूरादेव** दूरत एव, **सम्भ्रमवता** प्रीतिप्रयुक्तत्वराशालिना, **सम्भाषणेन** आलापेन, **एनं** विजयवेगम्, **अनुजग्राह** अनुगृहीतवान्, स राजेति शेषः । **सरभसोपसृतं** सवेगमन्तिकमागतम्, **तं** विजयवेगम्, **प्रीतिप्रसन्नतारकेण** प्रीत्या–प्रेम्णा, प्रसन्ना–विकसिता, तारका–कनीनिका यस्य तादृशेन, **चक्षुषा** नेत्रेण, **क्षणमात्रं** किञ्चित्कालम्, अवलोक्य, **जगाद** उक्तवान् । कीदृशं तम्? **कृतप्रणामं** कृताभिवादनम्; पुनः **आसक्तकुट्टिमरजोधूसरललाटजानुकरपुटम्** आसक्तेन–संलग्नेन कुट्टिमरजसा मणिबद्धभूमिधूलिकया, धूसराः–ईषत्पाण्डुवर्णाः, ललाटं भालस्थलम्, जानू–ऊरुजङ्घामध्यभागौ, करपुटः–हस्तपुटश्च यस्य तादृशम्; पुनः **अन्तिकोपनीते** समीपमानीते, आसने, **सविनयं** विनयपूर्वकम्, **उपविष्टं** कृतोपवेशनम् । किं जगादेत्याह—**विजयवेग! अखिलवीरचक्रप्रकाण्डस्य** समस्तवीरमण्डलप्रशस्तस्य; पुनः **महादण्डाधिपतेः** महतश्चतुरङ्गसेनाधिनायकस्य; पुनः **पृथिव्यां** जगति, **अप्रतिहतायुधस्य** अकुण्ठितबाणस्य, **सराजलोकस्य** राजजनसहितस्य, वज्रायुधस्य, **कुशलं** भद्रम्, अस्ति किम्? इति शेषः [ऋ] । **च** पुनः, **स** विजयवेगः, **किञ्चिदुज्झितासनः** किञ्चित्त्यक्तासनः सन्, **विनयरचिताञ्जलिः** विनय-

'अद्य कुशलम्, यस्मिन्नितरजन इव विसर्जिताहंकारग्रन्थिरित्थं स्वयमादिशति सकलत्रिभुवनाभिनन्दितप्रभावो देवः, त्वदनुभावप्रसाधिताखिलदुर्वृत्तरिपुराजन्यकेन सैन्याधिपतिना विज्ञापितोऽस्मद्वचनेन पञ्चाङ्गचुम्बितमणिकुट्टिमः प्रणामः, ससंभ्रममवनताश्चार्चयन्ति देवस्य चरणनखचिन्तामणिपरंपरां पुरःप्रकीर्णचूडामणिकिरणचक्रवालबालपल्लवैर्मूर्द्धभिः मूर्द्धाभिषिक्तपार्थिवकुलोद्भवा भवदत्त-भीमभानुवेगप्रभृतयः सपरिजना राजानः' [ऋ] । इत्युदीर्य भूयोऽप्यभाषत— 'देव ! बालारुणाभिधानं दिव्यमङ्गुलीयकरत्नं पुरा यत् प्रेषितं देवेन दण्डाधिपस्य तद्धृतं तेन कालमेतावन्तमात्मसंनिधावधुना च करदीकृतसकलदाक्षिणात्यक्षोणिपतिना तेन मत्पार्श्वे प्रहितमिह, मयाप्यद्य निरवद्यमणिभिर्भूषणगणैः समेतमखिलरत्नकोशाध्यक्षस्य महोदधेःससाक्षिकं समर्पितमित्यवधारयतु दिव्यदृष्ट्या देवः' इति वदन्तं च तमुपजातकौतुको नृपः सस्मितमवादीत्—'विजयवेग ! कच्चित् कृतस्तेन कश्चिदुपकारः संगरेषु सेनापतेस्त्वदीयस्य' [ऌ] । स जगाद—

सम्पुटितकरः, **प्रणम्य** प्रणामं कृत्वा, अब्रवीत् । किमित्याह—**अद्य** अस्मिन् दिने, कुशलम्, अस्तीति शेषः । **यस्मिन्** दिने, **इतरजन इव** सामान्यजन इव, **विसर्जिताहङ्कारग्रन्थिः** विमोचितमहत्त्वाभिमानरूपग्रन्थिः, **सकलत्रिभुवनाभिनन्दितप्रभावः** समग्रलोकत्रयप्रशंसितप्रभावः, **देवः** भवान्, **स्वयम्** आत्मनैव, **आदिशति** उक्तप्रकारेणाज्ञापयति । **त्वदनुभावप्रसाधिताखिलदुर्वृत्तरिपुराजन्यकेन** त्वदनुभावेन त्वत्प्रभावेण, प्रसाधितानि–वशमानीतानि, अखिलानि–सर्वाणि, दुर्वृत्तानि-उद्धतानि, रिपुराजन्यकानि–शत्रुभूतक्षत्रियसमूहा येन तादृशेन, **सैन्याधिपतिना** सेनानायकेन, वज्रायुधेनेति यावत्, **पञ्चाङ्गचुम्बितमणिकुट्टिमः** पञ्चाङ्गेन–हस्तद्वय जानुद्वयमस्तकात्मकेन, चुम्बितः–स्पृष्टः, मणिकुट्टिमः–मणिखचितभूमिर्येनैवंविधः, **प्रणामः** नमस्कारः, **अस्मद्वचनेन** मद्वाक्येन, **विज्ञापितः** निवेदितः । **मूर्धाभिषिक्तपार्थिवकुलोद्भवाः** प्रशस्तक्षत्रियवंशोत्पन्नाः, **भवदत्त-भीम-भानुवेगप्रभृतयः** तदादयः, **सपरिजनाः** सपरिवाराः, राजानः, **ससंभ्रमं** सवेगम्, **अवनताः** विनीताः सन्तः, **देवस्य** भवतः, **चरणनखचिन्तामणिपरम्परां** चरणसम्बन्धिनखरूपचिन्तामणिगणम्, **अर्चन्ति** आराधयन्ति । कैः ? **पुरःप्रकीर्णचूडामणिकिरणचक्रवालबालपल्लवैः** पुरः–अग्रे, प्रकीर्णाः–प्रक्षिप्ताः, चूडामणीनां–मुकुटानाम्, यत् किरणचक्रवालं–किरणमण्डलम्, तद्रूपा बालपल्लवाः–नवपल्लवा येषां तादृशैः, **मूर्धभिः** मस्तकैः [ऋ] ।

इति इत्थम्, **उदीर्य** उक्त्वा, **भूयोऽपि** पुनरपि, **अभाषत** उक्तवान्, विजयवेग इति शेषः । किमित्याह—**देव** ! राजन् !, **देवेन** श्रीमता भवतेति यावत्, यत्, **बालारुणाभिधानं** बालारुणनामकम्, **दिव्यं** सुन्दरम्, **अङ्गुलीयकरत्नम्** अङ्गुलिभूषणभूतरत्नम्, **पुरा** पूर्वम्, **दण्डाधिपस्य** चतुरङ्गसेनानायकस्य, वज्रायुधस्येत्यर्थः, **प्रेषितम्** उपहृतम्, तद् **तेन** दण्डाधिपेन, **एतावन्तं कालम्**, एतावत्कालमभिव्याप्य, **आत्मसंनिधौ** स्वपार्श्वे, **धृतं** स्थापितम् । **च** पुनः, **करदीकृतसकलदाक्षिणात्यक्षोणिपतिना** करं ददतीति करदाः, तादृशीकृता अधिकृता इति यावत्, दाक्षिणात्याः–दक्षिणजनपदसम्बन्धिनः, क्षोणिपतयः–नृपतयो येन तादृशेन, **तेन** वज्रायुधेन, **अधुना** इदानीम्, **मत्पार्श्वे** ममान्ते, **इह** अत्र, भवत्पार्श्वे इति यावत्, **प्रहितं** प्रेषितम् । मयापि **अद्य** अस्मिन् दिने, **निरवद्यमणिभिः** प्रशस्तमणिमयैः, **भूषणगणैः** अलङ्करणगणैः, **समेतं** सहितम्, **अखिलरत्नकोशाध्यक्षस्य** समस्तरत्नकोशाधिपतेः, **महोदधेः** तन्नामकस्य, **ससाक्षिकं**–साक्षिवर्गपूर्वकम्, **समर्पितं** दत्तम्, **इति** एतद्वृत्तम्, **दिव्यदृष्ट्या** तद्द्वारा, **देवः** भवान्, **अवधारयतु** निश्चिनोतु, **इति** इत्थम्, **वदन्तं** कथयन्तम्, तं विजयवेगम्, **नृपः** मेघवाहनः, **उपजातकौतुकः** उत्पन्नजिज्ञासोत्सुक्यः सन्, **सस्मितं**–समन्दहासम्, **अवादीत्** अब्रवीत् । किमित्याह—विजयवेग ! **तेन** दिव्याङ्गुलीयकेन, **संगरेषु** युद्धेषु, **त्वदीयस्य** त्वत्सम्बन्धिनः, **सेनापतेः**, **कश्चित्** कोऽपि, **उपकारः** साहाय्यम्, **कृतः**, **कच्चित्** किम् ? [ऌ] स विजयवेगः

'देव ! स कृतो यं न कश्चिदन्यः करोति, आकर्णयतु देवः, इतः समनन्तरातीतवर्षे निवृत्तास्वविरलजलासारवर्षासु वर्षासु प्रवृत्ते संवर्तितसिन्धुपूरपयसि परिणमत्कलमकपिलायमानकैदारिके बद्धस्तम्बतृणसंबाधग्रामसीम्नि जनितविजिगीषुपार्थिवजनोत्साहे शरत्समये सेनापतिरर्थशास्त्रपरामर्शपूतमतिभिरमात्यैः सह कृतकार्यवस्तुनिर्णयः प्रशस्तेऽहनि समस्तबलपरिवृतश्चरणतलमृदितभुजबलावलिप्तारिभूपालशिरःशेखरं **कुसुमशेखर**नामानमवनिपालमुन्मूलयितुकामः **कुण्डिनपुरात्** **काञ्चिमण्डला**भिमुखमचलत् [ल्ल] । क्रमेण चाबद्धदृढकक्षाभिराटोपकम्पमानविततकेतुवनराजिभिरभ्यर्थनापदेशस्तम्भितोदयमगस्त्यमुनिमभियोद्धुमुच्चलिताभिर्विन्ध्यशिखरावलीभिरिव करिघटाभिरन्धकारितैराज्ञाकृष्टानां दुष्टसामन्तानामनीकैरापूर्यमाणकटकविनिवेशः

टिप्पनकम्—वर्षं–वृष्टिः । कैदारिकं–केदारसमूहः [ल्ल] । कक्षा–करिमध्यवरत्रा, कक्षः–सतृणप्रदेशः । अपदेशः–व्याजम् । अतियोक्तुं–[अभियातुं–] गृहीतुम् [प] ।

जगाद उवाच । **देव !** राजन् !, **स** तादृशः, उपकार इति शेषः, **कृतः** विहितः, **यं** यादृशमुपकारम्, **कश्चित्** कोऽपि, **अन्यः** तद्व्यतिरिक्तः, न करोति, **देवः** भवान्; **आकर्णयतु** शृणोतु । **इतः** वर्तमानवर्षात्, **समनन्तरातीतवर्षे** अव्यवहितभूतपूर्ववर्षे, परुदित्यर्थः । **अविरलजलासारवर्षासु** अविरलम्–अविच्छिन्नम्, जलस्य आसारवर्षं–धारासम्पातिवर्षणं यासु तादृशीषु, **वर्षासु** वर्षर्तौ, **निवृत्तासु** व्यतीतासु, पुनः **शरत्समये** शरदृतौ, **प्रवृत्ते** प्रारब्धे सति, कीदृशे तस्मिन् ? **संवर्तितसिन्धुपूरपयसि** संवर्तितं–सङ्कोचितम्, सिन्धुपूरस्य–नदीप्रवाहसम्बन्धि, पयो–जलं येन तादृशे; पुनः **परिणमत्कलमकपिलायमानकैदारिके** परिणमद्भिः–परिपाकावस्थामापाद्यमानैः, कलमैः–धान्यविशेषैः, कपिलायमानं–पिङ्गलायमानम्, कैदारिकं–केदारसमूहो यस्मिंस्तादृशे; पुनः **बद्धस्तम्बतृणसंबाधग्रामसीम्नि** बद्धः–उद्गृहीतः, स्तम्बः–काण्डो यैस्तादृशैः, तृणैः, संबाधाः–संकीर्णाः, ग्रामसीमानो यस्मिंस्तादृशे; पुनः **जनितविजिगीषुपार्थिवजनोत्साहे** जनितः–उद्भावितः, विजिगीषूणां–विजयेच्छूनाम्, पार्थिवजनानां–नृपजनानाम्, उत्साहो येन तादृशे । **सेनापतिः** वज्रायुधः, **अर्थशास्त्रपरामर्शपूतमतिभिः** अर्थशास्त्रस्य–अर्थनीतिशास्त्रस्य, परामर्शेन–परिशीलनेन, पूता–परिमार्जिता, मतिः–बुद्धिर्येषां तादृशैः, **अमात्यैः** सचिवैः, सह, **कृतकार्यवस्तुनिर्णयः** कृतः, कार्यवस्तूनां–कर्तव्यवस्तूनाम्, निर्णयः–निश्चयो येन तादृशः सन्, **प्रशस्ते** शुभे, **अहनि** दिवसे, **समस्तबलपरिवृतः** समग्रसैन्यपरिवेष्टितः सन्, **चरणतलमृदितभुजबलावलिप्तारिभूपालशिरःशेखरं** चरणतलेन–पादाधस्तलेन, मृदिता–मर्दिता, भुजबलावलिप्तानां–बाहुबलगर्वितानाम्, अरिभूपालानां–शत्रुभूतानां राज्ञाम्, शिरःशेखराः–शिरोमुकुटा येन तादृशम्, **कुसुमशेखरनामानं** तत्संज्ञकम्, **अवनिपालं** राजानम्, **उन्मूलयितुकामः** उच्छेत्तुमिच्छुः, **कुण्डिनपुरात्** कुण्डिनपुराख्यनगरात्, **काञ्चिमण्डलाभिमुखं** काञ्चिदेशाभिमुखम्, **अचलत्** अगच्छत् । [ल्ल] । **च** पुनः, **क्रमेण** क्रमशः, **विन्ध्यशिखरावलीभिरिव** विन्ध्यगिरिशिखरपङ्क्तिभिरिव, **आबद्धदृढकक्षाभिः** आ–समन्तात्, बद्धाः, दृढाः–प्रबलाः, कक्षाः–बन्धनरज्जवो याभिस्तादृशीभिः, पक्षे आबद्धाः–सन्निवेशिताः, स्थिता इत्यर्थः, दृढाः–सान्द्राः, कक्षाः–लताः शुष्कतृणपुञ्जाः शुष्कवनानि वा यासु तादृशीभिः, पुनः **आटोपकम्पमानविततकेतुवनराजिभिः** आटोपेन अतिशयेन, कम्पमानाः–व्याधूयमानाः, विततः–विस्तृताः, केतवः–पताका एव, वनराजिः–वनपङ्क्तिः, पक्षे विततकेतुः–विस्तृतद्युतिर्वनराजिर्यासु तादृशीभिः, पुनः **अभ्यर्थनापदेशस्तम्भितोदयम्** अभ्यर्थनापदेशेन–प्रार्थनाव्याजेन, स्तम्भितः–निरुद्धः, उदयः–वृद्धिर्येन तादृशम्, अगस्त्यमुनिम्, **अभियोद्धुम्** अभि–सर्वतोभावेन, योद्धुम्, **अभियोक्तुमि**ति पाठे अभियातुमित्यर्थः, **उच्चलिताभिः** उत्थिताभिः, **करिघटाभिः** हस्तियूथैः; **अन्धकारितैः** कृतान्धकारैः, आज्ञया–नियोगेन, आकृष्टानाम्–आहूतानाम्, **दुष्टसामन्तानाम्** दुष्टविषयान्तरवर्तिनृपतीनाम्, **अनीकैः** सैन्यैः, **आपूर्यमाणकटकनिवेशः** आपूर्यमाणः–व्याप्यमानः, कटकनिवेशः–सैन्यावासो येन तादृशः, काञ्चिदेशम्, **अविशत्** प्रविष्टवान् । सुरगिरिस्पर्धयोन्नमन्तं विन्ध्यगिरिमवलोक्य तेनादित्यगतिप्रतिरोधेन जगतामन्धकारमयत्वभयेन तत्पार्श्वं गत्वा यावदहं न प्रत्यागच्छामि तावत् त्वया न वर्धनीयमिति वरमभ्यर्थ्य गतो, न

काञ्चिदेशमविशत् [ए]। **कुसुमशेखरोऽपि** किञ्चित् सदर्पतया तमुपसर्पितुमनीहमानो हीनबलतया च योधयितुमपारयन् कालातिवाहनमत्र प्राप्तकालमिति चेतसा निश्चित्य संवर्गितसमग्रोपकरणकलापः **शास्त्र**-मार्गानुसारेण दुर्गसंस्कारमनवरतमन्वतिष्ठत् । अन्वहं च दह्यमानासन्नग्रामकक्षामुपहतबहिर्जलाशयामन्तः-प्रवेशितप्रभूतधान्यामुपसंगृहीतप्रचुरयवसेन्धनामुदस्तजीर्णवापीकूपपङ्कां निष्कासितनिःशेषासारलोकां विषमित-प्राकारमूलसमभूतलामवतारमार्गदुर्गमीकृतखातवलयां निवारिताविज्ञातजननिर्गमप्रवेशामप्रमत्ताप्तपुरुषगुल्मक-प्रतिपन्नसकलप्रतोलिरक्षां पाणिक्षेपणीयपाषाणकूटस्थपुटितप्राकारासन्नस्थलामनियतावस्थानसप्तिसैन्यसतता-शून्यपर्यन्तां प्राकारशिखरोत्सङ्गसूत्रितविचित्रयन्त्रनिचयां **काञ्चिनगरीमकरोत्** । अपरित्यक्तसमराभिलाषश्च साहायकधिया सविधवर्तिनामवनिपालानामनुसंधानाय प्रधानदूतानहरहः प्राहिणोत् [ऐ] ।

पृतनाधिपोऽपि प्रकृत्यमर्षणः प्रणिधिपुरुषेभ्य उपलभ्य तस्य तथाविधं समारम्भमधिकोपजातसंरम्भः

प्रत्यागत इति तत्प्रतारणाकुपितो विन्ध्यगिरिस्तेन योद्धुं जगामेत्युत्प्रेक्षा [प]। **कुसुमशेखरोऽपि** तन्नामा नृपतिरपि, किञ्चित् **सदर्पतया** सगर्वतया, तं सेनापतिम्, **उपसर्पितुं** शरणमागन्तुम्, **अनीहमानः** अकामयमानः, **च** पुनः, **हीनबलतया** दुर्बलसैन्यतया, **योधयितुं** युद्धं प्रवर्तयितुम्, **अपारयन्** अशक्नुवन्, **अत्र** अस्मिन् युद्धकार्ये, **कालाति-वाहनं** कालातिक्रमणम्, **प्राप्तकालं** प्राप्तावसरम्, उचितमित्यर्थः, इति **निश्चित्य** निश्चयं कृत्वा, **संवर्गितसमग्रोप-करणकलापः** संवर्गितः—संगृहीतः, समग्राणां—समस्तानाम्, उपकरणानां—दुर्गसंस्कारसाधनानाम्, कलापः—समूहो येन तादृशः सन्, **शास्त्रमार्गानुसारेण** शिल्पशास्त्रोक्तरीत्या, अनवरतं—निरन्तरम्, **दुर्गसंस्कारं** तदाक्रमणवारणाय प्राकार-परिखादिपरिमार्जनम्, **अन्वतिष्ठत्** अकरोत् । **च** पुनः, काञ्चिनगरीम्, **अकरोत्** कृतवान्, कीदृशीम् ? **अन्वहं** प्रतिदिनम्, **दह्यमानासन्नग्रामकक्षां** दह्यमानाः—भस्मीक्रियमाणाः, आसन्नाः—समीपवर्तिनो ग्रामाः, कक्षाः—शुष्कवनानि च आसन्नग्रामसम्बन्धिनः कक्षा वा यस्यास्तादृशीम्; पुनः **उपहतबहिर्जलाशयाम्** उपहताः—विनाशिताः, बहिर्जलाशयाः—बहिर्गतास्तडागादयो यस्यास्तादृशीम्; पुनः **अन्तःप्रवेशितप्रभूतधान्याम्** अन्तः—मध्ये, प्रवेशितानि—निवेशितानि, प्रभूतानि—बहूनि, धान्यानि—गोधूमादीनि यस्यास्तादृशीम्; पुनः **उपसंगृहीतप्रचुरयवसेन्धनाम्** उपसंगृहीतानि—एकत्री-कृतानि, प्रचुराणि बहूनि, यवसानि—तृणानि, इन्धनानि—काष्ठानि च यस्यां तादृशीम्; पुनः **उदस्तजीर्णवापीकूपपङ्काम्** उदस्तः—उद्धृतः, जीर्णानां वापीकूपानां पङ्को यस्यां तादृशीम्; पुनः **निष्कासितनिःशेषासारलोकां** निष्कासिताः—बहिष्कृताः, निःशेषाः—समस्ताः, असाराः—बलरहिता लोका यस्यास्तादृशीम्, पुनः **विषमितप्राकारमूलसमभूतलां** विषमितम्—उन्नमि-तानमितम्, प्राकारमूलभूतं समभूतलं—समस्थलं यस्यां तादृशीम्; पुनः **अवतारमार्गदुर्गमीकृतखातवलयां**—अवतारमार्गे—राजधानीप्रवेशमार्गे, दुर्गमीकृतं—दुर्गमतापादितम्, खातवलयं—परिखामण्डलं यस्यां तादृशीम्; पुनः **निवारिताविज्ञात-जनप्रवेशनिर्गमां**—निवारितौ—निरुद्धौ, अविज्ञातजनानाम्—अपरिमितजनानाम्, प्रवेश-निर्गमौ गमनागमने यस्यां तादृशीम्; पुनः **अप्रमत्ताप्तपुरुषगुल्मकप्रतिपन्नसकलप्रतोलिरक्षाम्** अप्रमत्तानाम्—अवहितानाम्, आप्तपुरुषाणां—विश्वस्तजना-नाम्, गुल्मकेन—चतुरङ्गसैन्येन, प्रतिपन्ना—कर्तव्यत्वेनाङ्गीकृता, सकलानां—समस्तानाम्, प्रतोलीनां—रथ्यानाम्, रक्षा यस्यां तादृ-शीम्, पुनः **पाणिक्षेपणीयपाषाणकूटस्थपुटितप्राकारासन्नस्थलां** पाणिक्षेपणीयानां—हस्तक्षेपणीयानाम्, पाषाणानां—प्रस्तराणाम्, कूटेन—समूहेन, स्थपुटितं—विषमोन्नमितम्, प्राकारासन्नस्थलं—प्राकारसमीपस्थलं यस्यां तादृशीम्; पुनः **अनियता-वस्थानसप्तिसैन्यसततशून्यपर्यन्ताम्** अनियतावस्थानैः—अनिश्चितस्थितिकैः, सप्तिसैन्यैः—अश्वारूढसैनिकैः, सततम्, अशून्यः—व्याप्तः, पर्यन्तः—प्रान्तभूर्यस्यां तादृशीम्; पुनः **प्राकारशिखरोत्सङ्गसूत्रितविचित्रयन्त्रनिचयां** प्राकार-शिखराणां—प्राकारोपरिभागानाम्, उत्सङ्गे—मध्ये, सूत्रितः—सन्निवेशितः, विचित्रयन्त्राणां—विलक्षणयन्त्राणाम्, निचयः—समूहो यस्यां तादृशीम् । **च** पुनः, **अपरित्यक्तसमराभिलाषः** अपरित्यक्तयुद्धाभिलाषः सन्, **साहायकधिया** साहाय्यदृष्ट्या, **सविधवर्तिनां** समीपवर्तिनाम्, **अवनिपालानां** राज्ञाम्, **अनुसन्धानाय** अन्वेषणाय, **प्रधानदूतान्** मुख्यदूतान्, **अहरहः** प्रतिदिनम्, **प्राहिणोत्** प्रेषितवान् [ऐ] । **प्रकृत्यमर्षणः** प्रकृत्या—स्वभावेन, अमर्षणः—असहिष्णुः क्रुद्ध इति

सरभसप्रधाविताभिरनीकिनीभिरागत्य विहितोपरोधः पर्यन्तेषु काञ्च्याः स्कन्धावारममुञ्चत् । कृतासारसंरोधश्च प्रावृषेण्यजलधरव्यूह इव पौरलोकानां महान्तमातङ्कमकरोत् । सामन्ताश्च सज्जीकृतसमदसामजघटा विघटनाय दुर्गस्य तेन कृतविसर्गाः क्रमेण निर्जग्मुः [ओ] । आविष्कृताटोपदुष्प्रसहैश्च तैः सह प्राकारशिखरवर्तिनः कुसुमशेखरराजलोकस्यान्योऽन्यकृतनिर्भर्त्सनानि समत्सरसुभटसिंहनादबधिरीकृताभ्यर्णवासिजनकर्णरन्ध्राणि नीरन्ध्रपाषाणक्षेपक्षणमात्रस्थलीकृताम्बरतलानि निर्दयप्रहततूर्यरवपर्यासितकातरकरशस्त्राणि यन्त्रविक्षिप्ताग्नितप्ततैलच्छटाविघटमानविकटपदातिगुम्फानि बद्धस्फरतिरोहितपुरुषखन्यमानप्राकारमूलबन्धानि क्रोधदष्टौष्ठकण्ठश्रूयमाणदुर्गस्थवैरिनिष्ठुराक्रोशानि शिरस्थितफरकफारकप्रार्थ्यमानप्राकारखण्डीप्रवेशानि तृणपूल-

---

टिप्पनकम्—कृतासारसंरोधश्च आसारः—वेगवद्वृष्टिर्मित्रबलं च [ओ] । बद्धस्फुरः—चर्मकटी [औ] ।

यावत्, **पृतनाधिपोऽपि** सेनापतिरपि, **तस्य** कुसुमशेखरस्य, **तथाविधं** तादृशम्, **समारम्भं** उद्यमम्, **प्रणिधिपुरुषेभ्यः** चरजनेभ्यः, **उपलभ्य** विदित्वा, **अधिकोपजातसंरम्भः** अधिकम्—अत्यन्तम्, उपजातः—उत्पन्नः, संरम्भः—उत्साहजनितवेगो यस्य तादृशः सन्, **सरभसप्रधाविताभिः** सवेगं धाविताभिः, **अनीकिनीभिः** सेनाभिः, आगत्य, **विहितोपरोधः** विहितः—कृतः, उपरोधः—राजधान्या अवरोधो येन तादृशः, **काञ्च्याः** काञ्चिनगर्याः, **पर्यन्तेषु** प्रान्तभूमिषु, **स्कन्धावारं** सैन्यावासम्, **अमुञ्चत्** अस्थापयत् । **च** पुनः, **प्रावृषेण्यजलधरव्यूह इव** प्रावृषेण्यानां—वर्षाकालिकानाम्, जलधराणां—मेघानाम्, व्यूहः—समूह इव, **कृतासारसंरोधः** कृत आसारस्य—धारासम्पातस्य, पक्षे मित्रसैन्यस्य, संरोधः—अवरोधो येन तादृशः सन्, पौरलोकानां—पुरवासिजनानाम्, **महान्तं** प्रचुरम्, **आतङ्कं** त्रासम्, **अकरोत्** । **च** पुनः, **दुर्गस्य** प्राकारस्य, **विघटनाय** भञ्जनाय, **तेन** सेनापतिना, **कृतविसर्गाः** कृतो विसर्गो—विसर्जनं त्याग इति यावत्, येषां तादृशाः, पुनः **सज्जीकृतसमदसामजघटाः** सज्जीकृता—सन्नाहिता, समदानां—मत्तानाम्, सामजानां—गजानाम्, घटा—समूहो यैस्तादृशाः; **सामन्ताः** स्वविषयान्तर्वर्तिनो नृपाः, **क्रमेण** पर्यायेण, **निर्जग्मुः** निर्गताः, [ओ] । **च** पुनः, **आविष्कृताटोपदुष्प्रसहैः** आविष्कृतेन—प्रकटितेन, आटोपेन—आडम्बरेण, दुष्प्रसहैः—दुर्धर्षैः, **तैः** सामन्तैः सह, **प्राकारशिखरवर्तिनः** प्राकारोपरिवर्तिनः, **कुसुमशेखरराजलोकस्य** कुसुमशेखरराजजनस्य, **प्रतिदिनं** दिने दिने, **आयोधनानि** संग्रामाः, **अभवन्** बभूवुः । कीदृशानि ? **अन्योऽन्यकृतनिर्भर्त्सनानि** अन्योऽन्यं—परस्परम्, कृतं निर्भर्त्सनं—प्रहारो येषु तादृशानि; पुनः **समत्सरसुभटसिंहनादबधिरीकृताभ्यर्णवासिजनकर्णरन्ध्राणि**—समत्सराणां—स्पर्धावताम्, सुभटानां—सुयोधानाम्, सिंहनादेन—सिंहस्येव गर्जनेन, बधिरीकृतानि—बधिरत्वमापादितानि, पूरितानीति यावत्, अभ्यर्णवासिनां—निकटवासिनाम्, जनानां—लोकानाम्, कर्णरन्ध्राणि—कर्णविवराणि येषु तादृशानि; पुनः **नीरन्ध्रपाषाणक्षेपक्षणमात्रस्थलीकृताम्बरतलानि** नीरन्ध्रपाषाणक्षेपेण अनवरतप्रस्तरप्रक्षेपेण, क्षणमात्रं क्षणमात्रेण वा, स्थलीकृतं—स्थलत्वमापादितम्, अम्बरतलम्—आकाशतलं येषु तादृशानि; पुनः **निर्दयप्रहततूर्यरवपर्यासितकातरकरशस्त्राणि** निर्दयं—दयारहितम्, तीव्रमित्यर्थः, यथा स्यात् तथा, प्रहतानां—ताडितानाम्, तूर्याणां—वाद्यविशेषाणाम्, रवेण ध्वनिना, पर्यासितानि—करात् प्रच्यावितानि, कातराणां—भीरूणाम्, करशस्त्राणि—हस्तस्थितशस्त्राणि येषु तादृशानि; पुनः **यन्त्रविक्षिप्ताग्नितप्ततैलच्छटाविघटमानविकटपदातिगुम्फानि** यन्त्रेण विक्षिप्ताः—विकीर्णा या अग्नितप्तस्य तैलस्य छटाः—धारास्ताभिः, विघटमानः—विश्लिष्यमाणः, विकटानां—प्रबलानाम्, पदातीनां—पदगामिनां सैनिकानाम्, गुम्फः—समूहो येषु तादृशानि; पुनः **बद्धस्फरतिरोहितपुरुषखन्यमानप्राकारमूलबन्धानि** बद्धाः—शिरसि निहिताः, स्फराः—शिरोरक्षकफलका यैस्तादृशैः, तिरोहितैः—प्रच्छन्नैः, पुरुषैः—लोकैः, खन्यमानः—उद्ध्रियमाणः, प्राकारस्य मूलबन्धो येषु तादृशानि; पुनः **क्रोधदष्टौष्ठकण्ठश्रूयमाणदुर्गस्थवैरिनिष्ठुराक्रोशानि** क्रोधेन दष्टौ—कृतदशनौ, ओष्ठौ येषां तादृशैः, कण्ठैः—कण्ठध्वनिभिः, श्रूयमाणः, दुर्गस्थानां—प्राकारोपरिस्थानाम्, वैरिणाम्, निष्ठुरः—कठोरः, आक्रोशः—स्पर्धाव्यञ्जकः शब्दो येषु तादृशानि; पुनः **शिरःस्थितफरकफारकप्रार्थ्यमानप्राकारखण्डीप्रवेशानि** शिरसि स्थिताः फरकाः—शिरोरक्षकफलका

कोल्कानलप्रदीप्तकरिशारिनिःसरद्विहस्तहस्त्यारोहाणि वेगलग्नाभितप्तनाराचविलीयमाननृपतिकाञ्चनमुकुटानि कुठारताडितप्रतोलीकपाटनिःस्वनानुसारनिपतत्प्रबलपाषाणवर्षाणि कृतकलकलग्रामीणावलोक्यमानप्रहारविकलविद्रवद्द्विपघटानि भयानकानि च कुतूहलकराणि च क्रोधजनकानि च हासावहानि च विनोदभूतानि च निर्वेददायीनि च प्रतिदिनमायोधनान्यभवन् [औ] ॥

एवं च काञ्चीग्रहणरक्षणविधावधिरूढगाढाभिनिवेशयोरभिनवोढदम्पतिकरपल्लवयोश्च तयोः कियानप्यतिपपात कालः । एकदा तु प्राप्ते वसन्तसमये समागतायामनङ्गोत्सवतिथावतीते निशीथिन्याः प्रथमयामे राजद्वारमागतासु द्वितीययामगजघटासु, रसिते प्रमोदावसरतूर्ये, श्रुतावसरतूर्यरवसंभ्रान्तेषु दत्तपर्याणानारुह्योपवाह्यवाजिनो राजद्वारमतिरंहसा प्रधावितेषु परिवर्द्धकेषु यथायामं निरूपितयामिकेषु निजनिजकर्म-

---

टिप्पनकम्—उपवाह्यवाजिनः राजवाहनाश्वाः । परिवर्धकाः—अश्वसंवारकाः ।

येषां तादृशैः, फारकैः—प्राकारमूलखानकैः, प्रार्थ्यमानः—इष्यमाणः, प्राकारखण्डीप्रवेशः—अवान्तरप्राकारप्रवेशो येषु तादृशानि; पुनः **तृणपूलकोल्कानलप्रदीप्तकरिशारिनिःसरद्विहस्तहस्त्यारोहाणि** तृणपूलकानां—तृणमयपूलकसम्बन्धिभिः, उल्कानलैः—ज्वालाग्निभिः, प्रदीप्ताः—सन्तप्ता याः, करिशारयः—गजपर्याणकानि, ताभ्यो निःसरन्तो विहस्ताः—व्याकुलाः, हस्त्यारोहाः—हस्त्यारूढा जना येषु तादृशानि; पुनः **वेगलग्नाग्नितप्तनाराचविलीयमाननृपतिकाञ्चनमुकुटानि** वेगेन लग्नैः—संसक्तैः, अग्नितप्तैः, नाराचैः—बाणैः, विलीयमानानि—द्रवन्ति, नृपतीनां काञ्चनमुकुटानि—सुवर्णमयशिरोऽलङ्कारा येषु तादृशानि; पुनः **कुठारताडितप्रतोलीकपाटनिस्वनानुसारनिपतत्प्रबलपाषाणवर्षाणि** कुठारैः—तदाख्यशस्त्रविशेषैः, ताडितानां प्रतोलीकपाटानां—रथ्याद्वारपिधानानाम्, ये निस्वनाः—शब्दाः, तदनुसारेण निपतत्, पाषाणानां—प्रस्तराणाम्, वर्षं—वृष्टिर्येषु तादृशानि; पुनः **कृतकलकलग्रामीणावलोक्यमानप्रहारविकलविद्रवद्द्विपघटानि** कृतः कलकलः—कोलाहलो यैस्तादृशैः, ग्रामीणैः—ग्रामवासिजनैः, अवलोक्यमाना, प्रहारेण—आघातेन, विकलानां—खिन्नानाम्, विद्रवतां—पलायमानानाम्, द्विपानां—हस्तिनाम्, घटा—मण्डलं येषु तादृशानि; पुनः **भयानकानि** भयङ्कराणि; पुनः **कुतूहलकराणि** दिदृक्षाजनकानि; पुनः **क्रोधजनकानि** अमर्षोत्पादकानि; पुनः **हासावहानि** हासजनकानि; पुनः **विनोदभूतानि** विनोदमयानि; **च** पुनः, **निर्वेददायीनि** ग्लानिजनकानि [औ] । **एवं च** अनेन प्रकारेण च, **अभिनवोढदम्पतिकरपल्लवयोरिव** अभिनवोढयोः—नवपरिणीतयोः, दम्पत्योः—जायापत्योः, करपल्लवयोः—पल्लवोपमकोमलकरयोः, **काञ्चीग्रहणरक्षणविधौ** काञ्च्याः—तन्नामकनगर्याः, पक्षे स्त्रीकटिभूषणविशेषस्य, ग्रहणस्य—शत्रुसैन्यकर्तृकाक्रमणस्य, पक्षे पतिकर्तृकाकर्षणस्य, रक्षणस्य—स्वसैन्यकर्तृकतद्वारणस्य, पक्षे जायाकर्तृकतन्निरोधस्य, विधौ—व्यापारे, **अधिरूढगाढाभिनिवेशयोः** अधिरूढः—प्राप्तः, गाढः—अत्यन्तः, अभिनिवेशः—आग्रहो याभ्यां तादृशयोः, **तयोः** स्वसैन्यशत्रुसैन्ययोः, **कियानपि** कतिपयोऽपि, कालः, **अतिपपात** व्यतीतः । **एकदा** एकस्मिन् काले, **वसन्तसमये** चैत्रवैशाखात्मके वसन्तऋतौ, **प्राप्ते** समागते; पुनः **अनङ्गोत्सवविधौ** कामदेवोत्सवविधौ, **समागतायाम्** उपस्थितायाम्; पुनः **निशीथिन्याः** रात्रेः, **प्रथमयामे** प्रथमप्रहरे, **अतीते** व्यतीते सति; पुनः **द्वितीययामगजघटासु** द्वितीययामस्य—द्वितीयप्रहरस्य सम्बन्धिनीषु, तत्प्रहरावच्छेदेन रक्षणकर्मणि नियुक्तासु इत्यर्थः, गजघटासु—हस्तिसैन्येषु, **राजद्वारं** राजभवनद्वारम्, **आगतासु** उपस्थितासु सतीषु; पुनः **प्रमोदावसरतूर्ये** प्रमोदावसरसम्बन्धिवाद्यविशेषे, **रसिते** शब्दिते सति; पुनः **श्रुतावसरतूर्यरवसम्भ्रान्तेषु** श्रुतेन—श्रवणगोचरीकृतेन, अवसरतूर्यरवेण—स्वावसरसूचकवाद्यविशेषध्वनिना, **सम्भ्रान्तेषु** प्राप्तसम्भ्रमेषु, **श्रुतावतरत्तूर्यरवसम्भ्रान्तेष्विति** पाठकल्पे श्रुतेन अवतरता—उद्भवता तूर्यरवेण सम्भ्रान्तेष्विति व्याख्येयम्, **परिवर्धकेषु** अश्ववाहकेषु, **दत्तपर्याणान्** स्थापितपल्ययनान्, **उपवाह्यवाजिनः** स्ववाहनभूतानश्वान्, **आरुह्य** अध्यास्य, **अतिरंहसा** अतिवेगेन, राजद्वारं **प्रधावितेषु** धावितुमारब्धवत्सु; पुनः **यथायामं** यथाप्रहरम्, **निरूपितयामिकेषु** निश्चितप्राहरिककार्येषु, **चिरनिरोधखिन्नतनुषु** चिरकालिकैकभावस्थानखिन्नशरीरेषु,

शालाभ्यो निर्गतेषु चिरनिरोधखिन्नतनुषु नियोगिषु, पुरःसरद्वित्रदीपिकेषु व्रजत्सु निजशिबिराणि तारतरकरेणु-घण्टाक्वणितसूचितेषु सामन्तेषु, आपणिकसंवृतसायंतनपण्यसंततिषु विकटायमानेषु विपणिवीथीचतुष्पथेषु, शिबिरपर्यन्तबद्धगुल्मकेषु स्थित्वा स्थित्वा युगपदारटत्सु बाह्यतन्त्रपदातिवृन्देषु, विश्रान्तजनरवनिरङ्कुशप्रसरेष्वितस्ततः श्रूयमाणेष्वापानकमृदङ्गध्वनिषु, शयनमन्दिराङ्गणनिहितशय्यानिषण्णे संनिहितकतिपयप्रणयिनि प्रारब्धमदनजागरस्य जायाजनस्य गीतकान्याकर्णयति परितः परित्यक्तविग्रहकथानिरवग्रहमनसि सेनाधिपे, सहसैव संत्रासितकटकलोकस्त्रासतरलमन्दुरातुरङ्गश्रेणिश्रुतः सत्वरापसृतपृष्ठप्रसुप्ताधोरणानामपहायापहाय पांशु-तल्पान्युत्तिष्ठतामिभपतीनां चरणशृङ्खलारणितजरठेन जर्जरीकृतः कण्ठगर्जितेन, गजगर्जितारवश्रवणकुपितानां पञ्जरकेसरिणां सरभसकरास्फालितशलाकाप्रतिनादबृंहितेन बहलीकृतः फूत्कृतेन, प्रतिसैन्यमाहतानां प्रसृत-

---

टिप्पनकम्—गुल्मकं–स्थानकम् । निरवग्रहम्–उच्छृङ्खलम् । मन्दुरा–अश्वशाला । काहलः–अव्यक्तः ।

नियोगिषु भृत्येषु, **निजनिजकर्मशालाभ्यः** स्वस्वकार्यगृहेभ्यः, **निर्गतेषु** निष्क्रान्तेषु; पुनः **तारतरकरेणु-घण्टाक्वणितसूचितेषु** तारतरेण–तीव्रतरेण, करेणूनां–हस्तिनाम्, घण्टाक्वणितेन–घण्टानादेन, सूचितेषु–संकेतितेषु, **सामन्तेषु** स्वविषयान्तर्वर्तिनृपेषु, **पुरःसरद्वित्रदीपिकेषु** पुरः–अग्रे, सरन्तः–गच्छन्तः, द्वित्राः–द्वौ वा त्रयो वा, दीपिकाः–दीपवाहका येषां तादृशेषु, **निजशिबिराणि** स्वसैन्यावासान्, **व्रजत्सु** गच्छत्सु; पुनः **आपणिकसंवृतसायन्तनपण्यसन्ततिषु** आपणिकैः–विक्रेतृभिः, संवृताः–उपसंहृताः, सायन्तनपण्यानां–सायंकाले विक्रयणार्थं प्रस्तुतवस्तूनाम्, सन्ततयः–पङ्क्तयो येषु तादृशेषु, **विपणिवीथीचतुष्पथेषु** विपणिवीथीनाम्–आपण-मार्गाणाम्, चतुष्पथेषु चतुर्दिगभिमुखमार्गेषु, **विकटायमानेषु** प्रकटायमानेषु; पुनः **शिबिरपर्यन्तबद्धगुल्मकेषु** शिबिरपर्यन्ते–सैन्यावासप्रान्ते, बद्धगुल्मकेषु–बद्धपङ्क्तिकेषु, **बाह्यतन्त्रपदातिवृन्देषु** बाह्यतन्त्रपदातीनां–बाह्यराष्ट्रियपद-गामिनाम्, वृन्देषु–समूहेषु, **स्थित्वा स्थित्वा** मुहुर्मुहुः स्वगमनमवरुध्य; **युगपत्** सहैव, **आरटत्सु** शब्दाय-मानेषु; पुनः **विश्रान्तजनरवनिरङ्कुशप्रसरेषु** विश्रान्तः–निवृत्तो यो जनरवः–लोकशब्दस्तेन निरङ्कुशप्रसरेषु–अप्रति-बद्धप्रचारेषु, **आपानशालामृदङ्गध्वनिषु** आपानशालायाः–मद्यपानसभायाः, मृदङ्गध्वनिषु–वाद्यमानमृदङ्गनादेषु, **इत-स्ततः** अभितः, **श्रूयमाणेषु**; पुनः **शयनमन्दिराङ्गणनिहितशय्यानिषण्णे** शयनमन्दिराङ्गणे–शयनभवनप्राङ्गणे, निहितायां स्थापितायाम्, शय्यायां निषण्णे–उपविष्टे, **सन्निहितकतिपयप्रणयिनि** समीपस्थकतिपयस्नेहास्पदजने, **प्रारब्ध-मदनजागरस्य** प्रारब्धः मदनजागरः–कामदेवोद्देश्यकजागरणं येन तादृशस्य, **जायाजनस्य** स्त्रीजनस्य, **गीतकानि** गानानि, **आकर्णयति** शृण्वति सति, पुनः **परितः** सर्वतः, **परित्यक्तविग्रहकथानिरवग्रहमनसि** परित्यक्ता–निवारिता या, विग्रहकथा–युद्धवार्ता, तया निरवग्रहं–प्रतिबन्धरहितमुच्छृङ्खलमिति यावत्, मनो यस्य तादृशे, **सेनाधिपे** सेनापतौ सति, **महान्** गम्भीरः, **कलकलारवः** कोलाहलध्वनिः, **उदभूत्** प्रादुरभूत्। कीदृशः ? **सहसा** शीघ्रम्, **संत्रासित-कटकलोकः** भीषितसैन्यजनः; पुनः **त्रासतरलमन्दुरातुरङ्गश्रेणिश्रुतः** त्रासेन–भयेन, तरला–चञ्चला या, मन्दु-रायाः–अश्वशालायाः, तुरङ्गश्रेणिः–अश्वपङ्क्तिः, तया श्रुतः–श्रवणगोचरीकृतः; पुनः **सत्वरापसृतपृष्ठप्रसुप्ताधोरणानां** सत्वरं–शीघ्रम्, अपसृताः–दूरीभूताः, पृष्ठप्रसुप्ताः–पृष्ठभागमधिशयिताः, आधोरणाः–हस्तिपका येषां तादृशानाम्, पुनः **प्रांशुतल्पानि** उन्नतशय्याः, **अपहाय अपहाय** त्यक्त्वा त्यक्त्वा, **उत्तिष्ठताम्** उत्थानं कुर्वताम्, **इभपतीनां** महा-गजानाम्, **चरणशृङ्खलारणितजरठेन** चरणशृङ्खलायाः–चरणबन्धनविशेषस्य, रणितेन–शब्देन, जरठेन–वृद्धेन, **कण्ठगर्जितेन** कण्ठकृतगर्जनेन, **जर्जरीकृतः** मिश्रितः; पुनः **गजगर्जितारवश्रवणकुपितानां** गजानां–हस्तिनाम्, यद् गर्जितं–गर्जनम्, तद्रूपस्य आरवस्य–शब्दस्य, श्रवणेन, कुपितानाम्–ईर्ष्यितानाम्, **पञ्जरकेसरिणां** पञ्जरबद्धसिंहानाम्, **सरभसकरास्फालितशलाकाप्रतिनादबृंहितेन** सरभसं–सवेगं यथा स्यात् तथा, कराभ्याम्–अग्रिमपादाभ्याम्, आस्फालिताः–आहता याः, शलाकाः–पञ्जरस्थलौहयष्टयः, तासां प्रतिनादेन–प्रतिध्वनिना, बृंहितेन–वर्धितेन, **फूत्कृतेन** फूत्कारेण, बहलीकृतः–वर्धितः; पुनः **प्रतिसैन्यं** प्रतिसेनासम्भवेन, **आहतानां** नादितानाम्, **सन्नाहपटहानां** युद्धार्थ-कवचपरिधानद्योतकवाद्यविशेषाणाम्, **प्रसृततारतरकाहलाक्वणितकाहलेन** प्रसृतेन–प्रवृद्धेन, तारतरेण–अतितीव्रेण,

तारतरकाहलाक्वणितकाहलेन सन्नाहपटानामुन्नादितः कोलाहलेन, ससंभ्रमोत्थितानां तत इतः प्रधावताम् 'आहरत रथवरूथानि, कल्पयत मातङ्गान्, आरोहत तुरङ्गान्, अङ्गीकुरुत तनुत्राणि गृह्णीत शस्त्राणि' इत्यनवरतमाघोषतामधिकारिपुरुषाणां श्रवणपरुषेण पोषितस्तारतुमुलेन व्याहृतेन, निर्भरभरितसकलत्रिभुवनोदरो महानुदभूत् कलकलारवः [अं]। तं च प्रलयकालजृम्भितमहाभैरवाट्टहासभैरवं रवमाकर्ण्य समुपजातरिपुबलावस्कन्दपातशङ्को नायकस्तत्काललब्धावसरेण भृत्येनेव रणरसेन बद्धविकटरोमाञ्चकवचेन प्रेर्यमाणो विजृम्भितातिभीषणभ्रुकुटिसंकटायमानललाटभित्तिरमर्षदष्टदशनच्छदो दक्षिणकरेणाच्छिद्य परिचारकहस्तादुत्पाततडिल्लतानुकारिणं कृपाणमितरपाणिना प्रेङ्खयन् विचित्ररत्नखण्डखचितमन्तककितवकौतुकाष्टापदं प्रकोष्ठनिविष्टमष्टापदफलकमतिबहलेन तिर्यग्विसर्पता खड्गप्रभापटलेन मलिनितमाबद्धविकटकालायसकङ्कटकमिवोरःकपाटमुद्वहन् रभसदूरपातिभिरभिमुखप्रकटितासियष्टिमात्मच्छायामभिहन्तुमिव

टिप्पनकम्—उन्नादितः–उच्चैः कृतः। वरूथं–रथगोपनम्। **कल्पयत** सज्जयत। तारतुमुलेन–उच्चबहलेन [अं]। **भैरवः**–शङ्करः। **अवस्कन्दः**–धाटकः। **अष्टापदं**–चतुरङ्गफलकम्। **अष्टापदफलकं** सुवर्णफरकः। **कालायसकङ्कटः**–लोहकवचम्।

काहलानां–महाढक्कानाम्, क्वणितेन–शब्देन, काहलेन–वर्धितेन अव्यक्तेन वा, **कोलाहलेन** शब्देन, **उन्नादितः** संवर्धितः; पुनः **ससम्भ्रमोत्थितानां** सवेगमुत्थितानाम्, **तत इतः** तत्रात्र प्रधावताम्–प्रकर्षेण धावताम्, **अधिकारिपुरुषाणां** सैन्याध्यक्षजनानाम्, **श्रवणपरुषेण** कर्णकठोरेण, **तारतुमुलेन** अतिगम्भीरेण, **व्याहृतेन** शब्देन, **पोषितः** पुष्टिमापादितः, कीदृशानां तेषाम्? **रथवरूथानि** रथानां वरूथानि–वर्माणि, रथगुप्तिस्थानानि, परप्रहाररक्षार्थमावृतस्थानानि वा, **आहरत** आनयत अन्वेषयत वा, **मातङ्गान्** हस्तिनः, **कल्पयत** सज्जयत, **तुरङ्गान्** अश्वान्, **आरोहत** पृष्ठावच्छेदेनाधितिष्ठत, **तनुत्राणि** कवचान्, **अङ्गीकुरुत** धारयत, **शस्त्राणि** शस्त्रसमूहम्, **गृह्णीत** उत्थापयत, **इति** एवम्, **अनवरतं** निरन्तरम्, **आघोषताम्** आक्रोशताम्; पुनः **निर्भरभरितसकलत्रिभुवनोदरः** निर्भरम्–अत्यन्तम्, भरितं–पूरितम्, सकलं–समग्रम्, त्रिभुवनस्य–भुवनत्रयस्य, उदरं–मध्यं येन तादृशम् [अं]। **प्रलयकालजृम्भितमहाभैरवाट्टहासभैरवं** प्रलयकाले–जगद्विध्वंससमये, जृम्भितः–प्रकटितः, महाभैरवस्य–महाकालस्य, योऽट्टहासः–महाहासः, तद्वद् भैरवं–भयङ्करम्, **तम्** अनुपदोक्तम्, **रवं** शब्दम्, **आकर्ण्य** श्रुत्वा, **समुपजातरिपुबलावस्कन्दपातशङ्कः** समुपजाता–समुत्पन्ना, रिपुबलस्य–शत्रुसेनायाः, अवस्कन्दपातस्य–आक्रमणार्थमागमनस्य, शङ्का यस्य तादृशः सन्, **नायकः** सेनापतिः, **राजकुलात्** राजधानीतः, **अतिजवेन** अतिवेगेन, **निरगच्छत्** निष्क्रान्तः। कीदृशः? **तत्काललब्धावसरेण** तत्क्षणप्राप्तावसरेण, **भृत्येनेव** अनुचरेणेव, **बद्धविकटरोमाञ्चकवचेन** बद्धः–धृतः, विकटः–दृढः, रोमाञ्चकवचः–रोमाञ्चरूपं वर्म येन तादृशेन, **रणरसेन** संग्रामोत्साहेन, **प्रेर्यमाणः** प्रवर्त्यमानः; पुनः **विजृम्भितातिभीषणभ्रुकुटिसंकटायमानललाटभित्तिः** विजृम्भितया–प्रकटितया, अतिभीषणया–अतिभयानिकया, भ्रुकुट्या–नेत्रोपरितनरोमराजिकौटिल्येन, संकटायमाना–संकुचिताकारा, ललाटभित्तिः–ललाटस्थलं यस्य तादृशः; पुनः **अमर्षदष्टदशनच्छदः** अमर्षेण–क्रोधेन, दष्टौ–कृतदशनौ, दशनच्छदौ–ओष्ठौ यस्य तादृशः, **दक्षिणकरेण** दक्षिणहस्तेन, **परिचारकहस्तात्** सेवकहस्तात्, **उत्पाततडिल्लतानुकारिणं** प्रलयकालिकविद्युल्लतासदृशम्, **कृपाणं** खड्गम्, **आच्छिद्य** बलाद् गृहीत्वा, **इतरपाणिना** वामहस्तेन, **अष्टापदफलकं** सुवर्णमयं फलकं–'ढाल' इति प्रसिद्धमस्त्रप्रतिघातनिवारणसाधनम्, **प्रेङ्खयन्** प्रचालयन्, कीदृशम्? **विचित्ररत्नखण्डखचितं** विचित्रैः–विलक्षणैः, रत्नखण्डैः–रत्नावयवैः, खचितं–व्याप्तम्, पुनः **अन्तककितवकौतुकाष्टापदम्** अन्तककितवस्य–यमरूपद्यूतकारस्य, कौतुकाष्टापदं–कुतूहलजनकचतुरङ्गशारिफलकभूतम्, तत्सदृशमित्यर्थः, पुनः **प्रकोष्ठनिविष्टं** प्रकोष्ठे–कूर्पराधोभागे, निविष्टं–स्थितम्; पुनः **अतिबहलेन** अतिविपुलेन, **तिर्यग्विसर्पता** तिरःप्रसरता, **खड्गप्रभापटलेन** कृपाणकान्तिकलापेन, **मलिनितं** मालिन्यमापादितम्, अत एव **आबद्धविकटकालायसकङ्कटमिव** आबद्धः–गृहीतः, विकटः–विषमः, कालायसकङ्कटः–लोहविशेषनिर्मितकवचो येन तादृशमिव, **उरःकपाटं** वक्षःस्थलरूपमर्गलम्, **उद्वहन्** धारयन्; पुनः **रभसदूरपातिभिः** रभसेन–वेगेन, दूरपतनशीलैः, पुनः **अभिमुखप्रकटितासियष्टिम्**

पुरःप्रवर्तितैः पादैराकम्पितक्षितिराक्षेपदूरोच्छलितहारविप्रकीर्णेन नीहारनिकरस्पर्द्धिना किरणविसरेण संवर्द्धयन्निवारातिसैन्यसंदर्शनाय चन्द्रातपमनुमार्गप्रधावितेन संभ्रमस्खलितगतिना वीरलोकेन गमनवेगानिलाकृष्टेनेवानुसृतगतिरतिजवेन राजकुलान्निरगच्छत् [अः]। द्वारदेशावस्थितश्चाग्रतो दत्तदृष्टिरतिवेगादापतन्तावतिशयच्छेकपाटहिकताडितपटहनादपटुतरेण दूरादेव खुरपुटध्वनिना प्रकटीकृतावुरःकपाटघटितातनुतनुत्राणौ तत्क्षणविपाटितकाषायपटार्धान्तपीडितोत्तमाङ्गौ गृहीतनिशितप्राससुष्टिना वामेन किञ्चिदुत्क्षिप्तवल्गौ दक्षिणेन च करतलेन त्रासतरलिताक्षतुरगतिर्यगवलोकितोत्क्षेपां कशामुद्वहन्तावश्वदर्शनसरभसप्रधावितैः शिबिरवेसरैरिव धूसरैः खुररजोभिः पश्चादनुगम्यमानावनवरतदोलायमानजङ्घाकाण्डतया तुरगपृष्ठवर्तिनावपि धावन्ताविवोपलक्ष्यमाणावासन्नवर्तिना शिबिरलोकेन किं किमेतदिति संभ्रान्तेन पृच्छ्यमानौ मनोरथाविव मनसो जीवाविव जवस्य वारकाविव वायोरुत्सेकाविवौत्सुक्यस्य विगतपर्याणतुरङ्गमाधिरूढौ **काचरक-काण्डरात-**

टिप्पनकम्—सम्भ्रमश्च-आकुलता [अः]। प्रासः-सेल्लः [क]।

अभिमुखम्-अग्रे, प्रकटिता-आविर्भूता, असियष्टिः-कृपाणदण्डो यस्यां तादृशीम्, **आत्मच्छायां** स्वच्छायाम्, **अभिहन्तुमिव** अपहर्तुमिव, **पुरःप्रवर्त्तितैः** अग्रे प्रेरितैः, **पादैः** चरणैः, **आकम्पितक्षितिः** ईषत्कम्पितभूतलः; पुनः **अरातिसैन्यसन्दर्शनाय** शत्रुसैन्यसमवलोकनाय, **चन्द्रातपं** चन्द्रिकाम्, **आक्षेपदूरोच्छलितहारविप्रकीर्णेन** आक्षेपेण-सञ्चालनेन, दूरोच्छलितात्-दूरमुत्पतितात्, हारात्-रत्नमाल्यात्, विप्रकीर्णेन-प्रसृतेन, पुनः **नीहारनिकरस्पर्धिना** हिमौघानुकारिणा, **किरणविसरेण** किरणपुञ्जेन, **संवर्धयन्निव** सम्यग् वर्धयन्निवेत्युत्प्रेक्षा; पुनः **अनुमार्गप्रधावितेन** प्रतिमार्गं कृतातिधावनेन, अत एव **गमनवेगानिलाकृष्टेनेव** धावनवेगोत्थितवायुकृताकर्षणेनेव, **सम्भ्रमस्खलितगतिना** वेगस्खलितगमनेन, **वीरलोकेन** सुभटजनेन, **अनुसृतगतिः** अनुसृतगमनः [अः]। **च** पुनः, **द्वारदेशावस्थितः** द्वारदेशे कृतावस्थितिकः सन्, **अग्रतः** अग्रे, **दत्तदृष्टिः** व्यापारितनयनः, **प्रज्ञाततमौ** अतिपरिचितौ, काचरक-काण्डरातनामानौ, **अश्ववारौ** अश्वारोहिणौ, **अद्राक्षीत्** दृष्टवान्, स सेनापतिरिति शेषः। कीदृशौ तौ? **अतिवेगात्** अतिजवात्, **आपतन्तौ** आगच्छन्तौ; पुनः **अतिशयच्छेकपाटहिकताडितपटहनादपटुतरेण** अतिशयेन, छेकः-निपुणो यः, पाटहिकः-पटहाख्यवाद्यविशेषवादनशिल्पी, तेन, ताडितस्य-नादितस्य, पटहस्य, नादेन-ध्वनिना, पटुतरेण-स्फुटतरेण, मिश्रितेनेत्यर्थः, **खुरपुटध्वनिना** खुरपुटशब्देन, **दूरादेव** दूरत एव, **प्रकटीकृतौ** प्राकट्यमापादितौ; पुनः **उरःकपाटघटितातनुतनुत्राणौ** वक्षःस्थलधृतविशालकवचौ; पुनः **तत्क्षणविपाटितकाषायपटार्धान्तपीडितोत्तमाङ्गौ** तत्क्षणं-तत्काले, विपाटितस्य-विदारितस्य, काषायपटस्य-कषायरक्तवस्त्रस्य, यद् अर्धम्-अर्धभागः, तस्यान्तेन-अञ्चलेन, पीडितं-घटितम्, उत्तमाङ्गं-शिरो ययोस्तादृशौ; पुनः **गृहीतनिशितप्रासमुष्टिना** गृहीता-धृता, निशितस्य-तीक्ष्णस्य, प्रासस्य-कुन्तस्य, मुष्टिः-मुष्टिधार्यभागो येन तादृशेन, **वामेन**-दक्षिणेतरेण, करतलेन, **किञ्चिदुत्क्षिप्तवल्गौ** किञ्चिद्-ईषद्, उत्क्षिप्ता-उन्नमिता, वल्गा-अश्वमुखस्थरज्जुर्याभ्यां तादृशौ; **च** पुनः, **दक्षिणेन** वामेतरेण, **करतलेन** हस्ततलेन, **त्रासतरलिताक्षतुरगतिर्यगवलोकितोत्क्षेपां** त्रासेन-भयेन, तरलिते-चञ्चलिते, अक्षिणी-नेत्रे यस्य तादृशेन, तुरगेण-अश्वेन, तिर्यक्-सकटाक्षपातम्, अवलोकितो दृष्टः, उत्क्षेपः-उद्यमनं यस्यास्तादृशीम्, **कशाम्** अश्वताडनीम्, **उद्वहन्तौ** दधानौ; पुनः **अश्वदर्शनसरभसप्रधावितैः** अश्वदर्शनेन, सरभसं-सवेगम्, प्रधावितैः-प्रकर्षेण धावितैः, **शिबिरवेसरैरिव** सैन्यखेचरैरिव, **धूसरैः** तद्वर्णैः, **खुररजोभिः** अश्वशफोद्गतधूलिभिः, **पश्चात्** पृष्ठदेशे, **अनुगम्यमानौ** अनुक्रियमाणौ; **च** पुनः, **अनवरतदोलायमानजङ्घाकाण्डतया** अनवरतं-सततम्, दोलायमानौ-इतस्ततः सञ्चलन्तौ, जङ्घाकाण्डौ-जङ्घारूपस्तम्भौ ययोस्तादृशतया, **तुरगपृष्ठवर्त्तिनावपि** अश्वपृष्ठाधिष्ठितावपि, **धावन्ताविव** धावनं कुर्वन्ताविव, **उपलक्ष्यमाणौ** प्रतीयमानौ; पुनः **आसन्नवर्त्तिना** निकटवर्तिना, **सम्भ्रान्तेन** सम्भ्रमान्वितेन, **शिबिरलोकेन** सैनिकजनेन, **एतत्** पुरो दृश्यम्, किं किं भवतीति **पृच्छ्यमानौ** जिज्ञासां ज्ञाप्यमानौ; पुनः **मनसः** हृदयस्य, **मनोरथाविव** अभिलाषभूताविव; पुनः **जवस्य** वेगस्य, **जीवाविव** प्राणभूताविव; पुनः **वायोः** पवनस्य, **वारकाविव** नियामकाविव; पुनः

नामानौ प्रज्ञाततमावश्ववारावद्राक्षीत्, अप्राक्षीच्च सत्वरम्—'अरे!, किमेष कटकक्षोभः' इति [क]। अथ तौ समीपमेत्य त्यक्ततुरगावुरगाविव सर्वाङ्गस्पष्टभूतलौ प्रणम्य युगपदूचतुः—'दण्डनाथ! संप्रत्येव संनद्धसकलकरितुरङ्गयोधमाबद्धवीरपट्टपादातभीषणमरुनेत्रपताकापटपल्लवितरथनिरन्तरमुत्तरप्रतोलिमार्गेण निर्गतं काञ्च्याः कृतसमस्तसमरसामग्रीकमहितानामनीकममर्षपरवशं च पौरुषावलेपेन तृणलघूनस्मान् मन्यमानमतिजवेन प्राप्तमभ्यर्णेऽस्य कटकस्य वर्तते इति श्रुत्वा प्रभुः प्रमाणम्' इत्युक्त्वा विरेमतुः [ख]॥

सेनापतिस्तु तं तयोराकर्ण्य कर्णामृतकल्पं जल्पमुपजातहर्षो रणरसोत्कर्षपुष्यत्पुलकजालकः सजलजीमूतस्तनितगम्भीरेण स्वरेण तत्क्षणादिष्टकिङ्करससंभ्रमास्फालितमाबद्धस्फुटप्रतिशब्दमिव दर्शयन् ध्वनन्तमाजिदुन्दुभिमभ्यर्णचरमनुचरगणं रथानयनार्थमादिक्षत्। नचिराच्च तेनान्तिकमुपनीतमुभयतः प्रचलदतिचारुपत्रमुदरविनिहितमहाहिभीषणानेकास्त्रं पत्ररथराजमिव रथाङ्गपाणिरध्यास्य रथं यथासंनिहितेनात्मसैन्येनानु-

---

टिप्पनकम्—वीरपट्टः-चीरिका [ख]। ससम्भ्रमं-सादरम्। **प्रचलदतिचारुपत्रम्** एकत्र पत्रम्-अश्वः, अन्यत्र पत्राणि-पिच्छानि।

औत्सुक्यस्य उत्सुकतायाः, विलम्बासहिष्णुताया इत्यर्थः, **उत्सेकाविव** उन्नतिस्वरूपाविव; पुनः **विगतपर्याणतुरङ्गं** विगतं-नष्टम्, पर्याणम्-उपरितनसुखासनं यस्मिन् तादृशमश्वम्, **अधिरूढौ** आरूढौ। **च** पुनः, **सत्वरं** शीघ्रम्, **अप्राक्षीत्** पृष्टवान्, **अरे!** इति स्वन्यूनसम्बोधनम्, किमित्याह—**एषः** अयम्, **कटकक्षोभः** कटकस्य-सेनायाः, क्षोभः-सम्भ्रमः, **किम्?** किंहेतुकः [क]। **अथ** प्रश्नानन्तरम्, **त्यक्ततुरगौ** त्यक्ताश्वौ, **तौ** काचरक-काण्डरातनामानौ अश्ववारौ, **समीपमेत्य** निकटमागत्य, **उरगाविव** सर्पाविव, **सर्वाङ्गस्पृष्टभूतलौ** सर्वाङ्गालिङ्गितभूतलौ सन्तौ, **प्रणम्य** प्रणामं कृत्वा, **युगपत्** एककालम्, **ऊचतुः** उक्तवन्तौ। किमित्याह—**दण्डनाथ!** हे चतुरङ्गसेनापते!, **सम्प्रत्येव** इदानीमेव, **अहितानां** शत्रूणाम्, **अनीकं** सैन्यम्, अस्य **कटकस्य** सैन्यस्य, **अभ्यर्णे** निकटे, **अतिजवेन** अतिवेगेन, **प्राप्तम्** उपस्थितम्, वर्तते, इति **श्रुत्वा** श्रवणगोचरीकृत्य, **भवन्तः** यूयम्, **प्रमाणं** किंकर्तव्यनिर्णायकाः, इत्युक्त्वा **विरेमतुः** विरामं प्राप्तौ। कीदृशं तत्? **सन्नद्धसकलकरितुरङ्गयोधं** सन्नद्धाः-सज्जिताः, सकलाः-समग्राः, करिणः-हस्तिनः, तुरङ्गाः-अश्वाः, योधाः-सुभटाश्च यस्मिंस्तादृशम्; पुनः **आबद्धवीरपट्टपादातभीषणम्** आबद्धः-धृतः, वीरपट्टः-वीरचिह्नभूतपट्टो ध्वजो येन तादृशेन, पादातेन-पदातीनां पदगामिसैनिकानां समूहेन, भीषणं-भयानकम्; पुनः **अरुणनेत्रपताकापटपल्लवितरथनिरन्तरम्** अरुणानां-रक्तानाम्, नेत्रपताकानां-नेत्राकारविशिष्टवस्त्रनिर्मितध्वजानाम्, पटैः-वस्त्रैः, पल्लविताः-व्याप्ता ये रथास्तैः, निरन्तरं-संकीर्णम्; पुनः **काञ्च्याः** तदाख्यप्रकृतनगर्याः, **उत्तरप्रतोलिमार्गेण** उत्तररथ्यात्मकमार्गेण, **निर्गतं** निष्क्रान्तम्; पुनः **कृतसमस्तसमरसामग्रीकं** कृता-सम्पादिता, समस्ता समरसामग्री-युद्धसामग्री यस्मिंस्तादृशम्; पुनः **अमर्षपरवशम्** ईर्ष्याधीनम्; पुनः **पौरुषावलेपेन** पराक्रमगर्वेण, अस्मान्, **तृणलघून्** तृणवत्तुच्छान्, मन्यमानम् [ख]॥

सेनापतिस्तु सेनानायकस्तु, **तयोः** अश्ववारयोः, **कर्णामृतकल्पं** श्रवणामृतप्रायम्, **जल्पं** वचनम्, **आकर्ण्य** श्रुत्वा, **उपजातहर्षः** उत्पन्नानन्दः, **रणरसोत्कर्षपुष्यत्पुलकजालकः** रणरसस्य-रणानुरागस्य, उत्कर्षेण-औत्कट्येन, पुष्यत्-पुष्टिमापाद्यमानम्, पुलकजालं-रोमाञ्चपुञ्जो यस्य तादृशः, **सजलजीमूतस्तनितगम्भीरेण** सजलस्य-जलपूर्णस्य, जीमूतस्य-मेघस्य, यत् स्तनितं-गर्जितं तद्वद्, गम्भीरेण, स्वरेण, **तत्क्षणादिष्टकिङ्करससम्भ्रमास्फालितं** तत्क्षणं-तत्कालम्, आदिष्टैः-आज्ञप्तैः, किङ्करैः-भृत्यैः, ससम्भ्रमं-सवेगम्, आस्फालितं-ताडितम्, **ध्वनन्तं** नदन्तम्, **आजिदुन्दुभिं** संग्रामदुन्दुभिम्, **आबद्धस्फुटप्रतिशब्दमिव** धृतस्पष्टप्रतिध्वनिमिव, **दर्शयन्** प्रत्याययन्, **अभ्यर्णचरं** निकटवर्तिनम्, **अनुचरगणं** भृत्यवृन्दम्, **रथानयनार्थं** रथोपस्थापनार्थम्, **आदिक्षत्** आदिष्टवान्। **च** पुनः, **नचिरात्** शीघ्रम्, **तेन** अनुचरगणेन, **अन्तिकं** निकटम्, **उपनीतम्** उपस्थापितम्; पुनः **उभयतः** उभयपार्श्वे, **प्रचलदतिचारुपत्रं** प्रचलन्ती अतिचारुणी-अतिमनोहरे, पत्रे-वाहने, पक्षे पक्षौ यस्य तादृशम्; पुनः

गम्यमानो युगपदाहतानां कुपितयमहुङ्कारानुकारिभाङ्कारभैरवमतिगम्भीरमारसन्तीनां समरढक्कानां ध्वनितेन पातयन्निव सवन्धनान्यरातिहृदयानि, तारतरव्याहारिणां बन्दिवृन्दानां हृदयहारिणा जयशब्दाडम्बरेण मुखरिताम्बरः शिविरान्निरगच्छत् । कृतव्यूहविरचनश्च समरसंक्षोभक्षमायामुपान्तभूमावस्थात् [ग] ॥

अथाकर्णितसमरभेरीनिनादजृम्भितानन्दाः सरसरोचनारचितललाटतिलकबिन्दवो दूर्वाप्रवालदन्तुरैः शिरोभिरभ्यर्णचारिचारणोच्चार्यमाणवीर्यसंपदस्त्वरितपदसंचाराभिरागत्यागत्य करिघटाभिः समन्ततः ससामन्तचक्राः परिवारयांचक्रुरेनं सेनापतयः, प्रत्येकं पातितस्निग्धदृष्टिना च तेन सप्रसादमादिष्टाः प्रणम्य निजनिजस्थानेषु तस्थुः [घ] ॥

अथ निशीथानुभावभास्वरेण विषममुन्मीलता निमीलता च दीपिकानिवहेन पिशुनितममञ्जुगुञ्ज-

---

टिप्पनकम्—उदरविनिहितमहाहिभीषणास्त्रम् एकत्र महाहय एव भीषणानेकास्त्राणि, अन्यत्र महाहिवत् । **पत्ररथराजं** गरुडम् [ग] ।

उदरविनिहितमहाहिभीषणानेकास्त्रम् उदरे–मध्यभागे, विनिहितानि–स्थापितानि, महाहिभीषणानि–महासर्पवद् भयानकानि, अस्त्राणि यस्मिन्, पक्षे महाहय एव–महासर्पा एव, भीषणानि अस्त्राणि येन तादृशम्, **रथाङ्गपाणिः** रथाङ्गं–चक्रम्, पाणौ–हस्ते यस्य स विष्णुः, **पत्ररथराजमिव** पत्राणि–पक्षा एव, रथाः–रथा इव गमनसाधनानि येषां ते पत्ररथाः–पक्षिणः, तेषां राजा–गरुडः, तमिव, रथम्, **अध्यास्य** अधिरुह्य, **यथासन्निहितेन** यावान् सन्निहित आसीत् तावता, **आत्मसैन्येन** स्वसैनिकेन, **अनुगम्यमानः** अनुस्रियमाणः, **युगपदाहतानां** युगपत् ताडितानाम्, **कुपितयमहुङ्कारानुकारिभाङ्कारभैरवं** कुपितस्य–क्रुद्धस्य, यमस्य यो हुङ्कारस्तदनुकारिणा, भाङ्कारेण–ध्वनिविशेषेण, भैरवं–भीषणम्, तथा **अतिगम्भीरम्** अतिस्फुटं च यथा स्यात् तथा, **आरसन्तीनाम्** आनदन्तीनाम्, **समरढक्कानां** संग्रामवाद्यविशेषाणाम्, **ध्वनितेन** ध्वनिना, **सबन्धनानि** भयादिनियन्त्रितानि, **अरातिहृदयानि** शत्रुहृदयानि, **पातयन्निव** भ्रंशयन्निव; पुनः **तारतरव्याहारिणाम्** अत्युच्चैरुच्चारिणाम्, **बन्दिवृन्दानां** स्तुतिपाठकसमूहानाम्, **हृदयहारिणा** हृदयप्रियेण, **जयशब्दाडम्बरेण** जयकाराडम्बरेण, **मुखरिताम्बरः** ध्वनितगगनमण्डलः, **शिबिरात्** सैन्यावासात्, **निरगच्छत्** निष्क्रान्तः । **च** पुनः, **कृतव्यूहविरचनः** कृता–विहिता, व्यूहस्य सैन्यसन्निवेशविशेषस्य, विरचना येन तादृशः सन्, **समरसंक्षोभक्षमायां** संग्रामसञ्चारसमर्थायाम्, **उपान्तभूमौ** पर्यन्तभूमौ, **अस्थात्** स्थितवान् [ग] ॥ **अथ** तत्र स्थित्यनन्तरम्, **आकर्णितसमरभेरीनिनादजृम्भितानन्दाः** आकर्णितेन–श्रुतेन, समरभेरीनिनादेन–संग्रामढक्काध्वनिना, जृम्भितः–प्रकटितः, आनन्दो येषां तादृशाः; पुनः **सरसरोचनारचितललाटबिन्दवः** सरसया–आर्द्रया, रोचनया–गोरोचनया, रचिताः–कल्पिताः, ललाटतिलकबिन्दवः–ललाटे तिलकरेखा यैस्तादृशाः; पुनः **दूर्वाप्रवालदन्तुरैः** दूर्वाख्यतृणविशेषनूतनदलव्याप्तैः, **शिरोभिः** मस्तकैः, उपलक्षिताः; पुनः **अभ्यर्णचारिचारणोच्चार्यमाणवीर्यसम्पदः** अभ्यर्णचारिभिः–निकटगामिभिः, चारणैः–बन्दिभिः, उच्चार्यमाणाः–स्तूयमानाः, वीर्यसम्पदः–पराक्रमसम्पत्तयो येषां तादृशाः, **ससामन्तचक्राः** स्वविषयान्तर्वर्तिनृपसमुदायसहिताः, सेनापतयः, **त्वरितपदसञ्चाराभिः** त्वरितः–शीघ्रः, पदसञ्चारः–चरणसञ्चारो यासां तादृशीभिः, **करिघटाभिः** हस्तियूथैः, **आगत्यागत्य** उपस्थायोपस्थाय, **समन्ततः** सर्वतः, **एनं** चतुरङ्गसेनानायकम्, **परिवारयाञ्चक्रुः** परिवेष्टन्ते स्म । **च** पुनः, **प्रत्येकं** एकैकस्मिन्, **पातितस्निग्धदृष्टिना** पातिता–प्रक्षिप्ता, स्निग्धा–स्नेहार्द्रा, दृष्टिर्येन तादृशेन, **तेन** सेनानायकेन, **सप्रसादं** प्रसन्नतापूर्वकम्, **आदिष्टाः** आज्ञप्ताः सन्तः, **प्रणम्य** नमस्कृत्य, **निजनिजस्थानेषु** स्वस्वस्थानेषु, **तस्थुः** स्थिताः [घ] ॥ **अथ** अनन्तरम्, **प्रतिपन्थिबलं** शत्रुसैन्यम्, **चक्षुषः पथि** दृष्टिमार्गम्, **अढौकत** प्राप्तम् । कीदृशम्? **निशीथानुभावभास्वरेण** निशीथानुभावेन–मध्यरात्रप्रभावेण, भास्वरेण–प्रकाशमानेन; पुनः **विषमं** विषमप्रकारं यथा स्यात् तथा, **उन्मीलता** दीप्यमानेन, **निमीलता** संकुचता च, **दीपिकानिवहेन** प्रदीपसमूहेन, **पिशुनितं** सूचितम्; पुनः **अमञ्जुगुञ्जत्काहलम्**

त्काहलमाकर्ण्यमानतारपरुषहयहेषारवमितस्ततः श्रूयमाणगम्भीरगजगर्जितमावेगतर्जिताश्वैर्वारंवारमश्ववारैरावेद्यमानागमनमग्रस्कन्धताडितोद्धुरसमरढक्कमढौकत चक्षुषः पथि प्रतिपन्थिबलम्, अविरलनिरस्तशरनिकरशीकरासारडामरं च तद्दुर्वाररभसमुद्दामकलकलव्याप्तसकलदिङ्मुखमभिमुखप्रधावितेन जलदागमक्षुभितममरापगापूरजलमिव लवणजलधिना प्रत्यगृह्यतास्मद्बलेन [ङ]। परस्परवधनिबद्धकक्ष्ययोश्च तयोस्तत्क्षणमाकुलितसकलजीवलोको युगपदेकीभूतोदारवारिराशिरस्रजलविसरवर्षिघनपदातिघोरो मुदितयोगिनीमृग्यमाणलोकपालकपालचषकः

टिप्पनकम्—अग्रस्कन्धः-अग्रसेना [ङ]। कक्षा-निश्चयः। **आकुलितसकलजीवलोकः** एकत्र ससम्भ्रमसर्वजीवा जना यत्र स तथोक्तः, अन्यत्र ससम्भ्रमसर्वभुवनः। **युगपदेकीभूतोदारवारिराशिः** एकत्र एकहेलया मिलित उद्गतशब्दः शत्रुसंघातो यत्र स तथोक्तः, अन्यत्र युगपन्मिलितोन्नदसमुद्रः। **अस्रजलविसरवर्षिघनपदातिघोरः** एकत्र रुधिरोदकवर्षकनिबिडपत्तिभैरवः, अन्यत्र रक्तवज्जलवर्षकमेघावस्थानातिरौद्रः। **मुदितयोगिनीमृग्यमाणलोकपालकपालचषकः** एकत्र हृष्टशाकिनीगवेष्यमाणनृपतिशिरोऽस्थिमद्यपात्रः, अन्यत्र हृष्टचामुण्डान्वेष्यमाणदिक्पालकपालचषकः।

अमन्दु-कठोरं यथा स्यात् तथा, गुञ्जन्तः-ध्वनन्तः, काहलाः-महाढक्का यस्मिंस्तादृशम्; पुनः **आकर्ण्यमानतारपरुषहयहेषारवम्** आकर्ण्यमानाः-श्रूयमाणाः, ताराः-तीव्राः, परुषाः-कर्णकठोराः, हयानाम्-अश्वानाम्, हेषारवाः-हेषाख्यशब्दा यस्मिंस्तादृशम्; पुनः **इतस्ततः** अत्र तत्र, **श्रूयमाणगम्भीरगजगर्जितं** श्रूयमाणम्, गम्भीरं-तुमुलम्, गजगर्जितं-हस्तिगर्जनं यस्मिंस्तादृशम्; पुनः **आवेगतर्जिताश्वैः** आवेगैः-अतिवेगैः, तर्जिताः-ताडिताः, अश्वा यैस्तादृशैः, **अश्ववारैः** अश्वारोहिसैनिकैः, **वारं वारम्** अनेकधा, **आवेद्यमानागमनम्** आवेद्यमानं-ज्ञाप्यमानम्, आगमनं यस्य तादृशम्; पुनः **अग्रस्कन्धताडितोद्धुरसमरढक्कम्** अग्रस्कन्धे सेनासन्निवेशाग्रभागे, ताडिताः-नादिताः, उद्धुराः-दृढाः, समरढक्काः-संग्रामवाद्यविशेषा यस्मिंस्तादृशम्। **च** पुनः, **अविरलनिरस्तशरनिकरशीकरासारडामरम्** अविरलं-निरन्तरम्, निरस्तः-विकीर्णो यः, शरनिकरः-बाणसमूहः, तद्रूपजलकणधारापातेन, डामरं-व्याप्तम्; पुनः **दुर्वाररभसं** दुर्निवारवेगम्; पुनः **उद्दामकलकलव्याप्तदिङ्मुखम्** उद्दाम्ना-उत्कटेन, कलकलेन-कोलाहलेन, व्याप्तानि-पूरितानि, सकलानि-सर्वाणि, दिङ्मुखानि, सकलानां दिशां वा मुखानि-अग्रभागा येन तादृशम्, **तत्** शत्रुसैन्यम्, **अभिमुखप्रधावितेन** शीघ्रमभिमुखमागतेन, **अस्मद्बलेन** अस्मत्सैन्येन, **प्रत्यगृह्यत** आक्रान्तम्; केन कीदृशं किमिव ? **लवणजलधिना** लवणसमुद्रेण, **जलदागमक्षुभितं** जलदागमेन-वर्षर्तुना, क्षुभितं सञ्चालितम्, **अमरापगापूरजलमिव** अमरापगायाः-देवनद्याः, गङ्गाया इति यावत्, पूरजलमिव-प्रवाहजलमिव [ङ]। **च** पुनः, **परस्परवधनिबद्धकक्ष्ययोः** परस्परस्य, वधाय-घाताय, निबद्धा-नितरां बद्धा, कक्षा-कटिघटितपटार्धभागो निश्चयो वा याभ्यां तादृशयोः, **तयोः** स्वसैन्य-शत्रुसैन्ययोः, **महाप्रलयसन्निभः** महाप्रलयतुल्यः, **समरसंघट्टः** संग्रामसंघर्षः, **अजायत** जातः। कीदृशः ? **तत्क्षणं** तत्कालम्, **आकुलितसकलजीवलोकः** आकुलिताः-क्षोभिताः, सकलाः-समस्ताः, जीवाः-प्राणिनो यैस्तादृशा लोकाः-जना यत्र तादृशः, पक्षे आकुलिताः-क्षोभिताः, सकलाः-समस्ताः, जीवलोकाः-भवनानि येन तादृशः; पुनः **युगपदेकीभूतोदारवारिराशिः** युगपद्-एककालावच्छेदेन, एकीभूतः-संमिलितः, उदारवः-उद्गतशब्दः, अरिराशिः-शत्रुसमुदायो यत्र तादृशः, पक्षे युगपद्-एककालावच्छेदेन, एकीभूताः-संमिलिताः, उदाराः-महान्तः, वारिराशयः-समुद्रा यत्र तादृशः; पुनः **अस्रजलविसरवर्षिघनपदातिघोरः** अस्रजलविसरवर्षिणः-रुधिररूपजलौघवर्षिणो ये, घनाः-निबिडाः; पदातयः-पत्तयः, तैः अतिघोरः-अतिभयङ्करः, पक्षे अस्रजलविसरवर्षिणः-रुधिरमयजलौघवर्षिणो ये, घनाः-मेघाः, तेषां यानि पदानि-अवस्थानानि, तैः, अतिघोरः-अतिभयङ्करः; पुनः **मुदितयोगिनीमृग्यमाणलोकपालकपालचषकः** मुदितया-रुधिरपानहृष्टया, योगिन्या-शाकिन्या, पक्षे मुदितया लोकसंहारहृष्टया, योगिन्या-चामुण्डया, मृग्यमाणाः-अन्विष्यमाणाः, लोकपालानां-नृपाणाम्, पक्षे इन्द्रादिदिक्पालानाम्, कपालचषकाः-मस्तकोपरितनार्धघटाकारास्थिरूपरुधिरपानपात्रविशेषाः,

प्रचलितरसाकुलभूभृच्चक्रवालकृततुमुलः प्रसृतरभसोत्तालगजदानवारिरार्तत्रिदशदारिकान्विष्यमाणरमणसार्थो निपीतनरवशाविस्वरविसारिशिवाफेत्कारडामरः [च] । सतारकावर्ष इव वेतालदृष्टिभिः, सोल्कापात इव निशितप्रासवृष्टिभिः, सनिर्घातपात इव गदाप्रहारैः, ससंवर्तकाम्बुदुर्दिन इव करिशीकरासारैः, सोत्पातरविमण्डल इव कीलालितकरालचक्रमुक्तिभिः, सवैद्युतस्फूर्ज इव जवापतज्ज्वलितशक्तिभिः, सखण्डपरशुताण्डव इव प्रचण्डानिलधूतध्वजसहस्रैः, सकालाग्निधूम इव प्रकुपितसुभटभ्रकुटीतमिस्रैरजायत महाप्रलयसंनिभः

टिप्पनकम्—प्रचलितरसाकुलभूभृच्चक्रवालकृततुमुलः एकत्र प्रचलितवसुन्धराकुलगिरिचक्रविहिताकुलशब्दः, अन्यत्र प्रचलितवीररसाकुलनृपचक्रकृताकुलारवः । **प्रसृतरभसोत्तालगजदानवारिः** एकत्र प्रसृतं-प्रवृत्तम्, रभसोत्तालगजानाम्-उत्सुकोद्भटकरिणाम्, दानवारि-मदजलं यत्र स तथोक्तः, अन्यत्र प्रसृत उत्तालगजवद् दानवारिः-शङ्करो यत्र स तथोक्तः । **आर्तत्रिदशदारिकान्विष्यमाणरमणसार्थः** एकत्र आर्ताभिस्तिसृभिर्दशभिश्च, दारिकाभिः-अङ्गनाभिः, अन्विष्यमाणो भर्तृसंघातो यत्र स तथा, अन्यत्र आर्तदेवपुत्रिकागवेष्यमाणभर्तृसंघातः । **निपीते**त्यादि-शिवाफेत्कारडामरः-एकत्र चामुण्डाफेत्कारेण डामरः-रौद्रः, अन्यत्र कोष्ट्री० [च] । कीलालितः-सरुधिरः । स्फूर्जः-स्फुरणम् । खण्डपरशुः-शङ्करः । कालाग्निः-पातालरुद्रः [छ] ।

पक्षे तद्रूपमद्यपानपात्रविशेषा यस्मिंस्तादृशः; पुनः **प्रचलितरसाकुलभूभृच्चक्रवालकृततुमुलः** प्रचलितेन-उच्छलितेन, रसेन-वीररसेन, आकुलानाम्-आप्लुतानाम्, भूभृतां-राज्ञाम्, चक्रवालेन-मण्डलेन, कृतं तुमुलं-सान्द्रयुद्धं यस्मिन्, पक्षे प्रचलितायाः-प्रकम्पितायाः, रसायाः-पृथिव्याः, कुलभूभृतां-महेन्द्रादिकुलपर्वतानाम्, चक्रवालेन-समूहेन, कृतम्, परस्परोपरि पतनरूपं सान्द्रं युद्धं यस्मिंस्तादृशः; पुनः **प्रसृतरभसोत्तालगजदानवारिः** प्रसृतं-विस्तृतम्, रभसोत्तालानां-वेगोद्धतानाम्, गजानां, दानवारि-मदजलं यस्मिंस्तादृशः, पक्षे प्रसृतः-संहर्तुं व्यापृतः, रभसोत्तालः-औत्सुक्योन्नतो हर्षमेदुरो वा, गजदानवस्य-गजासुरस्य, अरिः-शत्रुः शिवः संहारभैरव इति यावत्, यस्मिंस्तादृशः; पुनः **आर्तत्रिदशदारिकान्विष्यमाणरमणसार्थः** आर्ताभिः-विरहव्यग्राभिः, त्रिदशदारिकाभिः-देवाङ्गनाभिः, अन्विष्यमाणः, रमणसार्थः-प्रियसमूहो यस्मिंस्तादृशः, युद्धे मृतानां देवत्वप्राप्तेः प्रसिद्ध्या वैधव्यविधुरितानां तद्वनितानां वरान्वेषणोपपत्तेः, पक्षे त्रिदशाभिः-त्रिरावृत्तदशसंख्यकाभिः, त्रिंशत्संख्यकाभिरिति यावत्, उपलक्षणत्वाद् बहुसंख्यकाभिरित्यर्थः, दारिकाभिः-अङ्गनाभिः, अन्विष्यमाणः, रमणसार्थः-भर्तृगणो यस्मिंस्तादृशः; पुनः **निपीतनरवशाविस्वरविसारिशिवाफेत्कारडामरः** निपीता-नितरां पानकर्मतामापादिता या, नराणां-मनुष्याणाम्, वशा-धातुविशेषः, तया विस्वरेण-विकृतस्वरेण, विसारिणीनां-प्रसारिणीनाम्, शिवानां-शृगालीनाम्, पक्षे विसारिण्याः शिवायाः-चण्डिकायाः, फेत्कारेण-ध्वनिविशेषेण, डामरः-व्याप्तः, रौद्र इति यावत् [च]; पुनः **वेतालदृष्टिभिः** वेतालानां-मल्लविशेषाणाम्, पक्षे शिवानुचरविशेषाणाम्, दृष्टिभिः-दृष्टिपातैः, **सतारकावर्ष इव** तारकाणां ताराणाम्, यद् वर्षं-वृष्टिः, तत्सहित इवेत्युत्प्रेक्षा; पुनः **निशितप्रासवृष्टिभिः** निशितानां-तीक्ष्णानाम्, प्रासानां-कुन्ताख्यास्त्राणाम्, या वृष्टयस्ताभिः, **सोल्कापात इव** उल्कापातसहित इवेति चोत्प्रेक्षा; पुनः **गदाप्रहारैः** गदाप्रक्षेपैः, **सनिर्घातपात इव** वज्रपातसहित इव; पुनः **करिशीकरासारैः** गजमदजलकणधारासम्पातैः, **ससंवर्त्तकाम्बुदुर्दिन इव** संवर्तकस्य-तदाख्यमेघविशेषस्य, अम्बुभिः-जलैः, यद् दुर्दिनं-मेघाच्छन्नदिनम्, तत्सहित इव; पुनः **कीलालितकरालचक्रमुक्तिभिः** कीलालितं-रुधिरार्द्रीभूतम्, करालं-भयानकं च, यच्चक्रं-तदाख्यमस्त्रम्, तन्मुक्तिभिः-तद्विमोचनैः, **सोत्पातरविमण्डल इव** उत्पातरविमण्डलेन-जगत्संहारसूचकसूर्यमण्डलेन, सहित इव; पुनः **जवापतज्ज्वलितशक्तिभिः** जवेन-वेगेन, आपतन्तीभिः-निपतन्तीभिः, ज्वलिताभिः-दीप्ताभिः, शक्तिभिः-तदाख्यास्त्रविशेषैः, **सवैद्युतस्फूर्ज इव** वैद्युतेन-विद्युत्सम्बन्धिना, स्फूर्जेन-स्फुरणेन, सहित इव; पुनः **प्रचण्डानिलधूतध्वजसहस्रैः** प्रचण्डेन-उद्दण्डेन, अनिलेन-वायुना, धूताः-कम्पिताः, ये ध्वजास्तेषां सहस्रैः, **सखण्डपरशुताण्डव इव** खण्डपरशोः-शिवस्य, ताण्डवेन-नृत्येन, सहित इव; पुनः **प्रकुपितसुभटभ्रकुटीतमिस्रैः** प्रकुपितानाम्-अतिक्रुद्धानाम्, सुभटानां-सुयोधानाम्, भ्रुकुटीभिः-नेत्रोपरितनरोमराजिकौटिल्यैः, यानि तमिस्राणि-अन्धकारास्तैः, **सकालाग्निधूम इव** कालाग्नेः-प्रलयकालिकाग्नेः, धूमेन सहित इवेति

समरसंघट्टः [छ]। सर्वतश्च गात्रसंघट्टरणितघण्टानामरिद्विपावलोकनक्रोधधावितानामिभपतीनां बृंहितेन, प्रतिबलाश्वदर्शनक्षुभितानां च वाजिनां हेषितेन, हर्षोत्तालसूतताडिततुरङ्गबद्धरंहसां च स्यन्दनानां चीत्कृतेन, सकोपधानुष्कनिर्दयाच्छोटितज्यानां च चापयष्टीनां टङ्कृतेन, खरखुरप्रदलितदण्डानां च पर्यस्यतां रथकेतनानां कडत्कारेण, निष्ठुरधनुर्यन्त्रनिष्ठ्यूतानां च निर्गच्छतां नाराचानां सूत्कारेण, वेगोह्यमानविवशवेतालकोलाहलघनेन च रुधिरापगानां घूत्कारेण, प्रतिरसितसंभृतेन समरभेरीणां भाङ्कारेण, निर्भराध्मातसकलदिक्चक्रवालं साक्रन्दमिव साट्टहासमिव सास्फोटनरवमिव ब्रह्माण्डमभवत् [ज]। अनन्तरं च सेनाभराक्रान्तमेदिनीमूर्च्छान्धकाराकृतिः कवलयितुमिव सशैलद्वीपकाननं त्रिभुवनमुल्ललास लासकस्तरुणजलधरपटलशङ्कया विमुक्तकलकेकाविलापानां वनकलापिनामाब्रह्मलोकमेणाङ्कमण्डलाकाण्डसैंहिकेयो रजःसंघातः।

टिप्पनकम्—बृंहितं–गजगर्जितम्। सूतः–सारथिः। **पर्यस्यतां** पतताम्। प्रतिरसितं–प्रतिशब्दः [ज]। **लासकः** नर्तकः। एणाङ्कः–चन्द्रः।

च सर्वत्रोत्प्रेक्षा [छ]। **सर्वतः** परितः, **गात्रसंघट्टरणितघण्टानां** गात्रसंघट्टेन–गात्राणां–शरीराणां परस्परसंघर्षेण, रणिता–ध्वनिता, घण्टा येषां तादृशानाम्, पुनः **अरिद्विपावलोकनक्रोधधावितानाम्** अरिद्विपानां–शत्रुगजानाम्, अवलोकनेन–दर्शनेन, यः क्रोधस्तेन धावितानां–शीघ्रं गतानाम्, **इभपतीनां** महागजानाम्, **बृंहितेन** गर्जितेन; **च** पुनः, **प्रतिबलाश्वदर्शनक्षुभितानां** प्रतिबलाश्वदर्शनेन–प्रतिद्वन्द्विसैन्याश्वदर्शनेन, क्षुभितानां–सञ्चलितानाम्, **वाजिनाम्**–अश्वानाम्, हेषितेन–हेषाख्यशब्देन; **च** पुनः, **हर्षोत्तालसूतताडिततुरङ्गबद्धरंहसां** हर्षेण उत्तालाः–उद्वेलिताः, ये सूताः–सारथयः, तैर्बद्धं–आहितम्, रंहः–वेगो येषां तादृशानाम्, **स्यन्दनानां** रथानाम्, **चीत्कृतेन** चीत्कारशब्देन; **च** पुनः, **सकोपधानुष्कनिर्दयाच्छोटितज्यानां** सकोपाः–क्रुद्धाः, ये धानुष्काः–धनुर्धारिणः, तैः, निर्दयम्–अत्यन्तं यथा स्यात् तथा, आच्छोटिता–आकृष्टा, ज्या–मौर्वी, रज्जुरिति यावत्, यासां तादृशीनाम्, **चापयष्टीनां** धनुर्यष्टीनाम्, **टङ्कृतेन** टङ्कारेण; **च** पुनः, पर्यस्यताम्–अधःपतताम्, पुनः **खरखुरप्रदलितदण्डानां** खराणां–गर्दभानाम्, खुरैः–शफैः, दलितानां–विदारितानाम्, **रथकेतनानां** रथध्वजानाम्, **कडत्कारेण** ध्वनिविशेषेण; **च** पुनः, **निष्ठुरधनुर्यन्त्रनिष्ठ्यूतानां** निष्ठुरेण–दृढेन, धनुर्यन्त्रेण, निष्ठ्यूतानां–प्रक्षिप्तानाम्, अत एव **निर्गच्छतां** ततो निष्क्रामताम्, **नाराचानां** बाणानाम्, **सूत्कारेण** ध्वनिविशेषेण; **च** पुनः, **वेगोह्यमानविवशवेतालकोलाहलघनेन** वेगेन उह्यमानानां–वहनकर्मतामापद्यमानानाम्, विवशानां–रुधिरपानपरवशानाम्, वेतालानां–भूतविशेषाणाम्, यः कोलाहलस्तेन, घनेन–निबिडेन, **रुधिरापगानां** रुधिरनदीनाम्, **घूत्कारेण** ध्वनिविशेषेण; पुनः **समरभेरीणां** संग्रामढक्कानाम्, **प्रतिरसितसम्भृतेन** प्रतिध्वनिपूर्णेन, **भाङ्कारेण** ध्वनिविशेषेण, **निर्भराध्मातसकलदिक्चक्रवालं** निर्भरम्–अत्यन्तं यथा स्यात् तथा, आध्मातं–शब्दितम्, सकलानां–सर्वासां दिशाम्, चक्रवालं–मण्डलं यस्मिंस्तादृशम्, **ब्रह्माण्डं** चतुर्दशभुवनाद्यात्मकं जगत्, **साक्रन्दमिव** सविलापमिव, **साट्टहासमिव** महाहाससहितमिव, **सास्फोटनरवमिव,** आस्फोटनरवेण–पर्वतावदारणध्वनिना सहितमिव, **अभवत्** जातम् [ज]। **च** पुनः, **अनन्तरं** ब्रह्माण्डस्योक्तस्थित्यनन्तरम्, **सेनाभराक्रान्तमेदिनीमूर्च्छान्धकाराकृतिः** सेनाभरेण–सैन्यभारेण, आक्रान्तायाः, आकुलितायाः, मेदिन्याः–पृथिव्याः, यो मूर्च्छान्धकारः–मूर्च्छारूपान्धकारः, सा आकृतिः–आकारो यस्य तादृशः, **रजःसङ्घातः** धूलिसमूहः, **सशैलद्वीपकाननं** शैलाः–पर्वताः, द्वीपाः–जलमध्यस्थलप्रदेशाः, काननानि–वनानि, तैः सहितम्, **त्रिभुवनम्** भुवनत्रयम्, **कवलयितुमिव** भक्षयितुमिव, **उल्ललास** उच्छलति स। कीदृशः? **तरुणजलधरपटलशङ्कया** तरुणाः–अभिनवा ये, जलधराः–मेघाः, तेषां यत् पटलं–समूहः, तस्य शङ्कया–संशयेन, **विमुक्तकलकेकाविलापानां** विमुक्तः–मुखान्निर्गमितः, कलः–मधुरः, केकाविलापः–केकाख्यशब्दविशेषेण विलपनं यैस्तादृशानाम्, **वनकलापिनां** वनमयूराणाम्, **लासकः** नर्तकः, पुनः **आब्रह्मलोकं** ब्रह्मलोकमभिव्याप्य, **एणाङ्कमण्डले** चन्द्रबिम्बे, **अकाण्डसैंहिकेयः** अकालराहुस्वरूपः। **प्रतिक्षणं**

प्रतिक्षणमुद्धुरैर्गुणध्वनिभिरज्ञायत धनुष्मतामिषुव्यापारः, शस्त्रशिखिकणद्योतेन पदमदीयत प्रचलितैः प्रत्यरिपदातिभिः, अविदितात्मीयपरविभागेन व्यलम्ब्यत मुहूर्तमुद्गूर्णहेतिनापि सुभटलोकेन, प्रभूतपिशिताभ्यवहारजनिततीव्रोदन्येन कर्दमप्रायमपीयत क्षतजापगाम्बु कौणपगणेन [झ] ॥

एवं च भीषणाबद्धतुमुले कुतूहलोत्तालकालदूताकुलितदशदिशि क्रव्यादकुलविलुप्यमानवीरलोके नृत्यत्परेतपरिषदि कृतान्तमहोत्सव इव निर्भरं प्रवृत्ते समरसंरम्भे क्षीयमाणेषु क्षितिपतिषु निपतत्सु पादातेषु सीदत्सु सादिषु व्रजत्सु विधुरतामाधोरणेषु प्रहारविकलकायेष्वितस्ततः परिस्खलत्सु शून्यासनेषु सप्तिषु स्फुरत्कृपाणचक्रत्रिशूलकार्मुकप्रायप्रहरणदुरालोकायामनेकशवमुण्डमालामालितवपुषि चण्डिकायामिव रूपपरिवर्तेन कृतसंनिधावुपलक्ष्यमाणायां क्षितावमर्षमय इव क्रौर्यमय इव वैरमय इव व्याजमय इव हिंसामय इव विभाव्यमाने जगति त्रिभागशेषस्थितौ त्रियामायाममर्षगतमरणशङ्कानिरङ्कुशप्रवृत्तिभिर्वीरलोकैरहंप्रथमिकया

टिप्पनकम्—उदन्या–तृषा । कौणपाः–राक्षसाः [झ] । क्रव्यादाः–राक्षसाः । परेताः–पिशाचाः [ञ] ।

क्षणे क्षणे, **उद्धुरैः** उच्चैः, **गुणध्वनिभिः** आकृष्टमौर्वीशब्दैः, **धनुष्मतां** धनुर्धारिणाम्, **इषुव्यापारः** बाणविक्षेपात्मको व्यापारः, **अज्ञायत** ज्ञायते स्म । **प्रचलितैः** प्रस्थितैः, **प्रत्यरिपदातिभिः** उपस्थितशत्रुपदगामिसैनिकैः, **शस्त्रशिखिकणद्योतेन** शस्त्रशिखिनः–खड्गादिरूपाग्नेः, कणानां–स्फुलिङ्गानाम्, द्योतेन–प्रकाशेन, **पदं** चरणम्, **अदीयत** आरोप्यते स्म । **उद्गूर्णहेतिनापि** उद्यतबाणेनापि, **सुभटलोकेन** सुयोधजनेन, **अविदितात्मीयपरविभागेन** अविदितः–अप्रतीतः, आत्मीयानां–स्वजनानाम्, परेषाम्–अनात्मीयजनानाम्, शत्रुजनानामिति यावत्, विभागः–पार्थक्यं येन तादृशेन सता, **मुहूर्तं** क्षणम्, **व्यलम्बत** बाणविक्षेपे विलम्बः कृतः । **प्रभूतपिशिताभ्यवहारजनिततीव्रोदन्येन** प्रभूतस्य प्रचुरस्य, पिशितस्य–मांसस्य, अभ्यवहारेण–भक्षणेन, जनिता–उत्पन्ना, तीव्रा–दुःसहा, उदन्या–पिपासा यस्य तादृशेन, **कौणपगणेन** राक्षसगणेन, **कर्दमप्रायं** पङ्कमयम्, **क्षतजापगाम्बु** रुधिरनदीजलम्, **अपीयत** पीयते स्म [झ] ॥ **एवम्** अनेन प्रकारेण, **भीषणाबद्धतुमुले** भीषणं–भयानकम्, आबद्धं–समन्तात् प्रवर्त्तितम्, तुमुलं–सान्द्रयुद्धं यस्मिंस्तादृशे; पुनः **कुतूहलोत्तालकालदूताकुलितदशदिशि** कुतूहलेन–औत्सुक्येन, उत्तालैः–उद्धतैः, कालदूतैः–यमदूतैः, आकुलिताः–आक्रान्ताः, दश दिशो यस्मिंस्तादृशे; पुनः **क्रव्यादकुलविलुप्यमानवीरलोके** क्रव्यादानां–राक्षसानाम्, कुलेन–समूहेन, विलुप्यमानाः–मांसार्थमुत्कृत्यमानाः, वीरलोकाः–युद्धमृतवीरपुरुषा यस्मिंस्तादृशे; पुनः **नृत्यत्परेतपरिषदि** नृत्यन्ती–हर्षेणोच्छलन्ती, परेतानां–व्यन्तरविशेषाणाम्, परिषत्–सभा समूह इति यावत्, यस्मिंस्तादृशे; पुनः **कृतान्तमहोत्सव इव** यमराजमहोत्सव इव, **निर्भरम्** अत्यन्तम्, **प्रवृत्ते** प्रारब्धे, **समरसंरम्भे** संग्रामसंघर्षे, **क्षितिपतिषु** नृपेषु, **क्षीयमाणेषु** म्रियमाणेषु; पुनः **पदातिषु** पदगामिसैनिकसमूहेषु, **निपतत्सु** अधःस्खलत्सु; पुनः **सादिषु** अश्वारोहिसैनिकेषु, **सीदत्सु** व्यथमानेषु; पुनः **आधोरणेषु** हस्तिपकेषु, **विधुरतां** क्लेशम्, **व्रजत्सु** अनुभवत्सु; पुनः **प्रहारविकलकायेषु** प्रहारेण–खड्गघातेन, विकलः–भग्नः, कायः–शरीरं येषां तादृशेषु, **शून्यासनेषु** पर्याणादिरहितेषु, **सप्तिषु** अश्वेषु, **इतस्ततः** अत्र तत्र, **परिस्खलत्सु** परिपतत्सु; पुनः **स्फुरत्कृपाणचक्रत्रिशूलकार्मुकप्रायप्रहरणदुरालोकायां** स्फुरन्ति–उज्ज्वलन्ति, यानि कृपाणचक्रत्रिशूलकार्मुकाणि, कृपाणः–खड्गः, चक्रं–चक्राकारोऽस्त्रविशेषः, त्रिशूलं–यस्य शूलाकाराणि त्रीणि शिखाग्राणि भवन्ति तादृगस्त्रविशेषः, कार्मुकं नाम–धनुः, तत्प्रायैः–तत्प्रचुरैः, प्रहरणैः–अस्त्रैः, दुरालोकायां–दुःखेन दृश्यायाम्, **च** पुनः, **अनेकशवमुण्डमालामालितवपुषि** अनेकेषां शवानां–मृतकानाम्, या मुण्डमाला–मस्तकस्थितमाला, पक्षे मस्तकपङ्क्तिः, तया मालितं–शोभितम्, वपुः–शरीरं यस्यास्तादृश्याम्, **क्षितौ** पृथिव्याम्, **रूपपरिवर्तेन** स्वरूपपरिवर्तनेन, **कृतसन्निधौ** कृतसमीपावस्थानायाम्, **चण्डिकायामिव** तदाख्यदेव्यामिव, **उपलक्ष्यमाणायां** प्रतीयमानायां सत्याम्; पुनः जगति, **अमर्षमय इव** क्रोधमय इव, पुनः **क्रौर्यमय इव** क्रूरतामय इव, पुनः **वैरमय इव** शात्रवमय इव, पुनः **व्याजमय इव** पारस्परिकच्छलमय इव, पुनः **हिंसामय इव** हिंसाप्रचुर इव, **विभाव्यमाने** प्रतीयमाने सति; पुनः **त्रियामायां** रात्रौ, **त्रिभागशेषस्थितौ** त्रिभागरूपा–

प्रार्थ्यमानयशसि पर्यायेण जयपराजयावासादयति सैन्यद्वये सहसैव शत्रुसैन्यादसह्यरभसो मृगयुमार्गणप्रहारताडित इव मृगारातिराकर्णितदुर्नरेन्द्रमन्त्रपद इव महाहिराघ्रातविपक्षवारणमदगन्ध इव वनकरेणुरनिललोलपताकापटसहस्रमरिकुलप्रलयाय मुक्तशिखमिवोत्खातशस्त्रपुरुषकृतपरिक्षेपं रथमारूढः प्रौढकालायसकवचगूढकायैः पुनरुक्ततर्जितसारथिभिरभङ्गुरभुजबलाभिमानैरनतिभूरिभिरवनिपतिपुत्रैरनुगम्यमान एको नृपकुमारः कुमारसदृशाकृतिरतिरंहसा निरगमत् [ञ]। निर्दयास्फालितधनुश्चातिदूरोल्लसितेन श्यामलितदशदिशा कुटिलविषमेण भ्रुकुटिवलिलेखात्रयेण धूमोद्गमेनेवानुमीयमानहृदयप्रदीप्तमन्युरभिमन्युरिव चक्रव्यूहस्य सेनापतिपुरोभागपुञ्जितस्य राजसमूहस्य संचरदनेकरथसहस्रदुष्प्रवेशमविशन्मध्यम्, अनुवर्तितक्षत्रधर्मैश्च महाबलैर्नरपतिभिरेकैकशोऽभिमुखीभवद्भिः क्षणमात्रमन्थरितरथगतिः 'वज्रायुध! वज्रायुध!' इति सगर्वं व्याहरन् वाहिनीभर्तुरन्तिकमधिगच्छत् [ट]॥

तृतीयभागरूपा, शेषस्थितिः–शेषावस्थानं यस्यास्तादृश्यां सत्याम्; पुनः **सैन्यद्वये** स्वसैन्य-शत्रुसैन्ययोः, **अमर्षगतमरणशङ्कानिरङ्कुशप्रवृत्तिभिः** अमर्षेण–ईर्ष्यावशेन, गता निवृत्ता, या मरणशङ्का–मृत्युभयम्, तेन निरङ्कुशप्रवृत्तिभिः–निर्बाधप्रवृत्तिकैः, **वीरलोकैः** वीरपुरुषैः, **अहंप्रथमिकया** 'अहं प्रथमः, अहं प्रथमो योधानाम्' इति पारस्परिकस्पर्धावशेन, **प्रार्थ्यमानयशसि** प्रार्थ्यमानम्–अभिलष्यमाणं यशो येन तादृशे, अत एव **पर्यायेण** क्रमेण, जय-पराजयौ, **आसादयति** प्राप्नुवति सति, **सहसैव** अकस्मादेव, **शत्रुसैन्यात्** शत्रुसैन्यसकाशात्, **कुमारसदृशाकृतिः** कार्तिकेयतुल्याकारः, एकः, **नृपतिकुमारः** राजकुमारः, **अतिरंहसा** अतिवेगेन, **निरगमत्** निर्गतः। कीदृशः? **असह्यरभसः** असह्यः–सोढुमशक्यः, रभसः–वेगो यस्य तादृशः, क इव? **मृगयुमार्गणप्रहारताडितः** मृगयोः–व्याधस्य, मार्गणप्रहारेण–बाणप्रक्षेपेण, ताडितः, **मृगारातिः** सिंह इव; पुनः **आकर्णितदुर्नरेन्द्रमन्त्रपदः** आकर्णितानि–श्रुतानि, दुर्नरेन्द्राणां–दुष्टमन्त्रपाठकानाम्, मन्त्रपदानि–मन्त्राक्षराणि येन तादृशः, **महाहिः** महासर्प इव; पुनः **आघ्रातविपक्षवारणमदगन्धः** आघ्रातः–आघ्राणकर्मतामापादितः, विपक्षवारणानां–शत्रुगजानाम्, मदगन्धः–दानवारिगन्धो येन तादृशः, **वनकरेणुः** वनगज इव; पुनः कीदृशः? **रथमारूढः** कृतरथारोहणः, कीदृशं रथम्? **अनिललोलपताकापटसहस्रम्** अनिलेन–वायुना, लोलम्–उद्धूयमानम्, पताकापटानां–ध्वजवस्त्राणाम्, सहस्रं यस्मिंस्तादृशम्, पुनः **अरिकुलप्रलयाय** शत्रुकुलसमूलोच्छेदाय, **मुक्तशिखमिव** मुक्ता–निर्गमिता, शिखा–ज्वाला येन तादृशम्, अग्निमिवेत्युत्प्रेक्षा, पुनः **उत्खातशस्त्रपुरुषकृतपरिक्षेपम्** उत्खातशस्त्रैः–उद्घाटितशस्त्रैः, पुरुषैः, कृतः परिक्षेपः–परिवेष्टनं यस्य तादृशम्, पुनः **प्रौढकालायसकवचगूढकायैः** प्रौढेन–सुदृढेन, कालायसकवचेन–लौहविशेषनिर्मितवर्मणा, गूढः–रक्षितः, कायः–शरीरं येषां तादृशैः, **पुनरुक्ततर्जितसारथिभिः** पुनरुक्तेन–पुनः पुनर्वचनेन, तर्जिताः–भर्त्सिताः सारथयो यैस्तादृशैः, पुनः **अभङ्गुरभुजबलाभिमानैः** अभङ्गुरः–अविनश्वरः, प्रबल इत्यर्थः, भुजबलाभिमानः–भुजबलगर्वो येषां तादृशैः, **अनतिभूरिभिः** अनत्यधिकैः, परिमितैरिति यावत्, **अवनिपतिपुत्रैः** राजकुमारैः, **अनुगम्यमानः** अनुस्रियमाणः [ञ]। च पुनः, **निर्दयास्फालितधनुः** निर्दयम्–अत्यन्तं यथा स्यात् तथा, आस्फालितम्–आकृष्टं धनुर्येन तादृशः, राजकुमार इति शेषः, **सेनापतिपुरोभागपुञ्जितस्य** सेनापतेः–सेनानायकस्य, पुरोभागे–अग्रभागे, पुञ्जितस्य–संहतस्य, राजसमूहस्य–नृपगणस्य, **सञ्चरदनेकमहारथसहस्रदुष्प्रवेशं** सञ्चरतां–प्रचरताम्, अनेकेषां महारथानां सहस्रेण, दुष्प्रवेशं–दुःखेन प्रवेष्टुं योग्यम्, **चक्रव्यूहस्य** सैन्यसन्निवेशविशेषस्य, **मध्यं** मध्यभागम्, **अभिमन्युः** तदाख्योऽर्जुनसूनुरिव, **अविशत्** प्रविष्टवान्; कीदृशः? **धूमोद्गमेनेव** धूमोत्थानेनेव, **अतिदूरोल्लसितेन** सुदूरादेवाविर्भूतेन, **श्यामलितदशदिशा** श्यामलिताः–मलिनिताः, दश दिशो येन तादृशेन, **कुटिलविषमेण** कुटिलेन–वक्रेण, विषमेण–उन्नतानतेन, **भ्रुकुटिवलिलेखात्रयेण** भ्रुकुटिः–नेत्रोपरितनकुटिलरोमावलिः, तदुपरिस्थिता या वलिलेखाः–वलिरूपा रेखाः, तासां त्रयेण, **अनुमीयमानहृदयप्रदीप्तमन्युः** अनुमीयमानः–अनुमित्यात्मकानुभवगोचरतामापाद्यमानः, हृदये, प्रदीप्तः–प्रज्वलितः, मन्युः–क्रोधो यस्य तादृशः **अनुवर्तितक्षत्रधर्मैः** अनुवर्तिताः–अनुसृताः, संग्रामशौर्यादिरूपाः **क्षत्रधर्माः** क्षत्रियधर्मा यैस्तादृशैः, **महाबलैः** प्रबलैः, **एकैकशः** प्रत्येकम्, **अभिमुखीभवद्भिः** सम्मुखमागच्छद्भिः, **नरपतिभिः** नृपतिभिः, **क्षणमात्रमन्थरितरथगतिः**

सेनाधिपोऽपि गम्भीरमधुरेण तेन व्याहृतध्वनिना प्रथमजलधरस्तनितेनेव विन्ध्यः सद्य एवोद्भिन्नसरसरोमाञ्चकन्दलः कोपविस्फारितपुटेन कवलयन्निव तारकोदरप्रतिबिम्बितं सप्रगल्भचलितपक्ष्मणा लोचनद्वयेन सतुरङ्गरथमातङ्गपार्थिवं प्रतिपक्षम् 'इत इतः पश्य माम्' इति व्याहरन्नेव वाहितरथः समेत्य तस्येक्षणपथे समस्थित [ठ] । वारंवारमन्योऽन्यकृततर्जनयोश्च तयोराकर्णान्ताकृष्टमुक्तास्तुल्यकालमास्वादितगलामिषा विसारिणो, लङ्घितदशदिशो दूराध्वगा, राजकार्योपयोगिनस्तीक्ष्णाः, परितोषितसुराङ्गनाः सुपर्वाणो, महाजवा वाजिनश्चापलतोषिताः क्षितिपालदारका, विषमाश्वमण्डलभेदिनः प्राप्तमोक्षा, दत्तदीर्घनिद्रा महासंनिपाताः,

---

टिप्पनकम्—आस्वादितगलामिषाः, विसारिणः मत्स्याः, कीदृशाः? आस्वादितं–भक्षितम्, गलामिषं–बडिसीमांसं यैस्ते तथोक्ताः, अन्यत्र प्रसरणशीलास्तथा आस्वादितग्रीवामांसाः । **लङ्घितदिशः, दूराध्वगाः** दूरपथिकाः, कीदृशाः? लङ्घितदिशः–अतिक्रान्ताशा भवन्ति, दूरमार्गगन्तारो लङ्घितदिशश्च । **राजकार्योपयोगिनस्तीक्ष्णाः** एकत्र तीक्ष्णाः–घातकाः, ते नृपार्थसाधकाः, अन्यत्र निशाताः । **परितोषितसुराङ्गनाः, सुपर्वाणः** एकत्र देवाः, अन्यत्र शोभनग्रन्थिद्वयमध्याः, उभयेऽपि हर्षितदेवयोषाः । **महाजवा वाजिनः** एकत्र वाजिनोऽ[श्वाः, अ]न्यत्र सपिच्छाः, उभयेऽपि महावेगाः । **चापलतोषिताः, क्षितिपालदारकाः** एकत्र राजपुत्राः, कीदृशाः? चापलतोषिताः–चपलत्वहर्षिताः, अन्यत्र नृपविदारकाः, धनुर्लतास्थिताः । **विषमाश्वमण्डलभेदिनः, प्राप्तमोक्षाः** एकत्र प्राप्तनिर्वाणाः,

---

क्षणमात्रं–मुहूर्तमात्रम्, मन्थरिता–शिथिलिता, रथस्य गतिः–गमनं यस्य तादृशः, **वज्रायुध! वज्रायुध! इति** भो वज्रायुध! भो वज्रायुध! इति, **सगर्वं** गर्वपूर्वकम्, **व्याहरन्** ब्रुवन्, **वाहिनीभर्तुः** अनुपदोक्तनामकस्य सेनापतेः, **अन्तिकं** समीपम्, **अभ्यागच्छत्** आगतवान् [ट] ॥ **सेनाधिपोऽपि** सेनापतिरपि, **प्रथमजलधरस्तनितेन** प्रथममेघगर्जितेन, **विन्ध्य इव** तदाख्यकुलपर्वत इव, **गम्भीरमधुरेण** गम्भीरेण–तीव्रेण, मधुरेण च, **व्याहृतध्वनिना** कथितशब्देन, **सद्य एव** तत्क्षणमेव, **उद्भिन्नसरसरोमाञ्चकन्दलः** उद्भिन्नानि–उन्मीलितानि, सरसानि–रसान्वितानि, रोमाञ्चकन्दलानि–रोमाञ्चरूपनवाङ्कुराणि यस्य तादृशः सन्; **कोपविस्फारितपुटेन** कोपेन–क्रोधेन, विस्फारितौ पुटौ–पुटाकारकनीनिकावरणत्वचौ यस्य तादृशेन, पुनः **सप्रगल्भचलितपक्ष्मणा** सप्रगल्भं–निर्भयं यथा स्यात् तथा, चलिते पक्ष्मणी–नेत्रावरणरोमलेखे यस्य तादृशेन, **लोचनद्वयेन** नेत्रद्वयेन, **तारकोदरप्रतिबिम्बितं** तारकयोः–नेत्रमध्यवर्तिकनीनिकयोः, उदरे–मध्ये, प्रतिबिम्बितम्, **सतुरङ्गरथमातङ्गपार्थिवं** तुरङ्गैः–अश्वैः, रथैः–स्यन्दनैः, मातङ्गैः–हस्तिभिः, पार्थिवैः–नृपैश्च, सहितम्, **प्रतिपक्षं** शत्रुम्, **कवलयन्निव** ग्रसन्निव; **इत इतः** अत्र अत्र, **मां** वज्रायुधम्, पश्य, इति **व्याहरन्नेव** कथयन्नेव; **वाहितरथः** प्रस्थापितरथः, **समेत्य** समीपमागत्य, **तस्य** राजकुमारस्य, **ईक्षणपथे** दृष्टिपथे, **समस्थित** संतिष्ठते स्म [ठ] ॥ **च** पुनः, **वारं वारं** मुहुर्मुहुः, **अन्योऽन्यकृततर्जनयोः** अन्योऽन्यं–परस्परम्, कृतं तर्जनं–प्रहारो याभ्यां तादृशयोः, **तयोः** सेनापति-राजकुमारयोः, **शराः** बाणाः, **प्रसस्रुः** प्रसृताः । कीदृशाः? **विसारिणः** प्रसरणशीला मत्स्यरूपाश्च, केन साधर्म्येण? **आकर्णान्ताकृष्टमुक्ताः** आकर्णान्तं–कर्णान्तपर्यन्तम्, आकृष्टाः–पूर्वं कृताकर्षणाः, पश्चान्मुक्ताः–लक्ष्येषु निपातिताः, पक्षे बडिशसूच्या कर्णान्तं यावदाकृष्टाः–जलादुद्धृताः, पश्चान्मुक्ताः–बडिशाग्निष्कासिताः, पुनः **आस्वादितगलामिषाः** आस्वादितं-भक्षितम्, गलामिषं-ग्रीवास्थमांसम्, पक्षे ग्रीवामांसं च यैस्तादृशाः, बडिशसूचीग्रथितमामिषं भक्षतां मत्स्यानां तेन सह तद्विद्धस्वग्रीवास्थमांसभक्षणस्याप्यवर्जनीयताया लोकप्रसिद्धत्वात्; पुनः **लङ्घितदशदिशः** लङ्घिताः–त्वरितगत्या कृतलङ्घनाः, दश दिशो यैस्तादृशाः, अत एव **दूराध्वगाः** दूरमार्गगामिनः, दूरगामिपथिकरूपाश्च; पुनः **राजकार्योपयोगिनः** राज्ञां यानि कार्याणि तदुपयोगिनः–तत्साधकाः, **तीक्ष्णाः** निशिताः, तीव्रा आत्मत्यागिनो वा; पुनः **परितोषितसुराङ्गनाः** परितोषिताः–सन्तोषिताः, सुराङ्गनाः–देव्यो यैस्तादृशाः, **सुपर्वाणः** सुष्ठु पर्व ग्रन्थिद्वयमध्यभागो येषां तादृशाः, पक्षे देवस्वरूपाश्च, युद्धे स्वमारितानां योधानां देवत्वापादनेन तैः पतिरहितानां देवीनां सन्तोषणोपपत्तेः, पुनः **महाजवा** अतिवेगशालिनः, **वाजिनः** वाजः–पक्षोऽस्ति येषां तादृशाः, पक्षे अश्वस्वरूपाश्च; पुनः **चापलतोषिताः** चापः–धनुरेव लतेति चापलता, तस्याम् उषिताः–कृतनिवासाः, पक्षे चपलस्य भावः–चापलम्, तेन तोषिताः–हर्षिताः, **क्षितिपालदारकाः** क्षितिपालान् संग्रामसमवेतनृपान् दारयन्ति-विदारयन्ति, भिन्दयन्तीति यावत्

स्वेच्छाविहारिणः खेचरा, ऋजुस्वभावा लब्धशुद्धयः, कचिद् वातिका इव सूतमारणोद्यताः, कचिद् राजाध्यक्षा इवाकृष्टसुभटग्रामकङ्कटाः, कचिद् वलयकारा इव कल्पितकरिविषाणाः, कचित् कितवा इव लिखिताष्टापदसारफलकाः, कचित् पतङ्गा इव पक्षपवनान्दोलितदीपिकाखण्डार्चिषोऽभिलषितगजदाना मार्गणतामुन्मिषित-

---

कीदृशास्ते ? विषमाश्वमण्डलभेदिनः–आदित्यमण्डलभेदिनः, अन्यत्र विषमतुरगसंघातदारकास्तथा लब्धमुक्तयः । **दत्तदीर्घनिद्रा महासन्निपाताः** एकत्र महासन्निपाताः–ज्वरविशेषाः, दत्ततन्द्राकाः, अन्यत्र दत्तमरणाः, तथा महत्सु सन्निपातः–निपतनं येषां ते तथोक्ताः । **स्वेच्छाविहारिणः, खेचराः** विद्याधराः, कीदृशास्ते ? स्वेच्छाविहारिणः–आत्मेच्छाविहरणशीलाः, अन्यत्र आकाशगामिनः, स्वेच्छाविहारिणश्च । **ऋजुस्वभावा लब्धशुद्धयः** ऋजुस्वभावाः कीदृशाः ? लब्धशुद्धयः–लब्धनैर्मल्याः, एतेष्वन्तर्भूत इवार्थो द्रष्टव्यः । **सूतमारणोद्यताः** सारथिमारणकृतोद्यमाः, अन्यत्र पारत, मारणोद्यताः । **आकृष्टसुभटग्रामकङ्कटाः** विदारितसुभटसमूहकवचाः, अन्यत्र आकृष्टाः–अपनीताः, सुभटग्रामेभ्यः कङ्कटाः–कण्टका यैस्ते तथोक्ताः, आकृष्टाः–आकर्षिताः, सुभटग्रामेभ्यः कङ्कटाः–कृषिबला यैस्ते तथोक्ता इति वा । **कल्पितकरिविषाणाः** खण्डितगजदन्ताः, अन्यत्र वि······ । **लिखिताष्टापदसारफलकाः** एकत्र लिखितद्युतविशेषशारिगृहकाः, अन्यत्र विदारितसुवर्णमयप्रधानफरकाः । **पतङ्गाः** शलभाः, पक्षाः–पिच्छानि । **अभिलषितगजदाना मार्गणतां** दानं–वितरणं खण्डनं च, मार्गणतां चोद्वहन्तः । **उन्मिषितनीलत्विषो बाणतां** त्विट्–दीप्तिरतिशोभा च,

---

इति क्षितिपालदारकाः, पक्षे क्षितिपालबालकस्वरूपाः; पुनः **विषमाश्वमण्डलभेदिनः** विषमाः–विलक्षणा ये अश्वाः–शत्रुसैन्यघोटकाः, तद्भेदनशीलाः, पक्षे विषमाः–विषमसंख्यकाः, सप्तेति यावत्, अश्वा यस्य स विषमाश्वः–सूर्यः, तन्मण्डलभेदिनः, पुनः **प्राप्तमोक्षाः** प्राप्तः–लब्धः, मोक्षः–धनुःसकाशात् मोचनं यैस्तादृशाः, पक्षे मुक्तिशालिजीवस्वरूपाश्च-अशेषकर्मक्षयानन्तरं मध्यस्थसूर्यमण्डलमुल्लङ्घ्य जीवानां मुक्तिगमनप्रसिद्धेः; पुनः **दत्तदीर्घनिद्राः** दत्ता–प्रापिता, दीर्घनिद्रा-मरणम्, पक्षे विवेकशून्यावस्था यैस्तादृशाः, **महासन्निपाताः** महान्–भयङ्करः, सन्निपातः–सम्यङ् निपातो येषां तादृशाः, पक्षे महान्तः सन्निपाताः–कफादिधातुत्रयवैषम्यरूपत्रिदोषजनितज्वरविशेषाः; पुनः **स्वेच्छाविहारिणः** अप्रतिहतगामिनः पक्षे स्वेच्छया विहरणशीलाः, **खेचराः** आकाशगामिनः, पक्षे विद्याधराः; पुनः **ऋजुस्वभावाः** वक्रतारहितस्वभावाः, पक्षे निष्कपटस्वभावाः, **लब्धशुद्धयः** परिमार्जनतः प्राप्तनैर्मल्याः, पक्षे अन्तर्मालिन्यशून्या भद्रकजनाः; पुनः **कचित्** कस्मिंश्चित् स्थले, **वातिका इव** वातव्याधिग्रस्ता इव, **सूतमारणोद्यताः** सारथिमारणोद्यताः, पक्षे सूतस्य–पारदस्य, मारणे उत्सुकाः; पुनः **कचित्** कस्मिंश्चित् स्थाने, **राजाध्यक्षा इव** राज्ञः, अध्यक्षाः–करग्रहणाद्यधिकारिजना इव, **आकृष्टसुभटग्रामकङ्कटाः** आकृष्टाः–विदारिताः, सुभटग्रामस्य–सुभटसमूहस्य, कङ्कटाः–कवचा यैः, पक्षे आकृष्टाः–आहृताः, सुभटग्रामेभ्यः कङ्कटाः–कवचा यैः, यद्वा आकृष्टाः–करादिग्रहणाय आनीताः, सुभटग्रामेभ्यः कङ्कटाः–कृषीवला यैस्तादृशाः, अथवा आकृष्टाः–अपनीताः, सुभटग्रामेभ्यः कङ्कटाः–कण्टका यैस्ते तथा; पुनः **कचित्** कुत्रचित् स्थले, **वलयकारा इव** वलयं–हस्तिदन्तमयं कङ्कणं कुर्वन्ति रचयन्तीति वलयकाराः, त इव, **कल्पितकरिविषाणाः** कल्पिताः–खण्डिताः, पक्षे वलयाद्याकारमापादिताः–करिणां–हस्तिनाम्, विषाणाः–दन्ता यैस्तादृशाः; पुनः **कचित्** कुत्रापि स्थले, **कितवा इव** द्यूतकारा इव, **लिखिताष्टापदसारफलकाः** लिखिताः–विदारिताः, अष्टापदसारफलकाः–अष्टापदस्य–सुवर्णस्य, साराः–दृढाः, फलकाः–अस्त्राघातनिवारकाः संग्रामसाधनविशेषा यैस्तादृशाः, पक्षे लिखिताः–चित्रिताः, अष्टापदसारफलकाः–द्यूतसाधनशारीपट्टा यैस्तादृशाः; **कचित्** कुत्रचित् स्थाने, **पतङ्गा इव** शलभा इव, **पक्षपवनान्दोलितदीपिकाखण्डार्चिषः** पक्षपवनैः–पिच्छोद्भूतपवनैः, पक्षे पक्षोद्भूतपवनैः, आन्दोलितानि–उद्वेलितानि, दीपिकाखण्डार्चींषि–दीपिकानां खण्डभूता ज्वाला यैस्तादृशाः; पुनः **अभिलषितगजदानाः** अभिलषितम्–इष्टम्, गजानां–हस्तिनाम्, दानं–खण्डनं भेदनमिति यावत्, पक्षेतेषां दानं–स्वसम्प्रदानकवितरणं यैस्तादृशाः; अत एव **मार्गणतां** बाणताम्, पक्षे याचकताम्, **उद्वहन्तः** दधाना इत्यग्रिमक्रियापदेनान्वेति; पुनः **उन्मिषितनीलत्विषः** उन्मिषिताः–उद्भासिताः, नीलाः–नीलवर्णाः, त्विषः–कान्तयो येषां तादृशाः, अत एव **बाणतां**

नीलत्विषो बाणतां द्विधाकृतोद्दण्डपुण्डरीकाः कादम्बाभिधामारवमुखरिताशामुखाः शिलीमुखाभिख्यां मुख्या-मुद्वहन्तः, सायकाः प्रसस्रुः [ड] । अतिसंहततया च तेषामन्तरितचक्षुरिन्द्रियाः पुरोवर्तिनामपि वीराणां रणमतीन्द्रियं नाद्राक्षुरमरपङ्क्तयः, समीपेऽपि त्रिदशतां सुभटजनमुपागतं न स्वयानमारोपयितुमपारयन्नप्सरसः, समासन्नस्यापि न कबन्धस्य स्कन्धरुधिरधारया कपालान्यपूरयन् परेतयुवतयः, निरुद्धचन्द्रालोकबद्धान्धकारेषु च रुधिरनिम्नगातीरेषु प्ररूढतालतरुवनशङ्कया निर्विशङ्कमध्यासितोर्ध्ववेतालमण्डलमध्याभिरमराङ्गनाभिररम्यन्त समरासादिताः पत्तयः [ढ] । मुहूर्ताच्च प्रीतहृदयः स नरपतिकुमारः सेनाधिपतिमवदत्—'वज्रायुध ! तवानेन सकललोकविस्मयकारिणा भुजबलेन धनुरिवावर्जितं मम निसर्गस्तब्धमपि हृदयम्, आशैशवाद-पारपौरुषमदोन्मादपरवशस्य मे शतशः संगरेषु संवृत्तः प्रवेशः, जातश्च सहस्रसंख्यैर्धन्विभिः सह समागमः,

---

बाणतां चोद्वहन्तः। **द्विधाकृतोद्दण्डपुण्डरीकाः कादम्बाभिधां** द्विधाकृतानि-छिन्नानि, उद्गतदण्डानि पुण्डरीकाणि-छत्राणि यैस्ते तथोक्ताः, अन्यत्र छिन्नोद्दण्डपद्माः, कादम्बाः-हंसाश्च । **आरवमुखरिताशामुखाः शिलीमुखाभिख्यां** शब्दशब्दितदिङ्मुखाः, शिलीमुखाभिख्यां, शिलीमुखाः-भ्रमराः [ड] ।

शरताम्, पक्षे नीलझिण्टीनामकबाणवृक्षताम्, उद्वहन्तः, तद्वृक्षाणामपि तादृक्कान्तिकत्वेन साधर्म्यात्; पुनः, **द्विधाकृतोद्दण्ड-पुण्डरीकाः** द्विधाकृतानि-खण्डितानि, उद्दण्डानि-ऊर्ध्वदण्डावलम्बितानि, पुण्डरीकाणि-रिपुभूतनृपच्छत्राणि, पक्षे उद्दण्डानि-ऊर्ध्वनालावलम्बितानि, पुण्डरीकाणि-कमलानि यैस्तादृशाः, अत एव **कादम्बाभिधां** कादम्बेति कलहंससाधारणसंज्ञाम्, उद्वहन्तः, कलहंसानां शराणां च कादम्बसंज्ञकत्वात्; पुनः **आरवमुखरिताशामुखाः** आरवैः-स्वशब्दैः, मुखरितानि-प्रतिनादितानि, आशामुखानि-दिङ्मुखानि यैस्तादृशाः, अत एव **मुख्यां** प्रधानभूताम्, **शिलीमुखाभिख्यां** भ्रमरसाधा-रणशिलीमुखेति संज्ञाम्, उद्वहन्तः, शराणां भ्रमराणां च शिलीमुखेतिसंज्ञकत्वात् [ड] । **च** पुनः, **तेषां** बाणानाम्, **अति-संहततया** अन्योऽन्यमतिमिलिततया, **अन्तरितचक्षुरिन्द्रियाः** अन्तरितं-व्यवहितम्; चक्षुरिन्द्रियं यासां तादृश्यः, **अमरपङ्क्तयः** पङ्क्तिबद्धदेवगणाः, **पुरोवर्त्तिनामपि** अग्रे स्थितानामपि, **वीराणां** सुयोधानाम्, **अतीन्द्रियम्** इन्द्रिया-गोचरम्, **रणं** संग्रामम्, **चक्षुषा** नेत्रेण, **न अद्राक्षुः** द्रष्टुमशक्नुवन् । पुनः **समीपेऽपि** पार्श्वेऽपि, पार्श्वस्थितमपीत्यर्थः, **त्रिदशतां** संग्राममरणजन्यदेवत्वम्, **उपागतं** प्राप्तम्, **सुभटजनं** सुयोधजनम्, **स्वयानं** स्ववाह्यरथम्, **आरोपयितुम्** आरोहयितुम्, **अप्सरसः** स्वर्वेश्याः, **न अपारयन्** अशक्नुवन्, निरन्तरबाणप्रहारजनितान्धकारमयत्वेन पार्श्ववर्तिनोऽपि मृतसुभटा न दृष्टिगोचरीभवितुमशकन्निति भावः । एवं **समासन्नस्यापि** पार्श्वस्थस्यापि, **कबन्धस्य** "मनुष्याणां सहस्रेषु हतेषु हतमूर्धसु । तदावेशात् कबन्धः स्यादेकोऽमूर्धा क्रियान्वितः ॥" इत्यन्यत्रोक्तशिरोरहितसक्रियशरीरस्य, **स्कन्धरुधिर-धारया** स्कन्धरुधिरस्य-स्कन्धस्यन्दितशोणितस्य, धारया-प्रवाहेण, **परेतयुवतयः** पिशाचयुवतयः, **कपालानि** स्वकर्परान्, **न अपूरयन्** न पूरयितुमपारयन् । **च** पुनः, **निरुद्धचन्द्रालोकबद्धान्धकारेषु** निरुद्धः-अनवरतबाणवर्षणावरुद्धः, चन्द्रा-लोकः-चन्द्रप्रकाशो येषु तादृशेषु, अत एव बद्धः-स्थापितः, अन्धकारो येषु, यद्वा निरुद्धेन चन्द्रालोकेन बद्धोऽन्धकारो येषु तादृशेषु, **रुधिरनिम्नगातीरेषु** शोणितनदीतटेषु, **प्ररूढतालतरुवनशङ्कया** प्रवृद्धतालाख्यवृक्षविशेषवनसन्देहेन, **निर्वि-शङ्कं** निश्शङ्कं यथा स्यात् तथा, **अध्यासितोर्ध्ववेतालमण्डलमध्याभिः** अध्यासितम्-अधिष्ठितम्, ऊर्ध्ववेतालानाम्-ऊर्ध्ववर्तिव्यन्तरविशेषाणाम्, मण्डलमध्यं-मण्डलमध्यभागो याभिस्तादृशीभिः, **अमराङ्गनाभिः** देवाङ्गनाभिः, **समरा-सादिताः** समरात्-रणात्, आसादिताः-प्राप्ताः, **पत्तयः** पदातयः, **अरम्यन्त** रम्यन्ते स्म [ढ] । **च** पुनः, **मुहूर्तात्** क्षणात्, **प्रीतहृदयः** प्रसन्नमनाः, स **नरपतिकुमारः** राजकुमारः, **सेनाधिपतिं** सेनानायकं वज्रायुधम्, **अवदत्** उक्तवान्, **वज्रायुध !** हे तत्संज्ञकसेनापते ! **सकललोकविस्मयकारिणा** सकललोकानां-सर्वजनानाम्, विस्मयकारिणा-आश्चर्यजनकेन, अनेन तव **भुजबलेन** बाहुविक्रमेण, **निसर्गस्तब्धमपि** निसर्गेण-स्वभावेन, स्तब्धमपि-निश्चेष्टमपि, मम हृदयं, **धनुरिव** चापदण्ड इव, **आवर्जितं** नमितम्, सचेष्टतामापादितमित्यर्थः । **आ शैशवात्** आबाल्यात्, **अपार-पौरुषमदोन्मादपरवशस्य** अपारम्-अत्यन्तम्, यत् **पौरुषं** पराक्रमः, तज्जन्येन मदेन-अभिमानेन, य उन्मादः-

न तु जनितमेवंविधं केनाप्यपरेण कौतुकम्, अतिवाहितश्च पुरः करकलितकार्मुकेण काल एतावान्, तदेतर्हि कृत्वा मनः सविशेषसावधानं प्रहर सर्वात्मना, विधेहि च स्वशक्त्या महात्मन्! आत्मनो रक्षाम्, एष मुच्यसे भुजबलाभिमानभङ्गादवलम्बितासमक्षमस्य समक्षमस्य सामन्तलोकस्य मर्त्यलोकावाससौख्येनेति व्याहरन्नेव वेगाकृष्टचापयष्टिरुत्पातजलधर इव जलधारासारमन्धकारिताष्टदिगन्तरालसूत्रिताकालप्रदोषम्, अनवरतमुत्पतद्भिर्नभसि भीषणैर्ज्यानिनादैररिशिरोभिश्च व्याहृतविसर्गम्, स्तूयमानमिव सुभटशस्त्रपातरणितेन, प्रणम्यमानमिव भूमिनिक्षिप्तमूर्धभिः कबन्धैः, अर्च्यमानमिव निपतदातपत्रकुसुमैः स्यन्दनैः, क्षिप्यमाणलाजमिव उच्छलत्कुम्भमुक्ताफलाभिः करिघटाभिः, अभिषिच्यमानमिव मुक्तासृग्वृष्टिभिः प्रहारव्रणैः, दीयमानचक्राभिघातमिव विलोलमणिकुण्डलैः क्ष्मापालमुण्डैः, प्रबलपरिवारपरिगतमिव शरच्छेदैः, मूकं

चित्तविभ्रमः, तत्परवशस्य-तदधीनस्य, **मे** मम, **शतशः** शतशतसंख्यकेषु, **संगरेषु** संग्रामेषु, प्रवेशः, **संवृत्तः** निष्पन्नः। **च** पुनः, **सहस्रसंख्यैः** सहस्रात्मकसंख्याविशिष्टैः, **धन्विभिः** धनुर्धारिभिः, सह समागमः, **जातः** अभूत्। **तु** किन्तु, **अपरेण** त्वदन्येन, केनापि, **एवंविधम्** ईदृशम्, कौतुकं न **जनितं** नोत्पादितम्। **च** पुनः, **करकलितकार्मुकेण** करे-हस्ते, कलितं-धृतम्, कार्मुकं-धनुर्येन तादृशेन, मयेति शेषः, **पुरः** पूर्वम्, एतावान्, **कालः** समयः, **अतिवाहितः** व्यतीतः, **तत्** तस्माद्धेतोः, **एतर्हि** अधुना, **मनः** हृदयम्, **सविशेषसावधानं** सविशेषं-सातिशयम्, सावधानम्-अवधानपूर्वकं यथा स्यात् तथा, **सर्वात्मना** सर्वतोभावेन, **प्रहर** मदुपरि प्रहारं कुरु। **च** पुनः, **महात्मन्!** भो महानुभाव!, **स्वशक्त्या** स्वपराक्रमेण, **आत्मनः** स्वस्य, **रक्षां** प्रतीकारम्, **विधेहि** कुरु। **एषः** पुरोवर्ती त्वमिति यावत्, **भुजबलाभिमानस्य** बाहुबलगर्वस्य, **भङ्गात्** नाशात्, **अवलम्बितासमक्षमस्य** अवलम्बिता-आश्रिता, असमा-असाधारणा, क्षमा-सहनशक्तिर्येन तादृशस्यापि, **समक्षमस्य** साधारणसहनशक्तिकस्येति विरोधः, तदुद्धारे तु तादृशस्य अस्य, **सामन्तलोकस्य,** स्वाधिकृतनृपजनस्य, समक्षम्, **मर्त्यलोकावाससौख्येन** मर्त्यभुवननिवाससुखेन, **मुच्यसे** रहितो भवसि, एतत्क्षणमेव म्रियसे इति भावः। **इति व्याहरन्नेव** इत्थं ब्रुवन्नेव, **वेगाकृष्टचापयष्टिः** वेगेन-शीघ्रम्, आकृष्टा चापयष्टिः-धनुर्दण्डो येन तादृशः सन्, पक्षे चापः-इन्द्रधनुः, **उत्पातजलधरः** प्रलयकालिकमेघः, **जलधारासारमिव** वेगविशिष्टवृष्टिमिव, यद्वा जलधाराऽऽसारम्, उत्पातजलधर इव, **असंख्यं** संख्याशून्यम्, **मार्गणव्रातं** बाणगणम्, **असृजत्** अमुञ्चत्। कीदृशम्? **अन्धकारिताष्टदिगन्तरालसूत्रिताकालप्रदोषं**-अन्धकारितेन-अन्धकारव्यापितेन, अष्टानां दिशाम्, अन्तरालेन-मध्येन, सूत्रितः-कल्पितः, अकाले-असमये, प्रदोषः-निशारम्भो येन तादृशम्; पुनः **नभसि** आकाशे, **उत्पतद्भिः** उच्छलद्भिः, **भीषणैः** भयङ्करैः, **ज्यानिनादैः** मौर्वीशब्दैः, **च** पुनः, **अरिशिरोभिः** शत्रुमस्तकैः, **व्याहृतविसर्गं** व्याहृतः-सूचितः, विसर्गः-विमोचनं यस्य तादृशम्; पुनः **सुभटशस्त्रपातरणितेन** सुभटानां-सुवीराणाम्, यानि शस्त्राणि-खड्गादीनि, तत्पातेन-तत्प्रहारेण, यद्रणितं-शब्दः, तेन, **स्तूयमानमिव** क्रियमाणस्तुतिकमिवेत्युत्प्रेक्षा; पुनः **भूमिनिक्षिप्तमूर्धभिः** भूमौ निक्षिप्ताः-प्रक्षिप्ताः, मूर्धानो-मस्तकानि येषां तादृशैः, **कबन्धैः** शिरोरहितशरीरैः, **प्रणम्यमानमिव** क्रियमाणप्रणाममिवेत्युत्प्रेक्षा; पुनः **निपतदातपत्रपकुसुमैः** निपतन्ति-स्खलन्ति, आतपत्राणां-छत्राणाम्, कुसुमानि-पुष्पाणि येभ्यस्तादृशैः, पक्षे निपतन् य आतपस्ततो रक्षणकर्तॄणि कुसुमानि, **स्यन्दनैः** रथैः, **अभ्यर्च्यमानमिव** पूज्यमानमिव; पुनः **उच्छलत्कुम्भमुक्ताफलाभिः** उच्छलन्ति-उद्वेलन्ति, कुम्भमुक्ताफलानि-मस्तकस्थितमुक्तामणयः, पक्षे कुम्भवद् वर्तुलानि मुक्ताफलानि यासां तादृशीभिः, **करिघटाभिः** हस्तिसमूहैः, **क्षिप्यमाणलाजमिव** क्षिप्यमाणाः-प्रक्षिप्यमाणाः, लाजाः-आर्द्रतण्डुला भृष्टधान्यानि वा यस्मिंस्तादृशमिव; पुनः **मुक्तासृग्वृष्टिभिः** मुक्ताः-पातिताः, असृजां-रुधिराणाम्, वृष्टयः-वर्षा यैस्तादृशैः, **प्रहारव्रणैः** प्रहारजन्यक्षतैः, **अभिषिच्यमानमिव** क्रियमाणाभिषेकमिव; पुनः **विलोलमणिकुण्डलैः** विलोलानि-चञ्चलानि, **मणिकुण्डलानि** मणिमयकर्णालङ्करणविशेषा येषु तादृशैः, **क्ष्मापालमुण्डैः** नृपमस्तकैः, **दीयमानचक्राभिघातमिव** दीयमानः-क्रियमाणः, चक्रेण-तदाख्यास्त्रविशेषेण, अभिघातः-आघातो यस्य तादृशमिव; पुनः **शरच्छेदैः** अन्यान्यबाणखण्डैः, **प्रबलपरिवारपरिगतमिव** प्रबलैः-बलवत्तरैः, परिवारैः-

मांसभेदे, मन्दं मेदसि, मुखरमस्थिषु, मन्थरं स्नायुग्रन्थिष्वसंख्यमसृजन्मार्गणव्रातम् [ण] । अतिवेगव्यापृतोऽस्य तत्र क्षणे प्रोत इव तूणीमुखेषु, लिखित इव मौर्व्याम्, उत्कीर्ण इव पुङ्खेषु, अवतंसित इव श्रवणान्ते तुल्यकालमलक्ष्यत वामेतरः पाणिः [त] । अविरलशरासारत्रासिता हंसीव मेघागमे पल्वलमनवलोकिताश्रयविसंस्थुला सैन्यपतिवक्षःस्थलममुञ्चद् राजलक्ष्मीः; उद्भ्रान्तहृदया च क्षणं बाहुशिरसि, क्षणं धनुषि, क्षणं कृपाणधाराम्भसि, क्षणमातपत्रे, क्षणं पालिध्वजेषु, क्षणं चामरेष्वकुरुत स्थितिम् । [थ] । अहं तु तां तस्य विपदमप्रतिविधेयामुपनतामवलोक्य किंकर्तव्यतामूढः स्तम्भित इव मुहूर्तमतिष्ठम्, प्रयत्नवशाच्च प्रत्यानीतधैर्य इतस्ततश्च धावता हृदयेन तस्य प्राणपरिरक्षणोपायान् मृगयमाणः सततमासन्नवर्त्यपि व्याकुलतया मुहूर्तमपसृतं स्मृतेर्झगिति तत्पुरा परमेश्वरेण प्रहितमङ्गुलीयकं बालारुणमस्मरम्, उच्छ्वसितहृदयश्च तदभिनन्द्य बहुप्रकारमादरकृतप्रणामः पाणिना दक्षिणेनोदक्षिपम्, आक्षेपस्खलद्वाणिश्च तत्क्षणमरातिबाणोन्मथितकेतुच्छत्रकार्मुकं

टिप्पनकम्—पालिध्वजाः······ [थ] ।

परिजनैः, परिगतं–व्याप्तमिवेति सर्वत्रोत्प्रेक्षा; पुनः **मांसभेदे** मांसभेदनावसरे, **मूकं** निःशब्दम्; पुनः **मेदसि** वसायां मांसजन्यधातुविशेषे इति यावत्, तद्भेदने इत्यर्थः, **मन्दम्** अतीक्ष्णम्; पुनः **अस्थिषु** अस्थिभेदने, **मुखरं** वाचालम्; पुनः **स्नायुग्रन्थिषु** शारीरिकवायुवाहकनाडीविशेषग्रन्थिभेदने, **मन्थरं** जडम्, शिथिलप्रवृत्तिकमिति यावत् [ण] । **तत्र** तस्मिन्, **क्षणे** मुहूर्ते, **अस्य** नृपकुमारस्य, **अतिवेगव्यापृतः** वेगातिशयेन कृतव्यापारः, **वामेतरः** दक्षिणः, **पाणिः** हस्तः, **तुल्यकालं** समकालमेव, **अलक्ष्यत** लक्षितः । कीदृशः? **तूणीमुखेषु** इषुधिमुखेषु, **प्रोत इव** गुम्फित इव; पुनः **मौर्व्यां** ज्यायाम्, **लिखित इव** चित्रित इव; पुनः **पुङ्खेषु** बाणमूलेषु, **उत्कीर्ण इव** उत्क्षिप्त इव; पुनः **श्रवणान्ते** कर्णान्तभागे, **अवतंसित इव** अलङ्करणतामापादित इवेति सर्वत्रोत्प्रेक्षा [त] । **मेघागमे** वर्षागमे, **अनवलोकिताश्रयविसंस्थुला** अनवलोकितः–अदृष्टः, आश्रयः–स्थानं यया तादृशी, अत एव विसंस्थुला–शिथिला, हंसी, **पल्वलं** क्षुद्रजलाशयमिव, **अविरलशरासारत्रासिता** अविरलेन–निरन्तरेण, शराणां–बाणानाम्, आसारेण–धारापातेन, त्रासिता सती, **राजलक्ष्मीः** राजोपास्यलक्ष्मीनामकदेवी, **सैन्यपतिवक्षःस्थलं** सैन्यपतेः–सेनानायकस्य, वज्रायुधस्य, वक्षःस्थलं–वक्षःप्रदेशम्, **अमुञ्चत्** त्यक्तवती । **च** पुनः, **उद्भ्रान्तहृदया** उद्भ्रान्तम्–उज्झितम्, हृदयं–सेनापतिवक्षो यया तादृशी सती, अत्र **उद्भ्रान्तहृदयेति** पाठे उद्भ्रान्तं–निजाश्रयविश्लेषवशेन, सम्भ्रान्तं–हृदयं यस्यास्तादृशी सतीत्यर्थः, राजलक्ष्मीरिति शेषः । **क्षणं** किञ्चित् कालम्, **बाहुशिरसि** बाहूर्ध्वभागे, पुनः क्षणं **धनुषि** धनुर्दण्डोपरि, पुनः क्षणं **कृपाणधाराम्भसि** खड्गधारात्मकजले, पुनः क्षणम् **आतपत्रे** छत्रोपरि, पुनः **क्षणं** किञ्चित् कालम्, **पालिध्वजेषु** कोणस्थितध्वजेषु, पुनः क्षणं **चामरेषु** राजव्यजनेषु, **स्थितिं** निवासम्, **अकुरुत** कृतवती [थ] । **अहं तु** विजयवेगस्तु, **तस्य** सेनापतेः, **अप्रतिविधेयाम्** अप्रतिकार्याम्, **उपनताम्** उपस्थिताम्, तां **विपदं** विपत्तिम्, **अवलोक्य** दृष्ट्वा, **किंकर्तव्यतामूढः** कर्तव्यविवेकरहितः, **स्तम्भित इव** कृतस्तम्भन इव, **मुहूर्तं** क्षणम्, **अतिष्ठं** स्थितवान् । **च** पुनः, **प्रयत्नवशात्** आयासवशात्, **प्रत्यानीतधैर्यः** प्रत्यानीतं–पुनरावाहितं धैर्यं येन तादृशः सन्, **इतस्ततः** अत्र तत्र, **धावता** भ्रमता, **हृदयेन** मनसा, **तस्य** सेनापतेः, **प्राणपरिरक्षणोपायान्** प्राणपरिरक्षणस्य–जीवनरक्षायाः, **उपायान्** प्रतीकारान्, **मृगयमाणः** अन्विष्यन्, **सततं** सदैव, **आसन्नवर्त्यपि** पार्श्ववर्त्यपि, **व्याकुलतया** व्यग्रतया, **मुहूर्तं** क्षणम्, **स्मृतेः** स्मृतिपथात्, **अपसृतं** भ्रष्टम्, **पुरा** पूर्वम्, **परमेश्वरेण** परमेश्वरतुल्यप्रभावेण भवता, **प्रहितं** प्रेषितं, तत्, **बालारुणं** तन्नामकम्, **अङ्गुलीयकम्** अङ्गुलिभूषणम्, **झटिति** शीघ्रम्, **अस्मरं** स्मृतवान् । **च** पुनः, **उच्छ्वसितहृदयः** उद्गलितहृदयः सन्, तत् अङ्गुलीयकम्, **बहुप्रकारं** बहवः प्रकारा यस्मिंस्तादृशं यथा स्यात् तथा, **अभिनन्द्य** स्तुत्वा, **आदरकृतप्रणामः** आदरेण न तूपेक्षया कृतः प्रणामो नमस्कारो येन तादृशः, **दक्षिणेन** वामेतरेण, **पाणिना** हस्तेन, **उदक्षिपम्** उत्क्षिप्तवान् । **च** पुनः, **आक्षेपस्खलद्वाणिः** आक्षेपेण–रिपुकृतापमानेन, स्खलन्ती–स्खलनमाश्रयन्ती, वाणी–वचनं यस्य तादृशः, **तत्क्षणं** तत्कालम्, **अरातिबाणोन्मथितकेतुच्छत्रकार्मुकम्**

सेनान्यमुच्चैस्तरेण स्वरेणावोचम्—'दण्डाधिप ! कृतं तावदपरायुधपरिग्रहेण, गृहाण बालारुणाभिधानमिदममोघं प्रहरणम्, अनेन परिगृहीतभुजदण्डशक्तिर्विधेहि निरवग्रहप्रसरस्य विद्विषः प्रतापखण्डनम्, अकाण्ड एव निर्व्याजपौरुषतया मा स्म विस्मरः स्वामिकार्यम्' [द]। असौ तु सासूय इव तन्मदीयवचनमवधार्य कृतावधीरणो रणरसोच्छ्वसितगात्रयष्टिराविष्ट इव 'रे रे दुरात्मन् ! दुर्गृहीतधनुर्विद्यामदाध्मात ! द्रविडाधम ! बधान क्षणमात्रमग्रतोऽवस्थानम्, अस्थान एव किं दृप्यसि, पश्य ममापि संप्रति शस्त्रविद्याकौशलम्' इत्युदीर्य निर्यत्पुलकमसिलताग्रहणाय दक्षिणं प्रसारितवान् बाहुम्। अरिवधावेशविस्मृतात्मनश्च तस्योल्लसितकोपसाटोपकम्पिताङ्गुलौ कराग्रभागे गृहीत्वाङ्गुलीमेकां तदहमङ्गुलीयकमतिष्ठिपम्। अधिष्ठितश्च स तदीयच्छायया तत्क्षणमेव दिङ्नागदन्तमुशल इव वज्रप्रतिमया, महाहिभोग इव मणिप्रभया, समुद्रोर्मिरिव वाडवार्चिषा, कामप्यभिरामतामधृष्यतां च पर्यपुष्यत् [ध]॥

टिप्पनकम्—बधान कुरु। अतिष्ठिपं स्थापितवान् [ध]।

अरातीनां–शत्रूणाम्, बाणैः–बाणाघातैः, उन्मथितानि–उच्छिन्नानि, केतुच्छत्रकार्मुकाणि–केतुः–ध्वजः, छत्रम्–आतपत्रम्, कार्मुकं–धनुश्च यस्य तादृशम्, **सेनान्यं** सेनाधिपतिम्, **उच्चैस्तरेण** अतिदीर्घेण, **स्वरेण**–कण्ठध्वनिना, **अवोचम्** उक्तवान्, अहमिति सर्वत्र शेषः। किमित्याह—**दण्डाधिप !** चतुरङ्गसेनापते !, **तावदि**ति वाक्यालङ्कारे, **अपरायुधपरिग्रहेण** अपरस्य–अन्यस्य, आयुधस्य–शस्त्रस्य, परिग्रहेण–ग्रहणेन, **कृतम्** अलम्, तत्परिग्रहो वृथेत्यर्थः। किन्तु **बालारुणाभिधानं** बालारुणनामकम्, **इदं** सन्निकृष्टम्, **अमोघम्** अव्यर्थम्, **प्रहरणम्** अस्त्रम्, **गृहाण** धारय। **अनेन** अङ्गुलीयकप्रहरणेन, **परिगृहीतभुजदण्डशक्तिः** संगृहीतभुजरूपदण्डसामर्थ्यः सन्, **निरवग्रहप्रसरस्य** निष्प्रतिबन्धास्त्रप्रहारस्य, **विद्विषः** शत्रोः, **प्रतापखण्डनं** पराक्रमक्षयम्, **विधेहि** कुरु। **अकाण्ड एव** अनवसर एव, **निर्व्याजपौरुषतया** निष्कपटपराक्रमेण, वास्तविकपराक्रमेणेति यावत्, **स्वामिकार्यं** स्वामिकृतनियोगम्, **मा स्म विस्मरः** न विस्मर्यताम् [द]। **असौ तु** सेनापतिस्तु, **सासूय इव** आविष्कृतदोष इव, **तत्** अनुपदोक्तम्, **मदीयवचनं** मदुक्तकर्तव्यावेदकवाक्यम्, **अनवधार्य** इष्टसाधनत्वेनानिश्चित्य, उपेक्ष्येत्यर्थः, **कृतावधीरणः** कृततिरस्कारः, **रणरसोच्छ्वसितगात्रयष्टिः** रणरसेन–रणानुरागेण, उच्छ्वसिता–उद्वलिता, गात्रयष्टिः–शरीररूपा यष्टिर्यस्य तादृशः, **आविष्ट इव** प्रकुपित इव, भूताविष्ट इव वा, **रे रे दुरात्मन् !** रे रे दुष्टात्मन् ! **दुर्गृहीतधनुर्विद्यामदाध्मात !** दुर्गृहीतायाः–अयथास्थिततया गृहीतायाः, धनुर्विद्यायाः, मदेन–गर्वेण, आध्मात !–व्याप्त ! **द्रविडाधम !** द्रविडदेशीयाधम !, **क्षणमात्रं** मुहूर्तमात्रम्, **अग्रतः** अग्रे, **अवस्थानं** स्थितिम्, **बधान** कुरु। **अस्थान एव** अनवसर एव, **किं** कस्माद्धेतोः, **दृप्यसि** गर्वं करोषि ?, **सम्प्रति** तत्कालम्, **पश्य** अनुभव, **ममापि** मदीयमपि, **शस्त्रविद्याकौशलं** शस्त्रविद्यावैदग्ध्यम्, **इत्युदीर्य** इत्युक्त्वा, **निर्यत्पुलकं** निर्यन्तः–निर्गच्छन्तः, पुलकाः–रोमाञ्चा यस्मिंस्तादृशं यथा स्यात् तथा, **असिलताग्रहणाय** खड्गलताग्रहणाय, **दक्षिणं** वामेतरम्, बाहुं **प्रसारितवान्** व्यापारितवान्। **च** पुनः, **अरिवधावेशविस्मृतात्मनः** अरिवधावेशेन–शत्रुमारणाग्रहेण, विस्मृत आत्मा–स्वरूपं येन तादृशस्य, **तस्य** सेनापतेः, एकाम् **अङ्गुलीं** करशाखाम्, **गृहीत्वा** धृत्वा, **उल्लसितकोपसाटोपकम्पिताङ्गुलौ** उल्लसितेन–उन्नतेन, कोपेन–क्रोधेन, साटोपं–सविस्तारं यथा स्यात् तथा, कम्पिताः–अङ्गुलयो यस्मिंस्तादृशे, **कराग्रभागे** हस्ताग्रभागे, **तत्** बालारुणनामकम्, अङ्गुलीयकम्, अहम्, **अतिष्ठिपं** स्थापितवान्, धारितवानित्यर्थः। **स** सेनापतिः, **तदीयच्छायया** अङ्गुलीयककान्त्या, **अधिष्ठितः** व्याप्तः सन्, **तत्क्षणमेव** तत्कालमेव, **कामपि** अनिर्वचनीयाम्, **अभिरामतां** रमणीयताम्, **अधृष्यताम्** अपराजेयतां च, **पर्यपुष्यत्** परिपुष्टवान्। कया क इव ? **वज्रप्रतिमया** वज्रसादृश्येन वज्रतुल्याकृत्या वा, **वज्रप्रतिभये**ति पाठे तु वज्रतुल्यकान्त्येत्यर्थः, **दिङ्नागदन्तमुशल इव** दिङ्नागानां–दिग्गजानाम्, मुशलाकारदन्त इव, पुनः **मणिप्रभया** मणिकान्त्या, **महाहिभोग इव** महासर्पफणा इव,

अथ तस्य संनिहितदीपिकाखण्डकरदण्डताडिताः कोपेनेव प्रजज्वलुः प्राज्यतेजसो मणयः, प्रचिक्षिपुश्च दिङ्मुखेषु क्षेपीयः कटाक्षानिव दीर्घारुणानंशून् [न]। तैश्च प्रभापीतचन्द्रातपैः समन्ततः परामृष्टमभिनवार्ककिरणस्पृष्टमिव कुमुदकाननं सद्य इव निद्रया प्रत्यपद्यत प्रतिपक्षसैन्यम्, उद्दामदानपङ्कलग्नानीव नोद्धर्तुमङ्कुशानि शेकुरनेकपकपोलकूटेभ्यो निषादिनः, सुराङ्गनादर्शनोपारूढमदेव सद्योऽमुकुलायत दृष्टिः सुभटानाम्, कृतकचग्रहकालदूताकृष्यमाणानीव शनैः शनैरवनेमुः परिशिथिलकन्धरासंधीनि शिरांसि योधानाम्, विघटितमुष्टिबन्धविगलितासयश्च कृपाणिकाग्रहणस्पृहयेव निपेतुर्जघनपार्श्वेषु प्रहारदानाय दूरोत्क्षिप्ता दक्षिणपाणयः पादातस्य, अर्धावकृष्टस्रस्तकार्मुकनिरस्ताश्चार्धपथे एवाधोमुखीबभूवुरप्राप्तशरव्यात्रपयेव सायका धनुष्मताम्, दृष्टसुरवधूविभ्रमाविर्भूतमदनार्तानामिव प्रावर्तन्त जम्भिका मुखेषु रथारोहाणाम्, स्वप्नदृष्टाचिरविमुक्तोद्बाष्पनिजजायाजनितदुःखानामिव प्रसस्रुरायतानि श्वसितान्यश्ववाराणाम्, श्रवणप्रविष्टारातिसिंहनादमुहूर्तविस्फा-

---

पुनः **वाडवार्चिषा** वडवानलज्वालया, **समुद्रोर्मिरिव** समुद्रतरङ्ग इव [ध] ॥ **अथ** अङ्गुलीयकधारणानन्तरम्, **तस्य** अङ्गुलीयकस्य, **प्राज्यतेजसः** प्रचुरतेजसः, मणयः, **प्रजज्वलुः** प्रज्वलन्ति स्म; कीदृशाः केनेव ? **सन्निहितदीपिकाखण्डकरदण्डताडिताः** सन्निहितानां–पार्श्वस्थितानाम्, दीपिकानां–प्रदीपानाम्, यः खण्डः–समूहः, तदीयकरदण्डैः–हस्तदण्डाभेदेनाध्यवसीयमानकिरणदण्डैः, ताडिताः–आहताः, अत एव **कोपेनेव** ताडनजन्यक्रोधेनेवेति प्रज्वलनहेतूत्प्रेक्षा । **च** पुनः, **दिङ्मुखेषु** दिङ्नायिकामुखेषु, नायकविधया कटाक्षानिव, **क्षेपीयः** अतिशीघ्रम्, **दीर्घारुणान्** दीर्घान्–आयतान्, अरुणांश्च, **अंशून्** किरणान्, **प्रचिक्षिपुः** प्रक्षिप्तवन्तः [न] । **च** पुनः, **प्रभापीतचन्द्रातपैः** प्रभया–कान्त्या, पीतः, चन्द्रातपः–चन्द्रिका यैस्तादृशैः, **तैः** मणिकिरणैः, **समन्ततः** सर्वतः, **परामृष्टं** स्पृष्टम्, **प्रतिपक्षसैन्यं** शत्रुसैन्यम्, **अभिनवार्ककिरणस्पृष्टम्** अभिनवस्य–उदयकालिकस्य, अर्कस्य–सूर्यस्य, किरणैः स्पृष्टम्, **कुमुदकाननं** कुमुदवनमिव, **सद्य एव** तत्क्षणमेव, निद्रया **प्रत्यपद्यत** प्राप्यत, अभिभूतमिति यावत् । **निषादिनः** हस्तिपकाः, **उद्दामदानपङ्कलग्नानीव** उद्दामा–उद्गाढो यो दानपङ्कः–मदकर्दमः, तत्र लग्नानीव–मग्नानीव, **अङ्कुशानि** हस्तिनियामकास्त्रविशेषान्, **अनेकपकपोलकुटेभ्यः** अनेकपानां–हस्तिनाम्, कपोलकुटेभ्यः–गण्डमण्डलेभ्यः, **उद्धर्त्तुं** निष्कासयितुम्, न **शेकुः** शक्नुवन्ति स्म । **सुभटानां** सुयोधानाम्, दृष्टिः, **सुराङ्गनादर्शनोपारूढमदेव** सुराङ्गनानां–देवाङ्गनानाम्, दर्शनेन–अवलोकनेन, उपारूढः–उद्भूतः, मदः–व्यामोहो यस्यास्तादृशीव, **सद्यः** तत्क्षणम्, **अमुकुलायत** समकुचत् । **परिशिथिलकन्धरासन्धीनि** परिशिथिलः–अतिशिथिलः, कन्धरासन्धिः–ग्रीवासन्धिर्येषां तादृशानि, **योधानां** सुभटानाम्, **शिरांसि** मस्तकानि, **कृतकचग्रहकालदूताकृष्यमाणानीव** कृतः कचग्रहः–केशाकर्षणं यैस्तादृशैः, कालदूतैः–यमराजदूतैः, आकृष्यमाणानीव–कृताकर्षणानीव, **शनैः शनैः** मन्दं मन्दम्, **अवनेमुः** अवनमन्ति स्म । **च** पुनः, **विघटितमुष्टिबन्धविगलितासयः** विघटितः–विश्लिष्टो यो मुष्टिबन्धः–अङ्गुलिसन्निवेशः, तेन विगलिताः–स्खलिताः, असयः–कृपाणा येभ्यस्तादृशाः, **प्रहारदानाय** प्रहारकरणाय, **दूरोत्क्षिप्ताः** दूरमुत्पातिताः, **पादातस्य** पादगामिसैनिकसमूहस्य, **दक्षिणपाणयः** दक्षिणहस्ताः, **कृपाणिकाग्रहणस्पृहयेव** कर्तरिकाग्रहणकामनयेव, **जघनपार्श्वेषु** कटिपुरोभागनिकटेषु, **निपेतुः** निपतिताः । **च** पुनः, **अर्धावकृष्टस्रस्तकार्मुकनिरस्ताः** प्राग् अर्धम् अवकृष्टानि–आकृष्टानि, पश्चात् स्रस्तानि–स्खलितानि यानि कार्मुकाणि–धनूंषि तेभ्यो निरस्ताः–स्खलिताः, **धनुष्मतां** धनुर्धारिणाम्, **सायकाः** बाणाः, **अप्राप्तशरव्याः** अप्राप्तलक्ष्याः, **अर्धपथ एव** अर्धमार्ग एव, **अधोमुखीबभूवुः** अधोमुखीभूताः । पुनः **दृष्टसुरवधूविभ्रमाविर्भूतमदनार्तानामिव** दृष्टैः–अवलोकितैः, सुरवधूनां–देववधूनाम्, विभ्रमैः–विलासैः, आविर्भूतेन–प्रकटितेन मदनेन–कामेन, आर्तानामिव–पीडितानामिव, **रथारोहाणां** रथारूढसैनिकानाम्, **मुखेषु जम्भिकाः**–मुखविकाशाः, **प्रावर्तन्त** प्रवर्तन्ते स्म । पुनः **स्वप्नदृष्टाचिरविमुक्तोद्बाष्पनिजजायाजनितदुःखानामिव** स्वप्नदृष्टाभिः–स्वप्नावस्थाऽवलोकिताभिः, अचिरविमुक्तोद्बाष्पाभिः–तत्क्षणविगलितोद्गताश्रुभिः, निजजायाभिः–स्ववधूभिः, जनितम्–अनुभावितं दुःखं येषां तादृशानामिव, **अश्ववाराणाम्** अश्वारोहिसैनिकानाम्, **आयतानि** दीर्घाणि, **श्वसितानि** निःश्वासाः, **प्रसस्रुः** प्रसरन्ति स्म । पुनः **श्रवणप्रविष्टारातिसिंहनादमुहूर्तविस्फारितापि** श्रवणयोः–कर्णयोः, प्रविष्टैः, अरातीनां–शत्रूणाम्, सिंहनादैः–सिंहनादसदृशनादैः

रिताप्यघटतामर्षलोहितायमानजडपुटा दृष्टिः सामन्तानाम्, अव्यापृतवामकरतलालीनरश्मिपाशाश्चोर्ध्वीकृतप्राजनावष्टम्भेन विसंस्थुलावयवास्तस्थुः सारथयः [प]। एवं च तेनातर्कितोपनतेनाप्रतिविधेयेन दैवेनेव लुप्तपुरुषकारेण, जरागमेनेव मन्दीकृताखिलेन्द्रियशक्तिना, महापुरुषेणेव गोपायितसमस्तात्मगुणेनाऽनायुःपरिक्षयेण मृत्युनाऽसर्पदंशेन विषवेगेनाऽनभिघातजेन मूर्च्छान्धकारेणाऽदोषक्षोभजन्मना संनिपातेनाऽनुन्मीलिततारकेण तमसा, महानिद्रावेगेन युगपदभिभूयमाने वैरिसैन्ये स वीरवर्गाग्रेसरो राजकुमारो रोषदष्टाधरोष्ठमुज्झितरथपृष्ठमुद्गूर्णकृपाणमभिमुखमतिरंहसा समापतन्तं सेनापतिमवलोक्य तद्वधाय धनुषि निवेशितमसितलोलदीधितिजटालफलधारमरातिरुधिरपानतृष्णया प्रसारितजिह्वासहस्रमिव सद्य एव समहृत संहृतानेकप्रतिपक्षप्राणं बाणम्, उत्सृष्टचापयष्टिश्च तत्क्षणं क्षात्रसमरनीतिप्रियतया पृथक्कृत्य परिवारतः कृपाणमात्मानं च वेगादवतरन्निद्रावेगविगलितपरिस्पन्दः स्यन्दनोत्सङ्गमगमत् [फ]।

मुहूर्तं–किञ्चित्कालम्, विस्फारितापि–विस्तारितापि, **अमर्षलोहितायमानजडपुटा** अमर्षेण–क्रोधेन, लोहितायमानौ–रक्तीभवन्तौ, जडपुटौ–व्यामूढचर्मपुटौ यस्यास्तादृशी, **सामन्तानाम्** अधिकृतनृपाणाम्, दृष्टिः, **अघटत** समकुचत्। **च** पुनः, **अव्यापृतवामकरतलालीनरश्मिपाशाः** अव्यापृताः–व्यापाररहिताः, वामकरतले–वामहस्ततले, आलीनाः–संसक्ताः, रश्मिपाशाः–अश्वादिनियन्त्रकरज्जुपाशा येषां तादृशाः, **विसंस्थुलावयवाः** विह्वलावयवाः, **सारथयः**–अश्वशासकाः, **ऊर्ध्वीकृतप्राजनावष्टम्भेन** ऊर्ध्वीकृतस्य–उन्नमितस्य, प्राजनस्य–अश्वादिप्रेरकदण्डस्य, अवष्टम्भेन–अवलम्बेन, **तस्थुः** तिष्ठन्ति स्म [प]। **च** पुनः, **एवम्** अनेन प्रकारेण, **अतर्कितोपनतेन** अकस्मादापतितेन, **अप्रतिविधेयेन** प्रतीकाररहितेन, अत एव **दैवेनेव** दुर्भाग्येणेव, **लुप्तपुरुषकारेण** लुप्तः–विनष्टः, पुरुषकारः–पराक्रमो येन तादृशेन; पुनः **जरागमेनेव** वार्धक्यागमेनेव, **मन्दीकृताखिलेन्द्रियशक्तिना** मन्दीकृता–शिथिलिता, अखिलेन्द्रियशक्तयः–सर्वेन्द्रियसामर्थ्यानि येन तादृशेन; पुनः **महापुरुषेणेव** महात्मनेव, **गोपायितसमस्तात्मगुणेन** गोपायिताः–तिरोहिताः, पक्षे संयमेन रक्षिताः, समस्ताः, आत्मगुणाः–वीर्यादयो येन तादृशेन; पुनः **अनायुःपरिक्षयेण** आयुःपरिक्षयरहितेन, **मृत्युना** मृत्युरूपेण; पुनः **असर्पदंशेन** सर्पदशनरहितेन, **विषवेगेन** विषज्वालारूपेण; पुनः **अनभिघातजेन** प्रहाराजन्येन, आकस्मिकेनेत्यर्थः, **मूर्च्छान्धकारेण** मूर्च्छारूपान्धकारेण; पुनः **अदोषक्षोभजन्मना** दोषाणां–वैषम्यापन्नवातपित्तादीनाम्, यः क्षोभः–प्रकोपस्तज्जनितेन, **सन्निपातेन** महाज्वरेण; पुनः **अनुन्मीलिततारकेण** अनुन्मीलिताः–अप्रकाशिताः, तारकाः–नक्षत्राणि यस्मिंस्तादृशेन, **तमसा** अन्धकाररूपेणेति रूपकमाला, गम्योत्प्रेक्षा माला वा; **महानिद्रावेगेन** महत्या निद्राया वेगेन–औत्कट्येन; **वैरिसैन्ये** शत्रुसैन्ये, **युगपद्** एकदैव, **अभिभूयमाने** बाध्यमाने सति, **वीरवर्गाग्रेसरः** वीरसमाजाग्रणीः, **स राजकुमारः**, **रोषदष्टाधरोष्ठं** रोषेण–क्रोधेन, दष्टः–व्रणितः, अधरोष्ठः–निम्नोष्ठो येन तादृशम्, पुनः **उज्झितरथपृष्ठम्** उज्झितं–त्यक्तम्, रथस्य, पृष्ठं–पृष्ठभागो येन तादृशम्; पुनः **उद्गूर्णकृपाणम्** उद्गूर्णः–उद्यतः, कृपाणः–खड्गो येन तादृशम्; पुनः **अतिरंहसा** अत्यन्तवेगेन, **अभिमुखं** संमुखम्, **समापतन्तम्** आगच्छन्तम्, **सेनापतिं** निरुक्तसेनानायकम्, **अवलोक्य** दृष्ट्वा, **तद्वधाय** सेनापतिमारणाय, धनुषि, **निवेशितम्** आरोपितम्, **असितलोलदीधितिजटालफलधारम्** असिताभिः–कृष्णाभिः, लोलाभिः–तरलाभिः, दीधितिभिः–किरणैः, जटाला–व्याप्ता, फलधारा–अग्रधारा यस्य तादृशम्; अत एव **अरातिरुधिरपानतृष्णया** अरातीनां–शत्रूणाम्, यानि रुधिराणि–शोणितानि, तत्पानाभिलाषेण, **प्रसारितजिह्वासहस्रमिव** व्याप्तसहस्रसंख्यकजिह्वाकमिवेत्युत्प्रेक्षा; **संहृतानेकप्रतिपक्षप्राणम्** संहृताः–विनाशिताः, अनेकेषां प्रतिपक्षाणां–शत्रूणाम्, प्राणाः–असवो येन तादृशम्; **बाणं** शरम्, **सद्य एव** तत्क्षणमेव, **समहृत** संहृतवान्, प्रहारान्निवारितवानित्यर्थः। **च** पुनः, **उत्सृष्टचापयष्टिः** त्यक्तधनुर्दण्डः सन्, **क्षात्रसमरनीतिप्रियतया** क्षात्री–क्षत्रियसम्बन्धिनी या समरनीतिः–पराजये शस्त्रत्यागरूपा संग्रामनीतिः, तत्प्रियतया, **तत्क्षणं** तत्कालम्, **परिवारतः** खड्गकोशात्, पक्षे परिजनात्, **कृपाणं** खड्गम्, **आत्मानं च** स्वं च, पृथक्कृत्य, **अवतरन्निद्रावेगविगलितपरिस्पन्दः** अवतरन्त्याः–आपतन्त्याः, निद्रायाः, वेगेन–उत्कर्षेण, विगलितः–विनष्टः, परिस्पन्दः–शारीरिकचेष्टा यस्य तादृशः, **स्यन्दनो-**

अत्रान्तरे लब्धरोषनिर्यातनावसराणि 'हत हत, उपसर्पतोपसर्पत, गृह्णीत गृह्णीत' इत्यनवरतकृतकोलाहलानि बद्धवेगद्विरदपृष्ठशारिदोलायमानसकलसायासप्रासपूलानि चलितरथचक्रचीत्कारचकितशाकिनीचक्रवालार्धावलोकितान्युद्गूर्णकृपाणपादातपादपातकम्पितधराण्यधावन्त सर्वतोऽस्मत्सैन्यकानि [ब] ॥

सेनाधिपस्तु तस्य महात्मनस्त्रिभुवनाभिभाविना भुजवीर्येण निर्व्याजमावर्जितमनास्तानि तथाविधप्रकटितसंरम्भाणि सर्वतः प्रधावितान्यवलोक्य संभ्रमोत्क्षिप्तबाहुयुगलो गद्गदिकागृह्यमाणगलनिर्गलदपर्याप्ताक्षरं 'रे रे स देवस्योत्तरकोशलेश्वरस्य पादपङ्कजेभ्यः शपते, योऽस्मै कुप्यति' इति स्वशक्त्या व्याहरन् पुनः पुनरादिष्टसूतसत्वरप्रवर्तितरथ्येन रथेन तं प्रदेशमागच्छत् [भ]। अद्राक्षीच्च तं समासन्नदीपिकालोकप्रकाशितमासक्तसान्द्रसमररेणुधूसराभिरामवपुषम्, औषधीनाथमिव पार्वणमस्तपर्वतप्रस्थे पृथुनि रथपृष्ठे पर्यस्तम्,

---

टिप्पनकम्—रथ्याः–अश्वाः [भ]। तापिच्छं–काकतुण्डिका [म]।

त्सङ्गं रथमध्यम्, **अगमत्** गतवान् [फ] ॥ **अत्रान्तरे** अस्मिन्नवसरे, **अस्मत्सैन्यकानि** अस्मत्सैन्यसमूहाः, **सर्वतः** सर्वदिक्षु, **अधावन्त** धावन्ते स्म; कीदृशानि ? **लब्धरोषनिर्यातनावसराणि** लब्धः–प्राप्तः, रोषेण–क्रोधेन, निर्यातनायाः–शत्रुपीडनायाः, अवसरो यैस्तादृशानि; पुनः **हत हत** मारयत मारयत, **उपसर्पत उपसर्पत** उपगच्छत उपगच्छत, शत्रूनिति शेषः, **गृह्णीत गृह्णीत,** अस्त्राणीति शेषः, **इति** इत्थम्, **अनवरतकृतकोलाहलानि** अनवरतं–निरन्तरम्, कृतः कोलाहलो यैस्तादृशानि; पुनः **बद्धवेगद्विरदपृष्ठशारिदोलायमानसकलसायासप्रासपूलानि** बद्धवेगाः–श्रितत्वराः, ये द्विरदाः–हस्तिनः, तेषां पृष्ठशारिषु–पृष्ठाधिष्ठितपर्याणेषु, दोलायमानानि–सञ्चलन्ति, सकलानां समस्तानाम्, सायानां बाणानाम्, आसानां–विक्षेप्यास्त्रविशेषाणाम्, प्रासानां–कुन्तानाम्, पूलानि–भारा येषु तादृशानि; पुनः **चलितरथचक्रचीत्कारचकितशाकिनीचक्रवालार्धावलोकितानि** चलितानि यानि रथचक्राणि–रथसमूहाः, तेषां चीत्कारेण–ध्वनिविशेषेण, चकितं–विस्मितम्, शाकिनीनां–देवीविशेषाणाम्, यच्चक्रवालं–समूहस्तेन, अर्धम्, अवलोकितानि–दृष्टानि; पुनः **उद्गूर्णकृपाणपादातपादपातकम्पितधराणि** उद्गूर्णाः–उत्थापिताः, कृपाणाः–खड्गा येन तादृशस्य, पादातस्य–पदगामिसैनिकसमूहस्य, पादपातेन–चरणाघातेन, कम्पिता–आन्दोलिता, धरा–पृथ्वी यैस्तादृशानि [ब] ॥

सेनाधिपस्तु सेनानायकस्तु, **पुनः पुनः** वारं वारम्, **आदिष्टसूतसत्वरप्रवर्तितरथ्येन** आदिष्टः–आज्ञप्तो यः, सूतः–सारथिः, तेन सत्वरं–शीघ्रम्, प्रवर्तितौ–प्रेरितौ, रथ्यौ–अश्वौ यस्य तादृशेन रथेन, **तं प्रदेशं** यत्र कुमार आसीदित्यर्थः, **आगच्छत्** आगतवान्। कीदृशः ? **महात्मनः** महिमशालिनः, **तस्य** नृपकुमारस्य, **त्रिभुवनाभिभाविना** जगत्त्रयविजयिना, **भुजवीर्येण** बाहुविक्रमेण, **निर्व्याजं** निष्कपटं यथार्थमिति यावत्, **आवर्जितमनाः** हृतहृदयः; पुनः **तथाविधप्रकटितसंरम्भाणि** तथाविधम्–उक्तप्रकारं यथा स्यात् तथा, प्रकटितः–आविष्कृतः, संरम्भः–वेग उत्साहो वा यैस्तादृशानि, सर्वतः, **प्रधावितानि** अतिसत्वरं गतानि, **तानि** सैनिकानि, **अवलोक्य** दृष्ट्वा, **सम्भ्रमोत्क्षिप्तबाहुयुगलः** वेगोत्थापितभुजयुगलः, किं कुर्वन् ? **गद्गदिकागृह्यमाणगलनिर्गलदपर्याप्ताक्षरं** गद्गदिकया–शोकादिजन्याव्यक्तोच्चारणक्रियया, **गृह्यमाणात्**, गलात्–कण्ठात्, निर्गलन्ति–निस्सरन्ति, अपर्याप्तानि–अपरिपूर्णानि, अक्षराणि यस्मिंस्तादृशं यथा स्यात् तथा, **रे रे** इति सम्भ्रमद्योतकम्, **उत्तरकोशलेश्वरस्य** कोशलराष्ट्रोत्तरविभागेश्वरस्य, **देवस्य** राज्ञः, **पादपङ्कजेभ्यः** चरणकमलेभ्यः, स शपते, यः, **अस्मै** नृपकुमाराय, **कुप्यति** कोपं करोति, इति **स्वशक्त्या** स्वसामर्थ्येन, **व्याहरन्** ब्रुवन् [भ]। **च** पुनः, तं नृपकुमारम्, **अद्राक्षीत्** दृष्टवान्। कीदृशम् ? **समासन्नदीपिकालोकप्रकाशितं** समासन्नैः–सन्निकटैः, दीपिकालोकैः–दीपवाहकजनैः, यद्वा समासन्नायाः–पार्श्ववर्त्तिन्याः, दीपिकायाः, आलोकैः–प्रभाभिः, प्रकाशितम्; पुनः **आसक्तसान्द्रसमररेणुधूसराभिरामवपुषम्** आसक्तैः–संलग्नैः, सान्द्रैः–निबिडैः, समररेणुभिः–संग्रामोद्धूतधूलिभिः, यो धूसरः–किञ्चित्पाण्डुवर्णः, तेन अभिरामम्–मनोहरम्, वपुः–शरीरं यस्य तादृशम्; पुनः **अस्तपर्वतप्रस्थे** अस्तपर्वतस्य अस्ताचलस्य, प्रस्थे–शिखरे, **पार्वणं** पूर्णिमासम्बन्धिनम्, **औषधीनाथमिव** चन्द्रमिव, **पृथुनि** विशाले, **रथपृष्ठे**

आसादितविजयरिपुदर्शनपरिजिहीर्षयेव निमिषितेक्षणारविन्दम्, आजिविपन्नसुभटजीवितसंजिघृक्षायातयमदर्शनागतया यमुनयेवाबद्धविकटतरङ्गया भ्रुकुट्याऽन्धकारितललाटभित्तिम्, उपरि रिपुशिलीमुखासारेणाधस्ताच्च रणरभसरोमाञ्चजालकेन जर्जरितमुल्लसितमिव मूर्च्छान्धकारमुन्निद्रतापिच्छनीलमस्थूलं कालायसकवचमुरःस्थलेनोद्वहन्तम्, उत्सृष्टचापयष्टिना वामेन दक्षिणेन च स्फुरितदीर्घनखकिरणेन तत्क्षणभ्रष्टकरवालान्वेषिणेव पाणिना विराजमानम्, उपान्तकेतुस्तम्भविन्यस्तदेहभारैश्च निद्रादूरभुग्नकण्ठनालैरात्मयोधैः परिवृतं प्रसुप्तसरःकुमुदवनमध्यवर्तिनमिव प्रतिमादिनकरम्, अव्याजशौर्यावर्जितहृदयैश्चागत्यागत्य वीरवृन्दैर्वन्द्यमानबाणव्रणोद्वान्तरुधिरबिन्दुनिकरं कुमारम् [म], उपजातविस्मयश्च निश्चलस्निग्धतारकेण चक्षुषा सुचिरमवलोक्य तदवलोकनप्रीतमनसा समीपवर्तिना सामन्तलोकेन सह बहुप्रकारमारब्धतद्वीर्यगुणस्तुतिस्तस्मिन्नेव प्रदेशे मुहूर्तमात्रमतिष्ठत्। तद्वृत्तान्तश्रवणसकुतूहलश्च निपुणतरमपि व्यापारितया दृष्ट्या यदा प्रतिपक्षपक्षे कमपि पुरुषं

रथपश्चाद्भागे, **पर्यस्तं** लीनम्; पुनः **आसादितविजयरिपुदर्शनपरिजिहीर्षयेव** आसादितः–प्राप्तः, विजयो येन तादृशस्य, रिपोः–स्वशत्रोः, यद् दर्शनम्, तत्परिजिहीर्षयेव–तत्परिहारेच्छयेव, **निमिषितेक्षणारविन्दं** निमीलितनयनारविन्दम्; पुनः **भ्रुकुट्या** नेत्रोपरितनकुटिलरोमराज्या, **अन्धकारितललाटभित्तिम्** अन्धकारिता–अन्धकारव्यापिता, ललाटभित्तिः–ललाटस्थलं यस्य तादृशम्, कीदृश्या? **आजिविपन्नसुभटजीवितसंजिघृक्षायातयमदर्शनागतया** आजौ–संग्रामे, विपन्नाः–मृताः, ये सुभटाः–सुयोधाः, तेषां यानि जीवितानि–प्राणाः, तत्संजिघृक्षया–तत्संहरणेच्छया, आयातस्य–आगतस्य, यमस्य–तदाख्यभ्रातुः, दर्शनाय–अवलोकनाय, आगतया–उपस्थितया, **यमुनयेव** तदाख्यनद्येव, **आबद्धविकटतरङ्गया** आबद्धाः–रचिताः, विकटाः–विशालाः, तरङ्गा यया तादृश्या; पुनः **कालायसकवचं** लौहविशेषमयं कवचम्, **उरःस्थलेन** वक्षःस्थलेन, **उद्वहन्तं** धारयन्तम्, कीदृशं कवचम्? **उपरि** ऊर्ध्वभागे, **रिपुशिलीमुखासारेण** रिपुशिलीमुखानां–स्वशत्रूत्क्षिप्तबाणानाम्, आसारेण–धारापातेन, **च** पुनः, **अधस्तात्** अधोभागे, **रणरभसरोमाञ्चजालकेन** रणरभसेन–संग्रामवेगेन, उद्गतो यो रोमाञ्चः–पुलकः, तज्जालकेन–तत्पुञ्जेन, **जर्जरितं** विह्वलीकृतम्, अत एव **उल्लसितम्** उद्भूतम्, **मूर्च्छान्धकारमिव** मूर्च्छारूपान्धकारमिवेत्युत्प्रेक्षा, पुनः **उन्निद्रतापिच्छनीलम्** उन्निद्रः–उत्फुल्लो यस्तापिच्छः–तमालः, तद्वन्नीलवर्णम्, पुनः **अस्थूलं** लघुम्; पुनः कीदृशं कुमारम्? **उत्सृष्टचापयष्टिना** उत्सृष्टा–त्यक्ता, चापयष्टिः–धनुर्दण्डो येन तादृशेन, **वामेन** दक्षिणेतरेण, **पाणिना** हस्तेन, **च** पुनः, **स्फुरितदीर्घनखकिरणेन** स्फुरिताः–ज्वालिताः, दीर्घाः, नखकिरणाः–नखकान्तयो यस्मिंस्तादृशेन, **तत्क्षणभ्रष्टकरवालान्वेषिणेव** तत्क्षणं–तत्कालम्, भ्रष्टः–स्वसकाशात् पतितो यः, करवालः–खड्गः, तदन्वेषिणेव–तदन्वेषणव्यापृतेनेव, दक्षिणेन, **पाणिना** हस्तेन, **विराजमानं** शोभमानम्; **च** पुनः, **उपान्तकेतुस्तम्भविन्यस्तदेहभारैः** उपान्तेषु–निकटस्थेषु, केतुस्तम्भेषु–ध्वजदण्डेषु, विन्यस्तः–धृतः, देहभारो यैस्तादृशैः, पुनः **निद्रादूरभुग्नकण्ठनालैः** निद्रया दूरभुग्नानि–दूरपर्यन्तकुटिलानि, कण्ठनालानि–कण्ठरूपकमलदण्डा येषां तादृशैः, **आत्मयोधैः** स्वकीयसुभटैः, **परिवृतं** परिवेष्टितम्, अत एव **प्रसुप्तसरःकुमुदवनमध्यवर्तिनं** प्रसुप्तं–संकुचितम्, यत् सरःकुमुदवनं–तडागस्थकुमुदवनम्, तन्मध्यवर्तिनम्, **प्रतिमादिनकरमिव** सूर्यप्रतिबिम्बमिव; **च** पुनः, **अव्याजशौर्यावर्जितहृदयैः** अव्याजेन–वास्तविकेन, शौर्येण, आवर्जितम्–अवनमितं हृदयं येषां तादृशैः, **वीरवृन्दैः** शूरसमूहैः, **आगत्य आगत्य** उपस्थायोपस्थाय, **वन्द्यमानबाणव्रणोद्वान्तरुधिरबिन्दुनिकरं** वन्द्यमानः–स्तूयमानः, बाणव्रणोद्वान्तानां–बाणव्रणनिर्गतानाम्, रुधिरबिन्दूनां–शोणितबिन्दूनाम्, निकरः–समूहो यस्य तादृशम् [म]। **च** पुनः, **उपजातविस्मयः** उत्पन्नाश्चर्यः, **निश्चलस्निग्धतारकेण** निश्चला–निःस्पन्दाः, स्निग्धाः–आर्द्रा च, तारका–कनीनिका यस्य यस्मिन् वा तादृशेन, **चक्षुषा** नेत्रेण, **सुचिरम्** अतिदीर्घकालम्, **अवलोक्य** दृष्ट्वा, **तदवलोकनप्रीतमनसा** तद्दर्शनप्रसन्नहृदयेन, **समीपवर्तिना** पार्श्ववर्तिना, **सामन्तलोकेन** अधिकृतभूपजनेन, सह, **बहुप्रकारम्** अनेकप्रकारं यथा स्यात् तथा, **आरब्धतद्वीर्यगुणस्तुतिः** आरब्धा–प्रारब्धा, तद्वीर्यगुणानां–तत्पराक्रमगुणानाम्, स्तुतिः–प्रशंसा येन तादृशः, **तस्मिन्नेव प्रदेशे** राजकुमारावस्थितिप्रदेशे, **मुहूर्तमात्रं** क्षणमात्रम्, **अतिष्ठत्** स्थितवान्, सेनापतिरिति शेषः। **च** पुनः, **तद्वृत्तान्तश्रवणसकुतूहलः** नृपकुमारवृत्तान्तश्रवणे, सकुतूहलः–सोत्कण्ठः, **निपुणतरमपि**

चैतन्यालिङ्गितं नाद्राक्षीत्, तदाऽस्य चामरग्राहिणीमप्राक्षीत्—'बालिके! कथय कोऽयम्, कस्य वाऽपत्यम्, किमभिधानः, किंनिमित्तमनपेक्षितात्मविनिपातः पतङ्ग इव पावके सहसैवास्मत्सैन्ये प्रविष्टः, किमर्थमसमर्थसहायेनानेन साहसप्रायमिदमतिदुष्करं कर्माध्यवसितम्, कया प्रत्याशया शक्तेनापि शत्रुवधकर्मणि न कृतो दिवस एवाभियोगः, किं फलमभिलष्य निर्व्याजपौरुषेणाप्यङ्गीकृतः क्षुद्रक्षत्रियलोकसूत्रितः सौप्तिकयुद्धमार्गः' [य]। सैवमापृष्टा सेनाधिपेन किमपि ध्यात्वा परामृष्टनयनबाष्पसलिला विलोक्याभिमुखमन्तर्दुःखावेगपिशुनमत्यायतं निःश्वस्य च शनैरवादीत्—'महाभाग! किं कथयामि मन्दभाग्या, कीदृशोऽयमिदानीं कथ्यते, गता खल्वस्तमस्य कथा, कथ्यमानापि कीदृशी भवत्येतदवस्थस्यास्य पूर्वावस्था, तथापि श्रूयताम्—एष खल्वशेषद्वीपावनीपालमौलिमालामलनदुर्ललितपादयुगलस्य युगायतभुजप्राकाररक्षितनिजक्षितेरवधीरितविषधरेन्द्रोग्रवदननिःश्वासविषवेगेनागणितकालकूटज्वालाटोपेनानपेक्षितरामविशिखशिखिशिखाडम्बरेणाविज्ञात-

---

अवधानातिशयपूर्वकमपि यथा स्यात् तथा, **व्यापारितया** प्रेरितया, **दृष्ट्या** चक्षुषा, **यदा** यस्मिन् काले **प्रतिपक्षपक्षे** शत्रुपक्षे, **कमपि** एकमपि, पुरुषं, **चैतन्यालिङ्गितं** चैतन्यवन्तम्, न, **अद्राक्षीत्** दृष्टवान्, तदा **अस्य** राजकुमारस्य, **चामरग्राहिणीं** चामरवाहिनीं दासीम्, **अप्राक्षीत्** पृष्टवान्, किमित्याह-**बालिके!** भो बाले!, **कथय** ब्रूहि, **कोऽयम्** अयं राजकुमारः कः?, **वा** अथवा, कस्य **अपत्यं** पुत्रः?, **किमभिधानः** किन्नामा?, **किंनिमित्तं** कस्माद्धेतोः?, **पावके** अग्नौ, पतङ्ग इव, **अनपेक्षितात्मविनिपातः** अनपेक्षितः-उपेक्षितः, आत्मविनिपातः-स्वविनाशो येन तादृशः, **सहसैव** अविविच्यैव, **अस्मत्सैन्ये** अस्मत्सेनामध्ये, **प्रविष्टः** आपतितः, **किमर्थम्** किमुद्दिश्य, **असमर्थसहायेन** असमर्थः-शक्तिशून्यः, सहायो यस्य तादृशेन, **अनेन** राजकुमारेण, **साहसप्रायम्** अविवेकप्रयुक्तम्, **अतिदुष्करम्** अत्यन्तकठिनम्, इदं, **कर्म** कार्यम्, **अध्यवसितं** कर्तुं विचारितम्?, कया **प्रत्याशया** सम्भावनया, **शत्रुवधकर्मणि** रिपून्मूलनात्मककार्ये, **शक्तेन** समर्थेनापि, **दिवस एव** दिनमध्य एव, **अभियोगः** सङ्घर्षः, न कृतः?, **किं फलं** कं परिणामम्, **अभिलष्य** उद्दिश्य, **निर्व्याजपौरुषेणापि** वास्तविकपराक्रमशालिनापि, अनेनेति शेषः, **क्षुद्रक्षत्रियलोकसूत्रितः** क्षुद्रैः-राजनीतिज्ञानशून्यैः, क्षत्रियलोकैः-क्षत्रियजनैः, सूत्रितः-रचितः, **सौप्तिकयुद्धमार्गः** सुप्तिकालिकस्य-रात्रिकालिकस्य, युद्धस्य, मार्गः-रीतिः, **अङ्गीकृतः** स्वीकृतः? [य]। **एवम्** अनेन प्रकारेण, उक्तप्रकारेणेत्यर्थः, **सेनाधिपेन** सेनापतिना, **आपृष्टा** समन्ताज्जिज्ञासां ज्ञापिता, **सा** चामरग्राहिणी बालिका, **किमपि** किञ्चित्, **ध्यात्वा** विचिन्त्य, **परामृष्टनयनबाष्पसलिला** परामृष्टानि-प्रोञ्छितानि, नयनयोः, बाष्पसलिलानि-अश्रुजलानि यया तादृशी सती, **अभिमुखं** सम्मुखम्, **विलोक्य** निरीक्ष्य, **च** पुनः, **अन्तर्दुःखावेगपिशुनम्** हार्दिकवेदनातिशयसूचकम्, **अत्यायतम्** अतिदीर्घं यथा स्यात् तथा, **निःश्वस्य** निःश्वासं कृत्वा, **शनैः** मन्दम्, **अवादीत्** उक्तवती। किमित्याह-**महाभाग!** हे महोदय!, **मन्दभाग्या** तुच्छभाग्या, अहमिति शेषः, **किं कथयामि** किमुत्तरयामि, अतिदुःखाकुलतया न किमपि वक्तुमर्हामीत्यर्थः। **इदानीम्** अस्मिन् विपदवसरे, **अयं** नृपकुमारः, **कीदृशः** कथम्भूतावस्थः, **कथ्यते** वर्ण्यते, **खलु** निश्चयेन, **अस्य** राजकुमारस्य, **कथा** वार्ता, **अस्तं** विनाशम्, **गता** प्राप्स्यति। **एतदवस्थस्य** एषा-मरणरूपा, अवस्था यस्य तादृशस्य, **अस्य** नृपकुमारस्य, **कथ्यमानापि** वर्ण्यमानापि, **पूर्वावस्था** पुरातनवृत्तम्, **कीदृशी** कथम्भूता, दुःखावहेत्यर्थः, **भवति** सम्पद्यते। **तथापि** तादृश्यपि, **श्रूयतां** श्रवणगोचरीक्रियताम्। **एषः** अयम्, **खलु** निश्चयेन, **सिंहलद्वीपभर्तुः** सिंहलाख्यो यो द्वीपः-जलमध्यवर्तिस्थलप्रदेशः, तद्भर्तुः-तदधिपतेः, **महानरेन्द्रस्य** महानृपतेः, अतिसमृद्धनृपतेरित्यर्थः, **चन्द्रकेतोः** तन्नामकस्य, **आत्मजः** औरसपुत्रः, **समरकेतुः** तत्संज्ञकः, अस्तीति शेषः, **नामेति** वाक्यालङ्कारे। कीदृशस्य? **अशेषद्वीपावनीपालमौलिमालामलनदुर्ललितपादयुगलस्य** अशेषाः-समस्ता ये, द्वीपानां-जलमध्यवर्त्तिस्थलप्रदेशानाम्, अवनीपालाः-नृपाः, तन्मौलिमालानां-तन्मस्तकस्थमालानाम्, तन्मुकुटपङ्क्तीनां वा, मलनेन-सम्पर्केण, दुर्ललितं-सङ्घर्षणदुःखेन, ललितं-सुन्दरम्, पादयुगलं-चरणद्वयं यस्य तादृशस्य; पुनः **युगायतभुजप्राकाररक्षितनिजक्षितेः** युगो नाम वृषस्कन्धारोप्यरथावयवविशेषः, तद्वद् आयतौ-दीर्घौ यौ, भुजौ-बाहू, तद्रूपेण

वाडवदहनदाहवेदनावेगेन जलनिधिनाऽप्यसोढनौतन्त्रपरिवृढप्रयाणसंमर्दस्य **समद**सैन्यकरिविषाणकोणविघटितत्रिकूटकटकभित्तेरवस्कन्दपातभीतेनेव सर्वदा शर्वरीषु विहितप्रचारेण नक्तञ्चरचक्रवर्तिना लङ्केश्वरेणापि सततमभिशङ्कितोत्साहस्य सिंहलद्वीपभर्तुर्महानरेन्द्रस्य **चन्द्रकेतो**रात्मजः सर्वातिशायिना भुजवीर्यविलसितेनास्त्रशिक्षाकौशलेन च विस्मायितसकलपार्थिवः पार्थवत् पृथिव्यामेकधन्वी **समरकेतु**र्नाम [र]। सोऽयं महाबलतया बाल एवाधिगतयौवराज्याभिषेकः सकलसागरान्तरालद्वीपविजिगीषया गतोऽपि दूरमतिसत्वरः पितुराज्ञया राज्ञोऽस्य **कुसुमशेखरस्य** साहायकं कर्तुमासन्नवर्तिभिः कतिपयैरेव नृपतिभिरनुप्रयातः **काञ्चीमनुप्राप्तः**। स्थितश्चात्र पञ्चषाण्यपि दिनानि दूनचेतोवृत्तिः, अद्य तु प्रातरेव हेतुना केनापि विधृतोदारशृङ्गारवेषः परि-

---

प्राकारेण–दुर्गेण, स्वबाहुबलेनेत्यर्थः, रक्षिता–पालिता, निजक्षितिः–स्वभूमिर्येन तादृशस्य; पुनः **जलनिधिनापि** समुद्रेणापि, **असोढनौतन्त्रपरिवृढप्रयाणसम्मर्दस्य** असोढः–अकृतसहनः, नौतन्त्रस्य–नौकासाध्यस्य, परिवृढस्य–प्रधानभूतस्य, प्रयाणस्य–प्रस्थानस्य, सम्मर्दः–आक्रमणं यस्य तादृशस्य, समुद्रयात्रोपकरणसंपद्विशिष्टस्येत्यर्थः; कीदृशेन जलधिना? **अवधीरितविषधरेन्द्रोग्रवदननिःश्वासविषवेगेन** अवधीरितः–तिरस्कृतः, विषधरेन्द्रस्य–महासर्पस्य, स्वाधःस्थितशेषनागस्येत्यर्थः, उग्रो वदननिःश्वासविषवेगः–मुखनिःसृतपवनविषवेगो येन तादृशेनापि, पुनः **अगणितकालकूटज्वालाटोपेन** अगणितः–तुच्छत्वधियोपेक्षितः, कालकूटस्य–"देवासुररणे देवैर्हतस्य पृथुमालिनः। दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः॥ निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्तितः।" इत्यन्यत्रोक्तनिर्याससरूपविषविशेषस्य, ज्वालाटोपः–ज्वालातिशयो येन तादृशेनापि, पुनः **अनपेक्षितरामविशिखशिखिशिखाडम्बरेण** अनपेक्षितः–उपेक्षितः, रामस्य–दाशरथेः, विशिखशिखिनः–बाणरूपाग्नेः, शिखाडम्बरः–ज्वालाविस्तारो येन तादृशेनापि, पुनः **अविज्ञातवाडवदहनदाहवेदनावेगेन** अविज्ञातः–अननुभूतः, **अवज्ञाते**ति पाठे–अवज्ञातः–तिरस्कृतः, वाडवदहनस्य–वाडवाग्नेः, दाहवेदनायाः–तापजन्यदुःखस्य, आवेगः–औत्कट्यं येन तादृशेनापि। पुनः कीदृशस्य चन्द्रकेतोः? **समदसैन्यकरिविषाणकोणविघटितत्रिकूटकटकभित्तेः** समदानां–सगर्वाणाम्, **सैन्यकरिणां**–सेनासमवेतहस्तिनाम्, विषाणकोणैः–दन्ताग्रभागैः, विघटिता–विश्लेषिता, त्रिकूटस्य–लङ्कासन्निहितसुवेलाख्यगिरेः, कटकभित्तिः–नितम्बरूपभित्तिर्येन तादृशस्य; अत एव **लङ्केश्वरेणापि** रावणेनापि, **सततम्** अनवरतम्, **अभिशङ्कितोत्साहस्य** अभिशङ्कितः–आशङ्कितः, उत्साहः–संग्रामोत्साहो यस्य तादृशस्य; कीदृशेन तेन? **अवस्कन्दपातभीतेनेव** अवस्कन्दः–सैन्यसन्निवेशस्थानम्, तस्य–तदुपलक्षितसैन्यस्य यः पातः–तत्कर्तृकमाक्रमणम्, तद्भीतेनेव, **सर्वदा** सर्वस्मिन् दिने, **शर्वरीषु** रात्रिमध्य एव, **विहितप्रचारेण** कृतविहारेण, अत एव **नक्तञ्चरचक्रवर्त्तिना** रात्रिञ्चराधिपेन, राक्षससम्राजेत्यर्थः, स्वाभाविकेऽपि तदीयरात्रिञ्चरत्वे हेतुविधया तद्भयोत्प्रेक्षाऽत्र बोध्या। कीदृशः समरकेतुः? **सर्वातिशायिना** सर्वोत्कृष्टेन, **भुजवीर्यविलसितेन** बाहुविक्रमविलासेन, **च** पुनः, **अस्त्रशिक्षाकौशलेन** अस्त्रविद्यानैपुण्येन, **विस्मायितसकलपार्थिवः** विस्मायिताः–आश्चर्यमनुभाविताः, सकलाः–समस्ताः, पार्थिवाः–राजानो येन तादृशः, पुनः **पार्थवत्** पार्थः–अर्जुनः, तद्वत्, **पृथिव्यां** जगति, **एकधन्वी** अद्वितीयधनुर्धरः [र]। **सः** अनुपदवर्णितविक्रमः, **अयं** पुरो दृश्यमानः कुमारः, **महाबलतया** अतिपराक्रमशालितया; **बाल एव** बाल्यावस्थ एव, **अधिगतयौवराज्याभिषेकः** अधिगतः–प्राप्तः, यौवराज्याय यौवनावस्थोचितराजकार्यकरणाधिकारार्थं, अभिषेकः–विधिना स्नानं येन तादृशः सन्, **सकलसागरान्तरालद्वीपविजिगीषया** सकलाः–समस्ता ये, सागरान्तरालद्वीपाः–समुद्रमध्यस्थस्थलप्रदेशाः, तज्जिगीषया–तज्जयेच्छया, **दूरं** दूरस्थानम्, **गतोऽपि** प्राप्तवानपि, **पितुः** जनकस्य, **आज्ञया** आदेशेन, **अस्य** प्रत्यक्षभूतस्य, **कुसुमशेखरस्य** तत्संज्ञकस्य, **राज्ञः** नृपस्य, **साहायकं** साहाय्यम्, **कर्तुम्** आचरितुम्, **आसन्नवर्तिभिः**, पार्श्ववर्तिभिः, **कतिपयैः** परिमितैः, **नृपतिभिः** राजभिः, **अनुप्रयातः** अनुसृतः, **काञ्चीं** तदाख्यनगरीम्, **अनुप्राप्तः** आगतः। **च** पुनः, **दूनचेतोवृत्तिः** सन्तप्तमनोवृत्तिः; **अत्र** काञ्चीनगर्याम्, **पञ्चषाण्यपि** पञ्च वा षड् वेति पञ्चषाणि, तावन्त्यपि, दिनानि, **स्थितः** स्थितिमकार्षीत्। **अद्य तु** अस्मिन् दिने तु, **प्रातरेव** प्रभातकाल एव, **केनापि** केनचित्, **हेतुना** निमित्तेन, **विधृतोदारशृङ्गारवेषः** विधृतः–परिगृहीतः, उदारः–साटोपः, शृङ्गारवेषः–शृङ्गाररसानुगुणवेषो येन

मितैरेव सह सुहृद्भिर्नरेन्द्रभवनोद्यानभूषणं गतः स्मरायतनम्, आसीनश्च तस्य द्वारदेशे विशन्तमनवरतमन्तरुपरतनिमेषेण चक्षुषा निरीक्षमाणो नगरनारीजनं स्थितो दिनमशेषम् [ल], अवसितायां च यात्रायामधिकतरमारूढगाढारतिः कारयित्वा **मकरकेतोः** पुरः सरोजिनीपत्रशयनम्, 'इहैव मयाद्य शयनीयम्' इत्युदीर्य विसर्जितासन्नपरिजनः केनापि विधिनातिवाह्य प्रदोषमागत्य चार्धरात्रसमये शिबिरमकस्मादेव सज्जीकृतसकलनिजबलः, 'कुमार! नायं क्रमो नयस्य' इति विनिवार्यमाणोऽपि मन्त्रिभिः, 'युवराज! विरम्यतामितो दुरध्यवसायात्' इति निरुध्यमानोऽपि बन्धुभिः, 'कल्याणिन्! अङ्गीक्रियतां यात्रालग्नम्' इति निवर्त्यमानोऽपि मौहूर्तिकैः, 'देव! प्रतिपाल्यतामनुपाति सैन्यम्' इति विज्ञाप्यमानोऽपि प्रधानलोकेन, 'विद्वन्! निवेद्यतां **कुसुमशेखरस्य**' इति वारं वारमभिधीयमानोऽपि विबुधवर्गेण, निर्गतः **काञ्च्याः** । आकृष्यमाणश्च व्यसनैषिणा पुरो विधिना प्रणिधिनेवानाप्तेन प्राप्तो भुवमिमामवस्थां च' [व]। इत्येवमावेदयन्त्यामेव तस्यामुपजातदुःखावेगेव प्रगलिततारका तनिमानमभजत रजनिः, अमरीभूतसुभटनिर्दयाश्लिष्टसुरवधूहारमुक्तमौक्तिक-

---

तादृशः सन्, **परिमितैरेव** परिगणितैरेव, **सुहृद्भिः** मित्रैः सह, **नरेन्द्रभवनोद्यानभूषणं** राजप्रासादनिकटस्थितारामालङ्करणभूतम्, **स्मरायतनं** कामदेवमन्दिरम्, **गतः** प्राप्तः । **च** पुनः, **तस्य** कामदेवमन्दिरस्य, **द्वारदेशे** अन्तःप्रवेशप्रदेशे, **आसीनः** उपविशन्, **उपरतनिमेषेण** निवृत्तस्पन्दनेन, चक्षुषा, **अनवरतं** निरन्तरम्, **अन्तःविशन्तम्** अन्तः प्रवेशं कुर्वन्तम्, **नगरनारीजनं** नागरिकस्त्रीजनम्, **निरीक्षमाणः** अवलोकमानः, **अशेषं** समस्तं, दिनम्, **स्थितः** स्थितिमकार्षीत् [ल]। **यात्रायां** कामदेवमन्दिरयात्रोत्सवे, **अवसितायां** समाप्तायाम्, **अधिकतरम्** अत्यधिकं यथा स्यात् तथा, **आरूढगाढारतिः** आरूढाः–उत्पन्ना, गाढा–सान्द्रा, अरतिः–खेदो यस्य तादृशः, **मकरकेतोः** कामदेवस्य, **पुरः** अग्रे, **सरोजिनीपत्रशयनं** कमलिनीपत्रमयीं शय्याम्, **कारयित्वा** निर्माप्य, **अद्य** अस्मिन् दिने, मया, **इहैव** अस्यामेव शय्यायाम्, **शयनीयं** शयनं कर्त्तव्यम्, **इत्युदीर्य** इत्युक्त्वा, **विसर्जितासन्नपरिजनः** दूरीकृतपार्श्ववर्तिपरिवारः सन्, **केनापि** अनिर्वाच्येन दुःखमयेनेत्यर्थः, **विधिना** प्रकारेण, **प्रदोषं** तद्रात्रिप्रथमभागम्, **अतिवाह्य** व्यतीत्य, **अर्धरात्रसमये** रात्रिमध्यभागे, **शिबिरं** सैन्यसन्निवेशस्थानम्, आगत्य, **अकस्मादेव** अकृतपूर्वविचारमेव, **सज्जीकृतसकलनिजबलः** सज्जीकृतं–सज्जितम्, सकलं–समस्तम्, निजबलं–सैन्यं येन तादृशः, **कुमार!** भो नृपकुमार!, **नयस्य** नीतेः, **अयं** रात्रौ युद्धारम्भरूपः, **क्रमः** विधिः, न, **इति** एवम्, **मन्त्रिभिः** सचिवैः, **विनिवार्यमाणोऽपि** गमनान्निवर्त्यमानोऽपि, पुनः युवराज!, **इतः** अस्मात्, **दुरध्यवसायात्** असमीचीनोद्योगात्, **विरम्यतां** त्वया निवृत्यताम्, **इति** एवम्, **बन्धुभिः** भ्रात्रादिभिः, **निरुध्यमानोऽपि** निवार्यमाणोऽपि, पुनः **कल्याणिन्!** कल्याणशालिन्!, **यात्रालग्नं** युद्धार्थं प्रस्थाने शुभजनको राशीनामुदयः, **अङ्गीक्रियतां** पर्यालोच्यताम्, तत्पर्यालोचनं विना न गम्यतामित्यर्थः, **इति** एवम्, **मौहूर्त्तिकैः** मुहूर्तज्ञैः, **निवर्त्यमानोऽपि** अवरुध्यमानोऽपि, पुनः **देव!** राजन्!, **अनुपाति** स्वानुगामि, **सैन्यं** सेनां, **प्रतिपाल्यतां** प्रतीक्ष्यताम्, **इति** एवम्, **प्रधानलोकेन** प्रधानजनेन, **विज्ञाप्यमानोऽपि** निवेद्यमानोऽपि, पुनः **विद्वन्!** विवेकशालिन्!, **कुसुमशेखरस्य** तत्संज्ञकस्य राज्ञः, **निवेद्यतां** विज्ञाप्यताम्, सर्वमुक्तपूर्वमिति शेषः, **इति** एवम्, **विबुधवर्गेण** विज्ञवर्गेण, **अभिधीयमानोऽपि** उच्यमानोऽपि, **काञ्च्याः** तन्नाम्न्या नगर्याः, **निर्गतः** निष्क्रान्तः । **च** पुनः, **अनाप्तेन** अविश्वस्तेन, **प्रणिधिनेव** चरजनेनेव, **व्यसनैषिणा** दुःखाभिलाषिणा, **विधिना** दैवेन, **पुरः** अग्रे, **आकृष्यमाणः** बलादुपनीयमानः, इमां, **भुवं** भूमिम्, **अवस्थां** दुर्दशां च प्राप्तः [व]। **इति** इत्थम्, **तस्यां** बालिकायाम्, **आवेदयन्त्यामेव** कथयन्त्यामेव सत्याम्, **उपजातदुःखावेगेव** उत्पन्नवेदनातिशयेव, **प्रगलिततारका** नष्टतारका, **रजनिः** प्रकृतरात्रिः, **तनिमानं** कार्श्यम्, शेषावस्थामित्यर्थः **अभजत** प्राप्तवती । पुनः **गगनतलम्** आकाशतलं कर्तृ, **अमरीभूतसुभटनिर्दयाश्लिष्टसुरवधूहारमुक्तमौक्तिकविसरमिव** अमरीभूतैः–युद्धे मृत्वा अमरतामापन्नैः, सुभटैः–सुयोधैः, निर्दयं–गाढं यथा स्यात् तथा, आश्लिष्टानाम्–आलिङ्गितानाम्, सुरवधूनां–देवाङ्गनानाम्, हारेभ्यः–मुक्तामाल्येभ्यः,

विसरमिव तुहिनजलबिन्दुनिकरं ववर्ष गगनतलम्, अरुणालोकतरलितानि वेतालवृन्दानीव तिरोबभूवुस्तिमिराणि, रणभूमिशोणितावलोकनत्रस्त इव पाश्चात्यशैलशिखरे स्खलद्विकलपादः पपात तारापतिः, आसक्तबालारुणप्रभाप्रभावपिहितवीर्यः सिंहलेन्द्रसूनुरिव निमिमील नक्षत्रराशिः, उत्सृष्टतरुकुलायकोटराणि प्रशान्तप्रहारभयानीव विरतयोधशरवृष्टिसावकाशे विहायसि व्यचरन्ननाकुलानि पत्त्ररथकुलानि, अपवर्गचलितवीरवर्गभिन्नसूर्यमण्डलरुधिरप्रवाह इव पूर्वदिग्भागमरुणीचकार सन्ध्यारागः, भयानकाजिभूमिदर्शनोपजातत्रासा इव सुदूरमपसस्रुराशाः, दिङ्मुखस्रस्ततनुतमिस्रविश्रान्तविरलतारका शोकलम्बितालकलग्नबाष्पजललवा द्रविडराजलक्ष्मीव तत्क्षणं रराज रजनिः, व्याजविजितसिंहलेन्द्रसुतपराभवरोषित इव पुरस्तादुल्ललास

टिप्पनकम्—आसक्तबालारुणप्रभाप्रभावपिहितवीर्यः एकत्र बालारुणः-बालादित्यसारथिः, अन्यत्र बालारुणम्-अङ्गुलीयकम् [शा]।

मुक्तं-च्युतम्, मौक्तिकविसरमिव-मुक्तामणिसमूहमिव, **तुहिनजलबिन्दुनिकरं** हिमजलबिन्दुसन्दोहम्, **ववर्ष** वर्षयति स्म, पुनः **वेतालवृन्दानीव** व्यन्तरविशेषसमूहा इव, **अरुणालोकतरलितानि** अरुणस्य-सूर्यसारथेः, आलोकेन-दर्शनेन, तरलितानि-चञ्चलतामापन्नानि, **तिमिराणि** अन्धकाराः, **तिरोबभूव** तिरोभवन्ति स्म। पुनः **रणभूमिशोणितावलोकनत्रस्त इव** रणभूमौ-संग्रामक्षेत्रे, यानि शोणितानि तेषामवलोकनेन-दर्शनेन, त्रस्त इव-भीत इव, **स्खलद्विकलपादः** स्खलन्तः-स्खलनमासादयन्तः, विकलाः-विरलाः, पादाः-किरणा यस्य तादृशः, **तारापतिः** चन्द्रः, **पाश्चात्यशैलशिखरे** पश्चिमपर्वतशृङ्गे, **पपात** पतितः, अस्तं गत इत्यर्थः। पुनः **सिंहलेन्द्रसूनुरिव** सिंहलेन्द्रस्य-सिंहलद्वीपनृपतेश्चन्द्रकेतोः, सूनुः-कुमारः, समरकेतुरिव, **आसक्तबालारुणप्रभाप्रभावपिहितवीर्यः** आसक्ता-सम्पृक्ता, या बालारुणस्य-उदयकालिकसूर्यस्य, पक्षे तत्संज्ञकाङ्गुलीयकस्य, प्रभा-द्युतिः, तस्याः प्रभावेनतेजसा पिहितं, वीर्यं-सामर्थ्यं यस्य तादृशः, **नक्षत्रराशिः** तारागणः, **निमिमिल** सङ्कुचितः, तिरोबभूव इत्यर्थः। पुनः **उत्सृष्टतरुकुलायकोटराणि** उत्सृष्टानि-प्रभातवेलायामुज्झितानि, तरुकुलायकोटराणि-वृक्षसम्बन्धीनि नीडात्मकगह्वराणि यैस्तादृशानि, **पत्त्ररथकुलानि** पक्षिवृन्दानि, **प्रशान्तप्रहारभयानीव** प्रशान्तं-निवृत्तम्, प्रहारेभ्यः-अस्त्राघातेभ्यो भयं येषां तादृशानीव, अत एव **अनाकुलानि** प्रशान्तचित्तानि सन्ति, **विरतयोधशरवृष्टिसावकाशे** विरताभिः-निवृत्ताभिः, योधानां-भटानाम्, शरवृष्टिभिः-शरवर्षाभिः, सावकाशे-अवकाशसहिते, **विहायसि** आकाशे, **व्यचरन्** विचरन्ति स्म। पुनः **अपवर्गचलितवीरवर्गभिन्नसूर्यमण्डलरुधिरप्रवाह इव** अपवर्गचलितेन-युद्धे मृत्वा मोक्षार्थं प्रस्थितेन, वीरवर्गेण-भटगणेन, भिन्नं-कृतभेदनम्, यत् सूर्यमण्डलं-सूर्यबिम्बं तस्य, रुधिरप्रवाह इव-शोणितप्रवाह इव, **सन्ध्यारागः** प्रातःसन्ध्याकालिकाकाशसम्बन्धिरक्तद्युतिः, **पूर्वदिग्भागं** पूर्वदिगंशम्, **अरुणीचकार** रञ्जयामास, पुनः **भयानकाजिभूमिदर्शनोपजातत्रासा इव** भयानिकायाः-भयजनिकायाः, आजिभूमेः-संग्रामभूमेः, दर्शनेन, उपजातः-उत्पन्नः, त्रासः-भयं यासां तादृश्य इव, **आशाः** दिशः, **सुदूरम्** अतिदूरम्, **अपसस्रुः** अपसृताः, रात्रौ निरन्तरान्धकारव्याप्ततया दिशः समीपस्थाः प्रतिभान्ति, दिवा त्वन्धकारसम्बन्धाभावाद् दूरवर्तिन्य इति वस्तुस्थितिः। पुनः **दिङ्मुखस्रस्ततनुतमिस्रविश्रान्तविरलतारका** दिङ्मुखेभ्यः-दिगग्रभागेभ्यः, स्रस्तानि-पतितानि, अपसृतानीति यावत्, तनूनि-कृशानि, यानि तमिस्राणि-अन्धकाराः, तेषु विश्रान्ताः-कृतावस्थानाः, विरलाः-कतिपयाः, सान्तरा इत्यर्थः, तारकाः-नक्षत्राणि यस्यां तादृशी, **रजनिः** रात्रिः, **तत्क्षणं** तत्कालम्, **शोकलम्बितालकलग्नबाष्पजललवा** शोकेन-रिपुकृतपराजयखेदेन, लम्बितेषु-स्रस्तेषु, अलकेषु-केशेषु, लग्नाः-स्थिताः, बाष्पजललवाः-अश्रुजलकणा यस्यास्तादृशी, **द्रविडराजलक्ष्मीरिव** द्रविडस्य-तदाख्यया विख्यातदाक्षिणात्यदेशविशेषस्य, यो राजा तल्लक्ष्मीरिव, **रराज** प्रतिभाति स्म। पुनः **व्याजविजितसिंहलेन्द्रसुतपराभवरोषित इव** व्याजेन-छलेन, विजितस्य-पराजितस्य, सिंहलेन्द्रसुतस्य-सिंहलद्वीपनृपकुमारस्य, पराभवेन-दुःखेन, रोषित इव-क्रोधित इव, **लोहितायमानवपुः** रक्तीभूतशरीरः, **उष्णदीधितिः** सूर्यः, **पुरस्तात्** अग्रे, **उल्ललास** उल्लसति स्म, उदित

लोहितायमानवपुरुष्णदीधितिः [श]। एवं च प्रवृत्ते प्रत्यूषसि विपक्षविजयाभिलाष इव विलीने तमसि, प्रसरति दिगन्तरेषु देवस्य प्रताप इव पातङ्गे महसि सहसैव प्रत्यबोधि सकलमपि तद्विरोधिसैन्यम्। असावपि कुमारः प्रनष्टनिद्राविकारो 'वज्रायुध! मा विषादं व्रज, विश्रब्धमेहि, न तावत् प्रहरामि यावच्च त्वया न प्रहृतम्' इत्यविशदाक्षरं पूर्ववासनावशेन व्याहरन् सुचिरनिद्राविमर्दजडपुटोदरमुदमीलयदीक्षण-युगलम्। अवलोक्य च पुरः परिवेष्टितरथमरातिलोकमात्मानं च तदवस्थमुपजातगुरुविषादो लज्जया पुनर्मोहान्धकारमविक्षत् [ष]।

सेनापतिरपि तेन तस्यातर्कितेनासंभावनीयेनादृष्टपूर्वेण प्रत्युज्जीवनेन जनितविस्मयः प्रहर्षमन्दतार-केणानन्दजलबिन्दुसेकादिव विकसता नयनारविन्दद्वयेनोद्भासमानस्तत्कालमासादितमहालाभमिव प्राप्तसकल-कल्याणमिव समृद्धाखिलकाममिव फलिताशेषगुरुजनाशिषमिव कृतार्थमात्मानं मन्यमानो मुहूर्तं स्थित्वा तस्मिन् क्षणे भयतरलेक्षणस्य विपक्षकक्षीकृतस्वामिदर्शनविषण्णबुद्धेरन्धीभूतसकलदिशः कान्दिशीकस्य शत्रुलोक-

---

टिप्पनकम्—कान्दिशीकः–भयद्रुतः [स]।

इत्यर्थः [श]। **एवं च** अनेन प्रकारेण च, **प्रत्यूषसि** प्रभाते, **प्रवृत्ते** प्रारब्धे, **विपक्षविजयाभिलाष इव** रिपु-पराजयमनोरथ इव, **तमसि** अन्धकारे, **विलीने** नष्टे सति । पुनः **देवस्य** भवतः, **प्रताप इव** प्रभाव इव, **पातङ्गे** पतङ्गः–सूर्यः, तत्सम्बन्धिनि, **महसि** तेजसि, **दिगन्तरेषु** दिङ्मध्येषु, **प्रसरति** विस्तारमासादयति सति, **सहसैव** शीघ्रमेव, **तद्विरोधिसैन्यं** तद्विपक्षसैन्यम्, **प्रत्यबोधि** अजागरीत् । **असौ** प्रकृतः, **कुमारोऽपि** नृपात्मजोऽपि, **प्रनष्टनिद्राविकारः** क्षीणनिद्रादोषः सन्, जागरितः सन्निति यावत्, **वज्रायुध!** तत्संज्ञकसेनापते!, **विषादं** खेदम्, **मा व्रज** न प्राप्नुहि । **विस्रब्धं** सविश्वासं यथा स्यात् तथा, **एहि** आगच्छ । **तावत्** तावत्कालपर्यन्तम्, न **प्रहरामि** बाणप्रहारं करोमि, त्वया, **यावत्** यावत्कालपर्यन्तम्, न **प्रहृतं** प्रहारः कृतः, **इति** इत्थम्, **अविशदाक्षरम्** अवि-शदानि–अव्यक्तानि, अक्षराणि यस्मिंस्तादृशं यथा स्यात् तथा, **पूर्ववासनावशेन** मूर्च्छाप्राक्कालिकसंस्कारवशेन, **व्याहरन्** कथयन्, **सुचिरनिद्राविमर्दजडपुटोदरं** सुचिरनिद्रायाः–चिरकालिकनिद्रायाः, विमर्देन-व्याप्त्या, जडं–निष्पन्दम्, पुटयोः–नेत्रपुटयोः, उदरं–मध्यं यस्य तादृशम्, **ईक्षणयुगलं** नेत्रद्वयम्, **उदमीलयत्** उन्मीलितवान् । **च** पुनः, **पुरः** अग्रे, **परिवेष्टितरथं** परिवेष्टितः–आक्रान्तो रथो येन, पक्षे यस्य तादृशम्, **अरातिलोकं** शत्रुजनम्, **आत्मानं च** स्वं च, **तदवस्थं** शत्रुमध्यपतितम्, **अवलोक्य** दृष्ट्वा, **उपजातगुरुविषादः** उत्पन्नमहाविषादः, **लज्जया** लज्जावशेन, पुनः **मोहान्धकारं** मूर्च्छारूपान्धकारम्, **अविक्षत्** प्रविष्टवान्, प्राप्तवानित्यर्थः [ष] ॥

सेनापतिरपि वज्रायुधोऽपि, **मुहूर्तं** क्षणम्, **स्थित्वा** स्थिरो भूत्वा, **तस्मिन्** दुर्घटनामये, क्षणे, **समन्तात्** सर्वतः, **अभयप्रदानपटहं** शत्रुसैनिकभयाभावद्योतकवाद्यविशेषम्, **शत्रुलोकस्य** शत्रुजनस्य, **आश्वसनार्थम्** आश्वा-सनफलकम्, **अदापयत्** दापितवान्, वादितवानित्यर्थः । कीदृशः ? **तस्य** नृपकुमारस्य, **तेन** अनुपदमुपवर्णितेन, **अतर्कि-तेन** आकस्मिकेन, **असम्भावनीयेन** सम्भावयितुमप्यशक्येन, **अदृष्टपूर्वेण** पूर्वं कच्चिददृष्टेन, **प्रत्युज्जीवनेन** पुनरु-ज्जीवनेन, **जनितविस्मयः** उत्पन्नाश्चर्यः; पुनः **प्रहर्षमन्दतारकेण** प्रहर्षेण–अतिहर्षेण, मन्दे तारके–कनीनिके यस्मिंस्तादृशेन, तथा **आनन्दजलबिन्दुसेकादिव** आनन्दजलबिन्दुभिः सेचनादिव, **विकसता** विकासमासादयता, **नयनारविन्दद्वयेन** नयनरूपकमलद्वयेन, **उद्भासमानः** प्रकाशमानः; पुनः **तत्कालं** तत्क्षणम्, **आसादितमहालाभमिव** प्राप्तमहालाभमिव, पुनः **प्राप्तसकलकल्याणमिव** आसादिताशेषशुभमिव, पुनः **समृद्धाखिलकाममिव** सम्पन्नसमस्ताभिलाषमिव, पुनः **फलिताशेषगुरुजनाशिषमिव** फलिताः–सफलतां गताः, अशेषाः–समस्ताः, गुरुजनानां–श्रेष्ठलोकानाम्, **आशिषः** शुभकामना यस्मिंस्तादृशमिव, **आत्मानं** स्वं, **कृतार्थं** सिद्धार्थं मन्यमानः । कीदृशस्य शत्रुलोकस्य ? **भयतरलेक्षणस्य** भयचञ्चलनेत्रस्य; पुनः **विपक्षकक्षीकृतस्वामिदर्शनविषण्णबुद्धेः** विपक्षेन–हरिवाहनसैन्यजनेन, कक्षीकृतस्य–बद्धस्य, स्वामिनो दर्शनेन विषण्णा–विषादग्रस्ता बुद्धिर्यस्य तादृशस्य; पुनः **अन्धीभूतसकलदिशः** अन्धीभूताः–अन्धकारव्याप्ताः,

स्याश्वासनार्थं समन्तादभयप्रदानपटहमदापयत् [स]। तदीयसारग्रहणोद्यतं चात्मसैनिकलोकं न्यवारयत्। आसन्नसरिति निर्वर्तितस्नानक्रियश्च दत्त्वा संगरसमाप्तप्राणेभ्यो बान्धवेभ्यः प्रणयिभ्यश्च शोकदीर्घश्वासतरलिततिलोदकं निवापाञ्जलिम्, आदिश्य चायुधप्रहारक्षतमर्मणामरातियोधानामौषधकर्मण्याप्तजनम्, अधिरुह्य च ससंभ्रमाधोरणोपनीतं प्रधानजयवारणम्, आरोप्य पुरः प्रत्यग्रयशःसुधाधवलवपुषमभ्युदयमङ्गलकलशमिव सिंहलाधिपसुतम्, आरब्धयुद्धकथालापवाचालेन प्रणयिना राजपुत्रलोकेनानुगम्यमानः शनैः शनैः शिबिरमागमत् [ह]। क्रमेण चासाद्य निजभवनमुपपादितसमस्ततत्कालोचितकरणीयो निर्वर्तितप्रत्यवसानादिकर्मणः समरकेतोरभ्यन्तर एव स्थितिमकल्पयत्। अधिशयिततल्पस्य च परिचारक इव स्वयं व्रणपट्टबन्धनादिक्रियामन्वतिष्ठत्। आप्तचिकित्सितप्रारब्धोपचारं च तमनतिचिरेणैव प्रगुणीभूतवपुषं प्रशस्तेऽहनि स्नातमुपनिमन्त्र्य सादरममात्यैर्बन्धुभिः सुहृद्भिरपरैश्च प्रधानपुरुषैः सहितमात्मगृहमानयत् [क्ष]। कृतभोजनोपचारं च तं

सकला दिशो यस्य तादृशस्य; पुनः **कान्दिशीकस्य** कां दिशं गच्छामीत्याहेति कान्दिशीकस्तस्य, भयपलायितस्येत्यर्थः [स]। **च** पुनः, **तदीयसारग्रहणोद्यतं** तदीयानां-तत्सम्बन्धिनाम्, साराणां-प्रधानवस्तूनाम्, ग्रहणाय, उद्यतम्-उत्सुकम्, **आत्मसैनिकलोकं** स्वसैनिकजनम्, **न्यवारयत्** तद्ग्रहणान्निवारितवान्। **च** पुनः, **आसन्नसरिति** निकटनद्याम्, **निर्वर्तितस्नानक्रियः** सम्पादितस्नानात्मकक्रियः, **संगरसमाप्तप्राणेभ्यः** संगरे-संग्रामे, समाप्ताः-नष्टाः, प्राणा येषां तादृशेभ्यः, **बान्धवेभ्यः** बन्धुजनेभ्यः, **च** पुनः, **प्रणयिभ्यः** प्रियजनेभ्यः, **शोकदीर्घश्वासतरलिततिलोदकं** शोकेन-विश्लेषदुःखेन, दीर्घो यः श्वासः-मुखनासावायुः, तेन तरलितं-चञ्चलितम्, तिलोदकं-तिलमिश्रितजलं यत्र तादृशम्, **निवापाञ्जलिं** मृतोद्देशेन निर्मिताञ्जलिम्, दत्त्वा। **च** पुनः, **आयुधप्रहारक्षतमर्मणाम्** आयुधप्रहारेण-बाणाघातेन, क्षतानि-व्रणितानि, मर्माणि-मर्मस्थलानि येषां तादृशानाम्, **अरातियोधानां** शत्रुभटानाम्, **औषधकर्मणि** चिकित्साकार्ये, **आप्तजनं** विश्वस्तजनं शिष्टजनं वा, **आदिश्य** नियुज्य। **च** पुनः, **ससम्भ्रमाधोरणोपनीतं** ससम्भ्रमेण-सत्वरेण, **आधोरणेन** हस्तिपकेन, उपनीतम्-उपस्थापितम्, **प्रधानजयवारणं** प्रधानभूतं जयोपकरणहस्तिनं जयोत्तरमारोहणीयगजं वा, आरुह्य। **च** पुनः, **अभ्युदयमङ्गलकलशमिव** अभ्युदयाय-उन्नतये, यो मङ्गलकलशः-मङ्गलार्थघटः, तमिव-तं यथा पुरः स्थापयति तथेत्यर्थः, **प्रत्यग्रयशःसुधाधवलवपुषं** प्रत्यग्रम्-अभिनवं यद् यशः, तद्रूपाभिः-सुधाभिः-अमृतैः, धवलं-स्वच्छम्, वपुः-शरीरं यस्य तादृशम्, **सिंहलाधिपसुतं** सिंहलद्वीपनृपकुमारम्, **पुरः** अग्रे, **आरोप्य** स्थापयित्वा, उपवेश्येत्यर्थः। **आरब्धयुद्धकथालापवाचालेन** आरब्धा-प्रारब्धा, या युद्धकथा-युद्धवार्ता, तदालापवाचालेन-तदाभाषणमुखरेण, **प्रणयिना** स्नेहास्पदेन, **राजपुत्रलोकेन** राजकुमारजनेन, **अनुगम्यमानः** अनुस्रियमाणः, **शनैः शनैः** मन्दं मन्दम्, **शिबिरं** सैन्यसन्निवेशस्थानम्, **आगमत्** आगतवान्। [ह]। **च** पुनः, **क्रमेण** क्रमिकगत्या, **निजभवनं** स्वप्रासादम्, **आसाद्य** प्राप्य, **उपपादितसमस्ततत्कालोचितकरणीयः** उपपादितानि-सम्पादितानि, समस्तानि-सर्वाणि, तत्कालोचितानि-तत्कालयोग्यानि, करणीयानि-कर्तव्यानि येन तादृशः सन्, **निर्वर्तितप्रत्यवसानादिकर्मणः** कृतभोजनादिकार्यस्य, **समरकेतोः** तत्संज्ञकस्य नृपकुमारस्य, **अभ्यन्तर एव** पार्श्व एव, **स्थितिम्** अवस्थानम्, **अकल्पयत्** अकरोत्। **च** पुनः, **अधिशयिततल्पस्य** अधिशयितं-शयनार्थमधिष्ठितम्, तल्पं-शय्या येन तादृशस्य, **तस्य** नृपकुमारस्य, **स्वयं** स्वयमेव, **परिचारक इव** सेवक इव, **व्रणपट्टबन्धनादिक्रियां** व्रणानाम्-अस्त्राघातकृतशरीरक्षतानाम्, पट्टबन्धनादिक्रियां-वस्त्रविशेषवेष्टनादिकार्यम्, **अन्वतिष्ठत्** अनुष्ठितवान्। **च** पुनः, **आप्तचिकित्सितप्रारब्धोपचारम्** आप्तेन-विश्वस्तेन शिष्टेन वा, यत् चिकित्सितं-चिकित्सनम्, तेन प्रारब्धः, उपचारः-परिचर्या यस्य तादृशम्, अत एव **अनतिचिरेणैव** अतिशीघ्रमेव, **प्रगुणीभूतवपुषं** प्रबलीभूतशरीरम्, **प्रशस्ते** शुभावहे, **अहनि** दिने, **स्नातं** कृतस्नानम्, **तं** नृपकुमारम्, **उपनिमन्त्र्य** ससन्मानमाहूय, **आमात्यैः** मन्त्रिभिः, **बन्धुभिः** भ्रात्रादिभिः, **सुहृद्भिः** मित्रैः, **अपरैः** अन्यैश्च, **प्रधानपुरुषैः** प्रधानजनैः, सहितम्, **सादरम्** आदरपूर्वकम्, **आत्मगृहं** स्वगृहम्, **आनयत्** आनीतवान् [क्ष]। **च** पुनः, **कृतभोजनोपचारं** कृतः, भोजनरूप उपचारः-सेवा यस्य तादृशम्, **तं** नृपकुमारम्, **वितीर्ण-**

वितीर्णकुसुमविलेपनवसनालङ्कारमुपनीतविविधवस्त्रवाहनं प्रत्यर्पिताहवगृहीतनिःशेषकरितुरङ्गस्यन्दनं च विधाय विनोद्य च मुहूर्तमरतिच्छेदकारिभिः कथालापैरभिमुखो भूत्वा कृताञ्जलिरवादीत्—'कुमार ! सकलजगदेकवीरस्य करदीकृताशेषसागरान्तरद्वीपभूपतेर्विपक्षव्यसनसङ्कटगतैर्महद्भिरपि भूमिपालैरपेक्षणीयसाहाय्यकस्य चतुरुदधिविख्यातपार्थिवप्रथमसूनोः कथञ्चिद् विधिवशाद् गृहायातस्य परेण परिकल्पितालपवृत्तिरस्मद्विधो जनः किं ते प्रियं करोतु, केन वा कृतेनोपचारेण प्रीतिमधिगच्छतु । तथापि यद्यनुग्रहबुद्धिरस्मासु तदेतदङ्गीकुरु सततमादेशकारिणा समीपदेशस्थितेन मया प्रतिपन्नसकलपृथ्वीव्यापारभरनिराकुलो मदीयमाधिपत्यपदम्, अथ तुच्छमिति मन्दाभिलाषस्तदा स परिजन इतो गत्वा तदेव पित्रा प्रतिपादितमतिप्राज्यवैभवमध्यास्स्व निजमेव यौवराज्यम्, मा च मन्येथा यथाहमेतेन निर्जित्य विहितानुग्रहः कथमिदं करोमि, कोऽहं तव पराजये, धृताधिज्यधन्वानमन्योऽपि किमस्ति जगति यस्त्वां समरकर्मणा करोति विमुखम् । यत्तु मुख्यै-

---

कुसुमविलेपनवसनालङ्कारं वितीर्णानि—समर्पितानि, कुसुमानि—पुष्पाणि, विलेपनानि—चन्दनादिद्रव्याणि, वसनानि—वस्त्राणि, अलङ्काराः—आभूषणानि च यस्मै तादृशम्, पुनः **उपनीतविविधवस्त्रवाहनम्** उपनीतानि—उपस्थापितानि-दत्तानीत्यर्थः, विविधानि—अनेकप्रकाराणि, वस्त्राणि वाहनानि च यस्मै तादृशम्, पुनः **प्रत्यर्पिताहवगृहीतनिःशेषकरितुरङ्गस्यन्दनं** प्रत्यर्पिताः—प्रत्यावर्तिताः, आहवे—रणे, गृहीताः आयत्तीकृताः, करिणः—हस्तिनः, तुरङ्गाः—अश्वाः, स्यन्दनाः—रथा यस्मै तादृशम्, **विधाय** कृत्वा, **च** पुनः, **मुहूर्तं** क्षणम्, **अरतिच्छेदकरिभिः** पराजयग्लानिविनाशिभिः, **कथालापैः** वार्तालापैः, **विनोद्य** विनोदमनुभाव्य, **अभिमुखः** सम्मुखो भूत्वा, **कृताञ्जलिः** रचिताञ्जलिः, **अवादीत्** उक्तवान्; सर्वत्र सेनापतिरिति शेषः । किमित्याह—**कुमार !** समरकेतो !, **परेण** अन्येन, **परिकल्पिताल्पवृत्तिः** परिकल्पिता—सम्पादिता, अल्पा—परिमिता, वृत्तिः—जीविका यस्य तादृशः, **अस्मद्विधः** अस्मादृशो जनः, **ते** तव, **किं प्रियम्** अभीष्टम्, **करोतु** सम्पादयतु, न किमपि कर्त्तुमर्हतीत्यर्थः । कीदृशस्य ते? **सकलजगदेकवीरस्य** सकले—समस्ते, जगति एकवीरस्य—अद्वितीयवीरस्य; पुनः **करदीकृताशेषसागरान्तरद्वीपभूपतेः** करदीकृताः—करदायकत्वमापादिताः, अधिकृता इति यावत्, अशेषाः—समग्राः, सागरान्तरद्वीपानां—समुद्रमध्यवर्तिद्वीपानाम्, भूपतयः—नृपतयो येन तादृशस्य; पुनः **विपक्षव्यसनसङ्कटगतैः** विपक्षव्यसनैः—शत्रुकृतदुःखैः, यत् सङ्कटं—दुःखस्थितिः, तद्गतैः—तत्प्राप्तैः, **महद्भिरपि** श्रेष्ठैरपि समृद्धैरपीत्यर्थः, **भूमिपालैः** नृपैः, **अपेक्षणीयसाहाय्यकस्य** अपेक्षणीयम्-आश्रयणीयम्, साहाय्यम्—उपकारो यस्य तादृशस्य; पुनः **चतुरुदधिविख्यातपार्थिवप्रथमसूनोः** चतुर्णाम् उदधीनां—समुद्राणां समाहारः चतुरुदधि, तत्र—तत्परिच्छिन्नभूमण्डल इत्यर्थः, विख्यातः—प्रसिद्धो यः पार्थिवः—चन्द्रकेतुः, तस्य प्रथमसूनोः—ज्येष्ठपुत्रस्य; पुनः **विधिवशाद्** दैवयोगात्, **कथञ्चित्** केनापि प्रकारेण, महता कष्टेनेत्यर्थः, **गृहायातस्य** मद्गृहातिथितामापन्नस्य । **वा** अथवा, **कृतेन** विहितेन, केन **उपचारेण** सेवया, **प्रीतिं** प्रसादम्, **अधिगच्छतु** प्राप्नोतु । **तथापि** भवत्प्रियकरणासम्भवेऽपि, **अस्मासु** अस्मद्विषये, यदि **अनुग्रहबुद्धिः** दयादृष्टिः, अस्तीति शेषः, **तत्** तर्हि, **सततं** सर्वदा, **आदेशकारिणा** आज्ञाकारिणा, **समीपदेशस्थितेन** पार्श्वस्थितेन, **मया** वज्रायुधेन, **प्रतिपन्नसकलपृथ्वीव्यापारभरनिराकुलः** प्रतिपन्नः—स्वीकृतो यः, सकलायाः—समग्रायाः, पृथ्व्याः, व्यापारभरः—शासनकार्यजातम्, तेन निराकुलः—स्वस्थः सन्, **एतत्** इदम्, **मदीयं** मत्सम्बन्धि, **आधिपत्यपदं** चतुरङ्गसेनाध्यक्षपदम्, **अङ्गीकुरु** स्वीकुरु । **अथ** यदि, **तुच्छं** तत् पदं न्यूनमिति हेतोः, **मन्दाभिलाषः** मन्दः—शिथिलः, अभिलाषः-तत्कामना यस्य तादृशः, त्वमसीति शेषः, **तदा** तर्हि, **सपरिजनः** सपरिवारः, **इतः** अस्मात् स्थानात्, गत्वा, **पित्रा** चन्द्रकेतुना, **प्रतिपादितं** दत्तम्, **अतिप्राज्यवैभवम्** अतिप्राज्यम्—अत्यधिकम्, वैभवं—धनसम्पत्तिर्यस्मिंस्तादृशम्, **निजं** स्वकीयम्, **यौवराज्यमेव** युवराजत्वपदमेव, **अध्यास्स्व** अधितिष्ठ । **च** पुनः, **मा मन्यथा** न मन्यस्व, **यथा** यत्, **एतेन** अनेन, **निर्जित्य** पराजित्य, **विहितानुग्रहः** कृतानुग्रहः, अहं **कथं** केन प्रकारेण, **इदं** यौवराज्यकार्यम्, **करोमि** सम्पादयामि । **तव** रणवीरस्य, **पराजये** पराजयकार्ये, **अहं कः** अकिञ्चित्करत्वान्न कोऽपीत्यर्थः । **जगति** लोके, **अन्योऽपि** मदन्योऽपि,

नृपतिभिः समं समकालमेव नीत्वा वश्यतामिहानीतोऽसि, स तु प्रभावोऽन्यस्य कस्यचित्, अथवा किमनेन दूरस्थोऽपि दृष्टमात्रेण येन प्रनष्टसकलचेष्टस्तदा समिति संजातोऽसि तदेव ते प्रकटमुपदर्शयामि' इत्युदीर्य तत्कालमादिष्टनिकटराजलोकढौकितमनेकमहाप्रभावमाणिक्यखचितमुद्रमङ्गुलीयकरत्नमग्रतो दर्शयन् 'कुतः प्राप्तमेतत्' इति पृष्टश्च देवस्य शक्रावतारगमनात् प्रभृति पूर्ववृत्तं **ज्वलनप्रभदेव**वृत्तान्तमखिलमपि राजलक्ष्मीस्वस्थानगमनपर्यवसानं यथाश्रुतमकथयत् [ज्ञ]।

सोऽपि तच्छ्रुत्वा किंचिदुपशान्तचिन्तासंज्वरः शत्रुभुजबलोत्कर्षसंभावनाकृतामवज्ञाबुद्धिमात्मनि श्लथामकरोत्। अब्रवीच्च—'दण्डाधिप! बाढमावर्जितोऽहममुना दूरविनिवारिताहङ्कारप्रवेशपेशलेन त्वदीयसौजन्येन। सदृशनिन्दाप्रशंसो मुनिरपि क ईदृशमात्मगुणापलापबद्धकक्षमरातिपक्षोत्कर्षवर्णनामुखरमखिलराजलोकसमक्षमुल्लपति, यादृक् त्वया सकलदिगन्तविश्रुतपराक्रमेण दक्षिणापथचक्रवर्तिना गदितम्। न केवलमव्याहतप्रसरया बाणसंहत्या महत्तयापि ते तिरस्कृतं भुवनमेतत्। कथमिव न प्रशस्यते स राजा **देवराज**-

---

अस्ति किम्? नास्ति कोऽपीत्यर्थः, यः **समरकर्मणा** संग्रामक्रियया, **धृताधिज्यधन्वानं** धृताकृष्टधन्वानम्, **त्वां विमुखं** परावृत्तम्, **करोति** कुर्यात्। **यत् तु** यत् पुनः, **मुख्यैः** प्रधानैः, **नृपतिभिः** राजभिः, **समं** सह, **समकालमेव** एककालमेव, **इह** अत्र, **वश्यतां** पराधीनताम्, **आनीतोऽसि** प्रापितोऽसि, स तु **अन्यस्य** मदतिरिक्तस्य, **कस्यचित्** वस्तुनः, **प्रभावः** महिमा। अथवा **अनेन** केवलतत्प्रभावप्रतिपादनेन, **किम्** अलम्, **दूरस्थोऽपि** दूरे विद्यमानोऽपि, **त्वमिति** शेषः, **दृष्टमात्रेण** केवलमवलोकनेन, **येन** वस्तुना, **तदा** तस्मिन् काले, **समिति** युद्धे, **प्रनष्टसकलचेष्टः** विलीनाखिलचेष्टाशक्तिकः, मूर्च्छित इत्यर्थः, **सञ्जातोऽसि** संवृत्तोऽसि, **तदेव** वस्तु, **ते** तुभ्यम्, **प्रकटं** स्फुटम्, **उपदर्शयामि** दृष्टिगोचरतामापादयामि। **इत्युदीर्य** इत्युक्त्वा, **तत्कालं** तत्क्षणम्, **आदिष्टनिकटराजलोकढौकितम्** आदिष्टेन-आज्ञप्तेन, निकटराजलोकेन-पार्श्ववर्तिनृपजनेन, ढौकितम्-आनीतम्, **अनेकमहाप्रभावमाणिक्यखचितमुद्रम्** अनेकानि यानि महाप्रभावाणि-परमप्रभावशालीनि, माणिक्यानि-रत्नविशेषाः, तैः खचिता-व्याप्ता, मुद्रा-आकृतिविशेषो यस्य तादृशम्, **अङ्गुलीयकरत्नम्** अङ्गुल्यलङ्करणरत्नम्, **अग्रतः** अग्रे, **अदर्शयत्** दर्शितवान्। **च** पुनः, **एतत्** पुरोवर्ति अङ्गुलीयकरत्नम्, **कुतः** कस्मात्, **प्राप्तं** लब्धमिति **पृष्टः** जिज्ञासां ज्ञापितः, **देवस्य** भवतः, **शक्रावतारगमनात् प्रभृति** तदाख्यतीर्थगमनादारभ्य, **राजलक्ष्मीस्वस्थानगमनपर्यवसानं** राजलक्ष्म्या यत् स्वस्थानगमनं तत्पर्यन्तम्, **पूर्ववृत्तं** पूर्वनिष्पन्नम्, **अखिलमपि** अशेषमपि, **ज्वलनप्रभदेववृत्तान्तं** ज्वलनप्रभसंज्ञकदेवसमाचारम्, **यथाश्रुतं** श्रुतमनतिक्रम्य, **अकथयत्** कथितवान् [ज्ञ]। **सोऽपि** नृपकुमारोऽपि, **तद्** उक्तवृत्तम्, श्रुत्वा, **किञ्चिदुपशान्तचिन्तासंज्वरः** किञ्चिदुपशान्तः-किञ्चिन्निवृत्तः, चिन्तारूपः संज्वरः-सन्तापो यस्य तादृशः, **शत्रुभुजबलोत्कर्षसम्भावनाकृतां** शत्रूणां-वैरिणाम्, भुजबलस्य-बाहुविक्रमस्य, य उत्कर्षः-प्रकर्षः, तत्सम्भावनाजनिताम्, **आत्मनि** स्वविषये, **अवज्ञाबुद्धिम्** तिरस्कारदृष्टिम्, **श्लथां** शिथिलाम्, **अकरोत्** कृतवान्। **च** पुनः, **अब्रवीत्** उक्तवान्, किमित्याह-**दण्डाधिप!** चतुरङ्गसेनाध्यक्ष! अहम्, **दूरनिवारिताहङ्कारप्रवेशपेशलेन** दूरनिवारितेन, अहङ्कारप्रवेशेन-अभिमानोदयेन, यत् पेशलं-मनोहरं तादृशेन, अमुना, **त्वदीयसौजन्येन** त्वत्सुजनतया, **बाढम्** अत्यन्तम्, **आवर्जितः** आनमितः। **सदृशनिन्दाप्रशंसः** सदृशौ-तुल्ये, निन्दा-प्रशंसे यस्य तादृशः, मुनिरपि कः, **ईदृशम्** एवंविधम्, **आत्मगुणापलापबद्धकक्षम्** आत्मगुणानां-स्वगुणानाम्, अपलापे-अपह्नवे, बद्धा-कक्षा अन्तरीयपश्चादञ्चलो यस्मिंस्तादृशम्, पुनः **अरातिपक्षोत्कर्षवर्णनामुखरम्** अरातिपक्षस्य-शत्रुपक्षस्य, य उत्कर्षः-प्रकर्षः, तद्वर्णनया, मुखरं-वाचालं यथा स्यात् तथेति सर्वं क्रियाविशेषणम्, **अखिलराजलोकसमक्षं** सकलनृपजनसमक्षम्, **उल्लपति** आलपति, न कोऽपीत्यर्थः, **यादृक्** यथा, **सकलदिगन्तविश्रुतपराक्रमेण** अखिलदिगन्तप्रसिद्धपराक्रमशालिना, पुनः **दक्षिणापथचक्रवर्तिना** दक्षिणदेशसम्राजा, त्वया, **गदितम्** उक्तम्। **एतद्** इदम्, **भुवनं** जगत्, केवलम्, **अव्याहतप्रसरया** अप्रतिहतप्रचारया, **ते** तव, **बाणसंहत्या** बाणसमूहेन, न **तिरस्कृतम्** अभिभूतम्, किन्तु तादृश्या **महत्त**-

प्रभृतिभिः, यस्य वेश्मनि व्यवहरन्ति सद्यःकृतापकारे शत्रावपि वितीर्णप्राणसर्वस्वाः स्वभुजविक्रमोत्कीर्तनावसरेऽपि परकीयसामर्थ्यसमर्थनपरास्त्वद्विधा राज्यचिन्तकाः प्रधानसचिवाः । सर्वमुचितमनुचितं च करणीयं मया त्वदीयवचनम्, केवलमिदानीं न वक्तव्योऽहमन्यत् किमपि, यदि च पक्षपातबुद्धिर्मयि ततः किमनया, कुरु कृतार्थं मे चक्षुः, तमेव दर्शय प्रीतिविस्तारितेक्षणवदनेन वज्रिणा त्रिदशसंसदि स्तुतगुणमसमसाहसावर्जितराजलक्ष्मीदर्शितप्रत्यक्षनिजरूपविभ्रममपेतरजसं राजर्षिम्, उपजाततर्षोऽहमतितरां तदङ्घ्रियुगलावलोकने [अ] । इति वदन्तं च तं प्रीतहृदयो दण्डाधिपः प्रत्यवादीत्—'कुमार! यद्येवमद्यैव कुरु प्रस्थानम्' इत्युदीर्य निरवद्येऽह्नि शिक्षयित्वा बहुप्रकारमनुचरीकृतप्रचुरपदातिचक्रेण कृत्वा मया सततकृतसेवं देवपादान्तिकमजीगमत् । सोऽहमादाय तमुदग्ररभसं प्रस्थितः पथि वहन्नहरहः प्रयाणैरलघुभिर्विलङ्घितानेकनगरग्रामजनपदः क्रमेणास्या-

---

यापि महिम्नापि । स राजा **देवराजप्रभृतिभिः** इन्द्रादिभिः, **कथमिव** कस्मादिव, न **प्रशस्यते** स्तूयते, प्रशस्यत एवेत्यर्थः । **यस्य** राज्ञः, **वेश्मनि** गृहे, **त्वद्विधाः** भवादृशाः, **राज्यचिन्तकाः** राज्यचिन्तनपराः, **प्रधानसचिवाः** मुख्यमन्त्रिणः, **व्यवहरन्ति** योग-क्षेमौ निर्वहन्ति । कीदृशाः? **सद्यःकृतापकारे** तत्क्षणविहिताप्रिये, **शत्रावपि** रिपावपि, **वितीर्णप्राणसर्वस्वाः** वितीर्णं–समर्पितम्, प्राणरूपं सर्वस्वं–सर्वधनम्, सर्वधनेभ्योऽप्यतिप्रियाः प्राणा इत्यर्थः, यद्वा प्राणाः सर्वस्वं च यैस्तादृशाः; पुनः **स्वभुजविक्रमोत्कीर्तनावसरेऽपि** निजबाहुबलवर्णनवेलायामपि, **परकीयसामर्थ्यसमर्थनपराः** परस्य–शत्रोरिदं परकीयं तस्य, सामर्थ्यस्य–शक्तेः, समर्थने–श्लाघने, पराः–प्रवीणाः । **उचितं** योग्यम्, **अनुचितम्** अयोग्यं च, सर्वं **त्वदीयवचनं** त्वत्सम्बन्धिकर्तव्यावेदकवाक्यम्, मया, **करणीयं** कर्तव्यं पालनीयमिति यावत्, **केवलं** किन्तु, अहम्, **इदानीं** सम्प्रति, **अन्यत्** अनुपदवक्ष्यमाणकार्यव्यतिरिक्तम्, **किमपि** कार्यं, **न वक्तव्यः** कर्तव्यत्वमेव न ज्ञापनीयः । यदि, **मयि** मद्विषये, **पक्षपातबुद्धिः** उपकारदृष्टिः, वर्तेत इति शेषः, तर्हि **अनया** निरुक्तवार्तया, **अन्यया** इति पाठे तु वार्तया इति शेषः, तथा च **अन्यया** वक्ष्यमाणकार्यान्यकार्यविषयिकया वार्तया, **किम्** अलमिति शेषः । **मे** मम, **चक्षुः**, **कृतार्थं** सफलम्, **कुरु** सम्पादय, **तम्** वर्णितगुणम्, **राजर्षिमेव** मेघवाहनमेव, **दर्शय** दृष्टिगोचरतामापादय । कीदृशम्? **प्रीतिविस्तारितेक्षणवदनेन** प्रीत्या–प्रेम्णा, विस्तारिते–विकासिते, ईक्षणे–नयने, वदनं–मुखं च येन तादृशेन, **वज्रिणा** इन्द्रेण, **त्रिदशसंसदि** देवसभायाम्, **स्तुतगुणं** प्रशंसितगुणम्; पुनः **असमसाहसावर्जितराजलक्ष्मीदर्शितप्रत्यक्षनिजरूपविभ्रमम्** असमेन–नास्ति समं–सदृशं यस्य तादृशेन, असाधारणेनेत्यर्थः, साहसेन–अशक्यकार्यकारित्वेन, आवर्जितया–प्रसादितया, राजलक्ष्म्या–राजोपास्यलक्ष्मीदेव्या, दर्शितः–दृष्टिगोचरतामापादितः, प्रत्यक्षनिजरूपस्य–प्रत्यक्षस्वमूर्तेः, विभ्रमः–विलासो यस्मै तादृशम्; पुनः **अपेतरजसं** विगलितकलुषम् । अहं **तदङ्घ्रियुगलावलोकने** तत्पादद्वयदर्शने, **अतितराम्**, अत्यन्तम्, **उपजाततर्षः** उत्पन्नाभिलाषः, अस्मीति शेषः [अ] । **इति** इत्थम्, **वदन्तं** कथयन्तम्, **तं** नृपकुमारम्, **प्रीतहृदयः** प्रसन्नहृदयः, **दण्डाधिपः** चतुरङ्गसेनाध्यक्षः, वज्रायुध इति यावत्, **प्रत्यवादीत्** प्रत्युक्तवान् । किमित्याह–**कुमार!** समरकेतो!, यदि **एवम्** इत्थमभिलष्यसि, तर्हि अद्यैव **प्रस्थानं** तत्पार्श्वप्रयाणं कुरु, **इत्युदीर्य** इत्युक्त्वा, **निरवद्ये** प्रशस्ते, **अहनि** दिवसे, **बहुप्रकारं** बहवः प्रकाराः प्रभेदा यस्मिंस्तादृशं यथा स्यात् तथा, **शिक्षयित्वा** तद्योग्यकार्यक्रममुपदिश्य, **अनुचरीकृतप्रचुरपदातिचक्रेण** अनुचरीकृतम्–अनुगामितां नीतं सेवकतामापादितं वा, प्रचुराणां–बहूनाम्, पदातीनां–पादगामिनाम्, चक्रं–समूहो येन तादृशेन, मया, **सततकृतसेवं** सततम्–अनवरतम्, कृता सेवा यस्य तादृशम्, **कृत्वा** सेवयित्वेत्यर्थः, समरकेतुमिति शेषः, **देवपादान्तिकं** देवस्य–भवतः, पादयोः पार्श्वम्, **अजीगमत्** मद्द्वारा प्रेषितवान्, सेनापतिरिति शेषः । **सः** गृहीततदानयनभारः, अहं विजयवेगः, **उदग्ररभसं** प्रकृष्टवेगम्, **तं** समरकेतुम्, **आदाय** गृहीत्वा, **प्रस्थितः** कृतप्रयाणः, **पथि** मार्गे, **वहन्** तं गमयन्, **अहरहः** प्रतिदिनम्, **अलघुभिः** दीर्घैः, **प्रयाणैः** यात्राभिः, **क्रमेण** प्रयाणक्रमेण, **विलङ्घितानेकनगरग्रामजनपदः** विलङ्घितानि–अतिक्रान्तानि, अनेकानि–बहूनि, नगराणि–"पुण्यक्रियादिनिपुणैश्चातुर्वर्ण्यैर्जनैर्युतम् । अनेकजातिसम्बद्धं नैकशिल्पिसमाकुलम् ॥ सर्वदैवतसम्बद्धं नगरं तदभिधीयते ।" इत्यन्यत्रोक्तलक्षणानि, ग्रामाः–"विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि । स तु ग्राम इति प्रोक्तः

मनन्तरातीतायां विभावर्यामिह नगर्यां प्रविष्टः। दृष्टं चाद्य पुण्योदयेन चिरकालाभिकाङ्क्षितदर्शनं चरणकमलद्वयं देवस्य, एतां च दिव्याङ्गुलीयकप्रभावावेदनप्रसङ्गागतामवनिपतिराकर्ण्य **विजयवेगतो वज्रायुध-समरकेतु**समरवार्तामास्थानवर्तिना नरपतिसमूहेन सहितः परं विस्मयमगच्छत्। अव्याजशौर्यावर्जितश्च न तथा लब्धविजये सुहृदि **वज्रायुधे** यथा विपक्षे **समरकेतौ** बबन्ध पक्षपातम्। तथाहि—अस्य चिन्तयन्नचिन्तितात्मपरसैन्यगुरुलाघवां मनस्विताम्, विभावयन्नेकरथेन कृतमहारथसमूहमध्यप्रवेशां साहसिकताम्, विचारयन् विधृतपौरुषप्रकर्षमरातिपरिभाषणेष्वरोषपरुषमालापविभ्रमम्, अवधारयन्ननादरनिरस्त्रीकृतनिखिलपरचक्रनायकं सायकव्यापारमतिचिरमतिष्ठत्। अनुरागतरलितश्च तत्रैव गत्वा तं द्रष्टुमिव परिष्वक्तुमिव संभाषयितुमिवाभ्यर्चितुमिव स्वपदेऽभिषेक्तुमिव चेतसाभिलषितवान्, दर्शनोत्सुकश्च पुनरवोचत्—'**विजयवेग!** क्वास्ते स सिंहलेश्वरसूनुः कदा च सोऽस्मान् द्रक्ष्यति।' स जगाद—'देव! स शक्रावतारोद्यानसंनिधिरमणीये सरय्वाः परिसरे निवेशितशिबिरस्तिष्ठति। दर्शनं तु यदैव देवः प्रसीदति तदैव करोति।'

शूद्राणां वास एव वा॥" इत्यन्यत्रोक्तलक्षणाः, जनपदाः-देशाश्च येन तादृशः, **अस्यां** हृदि वर्तमानायाम्, **अनन्तरातीतायाम्** अव्यवहितपूर्वव्यतीतायाम्, **विभावर्यां** रात्रौ, **इह** अस्यां, **नगर्याम्** अयोध्यायाम्, **प्रविष्टः** कृतप्रवेशोऽभूवम्। **च** पुनः, **पुण्योदयेन** सुकृतविपाकेन, **चिरकालाभिकाङ्क्षितदर्शनं** चिरकालं-दीर्घकालम्, अभिकाङ्क्षितम्-अभिलषितम्, दर्शनं यस्य तादृशम्, **देवस्य** भवतः, **चरणकमलद्वयं** पादपद्मयुगलम्, **अद्य** अस्मिन् दिने, **दृष्टं** दृष्टिगोचरीकृतम्। **अवनिपतिः** मेघवाहननृपतिः, **दिव्याङ्गुलीयकप्रभावावेदनप्रसङ्गागतां** दिव्यं-मनोहरम्, यद् अङ्गुलीयकं-लक्ष्मीदेवीदत्तमङ्गुलिभूषणम्, तत्प्रभावावबोधनप्रसङ्गेनोत्थिताम्, **एताम्** इमाम्, **वज्रायुध-समरकेतु-समरवार्तां** तदुभयसंग्रामाख्यायिकाम्, **विजयवेगतः** तदाख्यवज्रायुधप्रधानपुरुषात्, **आकर्ण्य** श्रुत्वा, **आस्थानवर्तिना** सभावर्तिना, **नरपतिसमूहेन** राजगणेन, सहितः, **परम्** अत्यन्तम्, **विस्मयम्** आश्चर्यम्, **अगच्छत्** प्राप्तवान्। **च** पुनः, **अव्याजशौर्यावर्जितः** अव्याजेन-कपटरहितेन, वास्तविकेनेत्यर्थः, शौर्येण-वीर्येण, आवर्जितः-आह्लादितः सन्, **लब्धविजये** प्राप्तविजये, **सुहृदि** मित्रे, **वज्रायुधे** तदाख्यसेनापतौ, **तथा** तादृशम्, **पक्षपातं** प्रीतिम्, **न बबन्ध** कृतवान्, **यथा** यादृशम्, **विपक्षे** शत्रावपि, **समरकेतौ** तदाख्यनृपकुमारे। शौर्यमुपदर्शयति-**तथाहीति**। **अस्य** समरकेतोः, **अचिन्तितात्मपरसैन्यगुरुलाघवाम्** अचिन्तिते-अनालोचिते, आत्मपरसैन्ययोः-स्वसैन्य-शत्रुसैन्ययोः, गुरुलाघवे-बलाबले यया तादृशीम्, **मनस्वितां** स्वाभिमानिताम्, **चिन्तयन्** विचारयन्; पुनः **एकरथेन** एकेनैव रथेन, **कृतमहारथसमूहमध्यप्रवेशां** कृतः, महारथानां-विशालरथानाम्, समूहस्य मध्ये प्रवेशो यया तादृशीम्, **साहसिकताम्** अतिदुष्करकर्मकारिताम्, **विभावयन्** निरूपयन्; पुनः **अरातिपरिभाषणेषु** रिपुजनकर्मकाह्वानविषयेषु, **विधृतपौरुषप्रकर्षं** विधृतः-व्यङ्ग्यविधया आश्रितः, आविष्कृत इत्यर्थः, पौरुषप्रकर्षः-पराक्रमोत्कर्षो येन तादृशम्, पुनः **अरोषपरुषं** रोषजन्यपारुष्यरहितम्, **आलापविभ्रमम्** आभाषणविलासम्, **विचारयन्** आलोचयन्; पुनः **अनादरनिरस्त्रीकृतनिखिलपरचक्रनायकम्** अनादरेण-तिरस्कारेण, निरस्त्रीकृताः-अस्त्रशून्यतामापादिताः, परचक्रस्य-शत्रुराष्ट्रस्य, नायका येन तादृशम्, **सायकव्यापारं** बाणविक्षेपम्, **अवधारयन्** निश्चिन्वन्; **अतिचिरम्** अतिदीर्घकालम्, **अतिष्ठत्** स्थितवान्। **च** पुनः, **अनुरागतरलितः** अनुरागेण-प्रीत्या, तरलितः-चञ्चलतापन्नः, **तत्रैव** यत्र समरकेतुरासीत् तस्मिन्नेव स्थाने, गत्वा, **तं** समरकेतुम्, **द्रष्टुमिव** निरीक्षितुमिव, पुनः **परिष्वक्तुमिव** आलिङ्गितुमिव, पुनः **सम्भाषयितुमिव** आलापयितुमिव, पुनः **अभ्यर्चितुमिव** अभिपूजयितुमिव, **स्वपदे** स्वाधिष्ठितराज्यासने, **अभिषेक्तुमिव** अभिषेकं कर्तुमिव, **चेतसा** हृदयेन, **अभिलषितवान्** अभिलषति स्म। **च** पुनः, **दर्शनोत्सुकः** दर्शनार्थमुत्कण्ठितः सन्, **पुनः** भूयोऽपि, **अवोचत्** उक्तवान्, **विजयवेग!** भो विजयवेग!, **सः** त्वयेहानीतः, **सिंहलेश्वरसूनुः** सिंहलद्वीपनृपकुमारः, **क्व** कुत्र स्थाने, **आस्ते** तिष्ठति, **कदा** कस्मिन् काले, **सः** नृपकुमारः, अस्मान्, **द्रक्ष्यति** दृष्टिगोचरीकरिष्यति। **सः** विजयवेगः, **जगाद** प्रत्युक्तवान्। किमित्याह-**देव!** राजन्!, **शक्रावतारोद्यानसन्निधिरमणीये** शक्रावतारस्य-तदाख्यतीर्थविशेषस्य, यदुद्यानम्-आरामः, तत्सन्निधिना-तत्सामीप्येन, रमणीये-मनोहरे, **सरय्वाः** सरयूनद्याः, **परिसरे** प्रान्ते, तटप्रदेशे

तच्छ्रुत्वा नरपतिरासन्नवर्तिनमत्युदारवेषं साकारवपुषमभ्यर्हितमशेषस्यापि परिग्रहस्य महत्सु कार्येषु व्यापारणीयं हरदासनामानं महाप्रतीहारमाकारणाय तत्क्षणमेव तस्य प्राहिणोत्। स गत्वा सपरिवारस्तदावासे कृतसमुचितोपचारो बहुप्रकारोपवर्णितनरेन्द्रानुरागनिर्वृतं कृताञ्जलिपुटस्तं राजकुलमानिनाय, प्रावेशयच्च दर्शितप्रश्रयातिरेकोऽभ्यन्तरम् [आ]। प्रविष्टं च तं धृतविदग्धोज्ज्वलवेषकतिपयाप्तपदातिपरिवृतम्, आलोकनोपजातसंक्षोभसरभसापसृतेन द्वारवर्तिना राजलोकेन दीयमानमार्गम्, अग्रयायिना विनयपेशलालापेन दौवारिकजनेनागम्यमानम्, आत्मप्रतिबिम्बकैरिव समानरूपैः समानवयोभिः समानवसनालङ्कारधारिभिरव्यभिचारिभिः प्रधानराजपुत्रैः परिवृतम्, उपान्तप्ररूढकल्पपादपविटपमिव नवपारिजातपोतम्, दिगन्तरव्यापिना कुवलयदलश्यामलेन स्वदेहप्रभासंतानेन तिरोहितसर्वाकारम्, अम्बुराशिजलमध्यवर्तिनं मैनाकमिव विभाव्यमानम्, अनवरतमुन्मिषता निसर्गस्निग्धेन कर्णपूरमौक्तिकस्तबकेन कृत्तिकापुञ्जेनेव कुमारशब्द-

---

इत्यर्थः, **निवेशितशिबिरः** रचितसैन्यावासः, **तिष्ठति** वर्तते। **देवः** भवान्, **यदैव** यस्मिन्नेव काले, **प्रसीदति** वर्तमानसमीपे भविष्यति, प्रसन्नो भवेत्, **तदैव** तस्मिन्नेव काले, दर्शनं **करोति** कुर्यात्। **तत्** तदुक्तम्, **श्रुत्वा** श्रवणगोचरीकृत्य, **नरपतिः** मेघवाहनः, **तत्क्षणमेव** तत्कालमेव, **तस्य** नृपकुमारस्य, आकारणाय-आह्वानाय, **हरदासनामानं** तत्संज्ञकम्, **महाप्रतीहारं** प्रधानद्वारपालम्, **प्राहिणोत्** प्रेषितवान्। कीदृशम्? **आसन्नवर्तिनं** पार्श्ववर्तिनम्, पुनः **अत्युदारवेषम्** अत्युज्ज्वलवेषम्; पुनः **साकारवपुषम्** आकारेण–मनोहरावयवसंस्थानेन सहितम्, वपुः–शरीरं यस्य तादृशम्, शरीरे साकारत्वस्य नियतत्वेनात्रोपादानसामर्थ्यादाकारपदस्य सुन्दराकारपरत्वं बोध्यम्; पुनः **अशेषस्यापि** समग्रस्यापि, **परिग्रहस्य** परिजनस्य, **अभ्यर्हितं** माननीयम्; पुनः **महत्सु** असाधारणेषु, कार्येषु, **व्यापारणीयं** नियोज्यम्। **स** हरदासः, **सपरिवारः** परिजनसहितः, **तदावासे** नृपकुमारावासे, **गत्वा** उपस्थाय, **कृतसमुचितोपचारः** कृतः–अनुष्ठितः, समुचितः–योग्यः, उपचारः–सेवा येन तादृशः सन्, **बहुप्रकारोपवर्णितनरेन्द्रानुरागनिर्वृतं** बहुभिः प्रकारैः उपवर्णितेन–व्याख्यातेन, नरेन्द्रस्य–मेघवाहननृपतेः, अनुरागेण–प्रेम्णा, निर्वृतं–प्रसन्नम्, तं नृपकुमारम्, **कृताञ्जलिपुटः** रचिताञ्जलिपुटः, **राजकुलं** मेघवाहनराजधानीम्, तत्पार्श्वमित्यर्थः, **आनिनाय** आनीतवान्। **च** पुनः, **दर्शितप्रश्रयातिरेकः** प्रकटितप्रेमातिरेकः, **अभ्यन्तरं** राजगृहाभ्यन्तरम्, **प्रावेशयत्** प्रवेशितवान् [आ]। **प्रविष्टं** कृताभ्यन्तरप्रवेशम्, तं प्रकृतम्, **समरकेतुं** तन्नामकं नृपकुमारम्, **क्षितिपतिः** मेघवाहनो नृपः, **अद्राक्षीत्** दृष्टवान्। कीदृशम्? **धृतविदग्धोज्ज्वलवेषकतिपयाप्तपदातिपरिवृतं** धृतः–परिहितः, विदग्धः–मनोहरः, उज्ज्वलः–निर्मलश्च, वेषो यैस्तादृशैः, कतिपयैः–परिगणितैः, **आप्तैः** विश्वस्तैः, पदातिभिः–पदगामिभिः, परिवृतं–परिवेष्टितम्; पुनः **आलोकनोपजातसंक्षोभसरभसापसृतेन** आलोकनेन–समरकेतोरवलोकनेन, उपजातः–उत्पन्नः, यः संक्षोभः–सम्भ्रमस्तेन सरभसापसृतेन सरभसं–सत्वरम्, अपसृतेन–पृथग्भूतेन, **द्वारवर्तिना** द्वारदेशस्थेन, **राजलोकेन** नृपजनेन, **दीयमानमार्गं** दीयमानः-रिक्तीक्रियमाणो मार्गो यस्य तादृशम्; पुनः **अग्रयायिना** अग्रगामिना, **विनयपेशलालापेन** विनयेन–नम्रतया, पेशलः–रमणीयः, आलापः–आभाषणं यस्य तादृशेन, **दौवारिकजनेन** द्वारपालजनेन, **आगम्यमानं** मेघवाहनपार्श्वमानीयमानम्, **अनुगम्यमानमिति** पाठे अनुस्रियमाणम्; पुनः **आत्मप्रतिबिम्बकैरिव** स्वप्रतिबिम्बभूतैरिव, **समानरूपैः** तुल्याकारैः, **समानवयोभिः** तुल्यावस्थाकैः, **समानवसनालङ्कारधारिभिः** तुल्यवस्त्रालङ्कारशालिभिः, **अव्यभिचारिभिः** नियतसहचारिभिः, **प्रधानराजपुत्रैः** मुख्यनृपकुमारैः, **परिवृतं** परिवेष्टितम्; पुनः **उपान्तप्ररूढकल्पपादपविटपम्** उपान्ते–निकटे, प्ररूढाः–उत्पन्नाः, कल्पपादपस्य–कल्पवृक्षस्य, विटपाः–शाखा यस्य तादृशम्, **नवपारिजातपोतमिव** नवं–नवीनम्, पारिजातस्य–तदाख्यदेवतरोः, पोतं–शिशुमिव, बालपारिजातमिवेत्यर्थः, अत्र राजपुत्राणां कल्पवृक्षशाखात्वेन समरकेतोर्बालपारिजातत्वेनोत्प्रेक्षा बोध्या; पुनः **स्वदेहप्रभासन्तानेन** स्वशरीरकान्तिकलापेन, **तिरोहितसर्वाकारं** तिरोहितसर्वावयवम्, कीदृशेन? **दिगन्तरव्यापिना** दिङ्मध्यव्यापिना, पुनः **कुवलयदलश्यामलेन** कुमुदपत्रवत् कृष्णवर्णेन, पुनः **अम्बुराशिजलमध्यवर्तिनम्** अम्बूनां–जलानाम्, राशिः–समुद्रः, तज्जले मध्यवर्तिनम्, **मैनाकमिव** तदाख्यपर्वतमिव, **विभाव्यमानं** प्रतीयमानम्; पुनः **अनवरतं** निरन्तरम्, **उन्मिषता** उद्गच्छता, **निसर्गस्निग्धेन** स्वाभाविक-

विप्रलब्धेन कृतमुखालोकम्, हराट्टहासद्युतिहासिना दूरमुल्लसितेन हारप्रभावलयेन वक्षःस्थलनिवासिन्याः श्रियः क्षीरोदमिव दर्शयन्तम्, अतिबहलकेयूरपद्मरागांशुरञ्जितैश्चिरप्ररूढैरपि सरसैरिवारिशस्त्रप्रहारैः स्थपुटितोरःस्थलम्, तरुणतामरसताम्रतलस्य सविलासं प्रेङ्खतः पाणियुगलस्य विसर्पन्तीभिर्धवलनखदीधितिभिरम्बुधाराभिरिव सावष्टम्भचरणपातभरपीडितामुक्षन्तं क्षितिं क्षितिपतिः समरकेतुमद्राक्षीत् [इ]। दृष्ट्वा च संमुखचलितवदनो वारंवारमादरप्रणिहितप्रसादार्द्रदृष्टिरासन्नसर्पिणा महाप्रतीहारेण कारितप्रणाममादरप्रणतिलग्नकुट्टिमोपहारकुसुमकिञ्जल्कशारीकृतशिरोरुहमेह्येहीति दूरादेवाह्वयत्। उपसृत्य चरणान्तिके भूयः कृतप्रणामं च प्रेम्णातिदूरं प्रसारिताभ्यां भुजाभ्यामाकृष्याङ्कमारोपयत्। आश्लिष्टमुक्तं च तं विनयादनादृतससंभ्रमाधिकृतढौकितविकटवेत्रासनमासन्नोपविष्टमुन्नमितपक्ष्मणा निश्चलनिबद्धलक्ष्येण चक्षुषा निरीक्ष्य साचीकृतशिरोधरः

स्नेहास्पदेन स्वभावतो मसृणेन वा, **कर्णपूरमौक्तिकस्तबकेन** कर्णाभरणभूतमौक्तिकगुच्छेन, **कृतमुखालोकं** कृतः, मुखस्य, आलोकः–प्रकाशो यस्य तादृशम्, केनेव? **कुमारशब्दविप्रलब्धेन** कुमारशब्देन–"षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः" इत्यादिकोशेषु कार्तिकेयपर्यायतया पठितेन समरकेतुबोधकेन शब्देन, विप्रलब्धेन–स्वपुत्रप्रत्यायनेन प्रतारितेन, **कृत्तिकापुञ्जेनेव** पुत्रवात्सल्यादागतेन कार्तिकेयमातृभूतकृत्तिकाख्यताराग़णेनेव; पुनः **हराट्टहासद्युतिहासिना** हरस्य–शिवस्य, योऽट्टहासः–महाहासः, तदीयद्युतिहासिना–तदीयकान्तितिरस्कारिणा, पुनः **दूरमुल्लसितेन** दूरं यावदुद्भासितेन, **हारप्रभावलयेन** हारद्युतिमण्डलेन, **वक्षःस्थलनिवासिन्याः** उपास्यतया हृदयदेशवर्तिन्याः, **श्रियः** लक्ष्म्याः, **क्षीरोदमिव** क्षीरसागरमिव, **दर्शयन्तं** दर्शनेन प्रत्याययन्तम्; पुनः **अतिबहलकेयूरपद्मरागांशुरञ्जितैः** अतिबहलैः–अतिप्रचुरैः, केयूरपद्मरागांशुभिः–केयूरस्य–बाहुभूषणस्य, यः पद्मरागः–तदाख्यरक्तमणिविशेषः, तस्य अंशुभिः–किरणैः रञ्जितैः, रक्ततामापादितैः, अतः **चिरप्ररूढैरपि** चिरकालोपजातैरपि, शुष्कैरपीत्यर्थः, **सरसैरिव** आर्द्रैरिव, **अरिशस्त्रप्रहारैः** शत्रुशस्त्रघातैः, **स्थपुटितोरःस्थलं** स्थपुटितं–निम्नोन्नतीकृतम्, उरःस्थलं–वक्षःस्थलं यस्य तादृशम्, पुनः **तरुणतामरसताम्रतलस्य** तरुणं–परिणतम्, यत् तामरसं–रक्तपद्मम्, तद्वत् ताम्रं–रक्तं, तलं–चपेटं यस्य तादृशस्य, **सविलासं** विलासपूर्वकं यथा स्यात् तथा, **प्रेङ्खतः** प्रचलतः, **पाणियुगलस्य** हस्तद्वयस्य, **विसर्पन्तीभिः** प्रसरन्तीभिः, **धवलनखदीधितिभिः** स्वच्छनखकिरणैः, **अम्बुधाराभिरिव** जलधाराभिरिव, **सावष्टम्भचरणपातभरपीडितां** सावष्टम्भस्य–साक्रमणस्य, चरणपातस्य–पादारोपणस्य, भरेण–भारेण, पीडितां–व्यथिताम्, **क्षितिं** पृथवीम्, **उक्षन्तं** सिञ्चन्तम्, सेचनेन तत्पीडामपनयन्तमित्यर्थः [इ]। **च** पुनः, **दृष्ट्वा** तं दृष्टिगोचरीकृत्य, **सम्मुखचलितवदनः** तदभिमुखीभूतमुखः, **वारंवारम्** असकृत्, **आदरप्रणिहितप्रसादार्द्रदृष्टिः** आदरेण–प्रीत्या, प्रणिहिता–समारोपिता, प्रसादार्द्रा–प्रसादेन–प्रसन्नतया, आर्द्रा–सरसा, दृष्टिर्येन तादृशः, **आसन्नसर्पिणा** पार्श्वगामिना, **महाप्रतीहारेण** प्रधानद्वारपालेन, **कारितप्रणामं** कारितनमस्कारम्, पुनः **आदरप्रणतिलग्नकुट्टिमोपहारकुसुमकिञ्जल्कशारीकृतशिरोरुहम्** आदरेण या प्रणतिः, तया लग्नैः–सम्पृक्तैः, कुट्टिमस्य–मणिबद्धप्रदेशस्य, उपहारभूतानां–प्राभृतभूतानाम्, कुसुमानां–पुष्पानाम्, किञ्जल्कैः–केसरैः, शारीकृताः–चित्रिताः, शिरोरुहाः–केशा यस्य तादृशम्, समरकेतुमिति शेषः, **एहि एहि** आगच्छ आगच्छेति, **दूरादेव** दूरत एव, **आह्वयत्** आहूतवान्। **च** पुनः, **चरणान्तिके** चरणसमीपे, **उपसृत्य** आगत्य, **भूयः** पुनः, **कृतप्रणामं** कृतनमस्कारम्, तमिति शेषः, **प्रेम्णा** स्नेहेन, **अतिदूरम्** अत्यन्तदूरपर्यन्तम्, **प्रसारिताभ्यां** विस्तारिताभ्याम्, भुजाभ्यां–बाहुभ्याम्, **आकृष्य** गृहीत्वा, **अङ्कं** क्रोडम्, **आरोपितवान्** तत्र स्थापितवान्, **च** पुनः, **आश्लिष्टमुक्तं** पूर्वमाश्लिष्टम्–आलिङ्गितम्, पश्चान्मुक्तं त्यक्तम्, **विनयात्** नम्रभावात्, **अनादृतससम्भ्रमाधिकृतढौकितविकटवेत्रासनम्** अनादृतं–तिरस्कृतं त्यक्तमिति यावत्, ससम्भ्रमं–सत्वरम्, अधिकृतेन–नियुक्तजनेन, ढौकितम्–आनीतम्, विकटं–विशालम्, वेत्रासनं–वेत्ररचितमूर्ध्वासनं येन तादृशम्; **आसन्नोपविष्टं** पार्श्वोपविष्टम्, **तं** समरकेतुम्, **उन्नमितपक्ष्मणा** उन्नमितम्–उद्धृतम्, पक्ष्म–नयनोपरितनरोमराजिर्यस्य तादृशेन, उन्मीलितेनेत्यर्थः, **निश्चलनिबद्धलक्ष्येण** निश्चलं–निर्निमेषं यथा स्यात् तथा, निबद्धं–निजरश्मिना नियन्त्रितम्, लक्ष्यं–दृश्यं येन तादृशेन, **चक्षुषा** नेत्रेण, **निरीक्ष्य** अवलोक्य, **साचीकृतशिरोधरः**

सुचिरमीषत्स्मितः समभाषत—'वत्स! स्वागतं ते, साधुकृतं यदत्रागतोऽसि, अनेन तव निसर्गसुन्दरेण दृष्टमात्रेण देहाकारेण पुरुषकारेणेव श्रुतेन श्रोत्रमानन्दितं मे किमपि नेत्रयुग्मम्, धन्यस्त्वमेको जगति यस्मादुपजातमात्मनः पराजयं विजयमिव सभासु शंसति प्रीतिविकसिताक्षो विपक्षलोकः, तोकमुपजनयता भवन्तमस्तोकसंचितसुकृतसंभारेण धारितो धुरि समस्तानां पुत्रिणामात्मा महात्मना सिंहलेश्वरेण, तेजस्वि-संगमेषु स्फुरदधिकौजसा सहजमार्दवगुणोपेतेन स्थिरप्रकृतिना त्वयैकेन भूषितं पुरुषरत्नेन परुषतरलैर्बहुभिरपि पाषाणरत्नैः परिष्कृताय प्रायो न मे गृहं स्पृहयत्यद्य सिंहलद्वीपाय, सर्वथा कृतार्थोऽहम्, अद्य फलितो मे दक्षिणापथविजयः, अद्य श्लाघनीयतां गतमिदं राज्यम्, अद्याधिगतपरिपूर्णशोभेयमुपजाता सभा, शिरश्छेद-साहसदर्शनादधिकपरितुष्टया दिव्याङ्गुलीयकार्पणव्यपदेशेन देशान्तरादानीय दत्तोऽसि मे द्वितीयस्त्वमात्मजो राजलक्ष्म्या। सामान्यममुना कुमारेण सह तवेदं राज्यमास्स्व यदृच्छया भावितभूरिनिर्वृतिः [ई]। मनसि मा स्म मंस्थाः—यथाहमानीतः परैरिति, न कश्चिदप्यत्र परः, सर्वोऽप्येष तव पर्वतस्येव मैनाकस्य

साचीकृता—तिर्यक्कृता, शिरोधरा ग्रीवा यस्य तादृशः, **सुचिरम्** अतिदीर्घकालम्, **ईषत्स्मितः** ईषद्धसितः, **समभाषित** आलपितवान्। किमित्याह—**वत्स!** भोः कुमार!, **ते** तव, स्वागतं—शोभनमागमनम्, अत्र मत्सविधे, **यदागतोऽसि** यदागमनं कृतम्, तत् **साधु** समीचीनं कृतम्। **निसर्गसुन्दरेण** स्वभावमनोहरेण, **अनेन** पुरोवर्तिना, तव **देहाकारेण** शरीराङ्गसन्निवेशेन, **दृष्टमात्रेण** दृष्टिगोचरीभूतमात्रेण, **मे** मम, **नेत्रयुग्मं** नयनद्वयम्, **किमपि** अनिर्वचनीयप्रकारम्, **आनन्दितम्** आनन्दमनुभावितम्, केन किमिव? **श्रुतेन** श्रवणगोचरीकृतेन, **पुरुषकारेण** पराक्रमेण, **श्रोत्रमिव** श्रवणेन्द्रियमिव। **जगति** लोके, **एकः** अद्वितीयः, त्वं, **धन्यः** श्लाघ्यः, वर्तसे इति शेषः, **यस्मात्** त्वत्तः, **उपजातम्** उत्पन्नम्, **आत्मनः** स्वस्य, पराजयं विजयमिव, **प्रीतिविकसिताक्षः** प्रेमप्रफुल्लितनेत्रः, **विपक्षलोकः** रिपुजनः, **सभासु** जनतासु, **शंसति** कथयति, श्लाघत इत्यर्थः। **भवन्तं** त्वद्रूपम्, **तोकम्** अपत्यम्, **उपजनयता** उत्पादयता, अत एव **अस्तोकसञ्चितसुकृतसम्भारेण** अस्तोकः—अनल्पः, सञ्चितः—संगृहीतः, सुकृतसम्भारः—पुण्यराशिर्येन तादृशेन, **महात्मना** पूज्यात्मना, **सिंहलेश्वरेण** सिंहलद्वीपनृपेण चन्द्रकेतुना, **समस्तानां** सकलानाम्, पुत्रिणां—पुत्रवताम्, **धुरि** अग्रे, **आत्मा** स्वः, **धारितः** स्थापितः, पुत्रवतां प्रथमो जात इत्यर्थः। **तेजस्विसङ्गमेषु** पराक्रमिगणेषु, **स्फुरदधि-कौजसा** प्रकाशमानप्रचुरपराक्रमेण, **सहजमार्दवगुणोपेतेन** स्वाभाविकमृदुत्वगुणशालिना, **स्थिरप्रकृतिना** प्रकृत्या स्थिरेण, **त्वया** त्वद्रूपेण, **एकेन** अद्वितीयेन, **पुरुषरत्नेन** पुरुषाणां मध्ये रत्नरूपेण, **भूषितम्** अलङ्कृतम्, **मे** मम, गृहम्, **परुषतरलैः** परुषाणि—कठोराणि च तानि, तरलानि च तैः, **बहुभिरपि** प्रचुरैरपि, **पाषाणरत्नैः** प्रस्तररत्नैः, **परिष्कृताय** विभूषिताय, **सिंहलद्वीपाय** सिंहलाख्यद्वीपविशेषाय, **अद्य** अस्मिन् दिने, न **स्पृहयति** स्पृहां करोति, प्रत्युत, तिरस्करो-तीत्यर्थः। अहं **सर्वथा** सर्वप्रकारेण, **कृतार्थः** सिद्धार्थः, अस्मीति शेषः। **अद्य** अस्मिन् दिने, **इदं** भवद्भिर्भूषितम्, राज्यं **श्लाघनीयतां** प्रशंसनीयताम्, **गतं** प्राप्तम्, **अद्य** अस्मिन् दिने, **मे** मम, **दक्षिणापथविजयः** दक्षिणापथस्य—ऋक्षवदवन्तिनगरीमतिक्रम्य दक्षिणदिग्वर्तिदेशविशेषस्य विजयः, सफलः—भवादृशप्राप्त्या सफलतां गतः। **अद्य** अस्मिन् दिने, **इयं** प्रत्यक्षभूता, **सभा** राजपरिषत्, **अधिगतपरिपूर्णशोभा** प्राप्तनिरतिशयसौन्दर्या, **उपजाता** सम्पन्ना। **शिरश्छेद-साहसदर्शनात्** स्वशिरःकर्तनाकातरताऽवलोकनात्, **अधिकपरितुष्टया** अतिसन्तुष्टया, **राजलक्ष्म्या** राजोपास्य-लक्ष्मीदेव्या, **दिव्याङ्गुलीयकार्पणव्यपदेशेन** मनोहराङ्गुलीयकवितरणद्वारा, **देशान्तरात्** अन्यदेशात्, सिंहलद्वीपा-दित्यर्थः, **आनीय** आकृष्य, **द्वितीयः** हरिवाहनादन्यः, **मे** मम, **आत्मजः** पुत्रः, त्वं **दत्तोऽसि** समर्पितोऽसि। **अमुना** हरिवाहनेन कुमारेण सह तव इदं राज्यं, **सामान्यं** तुल्यम्, **यदृच्छया** यथेच्छम्, **भावितभूरिनिर्वृतिः** अनुभूताधिक-सुखः सन्, **आस्स्व** उपविश [ई]। **मनसि** स्वहृदि, **मा स्म मंस्थाः** न मन्यताम्, **यथा** यत्, अहं, **परैः** शत्रुभिः, अन्यैर्वा, **आनीतः** बलादाकृष्योपस्थापित इति। **अत्र** अस्मिन् स्थाने, **कश्चिदपि** कोऽपि, **परः** शत्रुः, अन्यो वा, **न** नास्ति, अपि स्वात्मीय एवेत्यर्थः। **मैनाकस्य** तदाख्यस्य, **पर्वतस्येव** पर्वतविशेषस्येव, **तव** समरकेतोः, **एषः** सन्निकृष्टः,

पर्यन्तवर्ती सपक्षो भूभृतां वर्गः। स्वर्गोद्यानवनलेखाचारुरेकैव दूरे तिलकतालचम्पकैलालवङ्गपुन्नागबहुला दक्षिणार्णवोपकण्ठवनराजिः, अपरस्तु सर्वः सनीडः क्रीडोपकरणग्रामः, सर्वथा कुरु स्थिरमवस्थानाय चेतः, यच्चिन्तयसि तत्कृत्स्नमपि तवाचिरेण संपत्स्यते समीहितमिह' [उ]। इत्युक्त्वान्यतो विवर्तितमुखः पादपीठान्तिकोपविष्टमनवरतसंचारितस्नेहार्द्रलोचनं **समरकेतुवदने हरिवाहनमवादीत्**—'वत्स ! एष **समरकेतुर्गुणैः** समधिकं समं चात्मबन्धुवर्गे प्रधानपुरुषमपश्यता मया तवैव सहचरः परिकल्पितः, अस्य कल्पायुषो दर्पणस्येव सद्वृत्तस्य कलङ्करहितात्मनो मत्पुरस्कृतस्य सर्वकालमभिमुखेन भवितव्यम्, सुविदितदण्डनीतेः सौविदल्लस्येव निजपरिग्रहः सततमायत्ततां नेयः, भोगसुखसाधनैकहेतोः सुकृतकर्मण इव दानादिक्रियाभिः कर्तव्यमजस्रमुपबृंहणम्, सुश्लिष्टपरिवारस्य तरवारेरिव निशास्वपि स्वसंनिधौ विधेयमवस्थानम् [ऊ]। अन्वहं घायमा-

---

टिप्पनकम्—सपक्षः-सपिच्छः, सवर्गश्च, **भूभृतां** गिरीणां राज्ञां च [उ]। **सद्वृत्तस्य** शोभनवर्तुलस्य, अन्यत्र शोभनशीलस्य। **कलङ्करहितात्मनः** मलत्यक्तस्वरूपस्य, दोषत्यक्तजीवस्य च। **सुविदितदण्डनीतेः** एकत्र सुष्ठुज्ञातवेत्रनयनस्य, अन्यत्र सुविज्ञाता दण्डनीतिर्नाम-राजविद्या येन तस्य। **भोगसुखसाधनैकहेतोः** विषयसुखसिद्ध्यद्वितीयकारणस्य, उभयत्र तुल्यम्, **दानादिक्रियाभिः** आहारादिदानशीलादिकरणैः, अन्यत्र ग्रामादिदानसन्मानादिक्रियाभिः। **सुश्लिष्टपरिवारस्य** सुसम्बन्धकोशस्य, अन्यत्र सुसंयुक्तपरिच्छदस्य [ऊ]।

सर्वोऽपि समस्तोऽपि, **भूभृतां** राज्ञाम्, पक्षे पर्वतानाम्, **वर्गः** समूहः, **पर्यन्तवर्त्ती** समीपवर्ती, **सपक्षः** सुहृत्, पक्षे पक्षेण-पतत्रेण, सहितः। **एका** अद्वितीया, **दक्षिणार्णवोपकण्ठवनराजिरेव** दक्षिणसागरसन्निकृष्टक्रीडावनपङ्क्तिरेव, **दूरे** वर्त्तत इति शेषः, कीदृशी ? **स्वर्गोद्यानवनलेखाचारुः** स्वर्गस्य-देवपुर्याः, यत् उद्यानम्-क्रीडाकाननम्, तद्रूपाणां-वनानाम्, या लेखा-पङ्क्तिः, तद्वत् चारुः-रमणीया, पुनः **तिलकतालचम्पकैलालवङ्गपुन्नागबहुला** तिलकादिपुन्नागान्तवृक्षविशेषैः, बहुला-प्रचुरा पूर्णेत्यर्थः। अपरस्तु, **सर्वः** समस्तः, **क्रीडोपकरणग्रामः** क्रीडासामग्री, **सनीडः** संनिकृष्ट एवास्तीति शेषः। **अवस्थानाय** अत्र निवासाय, **चेतः** स्वमनः, **स्थिरं** दृढसंकल्पं, कुरु, **यद्** यद् यत्, **समीहितम्** अभिलषितं वस्तु, **चिन्तयसि** चिन्ताविषयीकरोषि, **तत्** तत् तत्, **कृत्स्नमपि** समस्तमपि, तव समीहितम्, **इह** अत्र स्थाने, **अचिरेण** शीघ्रमेव, **सम्पत्स्यते** सेत्स्यति [उ]। **इत्युक्त्वा** इति कथयित्वा, **अन्यतः** अन्यदिशि, **विवर्तितमुखः** परावर्तितमुखः, **हरिवाहनं** तदाख्यनिजकुमारम्, **अवादीत्** उक्तवान्, कीदृशम् ? **पादपीठान्तिकोपविष्टं** पादपीठस्य-पादस्थापनाधारस्य, अन्तिके-समीपे, उपविष्टम्-आसितम्; पुनः **समरकेतुवदने** समरकेतुमुखे, **अनवरतसञ्चारितस्नेहार्द्रलोचनम्** अनवरतं-निरन्तरम्, सञ्चारिते-प्रेरिते, स्नेहार्द्रे-स्नेहसरसे, लोचने-नयने येन तादृशम्, **वत्स !** भोः कुमार !, **आत्मबन्धुवर्गे** स्वबन्धुवर्गे मध्ये, गुणैः, **समधिकम्** उत्तमम्, **समं** तुल्यं च, **प्रधानपुरुषं** प्रधानजनम्, **अपश्यता** अनुपलभमानेन, मया, **एष** पुरोवर्ती, **समरकेतुः** तत्संज्ञकः कुमारः, तवैव **सहचरः** सखा, **परिकल्पितः** कृतः, **दर्पणस्य इव** आदर्शस्य इव, **सद्वृत्तस्य** सच्चरित्रस्य, पक्षे समीचीनवर्त्तुलाकारस्य, **कलङ्करहितात्मनः** निष्कलङ्कात्मनः, पक्षे निर्मलस्वरूपस्य, **मत्पुरस्कृतस्य** मया सम्मानितस्य, पक्षे मया पुरः-अग्रे, कृतस्य-धृतस्य, **कल्पायुषः** कल्पपर्यन्तायुषः, चिरंजीविन इत्यर्थः, **कल्पायुषा** इति पाठे तु चिरंजीविना त्वयेत्यर्थः, **अस्य** समरकेतोः, **सर्वकालं** सर्वदा, **अभिमुखेन** अभिमुखवर्तिना, **भवितव्यं** भवितुं योग्यम्, त्वयेति शेषः। **सौविदल्लस्येव** अन्तःपुररक्षकस्येव, **सुविदितदण्डनीतेः** सम्यगवगतदण्डविषयकराजनीतेः, सम्यग्ज्ञातवेत्रयष्टिनयनस्य, **सुविहिते**ति पाठे तु सुप्रयुक्तदण्डनीतेः, अस्येति शेषः, **आयत्तताम्** अधीनताम्, **निजपरिग्रहः** स्वपरिवारः, **नेयः** प्रापयितव्यः। **सुकृतकर्मण इव** पुण्यकर्मण इव, **भोगसाधनैकहेतोः** सुखसाधनप्रधानकारणस्य, अस्येति शेषः, **दानक्रियादिभिः** ग्रामादिदानसम्मानादिक्रियाभिः, पक्षे आहारादिदानशीलपरिपालनादिक्रियाभिः, **अजस्रं** सन्ततम्, **उपबृंहणं** परिवर्धनम्, परिपोषणमित्यर्थः, **कर्तव्यं** कर्तुमुचितम्। **तरवारेरिव** खड्गस्येव, **सुश्लिष्टपरिवारस्य** सुसङ्गतपरिजनस्य, पक्षे सुश्लिष्टः-सुभगः सुदृढो वा, परिवारः-खड्गकोशो यस्य तादृशस्य, अस्येति शेषः, **स्वसन्निधौ** स्वसमीपे, **निशास्वपि** रात्रिष्वपि, **अवस्थानम्** अवस्थितिः, **विधेयं** सम्पादनीयम् [ऊ]। **अन्वहं** प्रतिदिनम्,

पत्स्वपरिहारेण, संपत्स्वादरातिशयेन, समानगुणेषु गौरवोत्कर्षेण, विवादेषु पक्षग्रहणेन, नूतनार्थलाभेषु संविभजनेन, नर्मस्वमर्मोद्घाटनेन, मन्त्रणेष्वदूरीकरणेन, दारसंनिधावविकारदर्शनेन, प्रणयकलिकोपेषु स्वयमनुनयेन, उत्सवेष्वग्रपूजासंपादनेन, प्रारब्धवस्तुनिर्वहणेषु स्तुतिप्रपञ्चनेन, प्रतिपन्नकार्येष्वविसंवादनेन, सर्वत्र चातिविश्वासदर्शनेन परं सख्यमानेयः, एष ते भ्राता च भृत्यश्च सचिवश्च सहचरश्च' [क्र]। इत्युक्त्वा विसर्जितास्थानराजको नृपतिरासनादुत्तस्थौ। कुमारोऽपि 'यदाज्ञापयति तातः' इत्यभिदधानः करे गृहीत्वा **समरकेतुं** निषिद्धपरिजनः शुद्धान्तसंचारोचितेन परिचारकगणेनानुगम्यमानो **मदिरावती**भवनमगच्छत्। तत्र च कृतप्रणामो मातुर्दर्शयित्वा **समरकेतुं** कृतसकलतद्वृत्तान्तसंकथः स्थित्वा चिरमवाप्तवस्त्रभूषणेन तेनानुगम्यमानः स्वावासमागच्छत्। तत्र चारब्धनिजनिजकर्मणा सूदवारप्रमदाप्रायेण **मदिरावती**परिजनेन यथायोग्यमुपपादिताः समाहूतसकलप्रधानलोकेन **समरकेतु**नान्येन च प्रणयिना राजसमूहेन सहितः स्नानभोजनादिकाः क्रिया निरवर्तयत्। अपराह्णसमये च तस्याहारमण्डपाजिरनिषण्णस्य निकटोपविष्टविशिष्टेष्टराजलोकस्य राज्ञा समादिष्टः

परं सान्द्रम्, **सख्यं** मित्रताम्, **आनेयः** प्रापणीयः, कदा केन प्रकारेण? **आपत्सु** आपत्कालेऽपि, **अपरिहारेण** अपरित्यागेन; **सम्पत्सु** सम्पत्काले, अभ्युदयवेलायामिति यावत्, **आदरातिशयेन** अत्यन्तादरेण; **समानगुणेषु** तुल्यगुणकव्यक्त्यपेक्षयापि, यद्वा व्यक्त्यन्तरतुल्यगुणेष्वपि, **गौरवोत्कर्षेण** असाधारणत्वोत्कीर्तनेन; **विवादेषु** अन्यैः सह विरोधेषु, **पक्षग्रहणेन** एतत्पक्षपातेन; **नूतनार्थलाभेषु** नवीनवित्तलाभेषु, **संविभजनेन** तादृशवित्तस्य सम्यग्वण्टनेन; **नर्मसु** क्रीडासु, **अमर्मोद्घट्टनेन** मर्मप्रदेशानुद्घट्टनेन; **मन्त्रणेषु** रहस्यविचारणावसरेषु, **अदूरीकरणेन** अनपसारणेन; **दारसन्निधौ** स्वभार्यासन्निधावपि, **अविकारदर्शनेन** अलज्जाप्रकटनेन; **प्रणयकलिकोपेषु** प्रणयेन-स्नेहेन, यः कलिः-कलहः, तज्जन्यकोपेषु, **स्वयं** स्वेनैव, **अनुवर्तनेन** अनुसरणेन; **उत्सवेषु** शुभकार्येषु, **अग्रपूजासम्पादनेन** सर्वप्रथमसत्कारेण; **प्रारब्धवस्तुनिर्वहणेषु** प्रारब्धकार्यसम्पादनेषु, **स्तुतिप्रपञ्चनेन** गुणोत्कीर्तनविस्तारेण; **प्रतिपन्नकार्येषु** निश्चितकार्येषु, **अविसंवादनेन** विरोधाप्रकटनेन; **च** पुनः, **सर्वत्र** सर्वेषु कार्येषु, **अतिविश्वासदर्शनेन** अत्यन्तविश्वासप्रकटनेन। **एषः** अयम्, समरकेतुकुमार इत्यर्थः, **ते** तव, **भ्राता** सोदरः, **च** पुनः, **भृत्यः** सेवकः, **च** पुनः, **सचिवः** मन्त्री, **च** पुनः, **सहचरः** सखा [क्र]। **इत्युक्त्वा** इति कथयित्वा, **विसर्जितास्थानराजकः** विसर्जितं-स्वस्वस्थानगमनार्थमाज्ञप्तम्, आस्थानस्य-अधिष्ठितसभायाः, राजकं-नृपगणो येन तादृशः, **नृपतिः** मेघवाहनः, **आसनात्** सिंहासनात्, **उत्तस्थौ** उत्थितवान्। **कुमारोऽपि** हरिवाहनोऽपि, **तातः** पिता, यत् **आज्ञापयति** आदिशति, तदहमवश्यं करिष्यामीति शेषः, **इत्यभिदधानः** इति ब्रुवाणः, प्रतिजानान इत्यर्थः, **समरकेतुं** तत्संज्ञकं कुमारम्, **करे** हस्ते, गृहीत्वा, **निषिद्धपरिजनः** निवर्तिततदनुयायिवर्गः, **शुद्धान्तसञ्चारोचितेन** अन्तःपुरसञ्चारयोग्येन, **परिचारकगणेन** भृत्यवर्गेण, **अनुगम्यमानः** अनुस्रियमाणः, **मदिरावतीभवनं** मदिरावत्याः-स्वमातुः, भवनं-प्रासादम्, **अगच्छत्** गतवान्। **तत्र च** मदिरावतीभवने च, **मातुः** मदिरावत्याः, **कृतप्रणामः** कृतचरणपातः सन्, **समरकेतुं** तदाख्यमागतकुमारम्, **दर्शयित्वा** दृष्टिगोचरीकृत्य, **कृतसकलतद्वृत्तान्तसंकथः** कृता, सकलस्य-समस्तस्य, तद्वृत्तान्तस्य-तदीयसमाचारस्य, संकथा-संलापो येन तादृशः, **चिरं** दीर्घकालम्, **स्थित्वा** तत्रावस्थितिं कृत्वा, **अवाप्तवस्त्रभूषणेन** मदिरावतीलब्धवस्त्रालङ्कारेण, **तेन** समरकेतुना, **अनुगम्यमानः** अनुस्रियमाणः, **स्वावासं** स्वभवनम्, **अगच्छत्** गतवान्, **तत्र च** तस्मिन्नावासे च, **आरब्धनिजकर्मणा** आरब्धस्वकार्येण, **सूदवारप्रमदाप्रायेण** सूदस्य-ओदनपाचकस्य, वारः-अवसरः, यासां तादृशप्रमदाप्रायेण-तादृशस्त्रीप्रचुरेण, **मदिरावतीपरिजनेन** मदिरावतीपरिचारिकाजनेन, **यथायोग्यं** यथोचितम्, **उपपादिताः** निष्पादिताः, **स्नानभोजनादिकाः** स्नानभोजनप्रभृतीः, **क्रियाः** कर्माणि, **समाहूतसकलप्रधानलोकेन** समाहूताः-सम्यगाहूताः, सकलाः-समस्ताः, प्रधानलोकाः-सचिवजना यस्य तादृशेन, **समरकेतुना** तदाख्यप्रकृतकुमारेण, **अन्येन** तदन्येन, **प्रणयिना** स्नेहिना, **राजसमूहेन** नृपसमूहेन च सहितः सन्, **निरवर्तयत्** समपादयत्। **अपराह्णसमये** मध्याह्नसमये, **आहारमण्डपाजिरनिषण्णस्य** भोजनभवनप्राङ्गणोविष्टस्य, पुनः **निकटो-**

सुदृष्टिनामाऽक्षपटलिकः प्रविश्य पट्टकारोपितनिरवशेषमभ्यर्णवर्तिभिरनेकैः कश्मीरादिमण्डलप्रतिबद्धैः प्रधान-नगरग्रामैरुपेतं कुमारभुक्तावखिलमुत्तरापथमर्पयांबभूव, **समरकेतोश्च** सर्वदायसहितानङ्गजीवनेऽङ्गादिजनपदान् प्रायच्छत् [ऋद]। एवं च दर्शितप्रसादेन नृपतिना प्रतिदिवसमापाद्यमाननवनवसत्कारयोः, नियुक्तनिज-परिवारया सादरं **मदिरावत्या** चिन्त्यमानस्नानासनविलेपनादिशरीरस्थितिसाधनयोः, अनुजीविनो राजपुत्र-जनस्य पात्रतानुसारेण संविभक्तस्वभुक्तिनगरग्रामनिवहनिनिश्चिन्तयोः, दुष्टदायादसमवष्टब्धराज्यैरागत्यागत्य दिङ्मुखेभ्यो निजपदार्थिभिः पार्थिवकुमारैरनवरतगृह्यमाणसेवयोः, नरेन्द्रसेवया प्रतिदिनमवन्ध्यीकृतोभय-संध्ययोः, दूरीकृतदुष्टसामन्तसख्योपचारव्यवहारयोः, गुणानुरागिभिरागन्तुकफलार्थिभिश्च द्वीपान्तरनराधिपै-र्वासोभिराच्छादनै रत्नालङ्कारैर्विलेपनैः फलैरायुधैर्यानैरन्यैश्च निजनिजदेशसंभवैरपूर्ववस्तुभिः सततमुपचर्य-

---

पविष्टविशिष्टेष्टराजलोकस्य निकटे–पार्श्वे, उपविष्टाः, विशिष्टाः–प्रशस्ताः, इष्टाः–अभिमता आत्मीया इति यावत्, राजलोकाः–नृपजना यस्य तादृशस्य, **तस्य** हरिवाहनस्य, हरिवाहनायेत्यर्थः, **कुमारभुक्तौ** कुमारस्य–हरिवाहनस्य, भुक्तौ–भोगोद्देशेन, तदीययोगक्षेमार्थमित्यर्थः, **राज्ञा** मेघवाहनेन, **समादिष्टः** सम्यगाज्ञप्तः, **सुदृष्टिनामा** शोभना दृष्टिः–व्याव-हारिकदृष्टिर्यस्येत्यन्वर्थसंज्ञकः, **अक्षपटलिकः** वित्तदानाऽऽदानादिव्यवहारजाताधिकृतः प्राड्विवाकपदप्रतिपाद्यः प्रधानपुरुषः, **प्रविश्य** मण्डपे प्रवेशं कृत्वा, **उत्तरापथम्** उदीच्यजनपदम्, **अर्पयांबभूव** ददौ, कीदृशम्? **पट्टकारोपितनिरव-शेषविशेषं** पट्टके–जनपदादिचित्रपट्टे, आरोपितः–चित्रितः, निरवशेषः–समस्तः, विशेषः–वैशिष्ट्यं यस्य तादृशम्, पुनः **अभ्यर्णवर्तिभिः** निकटवर्तिभिः, **काश्मीरादिमण्डलप्रतिबद्धैः** काश्मीरादिमण्डलान्तःस्थितैः, **प्रधाननगरग्रामैः** मुख्यनगरग्रामैः, **उपेतं** सहितम्, पुनः **अखिलम्** अशेषम्। **समरकेतोश्च** तन्नामककुमारस्य, पुनः **अङ्गजीवने** अङ्गस्य–देहस्य, जीवने–पोषणोद्देशेन, अङ्गस्य–अङ्गभूतामात्यादिपरिवारस्य जीवनोद्देशेन च, **सर्वदायसहितान्** अशेषभागसहितान्, **अङ्गादिजनपदान्** अङ्गादिदेशान्, **प्रायच्छत्** प्रदत्तवान् [ऋद]। **एवं च** अनेन प्रकारेण च, **दर्शितप्रसादेन** प्रकटितप्रसन्नताकेन, **नृपतिना** मेघवाहनेन, **प्रतिदिवसं** दिने दिने, **आपाद्यमाननवनवसत्कारयोः** आपाद्यमानः–प्राप्यमाणः, नवनवः–नवीनप्रकारकः, सत्कारः–पारितोषिकं, ययोस्तादृशयोः, पुनः **नियुक्तनिजपरिवारया** नियुक्तः–तत्परि-चर्यायामधिकृतः, निजपरिवारः–स्वपरिचारकलोको यया तादृश्या, **मदिरावत्या** राज्ञ्या, **चिन्त्यमानस्नानासनविलेप-नादिशरीरस्थितिसाधनयोः** चिन्त्यमानानि–अवधानविषयीक्रियमाणानि, स्नानं–जलेन शरीरमार्जनम्, आसनम्–उपवेशनम्, विलेपनं–चन्दनादिद्रवोपलेपनम्, तदादीनि, शरीरस्थितिसाधनानि–शरीरस्वास्थ्योपकरणानि कर्माणि ययोस्तादृशयोः; पुनः **अनुजीविनोः** तदधीनजीवनयोः, **राजपुत्रजनस्य** कुमारजनस्य, **पात्रतानुसारेण** योग्यतानुसारेण, **संविभक्त-स्वभुक्तिनगरग्रामनिश्चिन्तयोः** संविभक्तैः–सम्यग्विभज्य समर्पितैः, स्वभुक्तये–स्वभोगाय, स्वनिर्वाहार्थैरिति यावत्, नगर-ग्रामैः, निश्चिन्तयोः–जीवनचिन्तारहितयोः, पुनः **दुष्टदायादसमवष्टब्धराज्यैः** दुष्टैः–परधनलुब्धैः, दायादैः–धनभागग्रही-तृभिः, समवष्टब्धं–समाक्रान्तम्, राज्यं येषां तादृशैः, **निजपदार्थिभिः** स्वस्वराज्यप्रत्यावर्तनप्रार्थिभिः, **पार्थिवकुमारैः** नृपात्मजैः, **दिङ्मुखेभ्यः** दिगन्तेभ्यः, **आगत्य आगत्य** उपस्थाय उपस्थाय, **अनवरतगृह्यमाणसेवयोः** सतत-क्रियमाणसेवयोः; पुनः **नरेन्द्रसेवया** नरेन्द्रस्य–मेघवाहनस्य, सेवया–शुश्रूषया, **प्रतिदिनं** दिने दिने, **अवन्ध्यीकृतोभय-सन्ध्ययोः** अवन्ध्यीकृते–सफलीकृते, उभयसन्ध्ये–सायं प्रातश्च याभ्यां तादृशयोः; पुनः **दूरीकृतदुष्टसामन्तसख्यो-पचारव्यवहारयोः** दूरीकृतं–वर्जितम्, दुष्टानां–दुर्जनानाम्, सामन्तानाम्–अधिकृतक्षुद्रनृपाणाम्, सख्यं–मैत्री, उपचारः–सेवा, व्यवहारः–दानाऽऽदानादिः, याभ्यां तादृशयोः; पुनः **द्वीपान्तरनराधिपैः** अन्यद्वीपनृपैः, **सततं** निरन्तरम्, **उप-चर्यमाणयोः** सेव्यमानयोः, कीदृशैः? **गुणानुरागिभिः** गुणस्नेहिभिः, आगन्तुकैः–आगन्तृभिः, आगतैरित्यर्थः, पुनः **फलार्थिभिः** किञ्चित्किञ्चिदभिमतफलप्रार्थिभिः, **आगन्तुकफलार्थिभिरिति** पाठे भाविफलाभिलाषिभिः, कैर्वस्तुभिः? **आच्छादनैः** शरीरावरणभूतैः, **वासोभिः** वस्त्रैः, पुनः **विलेपनैः** केशरादिसुगन्धिद्रवैः, **फलैः** स्वादुफलोपहारैः, पुनः **अन्यैः** तद्व्यतिरिक्तैः, **निजनिजदेशसम्भवैः** स्वस्वदेशोत्पन्नैः, **अपूर्ववस्तुभिः** विलक्षणवस्तुभिः; पुनः **गुणगणैः**

माणयोः, उपचीयमानया तारुण्यलक्ष्म्या प्रतिक्षणमुल्लसितै रूपबललावण्यादिभिः शारीरैरन्तःकरणजैश्च सत्यशौर्यावबोधवैदग्ध्यपुरस्सरैर्गुणगणैरगणितक्रममाक्रम्यमाणयो रतिसुखपराङ्मुखेन धूर्जटिललाटलोचनाग्निनेव हृदयेनानङ्गीकृतकन्दर्पयोः, दुष्टजनपददृष्टिदोषसंरक्षार्थमिव पौरलोकेन स्वान्तेषु सततधार्यमाणयोः, शरदिन्दुमण्डलालोकेऽप्यप्रगुणितगुणेन सुरभिसमयेऽप्यघटिताभिनवमार्गणेन जलदागमेऽप्यनाकृष्टचापयष्टिना दृष्टदुर्वारभुजपराक्रमेणोत्पन्नसंत्रासेनेव दूरस्थेन मकरलक्ष्मणाऽलक्ष्यीकृतदेहयोः [लृ] । कदाचिन्निजनिजास्त्रकौशलदर्शनेन कदाचित् पदवाक्यविचारेण कदाचित् प्रमाणप्रमेयस्वरूपनिरूपणेन कदाचिदभिमतागमग्रन्थार्थसमर्थनेन कदाचिदसद्दर्शनोक्तयुक्तिनिराकरणेन कदाचिन्नीतिशास्त्रनिबन्धपाठेन कदाचित् कलाविषयविचार-

---

टिप्पनकम्—**आक्रम्यमाणयोरतिसुखपराङ्मुखेन धूर्जटिललाटलोचनाग्निनेव हृदयेनानङ्गीकृतकन्दर्पयोः** एकत्र कामभार्यासौख्यबाधकेन, अन्यत्र अतिसौख्यपराङ्मुखेन, एकत्र अनङ्गीकृतकन्दर्पता–विनाशितकामता, अन्यत्र भस्मीकृतकामयोः । गुणः–ज्या । सुरभिः–चैत्रः [लृ] ।

गुणसमूहैः, **अगणितक्रमम्** अनपेक्षितक्रमं यथा स्यात् तथा, युगपदेवेत्यर्थः, **आक्रम्यमाणयोः** आश्रीयमाणयोः, कैः ? **उपचीयमानया** वर्धमानया, **तारुण्यलक्ष्म्या** यौवनश्रिया, **प्रतिक्षणं** प्रतिपलम्, **उल्लसितैः** उल्लासितैः, **रूपबललावण्यादिभिः** स्वरूप-शक्ति-सौन्दर्यादिभिः, **शारीरैः** शरीराश्रितैः, पुनः **सत्य-शौर्याऽवबोधवैदग्ध्यपुरस्सरैः** सत्यं–निष्कपटता, शौर्यं–शूरत्वम्, अवबोधः–विवेकः, वैदग्ध्यं–नैपुण्यम्, तत्प्रमुखैः, **सत्त्वशौर्य**त्यादिपाठे सत्त्वं–धर्मज्ञानैश्वर्यादिहेतुर्गुणविशेषः, **अन्तःकरणजैः** अन्तःकरणाश्रितैः; पुनः **धूर्जटिललाटलोचनाग्निनेव** धूर्जटेः–शिवस्य, ललाटलोचनेन–भालस्थनेत्रभूतेन, अग्निना इव, **रतिसुखपराङ्मुखेन** कामिनीसम्भोगविरक्तेन, अतिसुखपराङ्मुखेन वा, पक्षे रतिः–कामदेवभार्या, तत्सुखपराङ्मुखेन तत्सुखबाधकेन, **हृदयेन** चेतसा, **अनङ्गीकृतकन्दर्पयोः** अनङ्गीकृतः–अस्वीकृतः, तिरस्कृत इति यावत्, पक्षे अनङ्गीकृतः–अङ्गरहितीकृतः, भस्मीकृत इति यावत्, कन्दर्पः–कामदेवो याभ्यां तादृशयोः, पुनः **दुष्टजनपददृष्टिदोषसंरक्षार्थमिव** दुष्टानां जनपदानां–जनपदवासिनां यो दृष्टिदोषस्ततः संरक्षार्थं–सम्यग्रक्षणार्थमिव, **पौरलोकेन** पुरवासिजनेन, **स्वान्तेषु** स्वस्वहृदयेषु, **सततधार्यमाणयोः** प्रच्छन्नतया निरन्तरनिवास्यमानयोः; पुनः **शरदिन्दुमण्डलालोकेऽपि** शरदृतुचन्द्रमण्डलप्रकाशेऽपि, **अप्रगुणितगुणेन** अप्रगुणितः–अनुन्नमितः, गुणः–मौर्वी येन तादृशेन, पुनः **सुरभिसमयेऽपि** वसन्तकालेऽपि, **अघटिताभिनवमार्गणेन** अघटिता–धनुष्यनारोपिता, अभिनवाः–अभिनवोत्फुल्लकुसुमरूपाः, मार्गणाः–बाणा येन तादृशेन, पुनः **जलदागमेऽपि** वर्षाकालेऽपि, **अनाकृष्टचापयष्टिना** अनाकृष्टा–अनानता, चापयष्टिः–धनुर्दण्डो येन तादृशेन, अत एव **दृष्टदुर्वारभुजपराक्रमेण** दृष्टः–अनुभूतः, दुर्वारः–दुर्धर्षः, भुजपराक्रमः–तयोर्बाहुबलं येन, तादृशेन, अत एव **उत्पन्नसंत्रासेनेव** उत्पन्नः–संजातः, संत्रासः–सम्यक् त्रासः–भयं यस्य तादृशेनेव, **दूरस्थेन** दूरवर्तिना, **मकरलक्ष्मणा** कामदेवेन, **अलक्ष्यीकृतदेहयोः** अलक्ष्यीकृतः–स्वलक्ष्यतामनापादितः, देहः–शरीरं ययोस्तादृशयोः [लृ] । पुनः **भावुकैः** भव्यैः, मनोहरैरिति यावत्, **सुहृद्भिः** स्वमित्रैः, च पुनः, **विद्वद्भिः** विद्वज्जनैः, **रममाणयोः** क्रीडतोः, केन केन कर्मणा ? **कदाचित्** कस्मिंश्चित् काले, **निजनिजास्त्रकौशलदर्शनेन** स्वस्वास्त्रविद्यानैपुण्यप्रदर्शनेन, पुनः **कदाचित्** कस्मिंश्चिच्च समये, **पदवाक्यविचारेण** पद-वाक्यविवेचनेन, पुनः **कदाचित्** कस्मिंश्चित् समये, **प्रमाण-प्रमेयस्वरूपनिरूपणेन** प्रत्यक्षादिप्रमाणानां तत्प्रमेयाणां च स्वरूपनिर्वचनेन, पुनः **कदाचित्** कुत्रचित् काले, **अभिमतागमग्रन्थार्थसमर्थनेन** अभिमताः–स्वाभिप्रेताः ये, आगमग्रन्थाः–धर्मशास्त्राणि तेषां येऽर्थास्तेषां समर्थनेन–सङ्गमनेन, पुनः **कदाचित्** कस्मिंश्चित् काले तु, **असद्दर्शनोक्तयुक्तिनिराकरणेन** असद्दर्शनोक्तानाम्–असमीचीनदर्शनप्रतिपादितानाम्, युक्तीनाम्–उपपत्तीनाम्, निराकरणेन–खण्डनेन, पुनः **कदाचित्** कस्याञ्चिद् वेलायाम्, **नीतिशास्त्रनिबन्धपाठेन** नीतिशास्त्रसम्बन्धिनां निबन्धानां–किञ्चिद्विषयोपपादकवाक्यप्रबन्धानां पाठेन, पुनः **कदाचित्** कस्मिंश्चिदवसरे, **कलाविषयविचारकेलिकलहेन** कलाविषयः–शिल्पविषयको यो विचारः–युक्तिप्रतियुक्ति-

केलिकलहेन कदाचिद्रसाभिनयभावप्रपञ्चोपवर्णनेन कदाचिद् वेणुवीणामृदङ्गादिवाद्यविनोदेन कदाचिच्चिरन्तनकवीन्द्रकाव्यमुद्राभ्यसनेन भावुकैः सुहृद्भिर्विद्वद्भिश्च सह रममाणयोः, एकत्र कल्पिताशनस्नानासनशयनयोः, सदृशवेषालङ्कारधारिणोः, शाक्यशिष्ययोरिवानुपजातविप्रयोगदुःखयोः, सुखमया इव धृतिमया इव अमृतमया इव प्रीतिमया इवातिचक्रमुः कतिपये दिवसाः [ऌ]। यथोत्तरं प्रकटितप्रसादेन नृपतिना दृश्यमानोऽपि सुतनिर्विशेषमीषदपि **समरकेतु**र्नोत्सेकमगमत्। अपहाय भुजवीर्यमन्वकृत **हरिवाहनस्य** सर्वानपि गुणान्, आत्मगुणगणेन प्रगुणितश्च परमया भक्त्या प्रीत्या च निःसामान्यया राजानमिव तमहर्निशमसेवत। **हरिवाहनो**ऽपि तद्गुणानुरञ्जितमनाः स्वप्नदृष्टेऽपि **समरकेतौ** विपक्षजनपद इव जिगीषुः परां मुदमवापत् [ए]।

एकदा च स ग्रीष्मसमये प्रातरेवोत्थाय निर्वर्तितस्नानभोजनादिविधिरुदधिजलविलुलितवासुकिमुक्तनिर्मोकनिर्मलं परिधाय वासोयुगलमुन्निद्रमल्लिकामुकुलरचितशेखरो मदान्धमधुकरध्वानवाचालैरचल इव

टिप्पनकम्—अनुपजातविप्रयोगदुःखयोः एकत्र अनुत्पन्नब्राह्मणसम्बन्धकष्टयोः, अन्यत्र अजातविरहदुःखयोः [ऌ]।

विवेचनम्, तस्य केलिकलहेन–विनोदार्थं कृतेन वाक्कलहेन, **कदाचित्** कस्मिंश्चित् समये, **रसाभिनयभावप्रपञ्चोपवर्णनेन** रसानां–वीरादिरसानाम्, अभिनयस्य–चेष्टाविशेषस्य, तद्द्वारा तदभिव्यक्तिप्रयोजका इत्यर्थः, ये भावाः–आलम्बनोद्दीपनसञ्चारिभावाः, तेषां प्रपञ्चस्य–विस्तरस्य, उपवर्णनेन–उत्कीर्तनेन, पुनः **कदाचित्** कस्मिंश्चित् काले, **वेणुवीणामृदङ्गादिवाद्यविनोदेन** वेणुः–वंशीवाद्यम्, वीणा–स्वनामख्यातवाद्यविशेषः, मृदङ्गः–मुरजनामा वाद्यविशेषः, तदादिवाद्यैः–वेण्वादिवाद्यवादनेन, यो विनोदः–आनन्दस्तेन पुनः **कदाचित्** कस्मिंश्चिदवसरे, **चिरन्तनकवीन्द्रकाव्यमुद्राभ्यसनेन** चिरन्तनानां–प्राचीनानाम्, कवीन्द्राणां–महाकवीनाम्, या काव्यमुद्रा–काव्यरचना, काव्यच्छटेत्यर्थः, तस्या अभ्यसनेन–परिशीलनेन। **एकत्र** एकस्थाने, **कल्पिताशनस्नानासनशयनयोः** कल्पितं–रचितम्, अशनं–भोजनम्, स्नानं–जलेन शोधनम्, आसनम्–उपवेशनम्, शयनं–शय्या च, ययोस्तादृशयोः; पुनः **सदृशवेषालङ्कारधारिणोः** तुल्यवेषभूषणवतोः; पुनः **शाक्यशिष्ययोरिव** शाक्यमुनिशिष्ययोरिव, **अनुपजातविप्रयोगदुःखयोः** शाश्वतिकसाहचर्यवशादनुत्पन्नविश्लेषवेदनयोः, पक्षे अनुत्पन्नब्राह्मणसम्बन्धकष्टयोः, तयोरिति शेषः, **सुखमया इव** आनन्दमया इव, **धृतिमया इव** सन्तोषमया इव, **अमृतमया इव** अमृतपूर्णा इव, **प्रीतिमया इव** प्रीतिप्रचुरा इव, **कतिपयेऽपि** बहवोऽपि, **दिवसाः** दिनानि, **अतिचक्रमुः** अतिक्रान्ताः, व्यतीता इत्यर्थः [ऌ]।

यथोत्तरम् उत्तरोत्तरक्रमेण, **प्रकटितप्रसादेन** प्रकाशितप्रसन्नताकेन, **नृपतिना** मेघवाहनेन, **सुतनिर्विशेषं** स्वकुमारतुल्यं यथा स्यात् तथा, **दृश्यमानोऽपि** उपलाल्यमानोऽपि, **समरकेतुः** तन्नामा राजकुमारः, **ईषदपि** किञ्चिदपि, **उत्सेकं** तत्प्रयुक्ताभिमानम्, औद्धत्यमित्यर्थः, न **अगमत्** प्राप्तवान्। **भुजवीर्यं** बाहुविक्रमाभिमानम्, **अपहाय** त्यक्त्वा, **हरिवाहनस्य** तत्संज्ञकस्य कुमारस्य, **सर्वानपि** समस्तानपि, गुणान्, **अन्वकृत** अनुहृतवान्। **च** पुनः, **आत्मगुणगणेन** स्वगुणसमूहेन, **प्रगुणितः** परिपूर्णः सन्, **परमया,** अत्यन्तया, **भक्त्या** श्रद्धया, **निःसामान्यया** असाधारणया, **प्रीत्या** स्नेहेन, **राजानमिव** मेघवाहनमिव, **तं** हरिवाहनम्, **अहर्निशम्** रात्रिंदिवम्, **असेवत** सेवते स्म। **हरिवाहनोऽपि** तदाख्यकुमारोऽपि, **तद्गुणानुरञ्जितमनाः** तद्गुणप्रीणितहृदयः सन्, **जिगीषुः** वैरिविजयेच्छुः, **विपक्षजनपद इव** रिपुराज्य इव, समरकेतौ, **स्वप्नदृष्टेऽपि** स्वप्नावस्थायामवलोकितेऽपि, **पराम्** उत्कृष्टाम्, **मुदं** हर्षम्, **अवापत्** प्राप्तवान् [ए]।

एकदा च एकस्मिन् दिने च, **स** हरिवाहनः, **ग्रीष्मसमये** ग्रीष्मकाले, **प्रातरेव** प्रातःकाल एव, **उत्थाय** जागरित्वा, **निर्वर्तितस्नानभोजनादिविधिः** सम्पादितस्नानभोजनादिकार्यः, **उदधिजलविलुलितवासुकिमुक्तनिर्मोकनिर्मलम्** उदधिजले–समुद्रजले, विलुलितः–सञ्चलितो यो, वासुकिः–सर्पराजः, तेन मुक्तः–त्यक्तो यो, निर्मोकः–जीर्णत्वक्, तद्वद् निर्मलं–शुभ्रम्, वासोयुगलम्–उत्तरीयाधरीयवस्त्रद्वयम्, **परिधाय** धारयित्वा, **सरयूतटासङ्गि** सरयूतटवर्ति, **मत्तकोकिलं** मत्ताः–रसालरसास्वादोन्मत्ताः, कोकिला यस्मिन्नित्यन्वर्थसंज्ञकम्, **बाह्योद्यानम्** अयोध्यातो बहिर्वर्ति उद्यानं–क्रीडाकाननम्, **अगच्छत्** गतवान्, **नामे**ति वाक्यालङ्कारे। कीदृशः? **उन्निद्रमल्लिकामुकुलरचितशेखरः** उन्निद्रैः–विकसितैः,

मैनाकनामा निर्झरौघैरंसशिखरावलम्बिभिर्धूलीकदम्बप्रालम्बैरभिनवैरुद्भासमानः, शिरीषतरुकुसुमकल्पितकर्णपूरः, कर्पूरपरिमलमुचा चन्दनद्रवेण विहितसर्वाङ्गीणाङ्गरागः, तत्कालोपनीतरत्नोपलशकलशीतलममलमुक्ताफलप्रायमल्पमुद्वहन् भूषणकलापम्, अच्छकान्तिरत्नदर्पणप्रतिबिम्बितैः प्रीतिनिश्चलचक्षुषो जनस्य सर्वतः सहस्रसंख्यैर्विलोचनैः शबलितगात्रयष्टिः, ऐरावताधिरूढः सहस्राक्ष इव साक्षादुपलक्ष्यमाणः, निक्षिप्तनिजवेषानुरूपनिःशेषनेपथ्यस्य तत्क्षणगृहीतनिशितसृणेर्निषादितां प्रतिपद्य सिन्धुरस्कन्धमध्यासितस्य **समरकेतो**रधिस्कन्धमर्पितोभयबाहुपाशः, पश्चिमासनाध्यासिना ताम्बूलदायकेन प्रतिवेलमुद्धूयमानकनकदण्डडामरैकचामरः, तुलितगत्वरतमालतरुखण्डेन मायूरातपत्रमण्डलेन जयन्त इव संक्रन्दनानुचरीकृतेन बालजलधरव्यूहेनान्धकारिताग्रिमभूमिरग्रेसरेण सरयूतटासङ्गि **मत्तकोकिलं** नाम बाह्योद्यानमगच्छत् [ऐ]।

मल्लिकामुकुलैः–मल्लिकाख्यकुसुमकलिकाभिः, रचितः–निर्मितः, शेखरः–शिरोमाल्यं येन तादृशः; पुनः **मदान्धमधुकरध्वानवाचालैः** मदान्धानां–मदाकुलानाम्, मधुकराणां–भ्रमराणाम्, ध्वानैः–गुञ्जनैः, वाचालैः–मुखरैः, **अंसशिखरावलम्बिभिः** स्कन्धोपरिभागावलम्बिभिः, **अभिनवैः** नवीनैः, **धूलीकदम्बप्रालम्बैः** धूलीकदम्बानां–परागप्रचुरकदम्बाभिधवृक्षाणाम्, प्रालम्बैः–कण्ठादृ ऋजुतया लम्बमानमाल्यैः, **उद्भासमानः** उद्दीप्यमानः, कैः क इव ? **अंसशिखरावलम्बिभिः** स्कन्धशृङ्गावलम्बिभिः, **निर्झरौघैः** वारिप्रवाहसमूहैः, **मैनाकनामा** मैनाकसंज्ञकः, **अचलः** पर्वत इव; पुनः **शिरीषतरुकुसुमकल्पितकर्णपूरः** शिरीषतरोः–शिरीषाख्यवृक्षविशेषस्य, यत् कुसुमं–पुष्पम्, तेन कल्पितः–रचितः, कर्णपूरः–कर्णाभरणं येन तादृशः; पुनः **कर्पूरपरिमलमुचा** कर्पूरसौरभाविष्कर्त्रा, **चन्दनद्रवेण** चन्दनकर्दमेन, **विहितसर्वाङ्गीणाङ्गरागः** विहितः–कल्पितः, सर्वाङ्गीणः–सर्वाङ्गव्यापकः, अङ्गरागः–अङ्गविलेपनं येन तादृशः; पुनः **तत्कालोपनीतरत्नोपलशकलशीतलं** तत्कालं–तत्क्षणम्, उपनीततानि–प्रापितानि, योजितानीति यावत्, यानि, रत्नोपलशकलानि–रत्नरूपपाषाणभागाः, तैः शीतलम्, **अमलमुक्ताफलप्रायं** स्वच्छमुक्तामणिप्रचुरम्, **अल्पं** परिमितम्, **भूषणकलापम्** आभरणसमूहम्, **उद्वहन्** धारयन्; अत एव **अच्छकान्तिरत्नदर्पणप्रतिबिम्बितैः** अच्छकान्तिरत्नदर्पणेषु–निर्मलकान्तिकलितरत्नशकलरूपदर्पणेषु, प्रतिबिम्बितैः-प्रतिबिम्बरूपेण दृश्यमानैः, **सहस्रसंख्यैः** दशशतसंख्याकैः, **प्रीतिनिश्चलचक्षुषः** प्रीत्या–स्नेहेन, निश्चलं–निस्पन्दम्, चक्षुर्यस्य तादृशस्य, **जनस्य** मार्गवर्तिदर्शकलोकस्य, **लोचनैः** नेत्रैः, **सर्वतः** समन्तात्, **शबलितगात्रयष्टिः** शबलिता–चित्रिता, व्याप्तेत्यर्थः, गात्रयष्टिः–शरीररूपा यष्टिर्यस्य तादृशः; अत एव **ऐरावताधिरूढः** ऐरावताख्यमहागजारूढः, **साक्षात् सहस्राक्ष इव** साक्षादिन्द्र इव, **उपलक्ष्यमाणः** प्रतीयमानः; पुनः **समरकेतोः** तदाख्यप्रकृतकुमारस्य, **अधिस्कन्धं** स्कन्धोपरि, **अर्पितोभयबाहुपाशः** अर्पितः–स्थापितः, उभयबाहुपाशः–उभयबाहुरूपः, पाशः–बन्धनविशेषो येन तादृशः, कीदृशस्य समरकेतोः ? **निक्षिप्तनिजवेषानुरूपनिःशेषपथ्यस्य** निक्षिप्तं–त्यक्तम्, निजवेषानुरूपं–नृपकुमारवेषोचितम्, निःशेषं–समस्तम्, नेपथ्यं–कृत्रिमशरीरशोभा येन तादृशस्य, पुनः **तत्क्षणगृहीतनिशितसृणेः** तत्क्षणं–तत्कालम्, गृहीता–धृता, निशिता–तीक्ष्णा, सृणिः–अङ्कुशो येन तादृशस्य, पुनः **निषादितां** हस्तिपकताम्, **प्रतिपद्य** प्राप्य, **सिन्धुरस्कन्धं** हस्तिस्कन्धम्, **अध्यासितस्य** आरूढस्य; पुनः **पश्चिमासनाध्यासिना** पश्चिमं–पश्चाद्भागावस्थितम्, यद् आसनम्–उपवेशनाधारः, तदध्यासिना–तदुपवेशिना, **ताम्बूलदायकेन** ताम्बूलदानाधिकृतपुरुषेण, **प्रतिवेलं** सततम्, **उद्धूयमानकनकदण्डडामरैकचामरः** उद्धूयमानः–उत्क्षिप्यमाणः, कनकदण्डेन–सुवर्णमयदण्डेन, डामरः–सुदृढः, एकचामरः–प्रधानव्यजनविशेषो यस्य तादृशः; पुनः **तुलितगत्वरतमालतरुखण्डेन** तुलितः–उपमितः, गत्वराणां–जङ्गमभूतानाम्, तमालतरूणां–तमालाख्यश्यामलवृक्षविशेषाणाम्, खण्डः–विशेषः, वनमिति यावत्, येन तादृशेन, **अग्रेसरेण** अग्रगामिना, **मायूरातपत्रमण्डलेन** मयूरस्य–विकारो मायूरम्, मयूरपक्षनिर्मितमित्यर्थः, यद्वा मयूराणां समूहो मायूरम्, तद्रूपं यद् आतपत्रं–छत्रम्, तन्मण्डलेन–तत्समूहेन, **अन्धकारिताग्रिमभूमिः** अन्धकारिता–अन्धकारावृता, अग्रिमा–अग्रवर्तिनी, भूमिर्यस्य तादृशः, केन क इव ? **संक्रन्दनानुचरीकृतेन** संक्रन्दनेन–इन्द्रेण, अनुचरीकृतेन–अनुचरतामापादितेन, **जलधरव्यूहेन** मेघमण्डलेन, **जयन्त इव** तत्संज्ञक इन्द्रपुत्र इव [ऐ]।

प्रविश्य च तत्र परिमिताप्तराजपुत्रपरिवृत इतस्ततस्तत्कालबद्धमुग्धकुड्मलानि नवपरिमलाकृष्टवाचाल-षट्पदकुलानि धूलीकदम्बगहनानि, कादम्बकुलनिषेवितोद्दण्डकमलिनीपत्रखण्डाश्च तटपाटलाकुसुमवासिताम्भसः क्रीडादीर्घिकाः, निदाघतप्ताध्वगरचितपल्लवतल्पांश्च सलिलपरिपूरितालवालवलयितमध्यान् माधवीमण्डपान्, वातायनासीनवनिताकरप्रचेयतरुफलांश्च सुधापङ्कधवलान् प्रासादकानवलोकयन्नविरलफलितजलजम्बूनिकुरम्ब-मुद्गतस्तोककुसुमस्तबककेतकीस्तम्बमुच्चोच्चरच्चीत्कारमुखराणां प्रेङ्खतामनवरतमुद्घाटकानां घूर्णमानैर्नभसि नभस्व-दाघट्टनजर्जरैर्जलतुषारजालकैर्जडीकृतनिदाघकर्कशार्ककरवितानमापानकमृदङ्गरवजनितशृङ्गारैर्नगरीजनैर्वनशिख-ण्डिभिश्च युगपदारब्धताण्डवैर्मण्डितलतामण्डपमदूरवहदगाधनीरं सरय्वास्तीरपरिसरमुपासरत् [ओ] ।

टिप्पनकम्—उद्घाटकानां जलयन्त्राणाम् [ओ] ।

च पुनः, **प्रविश्य** तदन्तःप्रवेशं कृत्वा, **तत्र** तस्मिन्नुद्याने, **परिमिताप्तराजपुत्रपरिवृतः** परिमितैः—परिगणितैः, कतिपयैरित्यर्थः, आप्तैः—विश्वस्तैः, राजपुत्रैः—नृपकुमारैः, परिवृतः—परिवेष्टितः, **इतस्ततः** अत्र तत्र, **तत्कालबद्धमुग्ध-कुड्मलानि** तत्कालं-सद्यः, बद्धाः—गृहीताः, मुग्धाः—मनोहराः, कुड्मलाः—कलिका यैस्तादृशानि, पुनः **नवपरिमलाकृष्ट-वाचालषट्पदकुलानि** नवपरिमलैः—अभिनवसौरभैः, आकृष्टं-कृताकर्षणम्, वाचालं-मुखरम्, षट्पदकुलं-भ्रमणनिकरो यैस्तादृशानि, **धूलीकदम्बगहनानि** धूलीकदम्बानां—वसन्तविकासिकदम्बतरुविशेषाणाम्, गहनानि-वनानि; **च** पुनः, **काद-म्बकुलनिषेवितोद्दण्डकमलिनीपत्रखण्डाः** कादम्बकुलेन—हंससमूहेन, निषेविताः—कृतसेवाः, उद्दण्डानाम्—उन्नतकाण्डा-नाम्, कमलिनीनां—कमलसमूहानाम्, पत्रखण्डाः—दलदेशा यासु तादृशीः, पुनः **तटपाटलाकुसुमवासिताम्भसः** तटे-तीरे, यापाटला—कृष्णवृन्ताख्यलताविशेषः, तस्याः कुसुमैः—पुष्पैः, वासितानि—सुगन्धकलितानि, अम्भांसि—जलानि यासां तादृशीः; **क्रीडादीर्घिकाः** क्रीडावापिकाः; **च** पुनः, **निदाघतप्ताध्वगरचितपल्लवतल्पान्** निदाघतप्तैः—ग्रीष्मतप्तैः, अध्वगैः—पथिकैः, रचिताः—निर्मिताः, पल्लवतल्पाः—पल्लवशय्या येषु तादृशान्, **सलिलपरिपूरितालवालवलयितमध्यान्** सलिल-परिपूरितैः—जलपरिपूरितैः, आलवालैः—वृक्षमूले सेकार्थं मृदादिरचितैर्जलाधारैः, वलयितं—वेष्टितम्, मध्यं येषां तादृशान्, **माधवीमण्डपान्** माधवीनामकलतागृहान्; **च** पुनः, **वातायनासीनवनिताकरप्रचेयतरुफलान्** वातायनेषु-गवाक्षेषु, आसीनाभिः—उपविशन्तीभिः, वनिताभिः—वधूभिः, कराभ्यां—हस्ताभ्याम्, प्रचेयानि—प्रचेतुं—त्रोटयितुमित्यर्थः, शक्यानि, तरुफलानि—वृक्षफलानि येषु तादृशान्, अत्युन्नतानित्यर्थः, पुनः **सुधापङ्कधवलान्** सुधापङ्कैः—चूर्णद्रवैः, धवलान्—शुभ्रान्, **प्रासादकान्** राजगृहान्; **अवलोकयन्** पश्यन्, **सरय्वाः** सरयूनद्याः, **तीरपरिसरं** तीरप्रान्तम्, **उपासरत्** उपजगाम, कीदृशम्? **अविरलफलितजलजम्बूनिकुरम्बम्** अविरलं—निरन्तरम्, सान्द्रमित्यर्थः, फलितानां—संजात-फलानाम्, जलजम्बूनां—जलसम्पर्केण फलनशीलानां जम्बूवृक्षाणाम्, निकुरम्बं—वृन्दं यस्मिंस्तादृशम्; पुनः **उद्गतस्तोक-कुसुमस्तबककेतकीस्तम्बम्** उद्गतः—उन्मीलितः, स्तोकः—अल्पः, कुसुमस्तबकः—पुष्पगुच्छो येषां तादृशाः, केतकीस्तम्बाः—केतकीसंज्ञकलताकाण्डा यस्मिंस्तादृशम्; पुनः **उच्चोच्चरच्चीत्कारमुखराणाम्** उच्चं—तारं यथा स्यात् तथा, उच्चरद्भिः—उद्गच्छद्भिः, चीत्कारैः—ध्वनिविशेषैः, मुखराणां—शब्दायमानानाम्, पुनः **अनवरतं** निरन्तरम्, **प्रेङ्खतां** चलताम्, व्याप्रिय-माणानामिति यावत्, **उद्घाटकानां** कूपाज्जलोद्धरणयन्त्राणाम्, **नभसि** गगने, **घूर्णमानैः** भ्राम्यद्भिः, **नभस्वदाघट्टनजर्जरैः** नभस्वतः-पवनस्य, आघट्टनेन—आघातनेन, जर्जरैः—खण्डीभूतैः, **जलतुषारजालकैः** उक्तयन्त्रोद्भूतजलविकारात्मकहिमसंघातैः, **जडीकृतनिदाघकर्कशार्ककरवितानं** जडीकृतः—शिशिरीकृतः, शैत्यमापादित इति यावत्, निदाघे—ग्रीष्मकाले कर्कशः—कठोरः, अर्कस्य—सूर्यस्य, करवितानः—किरणविस्तारः, किरणरूपो गगनमण्डपोल्लोचो वा यस्मिंस्तादृशम्, पुनः **आपानक-मृदङ्गरवजनितशृङ्गारैः** आपानके—सुरापानगोष्ठ्याम्, यो मृदङ्गरवः—मृदङ्गाख्यवाद्यविशेषध्वनिः, तेन जनितः—आविर्भावितः, शृङ्गारः—तदाख्यरसविशेषो येषु तादृशैः, **युगपत्** एककाले, **आरब्धताण्डवैः** आरब्धनृत्यैः, **नगरीजनैः** प्रकृतनगरी-वास्तव्यलोकैः, **वनशिखण्डिभिः** वनमयूरैश्च, **मण्डितलतामण्डपम्** अलङ्कृतलतागृहम्; पुनः **अदूरवहदगाधनीरं**

तत्र च संनिधाने **मकरध्वजायतनस्य** नितान्तसुभगे भूविभागे प्रथममेवागत्य परिजनेन सूत्रितम्, अनतिमात्रोच्छ्रितस्य प्रशस्तविस्तारभाजः कूजितानुमीयमाननीलपल्लवप्रभान्धकारावगुण्ठितकलकण्ठकुलस्य लम्बमानबहलफललुम्बिस्तम्बभारदूरावर्जितोदारविटपस्य जलतुषारवर्षिणा सरलि(सि)तसमदहंससारसारवेण नभस्वता स्वैरमान्दोलितसान्द्रशाखामण्डलस्य तरुणसहकारखण्डस्य मध्ये महता बालकदलीवनेन कवचितम्, [औ], अचिरविकचानामजिरशिरीषशाखिनामलिविघट्टितैर्गलद्भिर्बालशुकशकुनिगलनालनीलैः प्रसूनस्तबकैराकाशजाह्नवीशैवलैरिव शैत्यलोलैरनुसृतपुरोभागम्, प्रतिभित्तिलम्बितविचित्रबिससूत्रचामरम्, प्रतिद्वारमाबद्धहरिचन्दनप्रवालवन्दनमालम्, प्रतिस्तम्भमारोपितहिमशिलाशालभञ्जिकम्, प्रतिगवाक्षमुपनिहितकालागुरु-

---

टिप्पनकम्—सारवेण सरय्वाः सत्केन [औ]।

अदूरे—समीपे, वहत्—स्पन्दमानम्, **अगाधम्** अतिगम्भीरं नीरं यस्य तादृशम्, [ओ]। **च** पुनः, **तत्र** तस्मिन्, तीर-परिसर इत्यर्थः, **जलमण्डपम्**—जलगृहम्, **अगच्छत्** गतवान्। कीदृशम्? **मकरध्वजायतनस्य** कामदेवमन्दिरस्य, **सन्निधाने** समीपे, **नितान्तसुभगे** अत्यन्तमनोहरे, **भूविभागे** भूमिप्रदेशे, **प्रथममेव** पूर्वमेव, **आगत्य** आगमनं कृत्वा, **परिजनेन** स्वपरिवारेण, **सूत्रितं** रचितम्, पुनः **तरुणसहकारखण्डस्य** परिणतातिसुरभिरसालवनस्य, मध्ये, **महता** विस्तृतेन, **बालकदलीवनेन** नवकदल्याख्यप्रसिद्धफलप्रसविवृक्षसमूहेन, **कवचितं** परितो वेष्टितम्, कीदृशस्य तस्य मध्ये? **अनतिमात्रोच्छ्रितस्य** अनत्यन्तोन्नतस्य; पुनः **प्रशस्तविस्तारभाजः** अतिविस्तारशालिनः; पुनः **कूजितानुमीयमाननीलपल्लवप्रभान्धकारावगुण्ठितकलकण्ठकुलस्य** कूजितेन—शब्दविशेषेण, अनुमीयमानम्—अनुमित्यात्मकज्ञान-विषयीक्रियमाणम्, नीलपल्लवानां—कृष्णवर्णनवदलानाम्, याः प्रभाः—कान्तयः, तद्रूपैः, अन्धकारैः, अवगुण्ठितम्—आच्छादितम्, कलकण्ठानां—कोकिलानाम्, कुलं—समूहो यस्मिंस्तादृशस्य; पुनः **लम्बमानबहलफललुम्बिस्तम्बभारदूरावर्जितोदारविटपस्य** लम्बमानाः—अधो नमन्त्यः, बहलफलाः—बहुफलाः, या लुम्बयः—प्रतिशाखावलम्बमानफलसमूहात्मका गुच्छाः, तासां स्तम्बस्य—समूहस्य, भारेण—गुरुतया, दूरं—दूरपर्यन्तम्, आवर्जिताः—आनमिताः, उदाराः—विस्तृताः, विटपाः—शाखा यस्य तादृशस्य; पुनः **नभस्वता** वायुना, **स्वैरं** स्वेच्छानुसारम्, **आन्दोलितसान्द्रशाखामण्डलस्य** आन्दोलितं—प्रकम्पितम्, सान्द्रं—निबिडम्, शाखामण्डलं—शाखासमूहो यस्य तादृशस्य, कीदृशेन वायुना? **जलतुषारवर्षिणा** जलहिमकणोत्क्षेपिणा, पुनः **सरसितसमदहंससारसारवेण** सरसिताः—सरसतामापादिताः, यद्वा सरसितेन—शब्देन सहिताः, शब्दायमाना इत्यर्थः, ये समदाः—मदान्विताः, हंससाराः—हंसश्रेष्ठाः, तैः सारवेण—मुखरेण, यद्वा सरसिताः—सशब्दाः, समदाः—हर्षान्विताश्च, हंससाराः—श्रेष्ठहंसा येन तेन सरसितसमदहंससारेण, पुनः सारवेण—सरयूनदीसम्बन्धिना, सरयूनदीजलसंस्पर्शिनेत्यर्थः [औ]। पुनः **प्रसूनस्तबकैः** पुष्पगुच्छैः, **अनुसृतपुरोभागम्** अनुसृतः—आश्रितः, व्याप्त इति यावत्, पुरोभागः—अग्रभागो यस्य तादृशम्, केषां तैः? **अचिरविकचानाम्** अभिनवविकसितानाम्, **अजिरशिरीषशाखिनां** प्राङ्गणवर्तिशिरीषाख्यवृक्ष-विशेषाणाम्; कीदृशैस्तैः? **अलिविघट्टितैः** भ्रमरविश्लेषितैः, पुनः **गलद्भिः** पतद्भिः; पुनः **बालशुकशकुनिगलनालनीलैः** बालानां—शैशवावस्थानाम्, शुकशकुनीनां—शुकाख्यपक्षिविशेषाणाम्, यद् गलनालं—कण्ठकाण्डः, तद्वद् नीलैः—कृष्ण-वर्णैः; कीदृशैः कैरिव? **शैत्यलोलैः** शैत्येन हेतुना, लोलैः—तरलैः, **आकाशजाह्नवीशैवलैरिव** आकाशजाह्नव्याः—आकाश-गङ्गायाः, शैवलैः—जलीयतृणविशेषैरिव; पुनः **प्रतिभित्तिलम्बितविचित्रबिससूत्रचामरं** प्रतिभित्ति—प्रतिकुड्यम्, लम्बिताः—अधोनताः, विचित्राः—विविधवर्णाः, बिससूत्राणां—मृणालतन्तूनाम्, चामराः—व्यजनविशेषा यस्मिंस्तादृशम्। पुनः **प्रतिद्वारमाबद्धहरिचन्दनप्रवालवन्दनमालं** प्रतिद्वारं—द्वारे द्वारे, आबद्धा—लम्बिता, हरिचन्दनप्रवालानां—हरिचन्दना-ख्यदिव्यवृक्षपल्लवानां चन्दनविशेषपल्लवानां वा, वन्दनमाला—तोरणमाला यस्मिंस्तादृशम्। पुनः **प्रतिस्तम्भं** प्रतिस्थूणम्, **आरोपितहिमशिलाशालभञ्जिकम्** आरोपिता—स्थापिता, हिमशिलायाः—शीतलप्रस्तरस्य, शालभञ्जिका—पुत्तलिका यस्मिंस्तादृशम्। पुनः **प्रतिगवाक्षं** प्रतिवातायनम्, **उपनिहितकालागुरुधूपघटिकम्** उपनिहिता—आरोपिता, कालागुरूणां—

धूपघटिकम्, सतारागणमिवाङ्गरागमणिभाजनैः, सान्धकारमिव परिमलाकृष्टमधुकरपटलैः, सज्योत्स्नमिव चीनांशुकवितानैः, अतिशिशिरतया च जलकलशैरपि निबिडकर्पटावगुण्ठितकर्णैरुत्पन्नशिरोवेदनैरिवाधिष्ठितम्, उद्यानहंसैरपि चञ्चुसंपुटधृतमृणालसूत्रपिण्डैः प्रावरणपटवानार्थिभिरिवेतस्ततो धावद्भिरध्यासितम्, आक्रीडगिरिभिरपि वारंवारमुच्चरत्तारमयूरकेकैराकारितनिदाघतप्तापरशिलोच्चयैरिवामुक्तसांनिध्यम्, अङ्घ्रिपैरपि परस्परसंवलितशाखैरभिलषितनिरन्तरशरीराश्लेषैरिव परीतम्, अरतिविनोदस्थानमिव सागरविप्रयोगे सरय्वाः, दुर्गनिवेशमिव ग्रीष्मनिर्दयावस्कन्देषु शिशिरस्य, दाहज्वरचिकित्सागृहमिव दिवसकरमण्डलप्रवेशेषु चन्द्रमसः, शिशिरोपचारमन्दिरमिव वज्राग्निसंतापातिवाहनेषु हिमगिरेः, उपरि वर्षतां च प्रावृषेण्ययन्त्रजलधराणामुद्धुरनिनादनर्तितमयूरमण्डलेन निपतता समन्तादश्रान्तसंतानेन निरन्तरन्यस्तचन्द्रमणिशिलाप्रणालविगलि-

---

सुगन्धिद्रव्यविशेषाणां यो धूपः, तस्य घटिका–घटी यस्मिंस्तादृशम्। पुनः **अङ्गरागमणिभाजनैः** अङ्गरागाणाम्–अङ्गविलेपनद्रव्याणाम्, मणिभाजनैः–मणिमयपात्रैः, **सतारागणमिव** तारागणसहितमिव। पुनः **परिमलाकृष्टमधुकरपटलैः** परिमलेन–सौरभेण, आकृष्टानि–कृताकर्षणानि, यानि मधुकरपटलानि–भ्रमरवृन्दानि, तैः, **सान्धकारमिव** अन्धकारसहितमिव। पुनः **चीनांशुकवितानैः** चीनांशुकं–चीनदेशरचितवस्त्रम्, तत्सम्बन्धिभिः, वितानैः–उल्लोचैः, **सज्योत्स्नमिव** ज्योत्स्नया–चन्द्रिकया सहितमिव; पुनः **अतिशिशिरतया** अतिशीतलतया हेतुना, **उत्पन्नशिरोवेदनैरिव** उत्पन्नशिरोव्यथैरिव, **निबिडकर्पटावगुण्ठितकर्णैः** निबिडेन–सान्द्रेण, कर्पटेन–पटखण्डेन, अवगुण्ठितः–आवृतः, कर्णौ येषां तादृशैः, **जलकलशैरपि** जलपूर्णघटैरपि, किमुत तत्रत्यमनुष्यैरित्यर्थः, **अधिष्ठितम्** आश्रितम्। पुनः **प्रावरणपटवानार्थिभिरिव** प्रावरणपटः–शीतावरणवस्त्रम्, तस्य वानं–निर्माणम्, तदर्थिभिरिव–तदभिलाषिभिरिवेत्युत्प्रेक्षा, **चञ्चुसम्पुटधृतमृणालसूत्रपिण्डैः**, चञ्चुसम्पुटेन–सम्पुटितचञ्चुभ्याम्, धृतः–गृहीतः, मृणालसूत्रपिण्डः–बिसतन्तुपिण्डो यैस्तादृशैः, पुनः **इतस्ततः** अत्र तत्र, **धावद्भिः** सञ्चरद्भिः, **उद्यानहंसैरपि** क्रीडाकाननहंसैरपि, किमुतान्यजनैरित्यर्थः, **अध्यासितम्** अधिष्ठितम्। पुनः **वारंवारम्** अनेकवारम्, **उच्चरत्तारमयूरकेकैः** उच्चरन्ती, तारा–उच्चा, मयूराणां केका–कूजितविशेषो येषु येभ्यो वा तादृशैः, अत एव **आकारितनिदाघतप्तापरशिलोच्चयैरिव** आकारिताः–शैत्यानुशीलनाय आहूताः, निदाघे–ग्रीष्मे, अपरे–अन्ये, शिलोच्चयाः–पर्वता यैस्तादृशैरिवेत्युत्प्रेक्षा, **आक्रीडगिरिभिरपि** क्रीडापर्वतैरपि, **अमुक्तसान्निध्यम्** अमुक्तम्–अत्यक्तम्, सान्निध्यं यस्य तादृशम्। पुनः **परस्परसंवलितशाखैः** परस्परं संवलिता–सम्पृक्ता, शाखा येषां तादृशैः, अतः **अभिलषितनिरन्तरशरीराश्लेषैरिव** अभिलषितः, निरन्तरम्–अनवरतम्, शरीराश्लेषः–शरीरासङ्गो यैस्तादृशैरिवेत्युत्प्रेक्षा, **अङ्घ्रिपैः** पादपैः, **परीतं** व्याप्तम्। पुनः **सरय्वाः** सरयूनद्याः, **सागरविप्रयोगे** समुद्ररूपपतिविरहे, **अरतिविनोदस्थानमिव** अरतिः–खेदः, सन्ताप इत्यर्थः, तस्य विनोदः–अपनोदनम्, शमनमित्यर्थः, तस्य स्थानमिवेत्युत्प्रेक्षा। पुनः **शिशिरस्य** तत्संज्ञकस्य ऋतोः, **ग्रीष्मनिर्दयावस्कन्देषु** ग्रीष्मेण–ग्रीष्मर्तुना, ये निर्दयाः–दृढतराः, अवस्कन्दाः–आक्रमणानि, तेषु सत्सु, **दुर्गनिवेशमिव** तद्वारणार्थप्राकारनिवेशमिवेत्युत्प्रेक्षा। पुनः **चन्द्रमसः** चन्द्रस्य, **दिवसकरमण्डलप्रवेशेषु** सूर्यबिम्बप्रवेशेषु सत्सु, **दाहज्वरचिकित्सागृहमिव** तद्बिम्बकृतदाहजन्यज्वरस्य या चिकित्सा–प्रतीकारः, तद्गृहमिवेति चोत्प्रेक्षा। पुनः **हिमगिरेः** हिमालयपर्वतस्य, **वज्राग्निसन्तापातिवाहनेषु** वज्राग्निना–इन्द्रप्रक्षिप्तवज्रानलेन यः सन्तापः, तदतिवाहनेषु–तदुपशमनेषु, तदर्थमित्यर्थः, **शिशिरोपचारमन्दिरमिव** शीतोपचारगृहमिवेत्युत्प्रेक्षा। पुनः **स्फाटिकेन** स्फटिकमणिमयेन, **प्राकारवलयेनेव** प्राकारमण्डलेनेव, **पाथसां** जलानाम्, **प्रवाहेण** निर्झरेण, **प्रान्तेषु** पर्यन्तप्रदेशेषु, **कृतपरिक्षेपं** कृतः, परिक्षेपः–परिवेष्टनं यस्य तादृशम्, किंसम्बन्धिना तेन? **उपरि** ऊर्ध्वम्, **वर्षतां** वर्षणं कुर्वताम्, **प्रावृषेण्ययन्त्रजलधराणां** प्रावृषेण्याः–वर्षासम्बन्धिनो ये यन्त्राः, तद्रूपाणां जलधराणां–मेघानाम्, तत्सम्बन्धिनेत्यर्थः, कीदृशेन प्रवाहेण? **उद्धुरनिनादनर्तितमयूरमण्डलेन** उद्धुरेण–उच्चेन, निनादेन–ध्वनिना, नर्तितं–नृत्यं कारितम्, मयूरमण्डलं–मयूरसमूहो येन तादृशेन, पुनः **समन्तात्** सर्वतः, **निपतता** स्यन्दमानेन, पुनः **अश्रान्तसन्तानेन** अविच्छिन्नधारेण, पुनः **निरन्तरन्यस्तचन्द्रमणिशिलाप्रणालविगलितेन** निरन्तरम्–अविरलम्, न्यस्ता–स्थापिता, या चन्द्र-

तेन स्थवीयसा पाथसां प्रवाहेण प्राकारवलयेनेव स्फाटिकेन प्रान्तेषु कृतपरिक्षेपम् [अं], अम्लानमल्लिकामाल्यरचितशेखराभिः श्रवणावलम्बिशैवलवल्लरीहरितायमाननवबन्धूकपाण्डुगण्डस्थलाभिः कण्ठकन्दलामुक्तहिमगुलिकाहारभासितोन्नतस्तनकलशाभिरसितोत्पलनालवलयाधिष्ठितप्रकोष्ठकाण्डाभिः पदे पदे रणितमधुकरजालकिङ्किणीचक्रवालेन बकुलमालामेखलागुणेन परिक्षिप्तघनजघनभागाभिर्घनसारसंपर्ककर्कशामोदेन स्पर्शेन्द्रियहारिणा हरिचन्दनरसद्रवेण संपादिताप्रपदीनचर्चाभिर्जलार्द्रबिससूत्रसंव्यानवाहिनीभिरुद्यानदेवताभिरिव संभूयोपस्थिताभिरभिनवयौवनाभिर्वाररमणीभिरध्यासितविततवातायनम्, अतिविचित्रानेकचित्रशालं जलमण्डपमगच्छत् [अः]।

प्रविश्य च तत्र कतिपयाप्तसहचरसहायो विभावयन्नितस्ततस्तस्य रचनाविचित्रतामतिचिरं बभ्राम, विरतकौतुकश्च कणद्भिरग्रतः श्वासपरिमलावकृष्टैरलिभिरभ्यर्थित इवानल्पमेकं कुसुमतल्पमध्यास्त। निषण्णं

मणिशिला–चन्द्रकान्तमणिरूपः प्रस्तरः, तत्सम्बन्धि यत् प्रणालं–जलनिर्गमनमार्गः, ततो विगलितेन–स्यन्दितेन, अतः **स्थवीयसा** अतिस्थूलेन [अं]। पुनः **वाररमणीभिः** वेश्याभिः, **अध्यासितवातायनम्** अध्यासितम्–उपविष्टम्, अधिष्ठितमित्यर्थः, वातायनं–गवाक्षो यस्य तादृशम्, कीदृशीभिः? **अम्लानमल्लिकामाल्यरचितशेखराभिः** अम्लानानाम्–अचिरावचितानाम्, मल्लिकानां–तदाख्यकुसुमानाम्, यन्माल्यं तेन रचितं शेखरं–शिरोमण्डनं याभिस्तादृशीभिः; पुनः **श्रवणावलम्बिशैवलवल्लरीहरितायमाननवबन्धूकपाण्डुगण्डस्थलाभिः** श्रवणावलम्बिनी–कर्णावलम्बिनी, या शैवलवल्लरी–शैवालाधायकतृणजललतिका, तया, हरितायमानं–हरितवर्णायमानम्, नवबन्धूकपाण्डु–नवं–नवीनं यद् बन्धूकं–तदाख्यरक्तकुसुमम्, तद्वत्, पाण्डु–रक्तवर्णम्, गण्डस्थलं–कपोलस्थलं यासां तादृशीभिः, पुनः **कण्ठकन्दलामुक्तहिमगुलिकाहारभासितोन्नतस्तनकलशाभिः** कण्ठकन्दलेन–कण्ठनालेन, अमुक्तः–शैत्यानुभवाय अत्यक्तः, धृत इत्यर्थः, यः, हिमगुलिकाहारः–हिमखण्डमाला, तेन भासितौ–उद्दीपितौ–उन्नतौ, स्तनकलशौ कलशायमानस्तनौ यासां तादृशीभिः; पुनः **असितोत्पलनालवलयाधिष्ठितप्रकोष्ठकाण्डाभिः** असितोत्पलनालवलयेन नीलकमलदण्डमण्डलेन, अधिष्ठितः–व्याप्तः, प्रकोष्ठकाण्डः–मणिबन्धाधोभागरूपो दण्डो यासां तादृशीभिः; पुनः **पदे पदे** प्रतिपदम्, प्रतिपादन्यासमित्यर्थः, **रणितमधुकरजालकिङ्किणीचक्रवालेन** रणितं–शब्दायितम्, मधुकरजालरूपं–भ्रमरमण्डलात्मकम्, किङ्किणीचक्रवालं–क्षुद्रघण्टिकामण्डलं यस्मिंस्तादृशेन, **बकुलमालामेखलागुणेन** बकुलमालायाः–बकुलाख्यकुसुमविशेषमालारूपायाः, मेखलायाः–स्त्रीकटिभूषणस्य, गुणेन–सूत्रेण, **परिक्षिप्तघनजघनभागाभिः** परिक्षिप्तः–परिवेष्टितः, घनः–दृढः, जघनभागः–कटिपुरोभागमण्डलं यासां तादृशीभिः; पुनः **हरिचन्दनरसद्रवेण** हरिचन्दनाख्यचन्दनविशेषरसपङ्केन, **सम्पादिताप्रपदीनचर्चाभिः** सम्पादिता–कृता, आप्रपदीना–पादाग्रपर्यन्ता, चर्चा–शरीरविलेपनं याभिस्तादृशीभिः; कीदृशेन तेन? **घनसारसम्पर्ककर्कशामोदेन** घनसारस्य–कर्पूरस्य, सम्पर्केण–मिश्रणेन, कर्कशः–उत्कटः, आमोदः–सुगन्धो यस्य तादृशेन, पुनः **स्पर्शेन्द्रियहारिणा** त्वगिन्द्रियकर्षिणा, अतिशीतलेनेत्यर्थः; पुनः **जलार्द्रबिससूत्रसंव्यानवाहिनीभिः** जलार्द्रं–जलाप्लुतम्, यद् बिससूत्राणां मृणालतन्तूनाम्, संव्यानम्–उत्तरीयवस्त्रम्, तद्वाहिनीभिः–तद्धारिणीभिः; काभिरिव? **सम्भूय** संघीभूय, **उपस्थिताभिः** उपागताभिः, **उद्यानदेवताभिरिव** क्रीडावनदेवताभिरिवेत्युत्प्रेक्षा; पुनः **अभिनवयौवनाभिः** नवीनयुवतीभिः। पुनः कीदृशम्? **अतिविचित्रानेकचित्रशालम्** अतिविचित्राः–अत्यन्तविलक्षणाः, अनेकाः–बहवः, चित्रशालाः–आलेख्यगृहा यस्मिंस्तादृशम् [अः]।

च पुनः, **तत्र** तस्मिन् जलमण्डप इत्यर्थः, **प्रविश्य** प्रवेशं कृत्वा, **कतिपयाप्तसहचरसहायः** कतिपयैः–परिगणितैः, आप्तैः–विश्वस्तैः, सहचरैः–सहगामिभिः, सहायः–सहितः, **इतस्ततः** अत्र तत्र, **तस्य** जलमण्डपस्य, **रचनाविचित्रतां** रचनावैलक्षण्यम्, **विभावयन्** पर्यालोचयन्, **अतिचिरम्** अतिदीर्घकालम्, **बभ्राम** भ्राम्यति स्म। च पुनः, **विरतकौतुकः** निवृत्ततद्वैचित्र्यावलोकनकुतूहलः सन्, **अग्रतः** अग्रे, **कणद्भिः** गुञ्जद्भिः, **श्वासपरिमलाकृष्टैः** श्वासस्य–नासामारुतस्य, परिमलैः–सौरभैः, आकृष्टैः–कृताकर्षणैः, **अलिभिः** भ्रमरैः, **अनल्पम्** अत्यन्तम्, **अभ्यर्थित इव** प्रार्थित

च तत्र तमुपसेवितुमतीव सेवाकुशलाः कलाविदो विदितसकलशास्त्रतत्त्वाः कवयो वाग्मिनः काव्यगुणदोषज्ञा विज्ञातविविधपुराणेतिहासकथाः कथाख्यायिकानाटकादिप्रबन्धबद्धरतयो रतितन्त्रपरम्परापरामर्शरसिकमनसः प्रियदर्शना विदग्धोज्ज्वलवेषवपुषः परिहासशीलाः स्वभावपेशलोक्तयः प्रत्येकमावेदिताः प्रतिहारेण राजपुत्राः प्राविशन्। अपरेऽपि तत्कालसेवोचिताः सवयसः प्रधानराजलोकाः संनिदधुः [क]।

यथास्थानमुपविष्टैश्च तैः सह प्रस्तुतविचित्रकथालापस्य चित्रपदभङ्गसूचितानेकसुन्दरोदारार्था प्रवृत्ता कथञ्चित् तस्य चित्रालङ्कारभूयिष्ठा काव्यगोष्ठी। तत्र च पठ्यमानासु विद्वत्सभालब्धख्यातिषु प्रहेलिकाजातिषु, चिन्त्यमानेषु मन्दमतिजनितनिर्वेदेषु प्रश्नोत्तरप्रभेदेषु, भाव्यमानासु प्रसन्नगम्भीरभावार्थासु षट्प्रज्ञक-

---

इव, **एकम्** अद्वितीयम्, **कुसुमतल्पं** पुष्पशय्याम्, **अध्यास्त** तदुपरि उपाविशत्। **तत्र** तस्मिन्, कुसुमतल्प इत्यर्थः, **निषण्णम्** उपविष्टम्, **तं** हरिवाहनम्, **सेवितुं** परिचरितुम्, **राजपुत्राः** राजकुमाराः, **प्राविशन्** प्रविष्टाः, कीदृशाः? **अतीव** अतिशयेन, **सेवाकुशलाः** परिचरणनिपुणाः; पुनः **कलाविदः** शिल्पाभिज्ञाः; पुनः **विदितसकलशास्त्रतत्त्वाः** परिशीलिताशेषशास्त्रसाराः; पुनः **कवयः** कवित्वशक्तिशालिनः; पुनः **वाग्मिनः** सम्यग्वक्तारः; पुनः **काव्यगुणदोषज्ञाः** काव्यसम्बन्धिनो ये गुणाः–माधुर्यादयः; ये च दोषाः–श्रुतिकटुत्वादयः, तेषां विज्ञाः; **विज्ञातविविधपुराणेतिहासकथाः** विज्ञाताः–सम्यगवगताः, अभ्यस्ता इत्यर्थः, विविधानि अनेकप्रकाराणि यानि पुराणानि–सर्गप्रतिसर्गादिपञ्चलक्षणोपेतप्रबन्धाः, इतिहासाः–महाभारतादिपूर्ववृत्तार्थकग्रन्थाः, तेषां कथाः–कथानकानि यैस्तादृशाः; पुनः **कथाख्यायिकानाटकादिप्रबन्धबद्धरतयः** कथा नाम–कादम्बर्यादयः कल्पितप्रबन्धाः, आख्यायिका–उपलब्धार्थकः प्रबन्धः, नाटकं–दृश्यकाव्यम्, तदादयः–तत्प्रभृतयो ये प्रबन्धाः–ग्रन्थाः, तेषु बद्धरतयः–बद्धानुरागाः; पुनः **रतितन्त्रपरम्परापरामर्शरसिकमनसः** रतितन्त्रस्य–रतिशास्त्रस्य, कामशास्त्रस्येत्यर्थः, या परम्परा–समूहः, तत्परामर्शे–तत्समालोचने, रसिकम्–अनुरक्तं मनो येषां तादृशाः; पुनः **प्रियदर्शनाः** प्रियम्–आनन्दजनकम्, दर्शनम्–अवलोकनं येषां तादृशाः; पुनः **विदग्धोज्ज्वलवेषवपुषः** विदग्धः–नैपुण्यपूर्णः, उज्ज्वलः–उद्भासुरश्च, वेषः–कृत्रिमाङ्गमण्डनं यस्य तादृशं, वपुः–शरीरं येषां तादृशाः; पुनः **परिहासशीलाः** परिहासस्वभावाः; पुनः **स्वभावपेशलोक्तयः** स्वभावेन पेशलाः–प्रियाः, उक्तयः–वचनानि येषां तादृशाः; पुनः **प्रतीहारेण** द्वारपालेन, **प्रत्येकं** प्रतिव्यक्ति, **आवेदिताः** हरिवाहनं प्रति सूचितागमनवार्ताः। **अपरेऽपि** अन्येऽपि, **तत्कालसेवोचिताः** तत्कालसेवायोग्याः, **सवयसः** समानवयस्काः, **प्रधानराजलोकाः** मुख्यराजकीयजनाः, **सन्निदधुः** सन्निहिताः [क]।

च पुनः, **यथास्थानं** स्वस्वस्थानमनतिक्रम्य, **उपविष्टैः** कृतोपवेशनैः, **तैः** राजपुत्रैः, सह, **प्रस्तुतविचित्रकथालापस्य** प्रस्तुतः–प्रारब्धः, विचित्रकथानाम्–अपूर्वकथानाम्, आलापः–आभाषणं येन तादृशस्य, **तस्य** हरिवाहनस्य, **चित्रपदभङ्गसूचितानेकसुन्दरोदारार्था** चित्राणाम्–अर्थचित्रालङ्कारविशिष्टानाम्, पदानाम्, भङ्गेन–विच्छित्या, चमत्कृत्येत्यर्थः, सूचिताः–अभिव्यक्ताः, अनेके, सुन्दराः–मनोहराः, उदाराः–विस्तृताः, अर्था यया तादृशी, **चित्रालङ्कारभूयिष्ठा** चित्रालङ्कारप्रचुरा, **काव्यगोष्ठी** काव्यपाठपरिषत्, **कथञ्चित्** केनापि प्रकारेण, प्रवृत्ता। पुनः तत्र गोष्ठयाम्, **विद्वत्सभालब्धख्यातिषु** विद्वत्सभायां–विद्वद्गोष्ठयाम्, लब्धा–प्राप्ता, ख्यातिः–प्रसिद्धिर्याभिस्तादृशीषु, **प्रहेलिकाजातिषु** प्रहेलयति–सूचयति वास्तविकार्थगोपनपूर्वकमवास्तविकमसम्भाव्यमर्थं या सा प्रहेलिका, यथा–"पानीयं पातुमिच्छामि त्वत्तः कमललोचने!। यदि दास्यसि नेच्छामि न दास्यसि पिबाम्यहम्॥" इति, तज्जातिषु–तज्जातीयेषु दुर्वेद्यार्थककाव्येषु, **पठ्यमानासु** पठनकर्मीक्रियमाणासु। पुनः **प्रश्नोत्तरभेदेषु** प्रश्नोत्तरविशेषेषु, **चिन्त्यमानेषु** आलोच्यमानेषु, कीदृशेषु? **मन्दमतिजनितनिर्वेदेषु** मन्दमतीनाम्–ऊहापोहाक्षमबुद्धीनाम्, जनितः–उत्पादितः, निर्वेदः–ग्लानिर्यैस्तादृशेषु। पुनः **प्रसन्नगम्भीरभावार्थासु** प्रसन्नः–श्रवणमात्रेण बोधविषयः, गम्भीरः–गाम्भीर्यगुणयुक्तश्च, भावार्थः–अभिप्रायविषयार्थो यासां तादृशीषु, **षट्प्रज्ञकगाथासु** षट्सु–'धर्मः, अर्थः, कामः, मोक्षः, लोकः, तत्त्वार्थः' एषु षड्विषयेषु, प्रज्ञा येषां ते षट्प्रज्ञकाः, तदुक्तम्–"धर्मार्थ-काम-मोक्षेषु लोकतत्त्वार्थयोरपि। षट्सु प्रज्ञा तु यस्यासौ षट्प्रज्ञः परिकीर्तितः॥ १॥" इति, तदीयगाथासु–तदीयकथासु, **भाव्यमानासु** आलोच्य-

गाथासु, विमृश्यमानेषु बाधानुपदसंपादितोत्सेकेषु बिन्दुमात्राक्षरच्युतकश्लोकेषु, हस्यमानेषु दीर्घकालानुभूतनिष्फलचिन्तामौनेषु प्राज्ञंमन्येषु, प्रकाश्यमाने साधुवादविधिना बुधानां बोधरभसे, विजृम्भमाणे निर्भरं सभ्यानां कौतुकरसे काव्येष्वतीव रसिकः सर्वदा निकटवर्ती कुमारस्य नर्मपात्रं सकलराजपुत्राणां मञ्जीरनामा बन्दिपुत्रः किञ्चिदुपसृत्य हरिवाहनमवोचत् [ख]—'कुमार! प्रक्रमागतमेव किञ्चिद् विज्ञाप्यसे । कुरु क्षणमात्रमवधानदानेनानुग्रहम्, अस्यैव समनन्तरातिक्रान्तस्य मधुमासस्य शुद्धत्रयोदश्यामहमहमिकोपदर्शितनिजविभवविच्छर्देन नगरीनिवासिना भुजङ्गलोकेन भक्त्या प्रवर्तितं यात्रोत्सवमवेक्षितुमिदमेव सर्वतोविरचितविचित्रवस्त्रध्वजवितानमात्तकनकशृङ्गवेश्याङ्गनाभुजङ्गजनपरस्परारब्धजलसेकयुद्धं भगवतो मकरध्वजस्यायतनमागतोऽस्मि, विस्मयस्मेरचक्षुषा च प्रविशता मया प्राङ्गणसहकारपादपस्य मूले मृणालसूत्रवलयितग्रीवाविभागं मध्यभागविन्यस्तमुग्धस्तनमुखमुद्रेण स्त्यानतुहिनपाण्डुरत्विषा शोषाधिगतकाठिन्येन चन्दनपङ्कवेदिकाबन्धेन

मानासु; पुनः **बाधानुपदसम्पादितोत्सेकेषु** अनुपदं—प्रतिपदम्, सम्पादितः, बाधस्य अर्थबोधव्याघातस्य, उत्सेकः—आधिक्यं यैस्तादृशेषु, **बिन्दुमात्राक्षरच्युतकश्लोकेषु** बिन्दुच्युतः, मात्राच्युतः, अक्षरच्युत इति बिंदुमात्राक्षरच्युतास्त एव बिन्दुमात्राक्षरच्युतकाः, तादृशेषु श्लोकेषु, **विमृश्यमानेषु** विविच्यमानेषु । पुनः **दीर्घकालानुभूतनिष्फलचिन्तामौनेषु** दीर्घकालं—चिरकालम्, अनुभूतं—प्रतीतम्, निष्फलचिन्तया—निष्फलभावनया, मौनं—मूकत्वं येषां तादृशेषु, **प्राज्ञम्मन्येषु** आत्मानं प्राज्ञं—पण्डितं मन्यन्ते न तु पण्डिता ये ते प्राज्ञम्मन्याः, तेषु, **हस्यमानेषु** उपहासास्पदतामापाद्यमानेषु । पुनः **बुधानां** पण्डितानाम्, **बोधरभसे** बोधवेगे, अर्थबोधाविलम्बे इति यावत्, **साधुवादविधिना** प्रशंसाविधानेन, **प्रकाश्यमाने** प्रकटीक्रियमाणे । पुनः **सभ्यानां** सभायां—गोष्ठ्यां साधुः सभ्यः, तेषां **कौतुकरसे** काव्यालापकुतूहलात्मकरसे, **निर्भरम्** अत्यन्तम्, **विजृम्भमाणे** प्रकाशमाने, **मञ्जीरनामा** मञ्जीरसंज्ञकः, **बन्दिपुत्रः** स्तुतिपाठकपुत्रः, **किञ्चित्** ईषत्, **उपसृत्य** समीपमागत्य, **हरिवाहनं** तदाख्यं मेघवाहननृपकुमारम्, **अवोचत्** उक्तवान्, कीदृशः? **काव्येषु** काव्यविषये; **अतीव रसिकः** अत्यन्तानुरागी, पुनः **सर्वदा** सर्वकालम्, **कुमारस्य** हरिवाहनस्य, **निकटवर्त्ती** पार्श्ववर्ती **सकलराजपुत्राणां** समस्तनृपकुमाराणाम्, **नर्मपात्रं** परिहासास्पदम् [ख]। किमवोचदित्याह—कुमार! भो नृपात्मज!, **प्रक्रमागतमेव** प्रासङ्गिकमेव, **किञ्चित्** किमपि वृत्तम्, **विज्ञाप्यसे** निवेद्यसे, **अवधानदानेन** मनोवृत्तिदानेन, **क्षणमात्रं** मुहूर्तमात्रम्, **अनुग्रहं** कृपां कुरु, विषयान्तरान्निवर्त्य वक्ष्यमाणवृत्तश्रवणे मनः समाधेहीत्यर्थः; **समनन्तरातिक्रान्तस्य** अव्यवहितव्यतीतस्य, **मधुमासस्य** चैत्रमासस्य, **शुद्धत्रयोदश्यां** शुक्लत्रयोदशतिथौ, **अहमहमिकोपदर्शितनिजविभवविच्छर्देन** अहमहमिकया—पारस्परिकस्पर्धया, उपदर्शितः, निजविभवविच्छर्दः—स्ववित्तव्ययो येन तादृशेन, **नगरीनिवासिना** अयोध्यावास्तव्येन, **भुजङ्गलोकेन** विटजनेन, **भक्त्या** कामदेवप्रीत्या, **प्रवर्तितं** प्रारब्धम्, **यात्रोत्सवं** कामदेवमन्दिरयात्रोत्सवम्, **अवेक्षितुं** द्रष्टुम्, **सर्वतः** परितः, **विरचितविचित्रवस्त्रध्वजवितानं** विरचितः—निर्मितः, विचित्रवस्त्राणां ध्वजः—पताका, वितानः—उल्लोचश्च, यद्वा ध्वजरूपो वितानः, ध्वजानां वितानः—विस्तारो वा यस्मिंस्तादृशम्, पुनः **आत्तकनकशृङ्गवेश्याङ्गनाभुजङ्गजनपरस्परारब्धजलसेकयुद्धम्** आत्तं—प्राप्तम्, गृहीतमित्यर्थः, कनकशृङ्गं—सुवर्णमयनलिका याभिस्तादृशीभिः, वेश्याङ्गनाभिः—वेश्यारूपाभिः स्त्रीभिः, भुजङ्गजनैः—विटजनैश्च, परस्परम्, आरब्धं—प्रवर्तितम्, जलसेकयुद्धं—जलसेचनसंग्रामो यस्मिंस्तादृशम्, **भगवतः** पूज्यस्य, **मकरध्वजस्य** कामदेवस्य, **इदमेव** प्रत्यक्षभूतमेव, **आयतनं** मन्दिरम्, **आगतोऽस्मि** उपस्थितोऽस्मि । **च** पुनः, **प्रविशता** प्रवेशं कुर्वता, **विस्मयस्मेरचक्षुषा** विस्मयेन—आश्चर्येण, स्मेरं—विकस्वरम्, चक्षुर्यस्य तादृशेन, मया, **प्राङ्गणसहकारपादपस्य** मन्दिरप्राङ्गणवर्तिचूतवृक्षस्य, **मूले** अधस्तात्, **ताडीपत्रखण्डं** तालपत्रखण्डम्, **अवलोकितं** दृष्टम्, कीदृशम्? **मृणालसूत्रवलयितग्रीवाविभागं** मृणालसूत्रेण—बिसतन्तुना, वलयितः—वेष्टितः, ग्रीवाविभागः—कण्ठस्थलं यस्य तादृशम्; पुनः **मध्यभागविन्यस्तमुग्धस्तनमुखमुद्रेण** मध्यभागे—मध्यस्थले, विन्यस्ता—रचिता, मुग्धस्य—सुन्दरस्य, स्तनमुखस्य, मुद्रा—प्रतिकृतिर्यस्मिंस्तादृशेन, पुनः **स्त्यानतुहिनपाण्डुरत्विषा** स्त्यानं—घनीभूतम्, यत् तुहिनं—हिमम्, तद्वत् पाण्डुरा—पीतवर्णमिश्रितशुक्लवर्णा, त्विट्—कान्तिर्यस्य तादृशेन, पुनः **शोषाधिगतकाठिन्येन** शोषेण—शुष्कतया, अधिगतं काठिन्यं—घनीभावो येन तादृशेन, **चन्दनपङ्कवेदिका-**

संदानितोभयान्तमभिमतवियोगविधुराभीरकामिनीकपोलपाण्डु ताडीपत्रखण्डमवलोकितम् [ग]। आदाय च सकौतुकेनोत्तरीयवस्त्रैकदेशे नियन्त्रितम्, अवसितायां च यात्रायां निजनिवासमागतेन विजने निविश्य कौतुकावेशात् कस्येदमिति सर्वतो निरूपितम्, अपश्यता च पृष्ठे नामाक्षराणि तत्क्षणमेवापनीय मुद्रामुद्वेष्टितम्, दृष्टा च तत्र ललितपदसंनिवेशा सान्द्रमृगमदमषीपङ्कलिखितैः प्रत्यग्रकुङ्कुमपत्रभङ्गशोभिभिः कृष्णागुरुधूपवास-संभृतसौरभातिरेकैरभिनवमौक्तिकक्षोदविशदवर्णेन पुण्यपरिमलमुचा कर्पूरचूर्णेन समन्तादवकीर्णैर्निरन्तरैरपि परस्परासंस्पर्शिभिरवाप्तपरिणतिप्रकर्षैरपि सुकुमारसर्वावयवैरक्षरैरुपेता दुरवबोधतात्पर्यवस्तुरेकैवार्या, परिभाविता च वारंवारमादरव्यापारितहृदयेन, न तु तदीयं हृदयमवगतम्; [घ]। तदादिशतु कुमारः सर्वमेवानुक्रमेण किं तत् पत्रकं केन प्रेषितं कस्य वा प्रेषितं किमत्र कार्यं विवक्षितम् ।' इत्युदीर्य विशदवर्णोच्चारया गिरा

टिप्पनकम्—निरन्तरैरपि परस्परसंस्पर्शिभिः यानि अन्तररहितानि तानि कथं परस्परासंस्पर्शीनि, अन्यत्र निरन्तराणि-संततानि, परस्परासंलग्नानि च । **अवाप्तपरिणतिप्रकर्षैरपि सुकुमारसर्वावयवैः** ये प्राप्तपरिणाम-प्रकर्षास्ते कथं सौकुमार्ययुक्तसकलभुजाद्यवयवाः, अन्यत्र प्रकृष्टपरिणामानि सुश्लिष्टसर्वशिरःप्रभृत्यवयवानि च [घ] ।

बन्धेन चन्दनपङ्कमयी या वेदिका-वेदिकाप्रतिकृतिः, तद्बन्धेन—तन्निवेशेन, **सन्दानितोभयान्तं** सन्दानितौ—बद्धौ, उभयान्तौ—पूर्वापरान्तभागौ यस्य तादृशम्, पुनः **अभिमतवियोगविधुराभीरकामिनीकपोलपाण्डु** अभिमतवियोगेन—इष्टवियोगेन, विधुरा—व्यथिता, या आभीरकामिनी गोपवधूः, तस्याः कपोलवत्—गण्डस्थलवत्, पाण्डु—पीतशुक्लवर्णम् [ग] । **च** पुनः, **आदाय** गृहीत्वा, **सकौतुकेन** कुतूहलसहितेन, मयेति शेषः, **उत्तरीयवस्त्रैकदेशे** उत्तरीयवस्त्राञ्चले, **नियन्त्रितं** बद्धम् । **च** पुनः, **यात्रायां** यात्रोत्सवे, **अवसितायां** समाप्तायाम्, **निजनिवासं** स्वगृहम्, आगतेन, मयेति शेषः, **विजने** रहसि, **कौतुकावेशात्** कुतूहलोदयात्, **कस्य** किंसम्बन्धि, **इदं** प्रत्यक्षभूतं पत्रम्, इति **सर्वतः** समन्तात्, **निरूपितं** विलोकितम् । **च** पुनः, **पृष्ठे** पृष्ठभागे, **नामाक्षराणि** नामघटकान्यक्षराणि, **अपश्यता** अनवलोकमानेन, मयेति शेषः, **तत्क्षणमेव** तत्कालमेव, **मुद्राम्** उभयान्तबन्धनम्, **अपनीय** दूरीकृत्य, **उद्वेष्टितम्** उद्घाटितम्, तत् पत्रमिति शेषः । **च** पुनः, **तत्र** तस्मिन् पत्रे, **एकैव** अद्वितीयैव, **आर्या** तदाख्यवृत्तबद्धः श्लोकः, **दृष्टा** दृष्टिगोचरीकृता । कीदृशी? **ललितपद-सन्निवेशा** ललितः—सुन्दरः, पदसन्निवेशः—पदविन्यासो यस्यां तादृशी; पुनः **सान्द्रमृगमदमषीपङ्कलिखितैः** सान्द्रः—निबिडो यः, मृगमदस्य—कस्तूरिकायाः, मषीपङ्कः—पत्राञ्जनकर्दमः, तेन लिखितैः, पुनः **प्रत्यग्रकुङ्कुमपत्रभङ्गशोभिभिः** प्रत्यग्रस्य—अभिनवस्य, कुङ्कुमपत्रस्य—केसरपत्रस्य यः, भङ्गः—खण्डः, तद्वत् शोभनशीलैः, पुनः **कृष्णागुरुधूपवाससम्भृत-सौरभातिरेकैः** कृष्णागुरुधूपस्य—कालागुरुधूपस्य, वासेन—सौरभेण, सम्भृतः—समेधितः, सौरभातिरेकः—सुगन्धातिशयो येषां तादृशैः, पुनः **कर्पूरचूर्णेन** कर्पूरपरागेण, **समन्तात्** सर्वतः, **अवकीर्णैः** व्याप्तैः, कीदृशेन? **अभिनवमौक्तिकक्षोद-विशदवर्णेन** अभिनवो यो मौक्तिकक्षोदः—मुक्तामणिचूर्णम्, तस्येव विशदः—शुभ्रः, वर्णः—कान्तिर्यस्य तादृशेन, पुनः **पुण्य-परिमलमुचा** पुण्यः—मनोहरो यः, परिमलः—गन्धः, तन्मुचा—तदभिव्यञ्जकेन, पुनः **निरन्तरैरपि** अवकाशरहितैरपि, **परस्परासंस्पर्शिभिः** परस्परमसंसृष्टैरिति विरोधः, तत्परिहारे तु निरन्तरैः—सान्द्रैरित्यर्थः, पुनः **अवाप्तपरिणतिप्रकर्षै-रपि** प्राप्तपरिपाकोत्कर्षैरपि, **सुकुमारावयवैः** कोमलावयवैरिति विरोधः, घटादेः परिपाकोत्तरं काठिन्योदयात्, तत्परिहारे तु मसीदार्ढ्ये प्राप्तदार्ढ्योत्कर्षैः, प्राप्तफलप्रसवोत्कर्षैरिति वार्थः, **अक्षरैः** लिपिभिः, **उपेता** अन्विता, पुनः **दुरवबोध-तात्पर्यवस्तुः** दुर्बोधभावार्था । **च** पुनः, **आदरव्यापारितहृदयेन** आदरेण व्यापारितं—प्रेरितं हृदयं यस्य येन वा तादृशेन, मयेति शेषः, **परिभाविता** विचारिता, **तदीयं** तस्या आर्यायाः, **हृदयं** गूढार्थवस्तु, न **अवगतं** ज्ञानम् [घ] । **तत्** तस्माद्धेतोः, **कुमारः** श्रीमान्, **अनुक्रमेण** मत्प्रश्नक्रमानुसारम्, **आदिशतु** बोधयतु, **तत् पत्रकं** ताडीपत्रम्, **किं** किमर्थकम्?, **केन** **प्रेषितं** प्रेषणकर्मतामापादितम्?, **वा** अथवा, **कस्य** पार्श्वे इति शेषः, प्रेषितम्?, **अत्र** अस्मिन् पत्रे, किं **कार्यं** कर्त-व्यम्, **विवक्षितं** वक्तुमभिप्रेतम्?, **इत्युदीर्य** इत्युक्त्वा, **विशदवर्णोच्चारया** विशदः—विस्पष्टः, वर्णानामुच्चारः—उच्चा-

सप्रागल्भ्यमार्यामिमां पपाठ—

गुरुभिरदत्तां वोढुं वाञ्छन् मामक्रमात् त्वमचिरेण। स्थातासि पत्रपादपगहने तत्रान्तिकस्थाग्निः ॥

अस्यां च पठ्यमानायामवहिताः सर्वे सभासदो बभूवुः। परिभावयतामेव च तेषां पाठसमकालमेव प्रज्ञाबलेन बुद्ध्वा कोशलाधिपतिसूनुरवदत्—'सखे! यत् तदासादितं त्वया तथाविधं ताडीपत्रकम्, असावनङ्गलेखस्तावत्। स च कयाचिदीश्वरकन्यया समारूढप्रौढयौवनया गुणानुरागप्रगुणितेन स्वचेतसा विदग्धाप्तसहचरीजनेन वा भूयो भूयः प्रवर्तितया कुमारीजनसहोत्थामपत्रपामपहाय कस्यचित् पूर्वमेवानुरागपिशुनैरिङ्गिताकारैरभिनन्दितोपांशुप्रयुक्तप्रार्थनस्य 'सुतनु! सततानुवृत्तिपरोऽपि गुरुभिस्त्वदीयैर्नाहमनुगृहीतो भवत्याः प्रदाने, तदिदानीमनिच्छतोऽपि मे दुरात्मनानेन मदनवह्निना दह्यमानमिदमनुचितेनापि विधिना जीवितस्वामिनीं कर्तुमिच्छति त्वामतर्कितोपायान्तरं हतहृदयम्, अतो नाहमत्रापराधी'

टिप्पनकम्—उपांशु–रहः [ङ]।

रणं यत्र तादृश्या, **गिरा** वाण्या, **सप्रागल्भ्यं** प्रागल्भ्येन–प्रौढतया, सहितं यथा स्यात् तथा, **इमाम्** उपस्थिताम्, आर्यां **पपाठ** पठितवान्, **गुरुभिरदत्तां वोढुं वाञ्छन् मामक्रमात् त्वमचिरेण। स्थातासि पत्रपादपगहने तत्रान्तिकस्थाग्निः** ॥ १ ॥ **गुरुभिः** मत्पित्रादिभिः, **अदत्तां** विद्वेषवशेन स्वयमप्रतिपादिताम्, माम्, **अक्रमात्**–प्रसिद्धोद्वाहप्रकारं विनैव, बलादपहारेणेत्यर्थः, **वोढुं** परिणेतुम्, **वाञ्छन्** इच्छन्, त्वम्, **तत्र** तस्मिन्, यत्रावयोः सम्मेलनमभूदित्यर्थः, **पत्रपादपगहने** पत्रपूर्णवृक्षवने, **अन्तिकस्थाग्निः** पार्श्वस्थिताग्निरूपवैवाहिकोपकरणः, **अचिरेण** अविलम्बेन, **स्थातासि** स्थास्यसि, गृहे गुरुजनानुमतिरहितोद्वाहस्यानौचित्यादसम्भवाच्चेत्यर्थः, यद्वा बलादपहरणपूर्वकोद्वाहजन्यप्रत्यवायेन, **अन्तिकस्थाग्निः** पार्श्वज्वलदग्निः, **असिपत्रपादपगहने** असयः–खड्गाः, खड्गवन्मारणसामर्थ्यकलितानीत्यर्थः, पत्राणि येषां तादृशानां पादपानां–नारकवृक्षाणाम् गहने–वने, **स्थाता** स्थितिकर्ता, भविष्यतीति शेषः, नरकं प्राप्स्यतीत्यर्थः। **च** पुनः, **अस्याम्** आर्यायाम्, **पठ्यमानायाम्** उच्चार्यमाणायाम्, **सर्वे** सकलाः, **सभासदः** सभोपविष्टाः, **अवहिताः** तदर्थविचारे सावधानाः **बभूवुः** जाताः। **परिभावयतामेव** तदर्थमालोचयतामेव, **तेषां** सभासदां मध्ये, **कोशलाधिपतिसूनुः** कोशलाधिपतेः–कोशलदेशाधिपतेः, मेघवाहनस्य, सूनुः–कुमारः, हरिवाहनः, **प्रज्ञाबलेन** स्वबुद्धिबलेन, **पाठसमकालमेव** पाठसमय एव, **बुद्ध्वा** तत्तात्पर्यमवधार्य, **अवदत्** उक्तवान्। किमित्याह–**सखे!** भो मित्र!, **त्वया** मञ्जीरेण, **तथाविधं** तादृशम्, **तत्** अनुपदप्रस्तुतम्, यत् ताडीपत्रकम्, **आसादितं** प्राप्तम्, **असौ** सः, **अनङ्गलेखः** कामदेवविषयकलेखः, **तावदिति** वाक्यालङ्कारे। **स च** प्रकृतलेखश्च, **कयाचित्** अविदितनाम्न्या, **ईश्वरकन्यया** धनाढ्यकुमार्या, **कस्यचित्** कस्यापि, **महानागरिकस्य** अत्यन्तनागरिकस्य, नगरवास्तव्यतया कान्तोपभोगकुशलस्य, **यूनः** तरुणपुरुषस्य, पार्श्वे इति शेषः, **प्रेषितः** प्रेषणकर्मीकृतः, कीदृश्या तया? **समारूढप्रौढयौवनया** समारूढं–सम्यगवाप्तम्, प्रौढं–प्रगल्भम्, यौवनं–तारुण्यं यया तादृश्या, पुनः **गुणानुरागप्रगुणितेन** अभिमतनायकगुणप्रीतिवृद्धेन, **स्वचेतसा** स्वकीयहृदयेन, **विदग्धाप्तसहचरीजनेन वा** निपुणविश्वस्तसखीजनेन वा, **भूयो भूयः** पुनः पुनः, **प्रवर्तितया** प्रेरितया, कीदृशस्य यूनः? तयेश्वरकन्यया **कुमारीजनसहोत्थामपत्रपां** कुमारीजनानां सहोत्था–सहजा, या अपत्रपा–अन्यहेतुकलज्जा, ताम्, **अपहाय** त्यक्त्वा, **अनुरागपिशुनैः** अनुरागसूचकैः, **इङ्गिताकारैः** चेष्टिताकारैः, आकारचेष्टया, पूर्वमेव, **अभिनन्दितोपांशुप्रयुक्तप्रार्थनस्य** अभिनन्दिता–अनुमोदिता, अङ्गीकृतेत्यर्थः, उपांशुप्रयुक्ता–रहसि कृता, प्रार्थना यस्य तादृशस्य, पुनः '**सुतनु!** हे सुन्दराङ्गि!, **सततानुवृत्तिपरोऽपि** निरन्तरानुसरणपरायणोऽपि, अहं **भवत्याः** श्रीमत्याः, प्रदानेन, **त्वदीयैः** भवदीयैः, **गुरुभिः** पित्रादिभिः, न **अनुगृहीतः** अनुकम्पितः, **तत्** तस्माद्धेतोः, **इदानीं** सम्प्रति, **अनिच्छतोऽपि** त्वामनभिलषतोऽपि, **मे** मम, **दुरात्मना** दुष्टात्मना, **अनेन** प्रत्यक्षभूतेन, **मदनवह्निना** कामाग्निना, **दह्यमानं** सन्तप्यमानम्, **अतर्कितोपायान्तरम्** अतर्कितम्–अनालोचितम्, उपायान्तरम्–उचितप्रकारान्तरं येन तादृशम्, **इदं** सन्निकृष्टम्, **हतहृदयं** कलुषितहृदयम्, **अनुचितेनापि** अयोग्येनापि, अवैधेनापीत्यर्थः, **विधिना** प्रकारेण, त्वां **जीवितस्वामिनीं** स्वप्राणस्वामिनीम्, स्वप्राणप्रियामित्यर्थः, **कर्तुं** विधातुम्, परिणेतुमित्यर्थः, **इच्छति** अभिलषति,

इति दूतीमुखेन च ख्यापितनिजसाहसाध्यवसायस्य महानागरकस्य यूनः प्रेषितः [ङ]। प्रयोजनं पुनरत्रेदं विवक्षितम्—अकारणद्विष्टैर्मदीयगुरुभिः सामप्रयोगोपक्रमेण कथञ्चिदपि न प्रतिपादितामपमानासहिष्णुतया प्रसिद्धमपहाय क्रममपहारादिना प्रकारेण मामुद्वोढुमिच्छन्ननुचितकारी त्वम्, अतो मा त्वरस्व, सेत्स्यति तवैष कामः, यतः कतिपयैरेव दिवसैर्यत्र पुरादर्शनमावयोरभवत्, तत्र पत्रप्रायपादपगहने निगूहितो मदीयदूतिकया त्वमनपेक्षितापरविवाहमङ्गलोपकरणः केवलेनैवाग्निना सनाथीकृतपार्श्वः स्थास्यसि। स्थितश्च तत्र द्वित्राभिराप्तसहचरीभिः सहानुपदमेव मे समुपस्थितायाः पाणिग्रहणमग्निसाक्षिकं कर्तासीति। यः पुनरिहापरः 'केनापि वैगुण्येन गुरुभिरप्रदत्तामभिलषन् मामन्यायतः क्षिप्रमेव प्राप्य नारकत्वमन्तिकज्वलदग्निरसिपत्राणां पादपानां गहने स्थाता त्वं पापकारिन्!' इति शापरूपोऽर्थः प्रकाशते, स सर्वथा निरवकाश एव। नहि विरक्ताः स्त्रियः कदाचिदक्षिगतानामीक्षणहारिणस्तादृशानुदारविरचनाँल्लेखानभिलिख्य तथाऽत्यादरेण

टिप्पनकम्—अक्षिगतानां शत्रूणाम् [च]।

सङ्कल्पत इत्यर्थः, **अतः** अस्माद्धेतोः, **अत्र** अस्मिन्, अवैधाचरण इत्यर्थः, अहम्, **अपराधी** दोषी, न भवेयमित्यर्थः, **इति** इत्थम्, **दूतीमुखेन** स्वदूतीद्वारा, **ख्यापितनिजसाहसाध्यवसायस्य** ख्यापितः–सन्देशवाचा निवेदितः, निजसाहसस्य–स्वानुचितकार्यस्य, अध्यवसायः–उद्योगो येन तादृशस्य [ङ]। पुनः **अत्र** अस्मिन् लेखे, इदं **प्रयोजनं** फलम्, **विवक्षितं** वक्तुमभिप्रेतम्, **अकारणद्विष्टैः** विनैव कारणम् अप्रीतिं प्रापितैः, **मदीयगुरुभिः** मत्पित्रादिभिः, **सामप्रयोगोपक्रमेण** सामप्रयोगरूपः–सान्त्वनारूपो य उपक्रमः–प्रकारः, तेन **कथञ्चिदपि** कथमपि, न **प्रतिपादितां** दत्ताम्, माम्, **अपमानासहिष्णुतया** अप्रतिपादनजन्यानादरासहनशीलतया, **प्रसिद्धं** वैधतया शिष्टाचारसिद्धम्, **क्रमं** परिणयप्रकारम्, **अपहाय** त्यक्त्वा, **अपहारादिना** बलाद् ग्रहणप्रभृतिना, प्रकारेण, **उद्वोढुं** परिणेतुमिच्छन्, **त्वं** भवान्, **अनुचितकारी** अयोग्याचारी, वर्तसे इति शेषः, **अतः** अस्माद्धेतोः, **मा त्वरस्व** न त्वरां कुरु, तव एष **कामः** मत्परिणयमनोरथः, **सेत्स्यति** सिद्धिमेष्यति, **यतः** यस्मात्, **कतिपयैरेव** परिगणितैरेव, **दिवसैः** दिनैः, **यत्र** यस्मिन्, आवयोः, **दर्शनं** परस्परमवलोकनम्, **अभूत्** जातम्, **तत्र** तस्मिन्, **पत्रप्रायपादपगहने** पत्रपूर्णवृक्षवने, **मदीयदूतिकया** मद्दूत्या, **निगूहितः** पिहितः, त्वम्, **अनपेक्षितापरविवाहमङ्गलोपकरणः** अनपेक्षितम्, अपरं–अग्न्यतिरिक्तम्, विवाहरूपस्य मङ्गलस्य–शुभकर्मणः, उपकरणं–साधनं येन तादृशः, **केवलाग्निना** अग्निमात्रतदुपकरणेन, **सनाथीकृतपार्श्वः** सनाथीकृतं–सनाथतामापादितम्, पार्श्वं–सविधं यस्य तादृशः, **स्थास्यसि** वर्तिष्यसे, **च** पुनः, **तत्र** तस्मिन् स्थाने, **स्थितः** कृतावस्थितिकः, **द्वित्राभिः** द्वाभ्यां तिसृभिर्वा, **आप्तसहचरीभिः** विस्रब्धसखीभिः, सह, **अनुपदमेव** अतिशीघ्रमेव, **समुपस्थितायाः** समागतायाः, समागमिष्यन्त्या इत्यर्थः, **मे** मम, **अग्निसाक्षिकम्** अग्निरेव साक्षी-साक्षाद्द्रष्टा, प्रमाणभूत इत्यर्थः, यस्य तादृशम्, **पाणिग्रहणं** विवाहम्, **कर्तासि** करिष्यसि, इति। **इह** अस्यामार्यायाम्, **केनापि** केनचित्, **वैगुण्येन** दोषेण, **गुरुभिः** पित्रादिभिः, **अप्रदत्तां** प्रदानकर्मतामनापादिताम्, माम्, **अभिलषन्** बलादुद्वोढुं वाञ्छन्, त्वम्, **अन्यायतः** अनुचिताचरणात्, **क्षिप्रमेव** शीघ्रमेव, **नारकत्वं** नरकदुःखभोक्तृत्वम्, प्राप्य, **अन्तिकज्वलदग्निः** अन्तिके–निकटे, ज्वलन्–दीप्यमानः, अग्निर्यस्य तादृशः, तादृगग्निसन्तप्यमानः सन्नित्यर्थः, **असिपत्राणां** असयः–कृपाणाकाराणि कृपाणवद्घातकानि च पत्राणि येषां तादृशानाम्, **पादपानां** वृक्षाणाम्, **गहने** वने, **स्थाता** भविष्यसीति शेषः, **पापकारिन्!** भोः पापिन्!, **इति** ईदृशः, यः, पुनः, अपरः, शापरूपः, **अर्थः** अर्थान्तरमित्यर्थः, **प्रकाशते** श्लेषमहिम्ना प्रतिभासते, **सः** अर्थः, **सर्वथा** सर्वप्रकारेण, **निरवकाश एव** असङ्गत एव। यतः **विरक्ताः** अपरक्ताः, स्त्रियः, **ईक्षणहारिणः** नयनहारिणः, **उदारविरचनान्** विशिष्टविन्यासान्, **तादृशान्** अनुपदोपवर्णितस्वरूपान्, लेखान्, **अभिलिख्य** सम्यग्लिखित्वा, **अक्षिगतानां** शत्रुभूतजनानाम्, पार्श्वे इति शेषः, **तथाऽत्यादरेण** तादृगत्यन्तादरेण, कदा-

प्रेषयन्ति [च] । कौतुकेरिता पत्रकहारी स्वयमेव मुद्रामुद्वेष्ट्य विदितकार्यतत्त्वा प्रकृतिपारिप्लवतया स्त्रीस्वभावस्य कदाचिन्मन्त्रभेदमाचरेदिति तां वञ्चयितुं तस्य च विलासिनश्छेकोक्तिगुणहार्यहृदयस्य वचनभङ्गीवैदग्ध्यमात्मीयमाविष्कर्तुमप्रयत्नावसेयविवक्षितार्थो नायमभिलिखितः ।' इत्युक्तवति तस्मिन् सर्वेऽपि ते पार्श्ववर्तिनो यथावस्थितविदितलेखार्थाः समं **मञ्जीरेण** राजपुत्राः प्रजहृषुः । अनेकधाकृतप्रतिभागुणस्तुतयश्च राजसूनोः पुनः प्रस्तुतकाव्यवस्तुविचारनिष्ठाः **समरकेतु**वर्जमतिष्ठन् । **समरकेतु**रपि विषादविच्छायवदनः शुष्काशनिनेव शिरसि ताडितस्तत्क्षणमेवाधोमुखोऽभवत्, उत्सृष्टसृष्टदीर्घनिःश्वासश्च निश्चलनयनयुगलो विगलिताश्रुशीकरक्लिन्नपक्ष्मा कराङ्गुष्ठनखलेखया भूतलमलिखत् [छ] ।

अवलोक्य च तथावस्थितं तमस्थान एव प्रतिपन्नशोकावस्थमुपजातविस्मयाः सभासदः किमेतदिति वितर्कतरलतारकाणि परस्परं मुखान्यवालोकयन् । अथ तेषां पुरोवर्ती **समरकेतु**ना समानप्रतिपत्तिरत्यन्तमभिमतो राजपुत्रस्य सकलशास्त्रभाषाविचक्षणः क्षीणभूयिष्ठशैशवे वयसि वर्तमानो माननीयः कुमारपरिग्रहस्य प्रकृतिप्रगल्भवाक् किमपि कोविदः परिहासकेलिषु **कमलगुप्त**नामा कलिङ्गदेशाधीशसूनुः शनैर्विहस्यावोचत्—

चित् कदापि, नहि, **प्रेषयन्ति** उपस्थापयन्ति [**च**] । **कौतुकेरिता** कुतूहलप्रेरिता, **पत्रहारिका** पत्रवाहिका दूती, स्वयमेव, **मुद्रां** पत्रोभयान्तबन्धनम्, **उद्वेष्ट्य** उद्घाट्य, **विदितकार्यतत्त्वा** विज्ञातकार्यसारा सती, स्त्रीस्वभावस्य, **प्रकृतिपारिप्लवतया** प्रकृत्या चञ्चलतया, **कदाचित्** कदापि, **मन्त्रभेदं** रहस्योद्घाटम्, **आचरेत्** कुर्यात्, **इति** अस्माद्धेतोः, **तां** पत्रवाहिकाम्, **वञ्चयितुं** प्रतारयितुम्, **च** पुनः, **छेकोक्तिगुणहार्यहृदयस्य** छेकः–विदग्धः, तस्य या उक्तिः–वैदग्ध्यपूर्णोक्तिरित्यर्थः, तस्या गुणैर्हार्यहृदयस्य–आकर्षणीयहृदयस्य, यद्वा छेकोक्तिः–वक्रोक्तिरूपालङ्कारः, तद्गुणेन–तदात्मकगुणेन हार्यहृदयस्य, **तस्य** मनोगतस्य, **विलासिनः** विलासनिपुणस्य, तं प्रतीत्यर्थः, **आत्मीयं**–स्वकीयम्, **वचनभङ्गीवैदग्ध्यं** वचनस्य भङ्गी–कौटिल्यं विच्छित्तिर्वा, तद्वैदग्ध्यं–तन्नैपुण्यम्, वक्रोक्तिकौशलमित्यर्थः, **आविष्कर्तुं** प्रकटयितुम्, **अप्रयत्नावसेयविवक्षितार्थः** अप्रयत्नं–विनैवोहापोहप्रयासम्, अवसेयः–अवधारणीयः, विवक्षितः–वक्त्रभिप्रेतः, अर्थो यस्य तादृशः, **अयं** लेखः, न **अभिलिखितः** उल्लिखितः, किन्तु संकीर्णार्थक एव लिखित इत्यर्थः । **तस्मिन्** हरिवाहने, **इति** इत्थम्, **उक्तवति** मञ्जीरकृतप्रश्नोत्तरं कथितवति सति, **सर्वेऽपि** समस्ता अपि, **पार्श्ववर्तिनः** तन्निकटवर्तिनः, **ते** प्रकृताः, **राजपुत्राः** नृपकुमाराः, **यथावस्थितविदितलेखार्थाः** यथावस्थिताः–वास्तविकाः, लेखार्थाः–लेखाशयाः, विदिता यैस्तादृशाः सन्तः, **मञ्जीरेण** तदाख्यबन्दिपुत्रेण, **समं** सह, **प्रजहृषुः** प्रहृष्टाः । **च** पुनः, **राजसूनोः** नृपकुमारस्य हरिवाहनस्य, **अनेकधाकृतप्रतिभागुणस्तुतयः** अनेकधा–अनेकप्रकारैः, कृता, प्रतिभागुणस्य–काव्यार्थविषयकोहापोहात्मकगुणस्य, स्तुतिः–प्रशंसा यैस्तादृशाः सन्तः, **पुनः** पुनरपि, **समरकेतुवर्जं** समरकेतुरहितं यथा स्यात् तथा, तं विनेत्यर्थः, **प्रस्तुतकाव्यवस्तुविचारनिष्ठाः** प्रस्तुतः–प्रकृतो यः, काव्यरूपवस्तुनो विचारः–विवेचनम्, तन्निष्ठाः–तल्लग्नाः, **अतिष्ठन्** स्थिताः । **समरकेतुरपि** तन्नामा नृपकुमारोऽपि, **विषादविच्छायवदनः** विषादेन–खेदेन, विच्छायं–मलिनम्, वदनं–मुखं यस्य तादृशः सन्, **शिरसि** मस्तके, **शुष्काशनिना** वृष्टिरहितवज्रपातेन, **ताडित इव** आहत इव, **तत्क्षणमेव** तत्कालमेव, **अधोमुखः** अवनतमुखः, **अभवत्** जातः; **च** पुनः, **उत्सृष्टदीर्घनिःश्वासः** उत्सृष्टः–त्यक्तः, दीर्घः–महान्, निःश्वासः–नासिकामारुतो येन तादृशः, पुनः **निश्चलनयनयुगलः** निश्चलं निर्निमेषम्, नयनयुगलं यस्य तादृशः, पुनः **विगलिताश्रुशीकरक्लिन्नपक्ष्मा** विगलितैः–स्यन्दितैः, अश्रुशीकरैः–नयनजलकणैः, क्लिन्नम्–आर्द्रम्, पक्ष्म–नेत्ररोमलेखा यस्य तादृशः, **कराङ्गुष्ठनखरेखया** करस्य यदङ्गुष्ठं तदीयया नखरेखया–नखपङ्क्त्या, **भूतलं** पृथ्वीतलम्, **अलिखत्** लिखितवान् [**छ**] । **तथा** तेन प्रकारेण, **अवस्थितं** कृतावस्थितिकम्, पुनः, **अस्थान एव** अनवसर एव, **प्रतिपन्नशोकावस्थं** प्रतिपन्ना–प्राप्ता, शोकावस्था–दुःखावस्था येन तादृशम्, **तं** समरकेतुम्, **अवलोक्य** दृष्ट्वा, **उपजातविस्मयाः** उत्पन्नाश्चर्याः, **सभासदः** सभामध्यवर्तिनो लोकाः, **एतत्** इदं दुःखम्, **किं** किंकारणकम्, **इति** इत्थम्, **वितर्कतरलतारकाणि** वितर्केण–विशिष्टतर्केण, तरला–चञ्चला, तारका–कनीनिका येषु तादृशानि, **मुखानि** मुखमण्डलानि, **परस्परम्** अन्योऽन्यम्, **अवालोकयन्** अवलोकितवन्तः । **अथ** अनन्तरम्, **कमलगुप्तनामा** कमलगुप्तसंज्ञकः, **कलिङ्ग**-

'युवराज! किमर्थमनवगतार्थ इव अप्रगल्भ इव मत्सरीवाऽरसिक इव मूकतामवलम्ब्य स्थितः, किं न वर्णयसि शतमुखो भूत्वा सर्वतोमुखीमखिलबुधजनाश्चर्यकारिणीं कुमारस्य काव्यतत्त्वावबोधशक्तिम्, अस्मद्विधानां हि स्वभावकश्मलस्थूलबुद्धीनां सर्वात्मनापि प्रयुक्ता बाह्येव वर्णना न प्रविश्य सम्यग्वस्तुतत्त्वमुल्लिखति, अतोऽद्यापि त्वयि प्रजल्पति परितोषः प्रत्ययश्चात्मविषयः कुमारस्य भविष्यति [ज]। किं चाश्रुसलिलक्लिन्ननिश्चलचक्षुरधोमुखो वारिबद्ध इव वनकरी लब्धमिथ्याभिशाप इव साधुरकस्मात् प्रनष्टसकलगृहस्वापतेय इव गृहपतिरायतोष्णान् मुहुर्मुहुः सृजसि निःश्वासान्, अजातप्रेयसीपाणिग्रहो महद्दुःखमनुभविष्यति महात्मेति कच्चिन्न तं कुमारोपवर्णितवृत्तान्तयुवानमनुशोचसि। किमेकमिह शोच्यते, सर्व एवायमेवंप्रकारः संसारः न जानासि, यदुत दुःखहेतुरनुरागः, विषोपमा विषयोपभोगवाञ्छा, वाञ्छितार्थप्रतिपन्थीन्यधर्मविलसितानि, सर्वतः

देशाधीशसूनुः कलिङ्गदेशाधिपतिपुत्रः, **शनैः** मन्दम्, विहस्य, **किमपि** किञ्चित्, **अवोचत्** उक्तवान्। कीदृशः? **तेषां** सभासदाम्, **पुरोवर्ती** अग्रवर्ती, पुनः **समरकेतुना** तत्संज्ञककुमारेण, **समानप्रतिपत्तिः** तुल्यगौरवः; पुनः **राजपुत्रस्य** हरिवाहनस्य, **अत्यन्तम्** समधिकम्, **अभिमतः** इष्टजनः; पुनः **सकलशास्त्रभाषाविचक्षणः** अखिलशास्त्रभाषाभिज्ञः; पुनः **क्षीणभूयिष्ठशैशवे** क्षीणं–व्यतीतम्, भूयिष्ठं–बहुतरम्, यत् शैशवं–बाल्यम्, तद्रूपे, **वयसि** अवस्थायाम्, शैशवशेषावस्थायामित्यर्थः, वर्तमानः; पुनः **कुमारपरिग्रहस्य** हरिवाहनपरिजनस्य, **माननीयः** आदरणीयः; पुनः **प्रकृतिप्रगल्भवाक्** प्रकृत्या–स्वभावेन, प्रगल्भा–प्रौढिपूर्णा, वाक्–वाणी यस्य तादृशः; पुनः **परिहासकेलिषु** परिहासक्रीडासु, **कोविदः** निपुणः। किमवोचदित्याह–**युवराज!** भोः समरकेतो!, **किमर्थं** केन हेतुना, **मूकतां** मौनम्, **अवलम्ब्य** गृहीत्वा, **स्थितः** असीति शेषः। क इव? **अनवगतार्थ इव** अविज्ञाततदभिप्राय इव; पुनः **अप्रगल्भ इव** कातर इव; पुनः **मत्सरी इव** अन्यशुभद्वेषी इव; **अरसिक इव** नीरस इव। **शतमुखः** शतं मुखानि यस्य तादृशः, भूत्वा, **सर्वतोमुखीं** चतुरस्राम्, **अखिलबुधजनाश्चर्यकारिणीम्** अशेषकविजनविस्मापिनीम्, **कुमारस्य** हरिवाहनस्य, **काव्यतत्त्वावबोधशक्तिं** काव्यरहस्यार्थोत्प्रेक्षणसामर्थ्यम्, **किं** कस्माद्धेतोः, न **वर्णयसि** कीर्तयसि। **हि** यतः, **सर्वात्मना** सर्वांशेन, **प्रयुक्तापि** कृतापि, **वर्णना** कविता, **बाह्येव** बहिरेवावस्थितेव, **स्वभावकश्मलस्थूलबुद्धीनां** स्वभावेन, कश्मला–मलिना, स्थूला–सूक्ष्मविषयानवगाहिनी, बुद्धिर्येषां तादृशानाम्, **अस्मद्विधानाम्** अस्मत्सदृशानाम्, **प्रविश्य** अन्तःप्रवेशं कृत्वा, **सम्यक्** समीचीनं यथा स्यात् तथा, **वस्तुतत्त्वं** वस्तुनः–काव्यार्थस्य, तत्त्वं–सारांशम्, न **उल्लिखति** प्रकटयति। **अतः** अस्माद्धेतोः, **अद्यापि** अधुनापि, **त्वयि** समरकेतौ, **प्रजल्पति** प्रकथयति सति, अनुमोदयति सतीत्यर्थः, **कुमारस्य** हरिवाहनस्य, **परितोषः** सन्तोषः, **आत्मविषयः** स्वोत्प्रेक्षितकाव्यार्थविषयः, **प्रत्ययः** विश्वासश्च, **भविष्यति** उत्पत्स्यते [ज]। **च** पुनः, **अश्रुसलिलक्लिन्ननिश्चलचक्षुः** अश्रुसलिलेन–नयननिःसृतजलेन, क्लिन्नम्–आप्लुतम्, निश्चलं–निःस्पन्दम्, चक्षुर्यस्य तादृशः; पुनः **अधोमुखः** अवनतमुखः, त्वमिति शेषः, **वारिबद्धः** जलनिगृहीतः, **वनकरीव** वनगज इव, पुनः **लब्धमिथ्याभिशापः** प्राप्तमिथ्यापवादः, **साधुः** सच्चरित्रपुरुष इव, **अकस्मात्** अतर्कितम्, **प्रनष्टसकलगृहस्वापतेयः** प्रनष्टं–प्रध्वस्तम्, अपहृतमित्यर्थः, सकलं–समस्तम्, गृहस्वापतेयं–गृहस्थितं धनं यस्य तादृशः, **गृहपतिरिव** गृहस्वामीव, **आयतोष्णान्** आयतान्–दीर्घान्, उष्णान्–उष्णस्पर्शांश्च, **निःश्वासान्** नासावायून्, **मुहुर्मुहुः** वारं वारम्, **किं** किमर्थम्, **सृजसि** मुञ्चसि। **अजातप्रेयसीपाणिग्रहः** अजातः–असम्पन्नः, प्रेयस्याः–प्रकृतप्रियतमायाः, पाणिग्रहः–परिणयो यस्य तादृशः, **महात्मा** महनीयात्मा, **महद्दुःखम्** अत्यन्तदुःखम्, **अनुभविष्यति** अनुभवविषयीकरिष्यति, **इति** अस्माद्धेतोः, **तं** प्रकृतम्, **कुमारोपवर्णितवृत्तान्तयुवानं** कुमारेण–हरिवाहनेन, उपवर्णितः–प्रतिपादितः, वृत्तान्तः–समाचारो यस्य तादृशं युवानं–तरुणपुरुषम्, न **अनुशोचसि** अनु–पश्चात्, शोचसि, **कच्चित्** किम्? **इह** लोके, **एकम्** एकमात्रम्, **किं** कुतः, शोच्यते, अपि तु **सर्व एव** समस्त एव, **एवंप्रकारः** एतादृशः, संसारः, शोचनीय इति शेषः। **यदुत** यस्माद्धेतोः, **अनुरागः** प्रीतिः, **दुःखहेतुः** दुःखजनकः, पुनः **विषयोपभोगवाञ्छा** विषयोपभोगेच्छा, **विषोपमा** विषसदृशी, पुनः **अधर्मविलसितानि** पापविलासाः, **वाञ्छितार्थप्रतिपन्थीनि** अभि-

सुलभविघ्नोद्गमाः काम्यक्रियारम्भाः । सोऽपि किं करोतु वराको यस्य दुष्करे तादृशि संबन्धघटने झटिति दर्शितफला विफलतां नीता दैवेन नीतिः । किं क्रियते, निसर्गत एव निरङ्कुशः पापकारीव व्यालो बलीयान् विधिर्बद्धोऽपि बुद्धिमद्भिरतिनिबिडेन प्रज्ञालोहनिगडेन निरवग्रहो विचरति, वामचारिण्यत्र मार्गमृग इवाध्वगा नाधिगच्छन्ति वाञ्छितानि व्यापारितसकलसामर्थ्या अपि फलार्थिनः [झ]। तदलमनया स्वचित्तसंतापैकफलया फल्गुचिन्तया, मनागपि महात्मना न शोचनीयोऽसौ, शोच्यः पुनरसौ पापकर्मा कर्मचण्डालः प्रकृतिदुष्टात्मा विशिष्टाभासः सकलचौरग्रामणीरग्राह्यनामा मञ्जीरो, येन मार्जारेणेव मूषिकामिथुनमुपसृत्य निभृतमत्र विनिहितमनुपलक्षिता प्रेक्षकजनेन दर्शयिष्यामि दूरस्थैव यात्रां द्रष्टुमायातस्य यूनस्तस्येत्यभिप्रायेण लेखहारिण्या सहकारमूले स्थापितमपहृत्य लेखपत्रकं तादृशस्य दूरारूढसदृशप्रेम्णः प्रतिकूलगुरुजनकृतप्रति-

---

टिप्पनकम्—निरङ्कुशः शृणिरहितः, अन्यत्र उच्छृङ्खलः। **वामचारिणि मार्गमृग इव** एकत्र वामचारिणि-सव्यचारिणि, अन्यत्र विपरीतकारिणि [झ] ।

लषितार्थप्रतिबन्धकानि, पुनः **काम्यक्रियारम्भाः** काम्यकर्मारम्भाः, **सर्वतः** सर्वथा, **सुलभनिघ्नोद्गमाः** सुलभः-सुगमः, विघ्नोद्गमः—कर्मफलसिद्धिव्याघातकदुरदृष्टोदयो येषु तादृशाः । सोऽपि **वराकः** शोच्यजनः, किं **करोतु** प्रतिकरोतु, **यस्य** वराकस्य, **दुष्करे** प्रयाससाध्ये, **तादृशि** उक्तप्रकारे, **संबन्धघटने** सम्बन्धप्रबन्धे, **झटिति** शीघ्रम्, **दर्शितफला** प्रकटितफला, **नीतिः** उपायानुष्ठानम्, **दैवेन** विधिना, **विफलतां** निष्फलताम्, **नीता** प्रापिता । किं **क्रियते** प्रतिक्रियते, किमपि नेत्यर्थः । **निसर्गत एव** स्वभावादेव, **निरङ्कुशः** निगृहीतुमशक्यः, पक्षे अङ्कुशरहितः, **पापकारी** पापाचारी, अनिष्टकारीत्यर्थः, **व्याल इव** दुष्टगज इव, **बलीयान्** बलवत्तरः, **विधिः** दैवम्, **प्रज्ञालोहनिगडेन** प्रज्ञारूपो यः लोहनिर्मितः, निगडः—शृङ्खलः, पक्षे पादबन्धनम्, तेन **बुद्धिमद्भिः** विवेकिभिः **बद्धोऽपि** नियन्त्रितोऽपि, **निरवग्रहः** निष्प्रतिबन्धः, **विचरति** भ्रमति, **अत्र** अस्मिन्, विधावित्यर्थः, **मार्गमृग इव** मार्गस्थहरिण इव, **वामचारिणि** प्रतिकूलवर्तिनि, पक्षे वामभागगामिनि सति, **फलार्थिनः** क्रियाफलाभिलाषिणः, पक्षे प्रयाणफलाभिलाषिणः, **व्यापारितसकलसामर्थ्या अपि** प्रयुक्ताशेषशक्तिका अपि, **वाञ्छितानि** अभिलषितवस्तूनि, न **अधिगच्छन्ति** प्राप्नुवन्ति [झ]। **तत्** तस्मात्, **अनया** वर्तमानया, **स्वचित्तसन्तापैकफलया** स्वचित्तस्य—निजान्तःकरणस्य, सन्तापः—परिताप एव फलं यस्यास्तादृश्या, **फल्गुचिन्तया** तुच्छचिन्तया, **अलं** न किमपि साध्यम् । **महात्मना** महनीयात्मना, विवेकिनेत्यर्थः, **असौ** तत्पाणिग्रहणप्रवणः पुमान्, **न शोचनीयः** शोचितुमनर्हः । **पुनः** किन्तु, **असौ** स मञ्जीरः, **शोचनीयः** शोचितुमुचितः, कीदृशः ? **पापकर्मा** पापं—पापप्रयोजकम्, कर्म—कार्यं यस्य तादृशः; अत एव **कर्मचण्डालः** कर्मणा—स्वदुष्कर्मणा, चण्डालः—क्रूरः; पुनः **प्रकृतिदुष्टात्मा** प्रकृत्या—स्वभावेन, दुष्टः—दोषान्वितः, परकीयशुभद्वेषीत्यर्थः, आत्मा यस्य तादृशः; अत एव **विशिष्टाभासः** विशिष्टवदाभासमानः, न तु विशिष्ट इत्यर्थः; **सकलचौरग्रामणीः** समस्ततस्कराधिपतिः, तस्करश्रेष्ठ इत्यर्थः; पुनः **अग्राह्यनामा** अनुच्चारणीयसंज्ञकः । **येन** मञ्जीरेण, **निभृतम्** एकान्तम्, प्रच्छन्नमित्यर्थः, यथा स्यात् तथा, **उपसृत्य** उपगत्य, **मार्जारेण** बिलाडेन, **मूषिकामिथुनमिव** मूषिकाद्वन्द्वमिव, **लेखपत्रकं** लेखपत्रम्, **अपहृत्य** अपहरणकर्मीकृत्य, **प्रयोजनमन्तरेण** स्वार्थं विनैव, **मिथुनस्य** निश्चितदम्पतिद्वन्द्वस्य, **विघटनं** विश्लेषणम्, **कृतं** विहितम्, कीदृशं तत् पत्रकम्? **अत्र** अस्मिन् स्थाने, **विनिहितं** स्थापितम्, तत्पत्रमिति शेषः, **दूरस्थैव** दूरमवस्थितैव, **प्रेक्षकजनेन** दर्शकजनेन, **अनुपलक्षिता** अनवलोकिता सती, **यात्रा** कामदेवमन्दिरयात्रोत्सवम्, **द्रष्टुम्** अवलोकितुम्, **आयातस्य** आगतस्य, **तस्य** प्रकृतस्य, **यूनः** तरुणपुरुषस्य, **दर्शयिष्यामि** दृष्टिपथमुपस्थापयिष्यामि, **इत्यभिप्रायेण** इत्याशयेन, **लेखहारिण्या** पत्रवाहिकया, **सहकारमूले** आम्रवृक्षाधस्तात्, **स्थापितं** धृतम्। कीदृशस्य मिथुनस्य? **तादृशस्य** निरुक्तप्रकारस्य; पुनः **दूरारूढसदृशप्रेम्णः** दूरम्—अत्यन्तम्, आरूढः—वृद्धिं गतः, सदृशः—तुल्यः, प्रेमा—प्रीतिर्यस्य तादृशस्य; पुनः **प्रतिकूलगुरुजनकृतप्रतिबन्धस्य** प्रतिकूलैः, गुरुभिः—कुमारिकापित्रादिभिः, कृतः प्रतिबन्धः—

बन्धस्य स्वरसतः कृतानुग्रहेण भगवता मकरकेतनेन संयोज्यमानस्य मिथुनस्य प्रयोजनमन्तरेण विघटनं कृतम्, घटितश्च जीवितावधिनिधुवनसुखानां सख्यस्य रूपसौभाग्यादिगुणकलापस्य विषयोपभोगानां च सर्वंकषो विनाशः [ञ]। को वास्य मोहोपहतधिषणस्य दोषः। कुमारस्यैवायं प्रमादो यदीदृशेऽप्यपराधे नैनमन्यायकारिणं करचरणकल्पनेन वा स्वदेशनिर्वासनेन वा रासभसमारोपणेन वान्येन वा धर्मशास्त्रप्रणीतनीतिना निग्रहेण विनयं ग्राहयति, यदि वा किमनेन क्लिष्टफलयानया नरेन्द्रसेवयैव शासितेन भूयः कदर्थितेन कृपणेनेति कृपामनुरुद्ध्यमानो न निष्ठुरं व्यवहरति, ततोऽयमपि तिष्ठतु, जन्मान्तरे नरकातिथीभूतः स्वत एव जाल्मः कल्मषस्य सदृशं दशापाकमनुभविष्यति। तत्तावदन्वेष्य मिथुनं मिथः संयोजनीयं भवति। यद्विप्रयोगसंभावनया स्वशरीरभूतस्य सुहृदो हृदयदाह ईदृशो युवराजस्य' इत्युक्तवति तस्मिन् सकलोऽपि परिहासालापरञ्जितः कुमारवर्जमहसदुच्चैः प्रणयी राजलोकः [ट]। कुमारोऽपि मन्दस्पन्दिताधरपुटः स्फुरणलोले कपोलदर्पणोदरे दरलब्धावकाशमपसार्य सद्यःस्मितप्रकाशं साभ्यसूय इव 'कमलगुप्त! किमयमस्थाने

अवरोधो यस्य तादृशस्य; पुनः **स्वरसतः** स्वेच्छया, **कृतानुग्रहेण** कृतः, अनुग्रहः–दया येन तादृशेन, **भगवता** ऐश्वर्यशालिना, **मकरकेतनेन** मकरध्वजेन, कामदेवेनेत्यर्थः, **संयोज्यमानस्य** संघट्यमानस्य। **च** पुनः, **जीवितावधिनिधुवनसुखानां** जीवनपर्यन्तरतिसुखानाम्, **सख्यस्य** परस्परसौहार्दस्य, **रूपसौभाग्यादिगुणकलापस्य** रूपलावण्यादिगुणगणस्य, **च** पुनः, **विषयोपभोगानां** गन्धरसादिविषयकप्रत्यक्षजन्यसुखानुभवानाम्, **सर्वंकषः** समूलोच्छेदकरः, विनाशः, **घटितः** कृतः [ञ]। **वा** अथवा, **मोहोपहतधिषणस्य** मोहेन–अविवेकेन, उपहता–दूषिता, धिषणा–बुद्धिर्यस्य, तादृशस्य, **अस्य** मञ्जीरस्य, को **दोषः** अपराधः, न कोऽपीत्यर्थः। किन्तु **कुमारस्यैव** हरिवाहनस्यैव, अयं **प्रमादः** अनवधानम्, **यत्** यस्मात्, **ईदृशेऽपि** एवंविधेऽपि, **अपराधे** दोषे, **अन्यायकारिणं** न्यायविरुद्धाचारिणम्, **एनं** मञ्जीरम्, **निग्रहेण** नियन्त्रणेन दण्डेनेत्यर्थः, **विनयं** नम्रताम्, न **ग्राहयति** प्रापयति, कीदृशेन निग्रहेण? **करचरणकल्पनेन** हस्तपादविध्वंसनेन, **वा** अथवा, **स्वदेशनिर्वासनेन** स्वदेशाद् बहिष्करणेन, **वा** अथवा, **रासभसमारोपणेन** गर्दभपृष्ठारोहणेन, **वा** अथवा, **अन्येन** तद्भिन्नेन, **धर्मशास्त्रप्रणीतनीतिना** धर्मशास्त्रेण प्रणीता–प्रकल्पिता, नीतिः–न्याय्या पद्धतिर्यस्य तादृशेन। **वा** अथवा, **क्लिष्टफलया** क्लिष्टं–क्लेशसाध्यम्, फलं यस्यास्तादृश्या, **अनया** वर्तमानया, **नरेन्द्रसेवयैव** नृपसेवयैव, **शासितेन** विनयं ग्राहितेन, **कृपणेन** क्षुद्रेण, **अनेन** मञ्जीरेण, **भूयः** पुनः, **कदर्थितेन** भर्त्सितेन, **किं** न किमपि, फलमित्यर्थः, **इति** ईदृशीम्, **कृपामनुरुध्यमानः** तस्मिन् दयामिच्छन्, यदि **निष्ठुरं** कठोरं यथा स्यात् तथा, **न व्यवहरति** नाचरिष्यति, भवानिति शेषः, **ततः** तर्हि, **अयमपि** मञ्जीरोऽपि, **तिष्ठतु** यथावदस्तु। किन्तु **जन्मान्तरे** अन्यजन्मनि, **जाल्मः** अन्यायकारी मञ्जीर इत्यर्थः, **नरकातिथीभूतः** नरकलोकातिथिः सम्पत्स्यमानः, स्वत एव **कल्मषस्य** स्वकृतपापस्य, **सदृशम्** अनुरूपम्, **दशापाकं** परिणामफलम्, दुःखमित्यर्थः, **अनुभविष्यति** उपभोक्ष्यते। **तावत्** प्रथमम्, **तत् मिथुनं** विघटितत्वेन शङ्कितं द्वन्द्वम्, **अन्वेष्य** अन्वेषणं कृत्वा, **मिथः** परस्परम्, **संयोजनीयं** सङ्घटनीयम्, **भवति** विद्यते, **यद्विप्रयोगसम्भावनया** यद्विघटनशङ्कया, **युवराजस्य** हरिवाहनस्य, **स्वशरीरभूतस्य** स्वशरीरवदाचरितस्य, अत्यन्तान्तरङ्गस्येत्यर्थः, **सुहृदः** मित्रस्य समरकेतोः, **ईदृशः** एतादृशः, **हृदयदाहः** हृदयसंतापः, वर्तते इति शेषः। **तस्मिन्** कमलगुप्ते, **इति** इत्थम्, **उक्तवति** कथितवति सति, **परिहासालापरञ्जितः** परिहासालापेन–तत्कृतोपहासकथया, रञ्जितः–प्रमोदितः, **सकलोऽपि** सर्वोऽपि, **प्रणयी** स्नेही, **राजलोकः** नृपजनः, **कुमारवर्जं** हरिवाहनरहितं यथा स्यात् तथा, **उच्चैः** उच्चस्वरेण, **अहसत्** हसितवान् [ट]। **कुमारोऽपि** हरिवाहनोऽपि, **मन्दस्पन्दिताधरपुटः** किञ्चिच्चलितौष्ठपुटः सन्, **स्फुरणलोले** स्पन्दनतरले, **कपोलदर्पणोदरे** कपोलौ दर्पणाविव समुज्ज्वलत्वादिति कपोलदर्पणौ तयोरुदरे–मध्ये, **दरलब्धावकाशं** किञ्चिदवाप्तसमावेशम्, **स्मितप्रकाशं** मन्दहासालोकम्, **सद्यः** तत्क्षणम्, **अपसार्य** निवार्य, **साभ्यसूय इव** अभ्यसूयया–दोषाविष्कारेण सहित इव, **कमलगुप्त!** भोः

विप्लवप्रपञ्चः' इत्युदीर्य तिर्यग्वलितवदनः सिंहलेन्द्रसुतमवादीत्—'सखे! किंनिमित्तं प्रहर्षस्थानेऽप्येवमस्वस्थेन भवता स्थीयते, किमर्थमिदमतर्कितागतेन तमसा समास्कन्दितं वदनमिन्दुमिव चन्द्रिका नार्द्रयति नर्मालापेष्वपि कुन्दनिर्मला ते स्मितद्युतिः, किमित्यधिकमधुरा अपि परपुरन्ध्रिदूतीगिर इव श्रवसि न विशन्ति शृङ्गारप्रधानाश्चिरन्तनकवीनामुक्तयः, केन हेतुना नूतनैरपि सुहृज्जनसूक्तैरजातपुलकोद्गतिरुभयपाणिपर्यङ्कशरणा धार्यते कपोलद्वयी । कच्चिन्न मयि जल्पति जातमुपतापदायिनः स्ववृत्तान्तस्य कस्यचिदाकस्मिकं स्मरणम्, यथाऽयमार्यार्थसूचितो युवा तथा न त्वमपि कुसुमायुधजयपताकया, कयाप्यवनिपालकन्यया क्वापि नयनमार्गणैर्विद्धः । प्रयुक्तप्रार्थनश्च निपुणमनयेव चतुरया वचनभङ्ग्या न क्वचित् सङ्केतस्थानकथनेन कृतार्थीकृतोऽसि, कृतप्रयत्नश्च तदवाप्तये विधिवशादतर्कितोपनतेन केनचिद् गरीयसा कार्येण तत्समागमसुखानां न दूरीकृतोऽसि [ठ] ।' इत्यादृतेन नृपतिसूनुना प्रयुक्तहृदयंगमप्रश्नः शनैरुन्नम्य सत्वरगृहीतोत्तरीयपल्लवप्रमृष्टदृष्टिवदनमनादरविलोकितपार्श्ववर्तिराजलोकः सशोक इव समरकेतुर्विरतवाक्प्रवृत्तिः स्थित्वा मुहूर्तमुपचक्रमे वक्तुम्—

कमलगुप्त !, **अस्थाने** अनवसरे, अयं **विप्लवप्रपञ्चः** क्षोभविस्तारः, किं किमर्थः, **इत्युदीर्य** इत्युक्त्वा, **तिर्यग्वलितवदनः** तिर्यक्-कुटिलं यथा स्यात् तथा, वलितं-स्पन्दितं मुखं यस्य तादृशः सन्, **सिंहलेन्द्रसुतं** सिंहलद्वीपनृपकुमारम्, समरकेतुमित्यर्थः, **अवादीत्** उक्तवान् किमित्याह—**सखे !** भो मित्र ! **प्रहर्षस्थानेऽपि** प्रमोदावसरेऽपि, **किंनिमित्तं** किमर्थम्, **भवता** त्वया, **एवम्** अनेन प्रकारेण, **अस्वस्थेन** शोकाकुलेन, स्थीयते, **किमर्थं** कस्य हेतोः, **कुन्दनिर्मला** कुन्दपुष्पवद्धवला, **ते** तव, **स्मितद्युतिः** मन्दहासच्छविः, **नर्मालापेऽपि** परिहासालापेऽपि, **अतर्कितागतेन** अकस्मादुपस्थितेन, **तमसा** शोकेन, पक्षे राहुणा, **समास्कन्दितं** समाक्रान्तम्, **वदनं** मुखम्, **इन्दुं** चन्द्रम्, **चन्द्रिका इव** ज्योत्स्ना इव, न **आर्द्रयति** आर्द्रीकरोति, रूक्षतामपनयतीति यावत्, उल्लासयतीत्यर्थः । **अधिकमधुरा अपि** अत्यन्तश्रोत्रपेया अपि, **शृङ्गारप्रधानाः** प्राधान्येन शृङ्गाररसाभिव्यञ्जिकाः, **चिरन्तनकवीनां** प्राचीनकविसम्बन्धिन्यः, **उक्तयः** वाचः, **परपुरन्ध्रिदूतीगिर इव** पराङ्गनादूतीवचनानीव, **श्रवसि** कर्णे, **किमिति** किमर्थम्, न **विशन्ति** प्रविशन्ति, केन **हेतुना** कारणेन, **नूतनैरपि** नवीनैरपि, **सुहृज्जनसूक्तैः** मित्रजनसुभाषितैः, **अजातपुलकोद्गतिः** अजातरोमाञ्चोदया, पुनः **उभयपाणिपर्यङ्कशरणा** उभयपाणी-उभयकरावेव, पर्यङ्कौ-तदाख्यशयनाधारविशेषौ, शरणे-आधारौ यस्यास्तादृशी, **कपोलद्वयी** गण्डयुगलम्, **धार्यते** धारणकर्मतां प्राप्यते । मयि **जल्पति** भाषमाणे सति, **उपतापदायिनः** सन्तापकारिणः, **कस्यचित्** कस्यापि, स्ववृत्तान्तस्य, **आकस्मिकम्** अतर्कितोपनतकम्, स्मरणं न **जातम्** उत्पन्नम्, **कच्चित्** किम् ? **यथा** येन प्रकारेण, **आर्यार्थसूचितः** प्रकृतार्याशयेन कृतसूचनः, **अयं** बुद्धिसन्निकृष्टः, **युवा** तरुणः पुमान्, कयापि कन्यया नेत्रबाणविद्धो वर्तते, **तथा** तेन प्रकारेण; त्वमपि **कुसुमायुधजयपताकया** कामदेवजयपताकारूपया, **कयापि** कयाचित्, **अवनिपालकन्यया** नृपकन्यया, **क्वापि** कुत्रापि स्थाने, **नयनमार्गणैः** नेत्रबाणैः, **विद्धः** व्रणितः, **आहत** इत्यर्थः, न **वर्तसे** इति शेषः; **च** पुनः, **अनयेव** प्रकृतकन्ययेव, **चतुरया** चातुरीपूर्णया, **वचनभङ्ग्या** वचनकौटिल्येन, वचनविच्छित्त्या वा, **निपुणं** स्फुटं यथा स्यात् तथा, **प्रयुक्तप्रार्थनः** प्रयुक्ता-कृता, प्रार्थना यस्य तादृशः सन्, **क्वचित्** कुत्रापि, **संकेतस्थानकथनेन** संकेतस्य-प्रतिज्ञातोभयसम्मेलनसमयप्रतीक्षाया यत् स्थानं तस्य, सूचनेन न **कृतार्थीकृतोऽसि** सफलीकृतोऽसि । **च** पुनः, **तदवाप्तये** तत्प्राप्तये, **कृतप्रयत्नः** विहितप्रयासः सन्, **विधिवशात्** दुर्दैवयोगात्, **अतर्कितोपनतेन** अकस्मादुपस्थितेन, **गरीयसा** गुरुतरेण, **केनचित्** केनापि, कार्येण, न **तत्समागमसुखानां** तत्सम्मेलनानन्दानाम्, **दूरीकृतोऽसि** दूरमवस्थापितोऽसि, ततो वञ्चितोऽसीत्यर्थः [ठ] । **इति** इत्थम्, **आदृतेन** सादरेण, **नृपतिसूनुना** नृपात्मजेन हरिवाहनेन, **प्रयुक्तहृदयङ्गमप्रश्नः** प्रयुक्तः-कृतः, हृदयङ्गमः-हार्दिकार्थविषयकः, प्रश्नो यस्य तादृशः, पुनः **शनैः** मन्दम्, **उन्नम्य** ऊर्ध्वमुखीभूय, **सत्वरगृहीतोत्तरीयपल्लवप्रमृष्टदृष्टिवदनं** सत्वरं-शीघ्रम्, गृहीतेन, उत्तरीय-

अमानुषी कुमार! तव प्रज्ञा प्रजापतेरिव तनुस्तनोति सर्वतोमुखतया परं मे मनसि विस्मयम्, अखिलजनमानसनिवासादिव त्वया समासादितमिदं पराशयज्ञानकौशलम्, किमहमत्रापरं कथयामि, निजयैव प्रज्ञया निवेदितस्ते सकलोऽपि सामान्येन मद्दुःखवृत्तान्तः, यदि परं परिकर एव मयास्य कथनीयः, तमपि वज्रसारकठोरहृदयस्त्वया समाज्ञापित इति विज्ञापयामि, किन्तु महती कथैषा न शक्यते संक्षिप्य कथयितुम्, विस्तरतस्तु कथ्यमाना पराणि कार्यान्तराण्यन्तरयिष्यति तथापि यदि कौतुकमावेदयामि, श्रूयतामेतत् प्रायेण श्रुतिविषयमायातमेव श्रुतिमतां वरस्य [ड]—

यथा—सिंहलेष्वस्ति समस्तवसुमतीभूषणमभ्रङ्कषप्राकारवलया विमानाकारपौरालयसहस्रशालिनी **रङ्गशाला** नाम नगरी। तत्रस्थः पिता मे **चन्द्रकेतुः** कदाचिद् देशकालाद्यवष्टम्भसंभृतावलेपानां प्रपन्नमपि पूर्व-

---

टिप्पनकम्—विक्षेपः–दण्डो धाटको [ढ]।

पल्लवेन–पल्लवमृदुलोत्तरीयवस्त्रेण, प्रमृष्टं–प्रोञ्छितम्, दृष्टिवदनं–मुखनयनं यस्मिंस्तादृशं यथा स्यात् तथा, **अनादरविलोकितपार्श्ववर्तिराजलोकः** अनादरेण–दुःखवशादादरराहित्येन, विलोकितः, पार्श्ववर्ती–सविधवर्ती, राजलोकः–नृपजनो येन तादृशः, समरकेतुः, **सशोक इव** शोकान्वित इव, **विरतवाक्प्रवृत्तिः** निवृत्तवचनप्रयोगः सन्, मूकः सन्नित्यर्थः, **मुहूर्तं** क्षणम्, स्थित्वा, **वक्तुं** कथयितुम्, **उपचक्रमे** प्रारेभे, किमित्याह–**कुमार!** भो हरिवाहन! **प्रजापतेः** ब्रह्मणः, **तनुरिव** शरीरमिव, **सर्वतोमुखतया** सर्वतः–सर्वत्र, अतीताऽनागतवर्तमानसन्निकृष्ट-विप्रकृष्ट-स्थूल-सूक्ष्म-सर्वविषयेषु, मुखं–प्रवृत्तिर्यस्यास्तादृशतया, पक्षे सर्वतः–सर्वभागेषु, मुखं यस्यास्तादृशतया चतुर्मुखतयेत्यर्थः, अमानुषी–मानवगणेऽदृश्यमाना, दिव्येत्यर्थः, तव, **प्रज्ञा** प्रतिभा, **मे** मम, **मनसि** चेतसि, **परम्** अत्यन्तम्, विस्मयम्, आश्चर्यम्, **तनोति** विस्तारयति। **अखिलजनमानसनिवासादिव** सर्वजनहृदयागारनिवासादिवेति हेतूत्प्रेक्षा, **इदं** प्रत्यक्षवदनुभूयमानम्, **पराशयज्ञानकौशलं** पराभिप्रायनिर्णयनैपुण्यम्, त्वया, **समासादितं** प्राप्तम्। **अत्र** अस्मिन् विषये, **अपरम्** अन्यत्, **किं कथयामि** ब्रवीमि, **सकलोऽपि** सर्वोऽपि, **मद्दुःखवृत्तान्तः** मदीयदुःखवार्ता, **निजया** स्वकीयया, **प्रज्ञयैव** प्रतिभयैव, **ते** तव, **सामान्येन** अविशेषेण, **निवेदितः** विज्ञापितः, **परं** केवलम्, मया, **अस्य** दुःखवृत्तान्तस्य, **परिकर एव** विस्तार एव, विशेषांश एवेत्यर्थः, यदि **कथनीयः** कथनार्हः, अवशिष्यत इति भावः, तदा **वज्रसारकठोरहृदयः** वज्रस्य यः सारः–दृढांशः, तद्वत् कठोरं–निष्ठुरं हृदयं यस्य तादृशः, अहमिति शेषः, **त्वया** हरिवाहनेन, **समाज्ञापितः** कथयितुमादिष्टः, **इति** हेतोः, **तमपि** तद्विस्तारमपि, **विज्ञापयामि** निवेदयामि, कथयामीत्यर्थः, **किन्तु** परन्तु, **महती** विपुला, **एषा** इयम्, **कथा** वार्ता, **संक्षेपेण** समासेन, **कथयितुं** निवेदयितुम्, न शक्यते, **विस्तरतस्तु** व्यासेन तु, **कथ्यमाना** निवेद्यमाना, **पराणि** अग्रिमाणि, अनन्तराणीत्यर्थः, **कार्यान्तराणि** अन्यान्यकार्याणि, **अन्तरयिष्यति** व्यवधास्यति, **तथापि** एवं सत्यपि, यदि **कौतुकं** श्रवणकुतुहलम्, तदा **आवेदयामि** प्रतिपादयामि, **एतद्** इदं वृत्तान्तम्, **श्रूयतां** निशम्यताम्, कीदृक्? **प्रायेण** बाहुल्येन, संक्षेपेण इत्यर्थः। **श्रुतिमतां** शास्त्रज्ञानवताम्, **वरस्य** श्रेष्ठस्य, भवत इति शेषः, **श्रुतिविषयं** श्रवणगोचरताम्, **आयातमेव** प्राप्तमेव [ड]।

यथा विवक्षितवृत्तान्तस्वरूपोपदर्शनार्थोऽयंशब्दः, **सिंहलेषु** तदाख्यद्वीपमध्ये, **रङ्गशालानगरी** तदाख्यपुरी, **नामे**ति वाक्यालङ्कारे, **अस्ति** विद्यते, कीदृशी? **समस्तवसुमतीभूषणम्** अखिलपृथ्वीभूषणभूता, पुनः **अभ्रङ्कषप्राकारवलया** अभ्रङ्कषं गगनचुम्बि, अत्युन्नतमित्यर्थः, आकारवलयं–प्राकारमण्डलं यस्यास्तादृशी, पुनः **विमानाकारपौरालयसहस्रशालिनी** विमानाकारं–व्योमयानतुल्याकारं यत्, पौरालयानां–पुरमध्यवर्तिगृहाणाम्, सहस्रं तेन शालते–शोभते, या तादृशी, **तत्रस्थः** तत्र वास्तव्यः, **मे** मम, पिता, **चन्द्रकेतुः** तदाख्यनृपतिः, **कदाचित्** कस्मिंश्चित् काले, **दुष्टसामन्तानां** दुष्टानां–दोषान्वितानाम्, सामन्तानां–स्वाधिकारवर्तिनृपाणाम्, **प्रतिक्षेपाय** अपनयनाय, दण्डनाय आक्रमणाय वा, **दक्षिणापथयायि** दक्षिणदेशगामि, **नौसैन्यं** नौद्वारा गमनकर्तृसैन्यम्, **आदिक्षत** आज्ञापितवान्। कीदृशानाम्? **देशकालाद्यवष्टम्भसम्भृतावलेपानां** सिद्धेर्दण्डस्य चाङ्गविधया यो देशकालादिविवेक उक्तः, तदवष्टम्भेन–तदाश्रयणेन,

दायमप्रयच्छतां विक्षेपविसर्जनेषु कालक्षेपकारिणामाह्वानेषु बह्वनागमनकारणव्याहारिणामुत्सवेष्वहृष्टानामापत्सु सविलासचेष्टानामुक्त्या प्रीतिमुपदर्शयतां युक्त्या प्रतिलोमं व्यवहरतां सुवेलशैलोपकण्ठवासिनां दुष्टसामन्तानां प्रतिक्षेपाय दक्षिणापथयायि नौसैन्यमादिक्षत। प्रस्थितस्य च तस्य रिपुविनाशाय यथाशक्तिकृतशास्त्रपरिचयमधीतनीतिविद्यमभ्यस्तनिरवद्यधनुर्वेदमसिगदाचक्रकुन्तप्रासादिषु प्रहरणविशेषेषु कृतश्रममचिरारूढयौवनमभिषिच्य यौवराज्ये मामेव नायकमकल्पयत्। अर्पितानल्पपदातिसैन्यं च पुण्येऽहनि प्रधानैरवनिपतिभिरमात्यैः सामन्तैश्च कृत्वा ससहायं प्राहिणोत् [ढ]।

अथाहं प्रातरेव स्नातो निर्वर्तिताभिमतदेवताविशेषपूजः संपूज्य वस्त्राद्यतिसर्जनेन द्विजातिलोकं प्रतिकलावलोकितशङ्कुच्छायैर्ज्योतिर्गणितविद्भिः साधिते लग्ने सितदुकूलवासाः सितकुसुमदामग्रथितशेखरः शरच्चन्द्रातपेनेव कौमुदीमहोत्सवभ्रमणलग्नेन स्पर्शाह्लादिना चन्दनाङ्गरागेण सर्वाङ्गीणेन शोभमानः स्थूलस्वच्छमुक्ताफलग्रथितां

सम्भृतः–कृतः, अवलेपः–गर्वो यैस्तादृशानाम्; पुनः **प्रपन्नमपि** स्वयमङ्गीकृतमपि, **पूर्वदायं** पूर्वदेयकरम्, **अप्रयच्छताम्** अप्रददताम्; पुनः **विक्षेपविसर्जनेषु** दण्डद्रव्यदानेषु, **कालक्षेपकारिणां** कालातिक्रमकारिणाम्; पुनः **आह्वानेषु** स्वसविधाहूतिषु सतीषु, **बह्वनागमनकारणव्याहारिणां** बहूनि यानि अनागमनकारणानि–आगमनाभावहेतवः, तद्व्याहारिणां-तत्प्रतिपादिनाम्; **उत्सवेषु** मङ्गलावसरेषु, **अहृष्टानाम्** अमुदितानाम्; पुनः **आपत्सु** आपत्त्यवसरेषु, **सविलासचेष्टानां** विलसेन–मुखप्रसादादिविभ्रमेण, सहिता चेष्टा–शारीरिकक्रिया येषां तादृशानाम्; पुनः **उक्त्या** वचनेन, **प्रीतिं** प्रेमाणम्, **उपदर्शयतां** प्रकटयताम्; पुनः **युक्त्या** उपायेन, **प्रतिलोमं** प्रतिकूलं यथा स्यात् तथा, **व्यवहरताम्** आचरताम्; पुनः **सुवेलशैलोपकण्ठवासिनां** सुवेलशैलस्य–सुवेलपर्वतस्य, उपकण्ठे–निकटे, वास्तव्यानाम्। **च** पुनः, **रिपुविनाशाय** शत्रुविनाशाय, **प्रस्थितस्य** प्रयातस्य, **तस्य** सैन्यस्य, **नायकं** पतिम्, मामेव, **अकल्पयत्** कृतवान्, किं कृत्वा? **यौवराज्ये** युवराजपदे, **अभिषिच्य** अभिषेकं कृत्वा, कीदृशं माम्? **यथाशक्तिकृतशास्त्रपरिचयं** स्वशक्त्यनुसारविहितशास्त्रानुशीलनम्; पुनः **अधीतनीतिविद्यम्** पठितनीतिशास्त्रम्; पुनः **अभ्यस्तनिरवद्यधनुर्वेदम्** अभ्यस्तः–घुषितः, निरवद्यः–प्रशस्यः, धनुर्वेदः–धनुर्विद्या येन तादृशम्; पुनः **असि-गदा-चक्र-कुन्त-प्रासादिषु** तत्तदस्त्रविशेषप्रभृतिषु, **प्रहरणविशेषेषु** अस्त्रविशेषेषु, **कृतश्रमं** कृतशिक्षणायासम्; पुनः **अचिरारूढयौवनम्** अभिनवोद्भूततारुण्यम्। **च** पुनः, **अर्पितानल्पपदातिसैन्यम्** अर्पितं–दत्तम्, अनल्पं–प्रचुरम्, पदातिसैन्यं–पदगामि सैन्यं यस्मै तादृशम्, मामिति शेषः, **प्रधानैः** मुख्यैः, **अवनिपतिभिः** नृपतिभिः, **अमात्यैः** सचिवैः, **सामन्तैः** अधीननृपैश्च, स **सहायं** सहायसहितम्, कृत्वा, **पुण्ये** प्रशस्ते, **अहनि** दिने, **प्राहिणोत्** प्रेषितवान् [ढ]।

अथ अनन्तरम्, **प्रातरेव** प्रातःकाल एव, **स्नातः** कृतस्नानः, **सभामण्डपं** सभागृहम्, **अगच्छम्** गतवान्; कीदृशः? **निर्वर्त्तिताभिमतदेवताविशेषपूजः** निर्वर्तिता–सम्पादिता, अभिमतदेवताविशेषस्य–इष्टदेवविशेषस्य, पूजा येन, यद्वा अभिमतदेवताया विशेषपूजा येन तादृशः; किं कृत्वा? **वस्त्राद्यतिसर्जनेन** वस्त्रादिदानेन, **द्विजातिलोकं** द्विजजनम्, **सम्पूज्य** सम्यक् पूजयित्वा; कदा? **प्रतिकलावलोकितशङ्कुच्छायैः** कला नाम–राशेः षष्टितमोऽशः, कलां कलां प्रति–प्रतिकलम्, अवलोकिता–दृष्टा, शङ्कोः–आरोपितद्वादशाङ्गुलदण्डस्य, छाया यैस्तादृशैः, तच्छायावलोकननिर्णीतेष्टकालकैरित्यर्थः, **ज्योतिर्गणितविद्भिः** ज्योतिर्नाम–नक्षत्रम्, तत्प्रधानकं शास्त्रमिति यावत्, तत्सम्बन्धि यद् गणितं–गणना, तद्विद्भिः–तदभिज्ञैः, दैवविद्भिरित्यर्थः, **साधिते** निरूपिते, **लग्ने** राश्युदये; पुनः कीदृशः? **सितदुकूलवासाः** सितं–शुभ्रम्, दुकूलं–पट्टम्, वासः–वस्त्रं यस्य तादृशः; पुनः **सितकुसुमदामग्रन्थितशेखरः** सितानि–श्वेतानि, यानि कुसुमानि–पुष्पाणि, तेषां दाम्ना–मालया, ग्रथितः–कल्पितः, शेखरः–शिरोभूषणं येन तादृशः; पुनः **कौमुदीमहोत्सवभ्रमणलग्नेन** कौमुद्याः चन्द्रिकायाः, यो महोत्सवः–महानुत्सवः, तत्र यद् भ्रमणं–विहरणम्, तेन लग्नेन शरीरसम्पृक्तेन, **शरच्चन्द्रातपेन इव** शरच्चन्द्रकिरणेनेवेत्युत्प्रेक्षा, **स्पर्शाह्लादिना** स्पर्शसुखावहेन, **सर्वाङ्गीणेन** सर्वाङ्गव्यापकेन, **चन्दनाङ्गरागेण**

तत्क्षणप्रमुदिताया वक्षःस्थलभाजो राजलक्ष्या लोचनद्वयादानन्दाश्रुपद्धतिमिव द्विधाप्रवृत्तां नाभिचक्रचुम्बिनीमेकावलीं दधानो बद्धचन्दनप्रवालवन्दनमालातरङ्गिततोरणमुद्दामगन्धोदकच्छटाविच्छर्दविरजीकृताजिरमागृहीतोज्ज्वलवेषसविशेषचारुसंचरद्वारवनिताजनमवहितप्रतीहारनिर्धार्यमाणानिबद्धभाषिबाह्यपरिजनं सभामण्डपमगच्छम् [ण] ।

तत्र च पवित्रमणिवेदिकापृष्ठनिहिते महति हेमासने प्राङ्मुखोपविष्टस्तत्कालमभिमुखीभूताभिः साक्षादिव जयश्रीभिरूरुसंदंशदष्टनिवसनाग्रपल्लवस्पष्टीकृतनितम्बपरिणाहाभिरीषदवनमितपूर्वकायतया मिलद्वलित्रयत्र्यस्त्रीभूतनाभिमण्डलाभोगाभिः कनकवलयावलीवाचालभुजलतोत्क्षेपलक्ष्यमाणपीनोद्धुरपयोधराभिरुज्झितस्तनोत्सङ्गनिःसङ्गलम्बमानप्रलम्बमौक्तिकप्रालम्बाभिः पुरोनिहितदधिकुसुमदूर्वाङ्कुरसनाथाक्षतपूर्णकनकपात्राभिरन्तःपुर-

---

चन्दनसम्बन्धिशरीरलेपनद्रवेण, **शोभमानः** दीप्यमानः; पुनः **स्थूलस्वच्छमुक्ताफलग्रथितां** स्थूलानि, स्वच्छानि-शुभ्राणि च, यानि मुक्ताफलानि-मौक्तिकानि, तैः, ग्रथितां–गुम्फिताम्, **द्विधाप्रवृत्तां** द्विधाऽवस्थिताम्, भागद्वयेनावस्थितामित्यर्थः, पुनः **नाभिचक्रचुम्बिनीम्** नाभिमण्डलव्यापिनीम्, **एकावलीम्** एकपङ्क्त्यात्मिकाम्, मालां **दधानः** धारयन्, कामिव? **तत्क्षणप्रमुदितायाः** तत्कालप्रहृष्टायाः, पुनः **वक्षःस्थलभाजः** वक्षःस्थलस्थितायाः, **राजलक्ष्म्याः** राजसम्बन्धिन्या लक्ष्म्याः, **लोचनद्वयात्** नेत्रद्वयात्, निर्गतामिति शेषः, द्विधाप्रवृत्ताम्, **आनन्दाश्रुपद्धतिमिव** आनन्दजन्यनेत्रजलप्रवाहमिवेत्युत्प्रेक्षा; कीदृशं सभामण्डपम्? **बद्धचन्दनप्रवालवन्दनमालातरङ्गिततोरणम्** बद्धाभिः, चन्दनप्रवालानां–चन्दनपल्लवानाम्, वन्दनमालाभिः–तोरणमालाभिः, तरङ्गितं–व्याप्तम्, तोरणं–बहिर्द्वारं यस्य तादृशम्; पुनः **उद्दामगन्धोदकच्छटाविच्छर्दविरजीकृताजिरम्** उदाम्नाम्–अप्रतिहतानाम्, गन्धोदकच्छटानां–गन्धान्वितजलधाराणाम्, विच्छर्देन–विक्षेपेण, विरजीकृतः–निर्धूलीकृतः, अजिरः–प्राङ्गणं यस्य तादृशम्, पुनः **आगृहीतोज्ज्वलवेषसविशेषचारुसञ्चरद्वारवनिताजनम्** आ–समन्तात्, गृहीतेन, उज्ज्वलवेषेण, सविशेषचारवः–अत्यन्तमनोहराः, सञ्चरन्तः–प्रचरन्तः, वारवनिताजनाः–वेश्याजना यस्मिंस्तादृशम्, पुनः **अवहितप्रतीहारनिर्धार्यमाणानिबद्धभाषिबाह्यपरिजनम्** अवहितप्रतीहारैः–सावधानद्वारपालैः, निर्धार्यमाणाः–पृथक्क्रियमाणाः, निरुध्यमाना इति यावत्, अनिबद्धभाषिणः–असम्बद्धभाषिणः, बाह्यपरिजनाः–बाह्यपरिवारा यस्मिंस्तादृशम् [ण] ।

च पुनः, **तत्र** सभामण्डपे, **पवित्रमणिवेदिकापृष्ठनिहिते** निर्मलमणिमयवेदिकोपरिधृते, **महति** विशाले, **हेमासने** सुवर्णमयासने, **प्राङ्मुखोपविष्टः** पूर्वाभिमुखकृतोपवेशनः सन्, **राजकुलात्** राजधानीतः, **निरगच्छम्** निर्गतवानित्यग्रेणान्वेति; कीदृशः? **अन्तःपुरविलासिनीभिः** अन्तःपुरवधूभिः, **सम्पादितसकलयात्रामङ्गलः** सम्पादितानि–निष्पादितानि, सकलानि–समस्तानि, यात्रामङ्गलानि–यात्राकालिकमङ्गलोपचारा यस्य तादृशः; कीदृशीभिः? **तत्कालं** तत्क्षणम्, **अभिमुखीभूताभिः** सम्मुखीभूताभिः, साक्षात्, **जयश्रीभिरिव** रिपुविजयलक्ष्मीभिरिवेत्युत्प्रेक्षा, पुनः **ऊरुसन्दंशदष्टनिवसनाग्रपल्लवस्पष्टीकृतनितम्बपरिणाहाभिः** ऊरुरूपः–जानूपरितनभागरूपो यः, सन्दंशः–वस्तुनियन्त्रणोपकरणविशेषः, तेन दष्टेन–नियन्त्रितेन, आकुञ्चितेनेत्यर्थः, निवसनस्य–सूक्ष्मवस्त्रस्य, अग्रपल्लवेन–पल्लवकोमलाग्रभागेन, स्पष्टीकृतः–स्फुटीकृतः, नितम्बस्य–कटिपश्चाद्भागस्य, परिणाहः–विस्तारो यासां तादृशीभिः, पुनः **ईषदवनमितपूर्वकायतया** किञ्चिदधोनमितशरीरपूर्वार्धतया हेतुना, **मिलद्वलित्रयत्र्यस्त्रीभूतनाभिमण्डलाभोगाभिः** मिलता सङ्घटमानेन, वलित्रयेण–नाभिमण्डलाधस्तनरेखात्रयेण, त्र्यस्त्रीभूतः–त्रीणि अस्राणि–कोणा यस्य तादृशीभूतः, नाभिमण्डलस्य, आभोगः–विस्तारो यासां तादृशीभिः, पुनः **कनकवलयावलीवाचालभुजलतोत्क्षेपलक्ष्यमाणपीनोद्धुरपयोधराभिः** कनकवलयानां–सुवर्णमयप्रकोष्ठाभरणानाम्, आवल्या–पङ्क्त्या, वाचालायाः–मुखरायाः, भुजलतायाः–बाहुलतायाः, उत्क्षेपेण–उद्वेलनेन, लक्ष्यमाणौ–दृश्यमानौ, उद्धुरौ–उन्नतौ, पीनौ–स्थूलौ च, पयोधरौ–स्तनौ यासां तादृशीभिः, पुनः **उज्झितस्तनोत्सङ्गनिःसङ्गलम्बमानप्रलम्बमौक्तिकप्रालम्बाभिः** उज्झितः–त्यक्तः, स्तनोरसङ्गः–स्तनमध्यभागो येन तादृशम्, अत एव निःसङ्गं–तत्सम्पर्करहितं यथा स्यात् तथा, लम्बमानम्–अधोनमत्, प्रलम्बं–दीर्घम्, मौक्तिकानां–मुक्तामणीनाम्, प्रालम्बं–ऋजुलम्बिमाल्यं यासां तादृशीभिः, पुनः **पुरोनिहितदधिकुसुमदूर्वाङ्कुरसनाथाक्षतपूर्णकनकपात्राभिः** पुरः–अग्रे,

विलासिनीभिः संपादितसकलयात्रामङ्गलः [त], प्रत्यग्रसप्तच्छदप्रवालदत्तसान्द्रमुखमुद्रमभिवन्द्य पुरःस्थापितं राजतपूर्णकुम्भमप्रतिरथाध्ययनध्वनिमुखरेण पुरःसरपुरोधसा द्विजातिवृन्देनानुगम्यमानश्चरणाभ्यामेव गत्वा प्रथमकक्षान्तरद्वारभूमिमग्रतः ससंभ्रमव्यापारिताङ्कुशेन वज्राङ्कुशनाम्ना महामात्रेण प्राङ्मुखीकृत्य विधृतं सितपिष्टपङ्कपाण्डुरितगात्रमक्षुद्रमणिचित्रनक्षत्रमालापरिक्षिप्तं सिन्दूरपाटलविकटकुम्भभागमारोपितानेकनिशितशस्त्रप्रभाशारशातकुम्भशारीपरिकरितपृष्ठपीठमश्रान्तमदवारिधारादुर्दिनान्धकारितकरटकूटं त्रिकूटपर्वतमिव परित्यक्तस्थावरावस्थममरवल्लभाभिधानं गन्धगजमधिरूढो [थ], दृढावनद्धतारतूणीरबन्धुरोभयस्कन्धशिखरः कनकपत्रभङ्गचित्रमध्यभागभाजा शरासनेन सनाथवामहस्तः सलीलमुद्धूयमानवालव्यजनकलापः सदर्पसर्प-

---

टिप्पनकम्—अप्रतिरथः—प्रस्थानमन्त्रः । शारः—कर्बुरः [थ] ।

निहितं—स्थापितम्, दध्ना, कुसुमैः—पुष्पैः, दूर्वाङ्कुरैः—दूर्वाख्यतृणविशेषाङ्कुरैः, सनाथं—सहितम्, अक्षतपूर्णम्—आर्द्रतण्डुलपूर्णम्। कनकपात्रं—सुवर्णपात्रं याभिस्तादृशीभिः [त]। पुनः **प्रत्यग्रसप्तच्छदप्रवालदत्तसान्द्रमुखमुद्रम्** प्रत्यग्रैः—अभिनवैः, सप्तच्छदस्य—सप्तसप्तपत्रविशिष्टवृन्तकवृक्षविशेषस्य, प्रवालैः—पल्लवैः, दत्ता—सम्पादिता, सान्द्रा—निबिडा, मुखमुद्रा—मुखावरणं यस्य तादृशम्, **पुरः** अग्रे, **स्थापितं** धृतम्, **राजतपूर्णकुम्भं** रजतनिर्मितपूर्णकलशम्, **अभिवन्द्य** नमस्कृत्य, **अप्रतिरथाध्ययनध्वनिमुखरेण** अप्रतिरथस्य—प्रस्थानमन्त्रस्य, यः, अध्ययनध्वनिः—पठननादः, तेन, मुखरेण—वाचालेन, पुनः **पुरस्सरपुरोधसा** पुरःसरः—अग्रेसरः, पुरोधाः पुरोहितो यस्य तादृशेन, **द्विजातिवृन्देन** द्विजगणेन, **अनुगम्यमानः** अनुस्रियमाणः, **पुरस्सरपुरोध** इति पाठे तु पुरस्सरः—पुरोधा यस्मिंस्तादृशम् यथा स्यात् तथेति क्रियाविशेषणविधया व्याख्येयम्; पुनः **प्रथमकक्षान्तरितद्वारभूमिम्** प्रथमकक्षाया—प्रथमप्रतोलिकाया, अन्तरद्वारभूमिं—बाह्यद्वारप्रदेशम्, **चरणाभ्यामेव** पद्भ्यामेव, गत्वा, **अग्रतः** अग्रे, **ससम्भ्रमव्यापारिताङ्कुशेन** ससम्भ्रमं—सत्वरं यथा स्यात् तथा, व्यापारितः—प्रयुक्तः, प्रेरित इति यावत्, अङ्कुशो येन तादृशेन, **वज्राङ्कुशनाम्ना** अन्वर्थतदाख्येन, **महामात्रेण** हस्तिपकेन, **प्राङ्मुखीकृत्य** पूर्वमभिमुखीकृत्य, **विधृतं** स्थापितम्, पुनः **सितपिष्टपङ्कपाण्डुरितगात्रम्** सितं—शुभ्रम्, यत् पिष्टं—चूर्णम्, पिष्टातकमित्यर्थः, तस्य पङ्केन—कर्दमेन, पाण्डुरितं—किञ्चित्पीतरक्तीकृतम्, गात्रं—शरीरं यस्य तादृशम्, पुनः **अक्षुद्रमणिचित्रनक्षत्रमालापरिक्षिप्तम्** अक्षुद्राः—महार्घाः, ये मणयः, तद्रूपाणां- चित्राणाम्—अनेकवर्णानाम्, नक्षत्राणां—ताराणाम्, मालया—समूहेन, सप्तविंशतिमौक्तिकनिर्मितहारेण वा, परिक्षिप्तं—व्याप्तम्, पुनः **सिन्दूरपाटलविकटकुम्भभागम्** सिन्दूरेण—रक्तचूर्णेन, पाटलः—रक्तः, विकटः—विशालः, कुम्भभागः—घटाकारमस्तकभागो यस्य तादृशम्, पुनः **अनेकनिशितशस्त्रप्रभाशारशातकुम्भशारीपरिकरितपृष्ठपीठम्** अनेकेषां—बहूनाम्, निशितानां—तीक्ष्णानाम्, शस्त्राणां प्रभाभिः—द्युतिभिः, शाराः—चित्रवर्णाः, याः शातकुम्भशार्यः—सुवर्णमयपर्याणानि, ताभिः परिकरितं—परिवेष्टितं, पृष्ठपीठं—पृष्ठरूपमासनं यस्य तादृशम्, पुनः **अश्रान्तमदवारिधारादुर्दिनान्धकारितकरटकूटम्** अश्रान्ताभिः—अविच्छिन्नाभिः, मदवारिधाराभिः—मदजलधाराभिः, यद्दुर्दिनं—मेघाच्छन्नदिनम्, तेन अन्धकारितः—अन्धकारावृतः, करटकूटः—गण्डस्थलशिखरं यस्य तादृशम्, अत एव **परित्यक्तस्थावरावस्थम्** परित्यक्ता स्थावरावस्था—स्थावरत्वरूपावस्था येन तादृशम्, गृहीतजङ्गमावस्थमित्यर्थः, **त्रिकूटपर्वतमिव** त्रिकूटाख्यपर्वतविशेषमिवेत्युत्प्रेक्षा, **अमरवल्लभाभिधानम्** अमराणां—देवानाम्, वल्लभः—प्रियः, इत्यन्वर्थतदाख्यम्, **गन्धगजम्** यस्य गन्धेनान्ये हस्तिनः पलायन्ते तादृशं मदगन्धाढ्यहस्तिनम्, **अधिरूढः** आरूढः [थ]; पुनः **दृढावनद्धतारतूणीरबन्धुरोभयस्कन्धशिखरः** दृढं यथा स्यात् तथा, अवनद्धेन—आबद्धेन, ताराणां—विशुद्धमौक्तिकानाम्, तूणीरेण—इषुधिना, बाणाधारपात्रेणेति यावत्, बन्धुरम्—उन्नतानतम्, उभयस्कन्धशिखरं—स्कन्धद्वयोपरिभागो यस्य तादृशः; पुनः **कनकपत्रभङ्गचित्रमध्यभागभाजा** कनकपत्रभङ्गैः—सुवर्णपत्ररचनाभिः, चित्रः—चित्रवर्णो यो मध्यभागस्तद्वता, **शरासनेन** धनुषा, **सनाथवामहस्तः** सनाथः—सहितः, वामहस्तो यस्य तादृशः, पुनः **सलीलं**—सक्रीडं यथा स्यात् तथा, **उद्धूयमानबालव्यजनकलापः** उद्धूयमानः—उत्क्षिप्यमाणः, बालव्यजनस्य—चामरस्य, कलापः—समूहो यस्मिंस्तादृशः;

त्पदातिनिर्दयपादपातप्रवर्तिताकाण्डमेदिनीकम्पः प्रहर्षोत्तालवैतालिकव्राततारतरोद्घुष्यमाणजयजयध्वनिर्ध्वन्‍-द्विजयमङ्गलाभिधानतूर्यनिर्घोषबधिरिताखिलब्रह्मस्तम्बः पुरस्तात् सलीलचलितकरिघटारूढकिङ्करपुरुषपातितविरलघनघातानामुत्पातनिर्घातघोरघोषोद्गारमतितारमारसन्तीनां ढक्कानां ध्वनितेन मुखरयन्नखिलान्यपि दिशां मुखानि [द], शिखरविस्फुरत्पद्मरागस्थूलकलशस्य दोलायमानावचूलमुक्ताफलदाम्नश्चित्ररत्नखण्डखचितचामीकरदण्डस्य पुरः प्रसर्पतः श्वेतातपत्रखण्डस्य पर्यन्तयायिनामनिलभरितरन्ध्रवर्त्मव्यक्तरूपाणामिभवराहशरभशार्दूलमकरमत्स्याद्याकारधारिणामनेकपार्थिवसमरसंगृहीतानां चिह्नकानामपह्नुतार्करोचिषां चक्रवालेन जटिलीकृतदिगन्तरालो राजकुलान्निरगच्छम् [ध]। अनुपदं च प्रणामपरितुष्टाभिर्विजयाशिषाभिनन्द्यमानो द्विजातिपरिषद्भिर्विनयविरचिताञ्जलिपुटाभिः प्रणम्यमानः पौरजनताभिरुत्सृष्टलाजवृष्टिभिरुद्घुष्यमाणमनोरथसिद्धिर्नगर-

---

पुनः **सदर्पसर्पत्पदातिनिर्दयपादपातप्रवर्तिताकाण्डमेदिनीकम्पः** सदर्पं-सगर्वं यथा स्यात् तथा, सर्पतां-गच्छताम्, पदातीनां-पादगामिसैन्यानाम्, निर्दयं-निष्ठुरं यथा स्यात् तथा, पादपातेन-पादविक्षेपेण, पादाघातेनेत्यर्थः, प्रवर्तितः-प्रारब्धः, अकाण्डे-अनवसरे, मेदिनीकम्पः-भूकम्पो येन तादृशः; पुनः **प्रहर्षोत्तालवैतालिकव्राततारतरोद्घुष्यमाणजयजयध्वनिः** प्रहर्षेण-प्रमोदेन, उत्तालः-उद्धतः, यो वैतालिकानां-बन्दिपुत्राणाम्, व्रातः-समूहः, तेन तारतरम्-उच्चतरं यथा स्यात् तथा, उद्घुष्यमाणः- असकृदुच्चार्यमाणः, जयजयध्वनिः-जयजयकारो यस्य तादृशः; पुनः **ध्वनद्विजयमङ्गलाभिधानतूर्यनिर्घोषबधिरिताखिलब्रह्मस्तम्बः** ध्वनतः-शब्दायमानस्य, विजयमङ्गलाभिधानस्य-विजयमङ्गलाख्यस्य, तूर्यस्य-वाद्यविशेषस्य, निर्घोषैः-नादैः, बधिरितः-बधिरीकृतः, अखिलब्रह्मस्तम्बः-समस्तब्रह्माण्डो येन तादृशः; पुनः **ढक्कानां** यशः-पटहानाम्, **ध्वनितेन** ध्वनिना, **अखिलान्यपि** सर्वाण्यपि, दिशाम्, **मुखानि** अग्रभागान्, **मुखरयन्** ध्वनयन्, कीदृशीनाम्? **पुरस्तात्** अग्रे, **सलीलचलितकरिघटारूढकिङ्करपुरुषपातितविरलघनघातानाम्** सलीलं-सखेलम्, चलितां-प्रयाताम्, करिघटां-हस्तियूथम्, आरूढैः-कृतारोहणैः, किङ्करपुरुषैः-भृत्यभूतपुरुषैः, पातितः-सङ्घर्षविश्लेषित , विरलघनः-कदाचिद् विरलः, कदाचिद् घनः घातः-अभिघातो यासां तादृशीनाम्, पुनः **उत्पातनिर्घातघोरघोषोद्गारम्** उत्पातरूपः-शुभाशुभसूचकभूतविकारभूतः, यः निर्घातः-ध्वनिः, तद्वद् घोरः-भयङ्करः, घोषोद्गारः-नादोद्रेको यस्मिंस्तादृशं यथा स्यात् तथा, **अतितारम्** अत्युच्चैः, **आरसन्तीनाम्** आ-समन्ताद् ध्वनन्तीनाम्; [द]। पुनः **शिखरविस्फुरत्पद्मरागस्थूलकलशस्य** शिखरे-ऊर्ध्वभागे, विस्फुरन्-प्रकाशमानः, पद्मरागस्य-तदाख्यरक्तमणेः, तन्मणिमय इत्यर्थः, स्थूलः-कलशो यस्य तादृशस्य, पुनः **दोलायमानावचूलमुक्ताफलदाम्नः** दोलायमानम्, अवचूलानां-वर्तुलानाम्, मुक्ताफलानां-मुक्तामणीनाम्, दाम-पङ्क्तिर्यस्मिंस्तादृशस्य, पुनः **चित्ररत्नखण्डखचितचामीकरदण्डस्य** चित्रैः-नानावर्णैः, रत्नखण्डैः, खचितः-व्याप्तः, चामीकरदण्डः-सुवर्णमयदण्डो यस्य तादृशस्य, पुनः **पुरः** अग्रे, **प्रसर्पतः** उद्वेलतः, **श्वेतातपत्रस्य** श्वेतच्छत्रस्य, **पर्यन्तपातिनाम्** प्रान्तवर्तिनाम्, **अनिलभरितरन्ध्रवर्त्मव्यक्तरूपाणाम्** अनिलभरितेन-वायुपूर्णेन, रन्ध्रवर्त्मना-छिद्रमार्गेण, व्यक्तं-प्रकटितम्, रूपं-स्वरूपं येषां तादृशानाम्, **इभ-वराह-शरभ-शार्दूल-मकर-मत्स्याद्याकारधारिणाम्** इभः-हस्ती, वराहः-शूकरः, शरभः-मृगविशेषः, शार्दूलः-व्याघ्रः, मकरः-जलजन्तुविशेषः, तदादीनां तत्प्रभृतीनाम्, य आकारः-प्रतिकृतिः, तद्धारिणाम्, **अनेकपार्थिवसमरसंगृहीतानाम्** अनेकपार्थिवैः-नानानृपैः सह, समरे-संग्रामे, संगृहीतानाम्-सञ्चितानाम्, **अपह्नुतार्करोचिषाम्** अपह्नुतम्-अपलपितम्, अर्कस्य-सूर्यस्य, रोचिः-प्रकाशो यैस्तादृशानाम्, **चिह्नकानां** ध्वजानाम्, **चक्रवालेन** मण्डलेन, **जटिलीकृतदिगन्तरालः** व्याप्तदिङ्मध्यः [ध]।

च पुनः, **अनुपदं** प्रतिपदम्, **प्रणामपरितुष्टाभिः** अभिवादनसन्तुष्टाभिः, **द्विजातिपरिषद्भिः** द्विजमण्डलीभिः, **विजयाशिषा** विजयशुभैषणया, **अभिनन्द्यमानः** अभिवर्ध्यमानः, पुनः **विनयविरचिताञ्जलिपुटाभिः** विनयेन-नम्रभावेन, विरचितः-निर्मितः, अञ्जलिपुटो याभिस्तादृशीभिः, **पौरजनताभिः** पुरवासिजनसमूहैः, **प्रणम्यमानः** अभिवाद्यमानः; पुनः **उत्सृष्टलाजवृष्टिभिः** उत्सृष्टाः-विमुक्ताः, लाजवृष्टयः-भृष्टधान्यवृष्टयो याभिस्तादृशीभिः, **नगरवृद्धाभिः** नगरवास्तव्यवृद्धस्त्रीभिः, **उद्घुष्यमाणमनोरथसिद्धिः** उद्घुष्यमाणा-असकृदुच्चार्यमाणा, मनोरथसिद्धिः-अभिलषितार्थ-

वृद्धाभिः प्रीतिनिर्भरदृष्टिपातकुवलयितदिग्वलयाभिरवलोक्यमानो नागरिकाभिर्नगराद्भिरगमम् [न] । क्रमेण च शरत्समयपरिचयप्रपञ्चितशोभाम्, आभोगिनीम्, उदारकलमकेदारपरिमलामोदितवनानिलाम्, उन्मदकुररकादम्बसारसारावमुखरितसरस्तीरनीराम्, कीरचञ्चुसंपुटच्युतार्धजग्धप्रियङ्गुमञ्जरीपिञ्जरजरद्द्रुमतलाम् [प], अक्षुद्रपादपालानितैरनवरतवेल्लत्कर्णपल्लवतरलितेन प्रतिवेलमुड्डीयमानेन निलीयमानेन च झङ्कारकारिणा मधुकरमण्डलेन पीयमानोद्दामदाननिर्झरैरप्रमत्तरक्षकपदातिवार्यमाणासंस्तुतजनप्रत्यासत्तिभिः पर्यन्तरचिततृणकुटीरकेण प्रतिक्षणमाधोरणगणेन क्रियमाणविविधोपचारैरनवलोकितपरस्परैः प्रसिद्धाभिधानैर्जगति प्रधानवारणैरधिष्ठितोद्देशाम् [फ], आगृहीतद्वीपान्तरगामिभूरिभाण्डैराभरणपर्याणकादिवृषोपस्करसमारचनसंतत-

---

सिद्धिर्यस्य तादृशः; पुनः **प्रीतिनिर्भरदृष्टिपातकुवलयितदिग्वलयाभिः** प्रीतिनिर्भरदृष्टिपातैः—प्रेमपूर्णकटाक्षपातैः, कुवलयितं—संजातानि कुवलयानि कमलानि यस्मिंस्तादृशम्, दिग्वलयं—दिङ्मण्डलं याभिस्तादृशीभिः, **नागरिकाभिः** नगरतरुणीभिः, **अवलोक्यमानः** दृश्यमानः; **नगरात्** रङ्गशालाख्यनगरात्, **निरगमम्** निर्गतवानहम् [न]।

च पुनः, **क्रमेण** क्रमिकगत्या, **नगरसीमाम्** उक्तनगरपरावधिम्, **अलङ्घयम्** अतिक्रान्तवानहम्; कीदृशीम्? **शरत्समयपरिचयप्रपञ्चितशोभाम्** शरत्समयेन—आश्विनकार्तिकमासात्मकशरत्कालेन, यः परिचयः—सङ्गमः, तेन प्रपञ्चिता—विस्तारिता, शोभा यस्यास्तादृशीम्; पुनः **आभोगिनीं** विस्तारवतीम्; पुनः **उदारकलमकेदारपरिमलामोदितवनानिलाम्** उदाराः—महान्तः, समृद्धा इति यावत्, कलमाः—शालयो येषु तादृशानाम्, केदाराणां ये परिमलाः—सौरभाणि तैः आमोदिताः—सुरभिताः, वनानिलाः—वनपवना यस्यां तादृशीम्; पुनः **उन्मदकुररकादम्बसारसारावमुखरितसरस्तीरनीराम्**, उन्मदानाम्—उन्मत्तानां कुरर-कादम्ब-सारसानाम्, कुरराः—उत्क्रोशपक्षिणः, कादम्बाः—कलहंसाः, सारसाः—स्वनामख्याताः पक्षिणः, तेषाम्, आरावैः—शब्दैः, मुखरितानि—प्रतिध्वनितानि, सरस्तीरनीराणि—कासारतटस्थितजलानि यस्यां तादृशीम्; पुनः **कीरचञ्चुसम्पुटच्युतार्धजग्धप्रियङ्गुमञ्जरीपिञ्जरजरद्द्रुमतलाम्** कीराणां—शुकानाम्, चञ्चुसम्पुटात्—सम्पुटितचञ्चुसकाशात्, च्युताभिः—स्खलिताभिः, अर्धजग्धाभिः—अर्धभुक्ताभिः, प्रियङ्गुमञ्जरीभिः—प्रियङ्गुलतामञ्जरीभिः, पिञ्जराणि—पीतानि, जरतां जीर्णानाम्, द्रुमाणां—वृक्षाणाम्, तलानि—अधःस्थलानि यस्यां तादृशीम् [प]; पुनः **प्रधानवारणैः** प्रधानहस्तिभिः, **अधिष्ठितोद्देशाम्** अधिष्ठितः—आक्रान्तः, उद्देशः—उच्चप्रदेशो यस्यां तादृशीम्; कीदृशैः? **अक्षुद्रपादपालानितैः** विशालवृक्षरूपस्तम्भबद्धैः, पुनः **मधुकरमण्डलेन** भ्रमरपुञ्जेन, **पीयमानोद्दामदाननिर्झरैः** पीयमानः—पानकर्मीक्रियमाणः, उद्दामा—उद्धतः, अप्रतिहत इत्यर्थः; दाननिर्झरः—मदजलप्रवाहो येषां तादृशैः, कीदृशेन? **अनवरतवेल्लत्कर्णपल्लवतरलितेन** अनवरतं—निरन्तरम्, वेल्लद्भ्याम्—उच्चलद्भ्याम्, कर्णपल्लवाभ्यां—कर्णरूपपल्लवाभ्याम्, तरलितेन—चञ्चलितेन, उत्क्षिप्तेनेति यावत्, अत एव **प्रतिवेलम्** सर्वकालम्, **उड्डीयमानेन** उपरि भ्रमता, **च** पुनः, **निलीयमानेन** मदजलनिर्झरे तिरोभवता; पुनः **झङ्कारकारिणा** कोलाहलकारिणा, पुनः **अप्रमत्तरक्षकपदातिवार्यमाणासंस्तुतजनप्रत्यासत्तिभिः** अप्रमत्तैः—अवहितैः, रक्षकैश्च, पदातिभिः—पादगामिजनैः, वार्यमाणा—अवरुध्यमाना, असंस्तुतानां—अपरिचितानाम्, जनानां प्रत्यासत्तिः—सान्निध्यं येषां तादृशैः, **पर्यन्तरचिततृणकुटीरकेण** पर्यन्ते—निकटे, रचितः—निर्मितः, तृणकुटीरः—तृणमयह्रस्वकुटी येन तादृशेन, **आधोरणगणेन** हस्तिपकसमूहेन, **प्रतिक्षणं** प्रतिपलम्, **क्रियमाणविविधोपचारैः** क्रियमाणाः—विधीयमानाः, विविधाः—अनेकप्रकाराः, उपचाराः—सेवा येषां तादृशैः, पुनः **अनवलोकितपरस्परैः** कलहभिया परस्परदृष्टिपथमप्रापितैः, पुनः **जगति** भुवने, **प्रसिद्धाभिधानैः** विश्रुतनामधेयैः [फ]; पुनः कीदृशीम्? **आढ्यनैगमानाम्** धनाढ्यवणिजाम्, **सार्थैः** समूहैः, **स्थानस्थानेषु** प्रतिस्थानम् **कृतावस्थानाम्** कृतम्, अवस्थानम्—अवस्थितिर्यस्यां तादृशीम्, कीदृशैः? **आगृहीतद्वीपान्तरगामिभूरिभाण्डैः** आ—समन्तात्, गृहीतानि, द्वीपान्तरगामीनि—अन्यद्वीपगन्तुकानि, भूरिभाण्डानि—बहुभाण्डानि यैस्तादृशैः, पुनः **आभरणपर्याणकादिवृषोपस्करसमारचनसन्ततव्यापृतभृतकैः** आभरणम्—अलङ्कर-

व्यापृतभृतकैरभिनवस्यूतताम्रपटकुटीरकोणावस्थापितस्थूलद्रविणकण्ठालैः प्राङ्गणोपरचितगोणीगणाट्टालकसूचितैः प्रस्थाननिर्गतानामाढ्यनैगमानामनेकतुरगाश्वतरसंकुलैः सार्थैः स्थानस्थानेषु कृतावस्थानाम् [ब], अच्छशीतलस्वादुसलिलाभिः सुधाधवलवरण्डिकावलयाकुण्डलितकूलाभिर्द्वारभित्तिगर्भप्रतिष्ठितानेकदेवताप्रतिमाभिस्तृष्णातुरावतरदनन्तपथिकपातभयादिव पुरःप्रसारितोभयाग्रहस्तेन भेककुटुम्बिनीकदम्बकेन कृतकलकलेनावलम्बितसोपानमालामूलदेशाभिरतिसुश्लिष्टलोहेष्टकचिताभिर्मार्गवापीभिः स्थपुटितमहावटद्रुमोपान्तस्थलाम् [भ],अन्तराऽन्तरा च प्रावृषेण्यसलिलपूरक्षालनापनीतसकलपङ्कमलाभिरासन्नग्रामवासिना वणिग्जनेन तत इतः प्रकटितौदनाज्यदधिभाण्डखण्डमोदकप्रायपण्यप्रसारकाभिस्तटस्थपथिकबालिकाविलोक्यमानभुक्तोज्झितान्नलवकवलना-

---

णम्, पर्याणकं–पृष्ठास्तरणम्, तदादिः–तत्प्रभृतिः, यः, वृषाणां–बलीवर्दानाम्, उपस्करः–वेषः, तत्समारचने–तद्विन्यासे, सन्ततम्–अनवरतम्, व्यापृताः–संलग्नाः, भृतकाः–किङ्करा येषां तादृशैः, पुनः **अभिनवस्यूतताम्रपटकुटीरकोणावस्थापितस्थूलद्रविणकण्ठालैः** अभिनवस्यूताः–अचिरप्रोताः, ये ताम्रपटाः–रक्तवस्त्राणि, तत्कुटीरस्य–तन्निर्मितहस्वकुट्याः कोणे, अवस्थापिताः–धृताः, स्थूलाः–बृहदाकाराः, द्रविणकण्ठालाः–धनभाण्डविशेषा यैस्तादृशैः, पुनः **प्राङ्गणोपरचितगोणीगणाट्टालकसूचितैः** प्राङ्गणे, उपरचितैः–सन्निवेशितैः, गोणीनाम्–आवपनानाम्, गणैः–समूहरूपैः, अट्टालकैः–प्रासादोपरितनगृहैः, सूचितैः–उपलक्षितैः, पुनः **अनेकतुरगाश्वतरसङ्कुलैः** अनेकैः–बहुभिः, तुरगैः–अश्वैः, अश्वतरैः–खचरैश्च संकुलैः–व्याप्तैः [ब]; पुनः **मार्गवापीभिः** मार्गदीर्घिकाभिः, **स्थपुटितमहावटद्रुमोपान्तस्थलाम्** स्थपुटितम्–उन्नतानतीकृतम्, महावटद्रुमाणां–विशालवटवृक्षाणाम्, उपान्तस्थलं–निकटस्थानं यस्यास्तादृशीम्, कीदृशीभिः? **अच्छशीतलस्वादुसलिलाभिः** अच्छं–निर्मलम्, शीतलं, स्वादु–मधुरं च, सलिलं–जलं यासां तादृशीभिः, पुनः **सुधाधवलवरण्डिकावलयाकुण्डलितकूलाभिः** सुधाधवलानां–चूर्णोपलेपशुभ्राणाम्, वरण्डिकानाम्–लघुप्राकारभूतभित्तिविशेषाणाम्, वलयेन–मण्डलेन, आकुण्डलितानि–आवेष्टितानि, कूलानि–तटा यासां तादृशीभिः; पुनः **द्वारभित्तिगर्भप्रतिष्ठितानेकदेवताप्रतिमाभिः** द्वारभित्तिगर्भे–द्वारस्थकुड्यमध्ये, प्रतिष्ठिता–स्थापिता, अनेकासां, देवतानाम् प्रतिमा–प्रतिकृतिर्यासां तादृशीभिः, पुनः **भेककुटुम्बिनीकदम्बेन** भेकानां–मण्डूकानाम्, याः कुटुम्बिन्यः–स्त्रियः, तासां कदम्बकेन–समूहेन, **अवलम्बितसोपानमालामूलदेशाभिः** अवलम्बितः–आश्रितः, सोपानमालानाम्–अधिरोहणीपङ्क्तीनाम्, मूलदेशः–मूलस्थानं यासां तादृशीभिः, कस्मादिव? **तृष्णातुरावतरदनन्तपथिकपातभयादिव** तृष्णातुराणां–पिपासापीडितानाम्, अवतरताम्–अवरोहताम्, अधस्तादागच्छतामित्यर्थः, अनन्तानां–बहूनाम्, पथिकानां–मार्गगामिनाम्, यः पातः–निपतनम्, तद्भयादिवेति हेतूत्प्रेक्षा, कीदृशेन? **पुरःप्रसारितोभयाग्रहस्तेन** पुरः–अग्रे, प्रसारितौ–तत्पातनिवारणाय विस्तारितौ, उभयाग्रहस्तौ–उभयहस्ताग्रभागौ येन तादृशेन, पुनः **कृतकलकलेन** तदातङ्कवशाद् विहितकोलाहलेन, पुनः **अतिसुश्लिष्टलोहेष्टकचिताभिः** अतिसुश्लिष्टम्–अतिशयेन परस्परसम्पृक्तम्, लोहेष्टकानां–लोहमयेष्टकानाम्, चितं–समूहो यासु तादृशीभिः [भ]; च पुनः, **अन्तरा अन्तरा** मध्ये मध्ये, **वनस्रोतोवहाभिः** वननदीभिः, **सीमन्तिताम्** सञ्जातकेशवेशाम्, **प्रावृषेण्यसलिलपूरक्षालनापनीतपङ्कमलाभिः** प्रावृषेण्येन, सलिलपूरेण–जलप्रवाहेण, यत् क्षालनं–मार्जनम्, तेन, अपनीताः–दूरीकृताः, पङ्करूपाः–कर्दमरूपाः, मला यासां तादृशीभिः; पुनः **आसन्नग्रामवासिना** निकटग्रामवास्तव्येन, **वणिग्जनेन** वणिग्लोकेन, **तत इतः** अत्र तत्र, **प्रकटितौदनाज्यदधिभाण्डखण्डमोदकप्रायपण्यप्रसारकाभिः** प्रकटितः–प्रकाशितः, ओदनः–भक्तम्, आज्यं–घृतम्, दधि-दुग्धघनीभावावस्थाविशेषः, तेषां भाण्डखण्डानां–भाजनप्रभेदानाम्, यद्वा भाण्डानां–भाजनानाम्, खण्डं च–इक्षुविकारः, तस्य, यद्वा खण्डमोदकप्रायाणां–खण्डनिर्मितमिष्टान्नप्रचुराणाम्, पण्यानां–विक्रेतव्यवस्तूनां च, प्रसारो यासु तादृशीभिः; पुनः **तटस्थपथिकबालिकाविलोक्यमानभुक्तोज्झितान्नलवकवलनाकुलशकुनकुलाभिः** तटस्थाभिः–तीरस्थिताभिः, पथिकबालिकाभिः–पथिककन्याभिः, अवलोक्यमानं–दृश्यमानम्, भुक्तोज्झितानां–भोजनावशिष्टानाम्, अन्नलवानाम्–अन्नलेशानाम्, कवलने-

कुलशकुलकुलाभिर्दूरनिर्गतजलार्द्रमार्गपिशुनितपशुपरम्परोत्ताराभिरनवरतलोकविश्रामक्षामितोपान्तवेतसवनाभिर्वनस्रोतोवहाभिः सीमन्तिताम् [म], ईषदुपजातशोषकरीषसुखसंचारविशिखैः सपर्णतरुलतानिवेशजटालवेश्मपटलैरजिरमण्डपच्छायानिविष्टगोरसपरिपुष्टमहाकायपुष्टकौलेयकैः सकलकलोच्छलत्प्राज्यपरिमलव्यञ्जिततप्ताज्यतक्रविन्दुक्षेपैरुत्कर्णतर्णकाकर्णितमथ्यमानमथितमन्थनीमन्थरनिर्घोषैः सतोषघोषाधिपसमाहूयमानपर्यटत्पायसार्थिपथिकपेटकैः क्रमागतैकैकबठरद्विजातिवचननिर्विचारप्रवर्तितशयनासनस्नानदानादिसर्वक्रियैः प्रातरेव प्रचारनिर्गताभिस्तत्कालमधिगताधिकवलोपचयबृंहितेन स्वाभाविकभव्यतागुणेन द्विगुणाकृष्टलोकदृष्टिभिः पीनपरिमण्डलापीनभारविकटमन्थरगमनाभिरनणुमणिघण्टिकाघोषरमणीयमितस्ततो विचरन्तीभिः सततानु-

---

भक्षणे, आकुलं–व्यग्रम्, शकुलकुलं–मत्स्यविशेषगणो यासां तादृशीभिः, पुनः **दूरनिर्गतजलार्द्रमार्गपिशुनितपशुपरम्परोत्ताराभिः** दूरनिर्गतेन–दूरनिष्क्रान्तेन, जलार्द्रमार्गेण–जलाप्लुतवर्त्मना, पिशुनितः–सूचितः, पशुपरम्पराणां–पशुसमूहानाम्, उत्तारः–उपरिनिर्गमनं याभ्यस्तादृशीभिः, पुनः **अनवरतलोकविश्रामक्षमितोपान्तवेतसवनाभिः** अनवरतं–निरन्तरम्, लोकानां–जनानाम्, विश्रामे–खेदापनयने, क्षमितानि–क्षमतामापादितानि, **क्षामितेति** पाठे तेषां विश्रामेण क्षामितानि–क्षीणतां गमितानीत्यर्थः, उपान्तानि–निकटानि, वेतसवनानि–वञ्जुलवनानि याभिस्तादृशीभिः [म]; पुनः **गोकुलैः** गोष्ठैः, गवां स्थानैरित्यर्थः, **अधिष्ठितकक्षोपकण्ठाम्** अधिष्ठितः–व्याप्तः, कक्षस्य–वनस्य, उपकण्ठः–समीपप्रदेशो यस्यां तादृशीम्, यद्वा अधिष्ठितस्य कक्षस्य–वनस्य, उपकण्ठाम्–समीपाम्, कीदृशैः? **ईषदुपजातशोषकरीषसुखसञ्चारविशिखैः** ईषत्–किञ्चित्, उपजातः–उत्पन्नः, शोषः–शुष्कता येषां तादृशैः, करीषैः–गोमयैः, सुखसञ्चारा–सुकरगमना, विशिखा–रथ्या, येषां तादृशैः, पुनः **सपर्णतरुलतानिवेशजटालवेश्मपटलैः** सपर्णानां–पत्रपूर्णानाम्, तरुलतानां–तरूणां–वृक्षाणाम्, तदाश्रितलतानां च, निवेशेन–समावेशेन, जटालं–समृद्धम्, वेश्मपटलं–गृहसमूहो येषां तादृशैः, पुनः **अजिरमण्डपच्छायानिविष्टगोरसपरिपुष्टमहाकायपुष्टकौलेयकैः** अजिरमण्डपस्य–प्राङ्गणवर्तिगृहविशेषस्य, छायायां निविष्टः–अवस्थितः, तथा गोरसेन–पयोदधिघृतादिना, परिपुष्टः–अतिपुष्टः, महाकायः–विशालशरीरं यस्य तादृशः, तथा पुष्टः–प्रबलः, एवंविधः कौलेयकः–कुलागतः कुक्कुरो येषां तादृशैः, पुनः **सकलकलोच्छलत्प्राज्यपरिमलव्यञ्जिततप्ताज्यतक्रबिन्दुक्षेपैः** सकलकलम्–कलकलेन–शब्दविशेषेण सहितं यथा स्यात् तथा, उच्छलन्तः–उद्गच्छन्तः, प्राज्यपरिमलेन–प्रचुरसौरभेण, व्यञ्जिताः–सूचिताः, तप्तघृतसुगन्धज्ञापिता इत्यर्थः, एवंविधाश्च ये, तप्तस्य, आज्यस्य–घृतस्य, तक्रबिन्दवः, तप्यमाननवनीतावस्थागतघृतस्थतक्रस्य बिन्दव इत्यर्थः, तेषां क्षेपाः–विक्षेपः–दूरीभवनं येषु तादृशैः, पुनः **उत्कर्णतर्णकाकर्णितमथ्यमानमथितमन्थनीमन्थरनिर्घोषैः** उत्–ऊर्ध्वौ, कर्णौ येषां तादृशैस्तर्णकैः–वत्सैः, आकर्णितः–श्रुतः, मथ्यमानस्य–आलोड्यमानस्य, मथितस्य–तक्रस्य, या मन्थनी–मथनदण्डः, तस्या मन्थरः–मन्दः, निर्घोषो येषां तादृशैः, पुनः **सतोषघोषाधिपसमाहूयमानपर्यटत्पायसार्थिपथिकपेटकैः** सतोषं–परितोषेण सहितं यथा स्यात् तथा, घोषाधिपेन–आभीरग्रामाधिपेन, समाहूयमानं–सम्यगाहूयमानम्, पर्यटतां–परिभ्रमताम्, पायसार्थिनां–क्षीरान्नाभिलाषिणाम्, पथिकानां–मार्गगामिनाम्, पेटकं-समूहो येषु तादृशैः, पुनः **क्रमागतैकैकबठरद्विजातिवचननिर्विचारप्रवर्तितशयनासनस्नानदानादिसर्वक्रियैः** क्रमेण आगतस्य एकैकस्य बठरस्य–मूर्खस्य, द्विजातेः–द्विजस्य, वचनेन–वाक्येन, निर्विचारं–स्वविचारं विनैव, प्रवर्तिता–गोपैः प्रारब्धा, शयनम्, आसनम्, स्नानम्, दानम्, तदादिः–तत्प्रभृतिः, सर्वा–सकला, क्रिया येषु तादृशैः, पुनः **गोभिः** धेनुभिः, **अशून्यपर्यन्तैः** व्याप्तनिकटैः, कीदृशीभिः? **प्रातरेव** प्रातःकाल एव, **प्रचारनिर्गताभिः** प्रचाराय–विचरणाय, यद्वा तृणभक्षणाय, गृहान्निष्क्रान्ताभिः, पुनः **तत्कालं** प्रचारकालमेव, **अधिगताधिकबलोपचयबृंहितेन** अधिगतः–प्राप्तः, योऽधिकबलोपचयः–अधिकबलवृद्धिः, तेन बृंहितेन–वर्धितेन, **स्वाभाविकभव्यतागुणेन** स्वाभाविकसौन्दर्यगुणेन, **द्विगुणाकृष्टलोकदृष्टिभिः** द्विगुणं यथा स्यात् तथा, आकृष्टाः–कृताकर्षणाः, लोकानां–जनानाम्, दृष्टयो याभिस्तादृशीभिः, पुनः **पीनपरिमण्डलापीनभारविकटमन्थरगमनाभिः** पीनानि–स्थूलानि, परिमण्डलानि–वर्तुलाकाराणि च, यानि आपीनानि–ऊधांसि, स्तना इत्यर्थः, तेषां भारेण–गुरुतया, विकटं–प्रकटम्, मन्थरं–मन्दम्, गमनं यासां तादृशीभिः, पुनः **अनणुमणिघण्टिकाघोषरमणीयम्** अनणुमणिघण्टिकानाम्–स्थूलमणिमयग्रीवास्थकिङ्किणीनाम्, घोषेण–ध्वनिना, रमणीयं–मनोहरं यथा स्यात् तथा, **इतस्ततः** अत्र तत्र, **विचरन्तीभिः** विहरन्तीभिः, पुनः **सततानुचरचाटुकारस्वैरसौरभेयाभिः**

चरचाटुकारस्वैरसौरभेयाभिरचिरजातप्रसवाभिरद्यश्वीनाभिश्च गोभिरशून्यपर्यन्तैस्तुहिनपातशीनहैयंगवीनवर्णतनुलतालावण्याभिः क्षीरधवलचलत्कटाक्षच्छटाप्रतिक्षणक्षालितदिङ्मुखाभिर्नवनीतपिण्डपाण्डुवल्गत्कठिनपरिमण्डलस्तनकलशयुगलाभिर्गोरसश्रीभिरिव शरीरिणीभिः सविभ्रमैरङ्गचलनैः स्नेहनिर्भराणि दधीनि बल्लवहृदयानीव निर्दयमामथ्नतीभिर्गोपललनाभिः सर्वतः समाकुलैर्गोकुलैरधिष्ठितकक्षोपकण्ठां नगरसीमामलङ्घयम् [य]।

अथाग्रेसराश्ववारदर्शनक्षुभितैः 'कटकमागच्छति' इति जनरवादुपलभ्योपलभ्य सर्वतः प्रधावितैः परित्यक्तनिजनिजव्यापारैरवकरकूटकेष्वधिरूढैस्तडागपालीषु पुञ्जितैर्देवकुलवरण्डकेषु कृतावस्थानैः पादपस्कन्धेषु बद्धासनैरूर्ध्वैश्चोपविष्टैश्च लम्बितोभयभुजैश्च जघनपार्श्वविन्यस्तहस्तयुगलैश्च शीर्णपट्टिकागाढग्रथितासिधेनुकैश्च धौतशाटककृतशिरोवेष्टनैश्च वेणुयष्टिषु कृतावष्टम्भैश्च स्कन्धाधिरोपितदयितडिम्भैश्च सर्वत्र सकुतूहलैरपि सविशेषं

टिप्पनकम्—विशिखा-रथ्या । आपीनम्-ऊधः । अद्यश्वीनाः-अद्य श्वो वा प्रसूताः । **स्नेहनिर्भराणि** घृतभरितानि प्रेमपूरितानि च दधीनि बल्लभहृदयानि च । **निर्दयमामथ्नतीभिः** निष्करुणम्, मथ्नतीभिः-मदयन्तीभिः पीडयन्तीभिश्च [य] ।

सततम्-अनवरतम्, अनुचरस्य-भृत्यस्य, यः, चाटुकारः-प्रियवाक्यप्रयोगः, तत्र स्वैराः-स्वतन्त्राः, सौरभेयाः-वृषभा यासां तादृशीभिः, पुनः **अचिरजातप्रसवाभिः** अभिनवप्रसूताभिः, **च** पुनः, **अद्यश्वीनाभिः** अद्य श्वो वा प्रसविष्यमाणाभिः, अत्यासन्नप्रसवाभिरित्यर्थः। पुनः कीदृशैः ? **गोपाललनाभिः** गोपवधूभिः, **सर्वतः** सर्वभागेषु, **समाकुलैः** व्याप्तैः; कीदृशीभिः ? **तुहिनपातशीनहैयङ्गवीनवर्णतनुलतालावण्याभिः** तुहिनपातेन-हिमपातेन, शीनं-घनीभूतम्, यद् हैयङ्गवीनं-नवनीतम्, तस्येव वर्णः-रूपं यस्य तादृशम्, तनुलतायाः-शरीरलतायाः, लावण्यं-कान्तिर्यासां तादृशीभिः, पुनः **क्षीरधवलचलत्कटाक्षच्छटाप्रतिक्षणक्षालितदिङ्मुखाभिः** क्षीरवत्-दुग्धवत्, धवलानां-शुभ्राणाम्, चलतां च, कटाक्षाणाम्-अपाङ्गानाम्, छटाभिः-धाराभिः, प्रतिक्षणं-प्रतिपलम्, क्षालितानि-धौतानि, दिङ्मुखानि-दिगग्रभागा याभिस्तादृशीभिः, पुनः **नवनीतपिण्डपाण्डुवल्गत्कठिनपरिमण्डलस्तनकलशयुगलाभिः** नवनीतपिण्डवत्, पाण्डु-किञ्चित्पीतश्वेतवर्णम्, वल्गत्-चलत्, कठिनं-कठोरम्, परिमण्डलं-वर्तुलं च, स्तनकलशयुगलं-कलशाकारस्तनद्वयं यासां तादृशीभिः, पुनः **शरीरिणीभिः** शरीरवतीभिः, **गोरसश्रीभिरिव** गवाम्, रसः-पयोदध्यादि, तदीयशोभाभिरिवेत्युत्प्रेक्षा, पुनः **सविभ्रमैः** विलाससहितैः, **अङ्गचलनैः** अङ्गसञ्चलनैः, **स्नेहनिर्भराणि** स्नेहेन-दध्यादिगुणविशेषेण, पक्षे प्रीत्या, निर्भराणि-पूर्णानि, दधीनि, **च** पुनः, **वल्लभहृदयानि** पतिहृदयानि, **बल्लवहृदयानि** इति पाठे तु गोपहृदयानीत्यर्थः, **निर्दयम्** अत्यन्तम्, **आमथ्नतीभिः** आलोडयन्तीभिः [य]।

अथ अनन्तरम्, **भगवन्तम्** ऐश्वर्यशालिनम्, **अम्भोनिधिं** समुद्रम्, **अपश्यम्** दृष्टवानहम्, इत्यग्रेणान्वेति। कीदृशः ? **ग्रामेयकैः** ग्रामवासिभिः, **अवलोक्यमानबलसन्ततिः** दृश्यमानसैनिकसङ्घः, कीदृशैः ? **अग्रेसराश्ववारदर्शनक्षुभितैः** अग्रेसराणाम्-अग्रगामिनाम्, अश्ववाराणाम्-अश्ववाहकानाम्, दर्शनेन, क्षुभितैः-सञ्चलितैः, **कटकं** सैन्यम्, आगच्छतीति, **जनरवात्** लोकोक्तशब्दात्, **उपलभ्योपलभ्य** ज्ञात्वा ज्ञात्वा, **सर्वतः** सर्वदिग्भ्यः, **प्रधावितैः** कृतसत्वरगमनैः, पुनः **परित्यक्तनिजनिजव्यापारैः** संत्यक्तस्वस्वकार्यैः, पुनः **अवकरकूटेषु** अवकीर्यते-मार्जन्या विक्षिप्यते इत्यवकरः, धूल्यादिराशिः, तत्कूटेषु-तदुपरिभागेषु, **अधिरूढैः** आरूढैः, पुनः **तडागपालिषु** तडागकोणेषु, तडागसेतुषु वा, **पुञ्जितैः** सङ्घीभूतैः, पुनः **देवकुलवरण्डकेषु** देवकुलस्य देवमन्दिरस्य, वरण्डकेषु-प्राकारस्थानीयभित्तिषु, **कृतावस्थानैः** अवस्थितैः, पुनः **पादपस्कन्धेषु** वृक्षस्कन्धेषु, **बद्धासनैः** कल्पितासनैः, **च** पुनः, **ऊर्ध्वैः** उत्थितैः, **च** पुनः, **उपविष्टैः** कृतोपवेशनैः, **च** पुनः, **लम्बितोभयभुजैः** नमितोभयबाहुभिः, **च** पुनः, **जघनपार्श्वविन्यस्तहस्तयुगलैः** कटिपुरोभागनिवेशितहस्तद्वयैः, **च** पुनः, **शीर्णपट्टिकागाढग्रथितासिधेनुकैः** शीर्णपट्टिकायां-शीर्णवस्त्रपटखण्डे, गाढं-दृढं यथा स्यात् तथा, ग्रथिता-बद्धा, असिधेनुः-छुरिका यैस्तादृशैः, **च** पुनः, **धौतशाटककृतशिरोवेष्टनैः** धौतेन-क्षालितेन, शाटकेन-वस्त्रेण, कृतं शिरोवेष्टनं-मस्तकावरणं यैस्तादृशैः, **च** पुनः, **वेणुयष्टिषु** वंशदण्डेषु, **कृतावष्टम्भैः** कृता-

करिषु कपिषु क्रमेलकेषु च प्रहितदृष्टिभिः प्रमाणरूपबलोपचयशालिनां प्रत्येकमनडुहां मूल्यमानमुद्धट्टयद्भिः [र] 'कथय, क एष राजपुत्रः, केयं राज्ञी, किमभिधानोऽयं द्विरदः' इत्यनवरतप्रयुक्तया प्रश्नपरम्परया कदर्थितसकृद्दृष्टकटकग्रामलाकुटिकैः करेणुकाधिरूढं क्षुद्रगणिकागणमप्यन्तःपुरमिति धृतोष्णवारणं चारणमपि महाराजपुत्र इति कनकनिष्कावृतकन्धरं वणिजमपि राजप्रसादचिन्तक इति चिन्तयद्भिः पृष्टैरपि प्रतिवचनमप्रयच्छद्भिराहूतैरप्यन्यतो गच्छद्भिः पश्यतोऽप्यभिमुखमङ्गुलीभिर्दर्शयद्भिः शृण्वतामपि चेष्टितमशङ्कितैरुच्चस्वनेन सूचयद्भिर्विषमावतारसंमर्देषु दुर्दान्तकरभवाजिवृषभोत्प्लवनेषु व्यालदन्तिवेगोपसर्पणेषु च स्खलतः पततः पलायमानानवलोक्यावलोक्य समकालकृतकलकलैः सतालशब्दमुच्चैस्तरां हसद्भिः [ल], कैश्चिन्मार्गनिहितनिश्चलदृष्टिभिः पश्चादेष्यतां दिगन्तविख्यातयशसामुर्वीभृतां कुमाराणां राजपत्नीनां प्रधानगणिकानां पट्टहस्तिनां च दर्शनाशया क्षुत्पिपासापरिगतैरूर्ध्वशोषं शुष्यद्भिः, कैश्चित् पृष्ठसङ्गिस्वैरिपामरीपीवरस्तनस्पर्शलुब्धैः पीडितैरपि

वलम्बनैः, **च** पुनः, **स्कन्धाधिरोपितदयितडिम्भैः** स्कन्धे, आरोपितः-धृतः, दयितः-प्रियः, डिम्भः-शिशुर्यैस्तादृशैः, पुनः **सर्वत्र** सर्वविषयेषु, **सकुतूहलैरपि** कौतुकान्वितैरपि, **करिषु** हस्तिषु, **कपिषु** मर्कटेषु, **च** पुनः, **क्रमेलकेषु** उष्ट्रेषु, **सविशेषं** विशेषेण, **प्रहितदृष्टिभिः** प्रेरितलोचनैः, पुनः **प्रमाणरूपबलोपचयशालिनाम्** प्रमाणं-दैर्ध्यम्, रूपं-सुन्दराकृतिः, बलोपचयः-बलवृद्धिः, तैः, शोभावताम्, **अनडुहां** वृषभाणाम्, **प्रत्येकम्** एकैकस्य, **मूल्यमानम्** मूल्यप्रमाणम्, **उद्धट्टयद्भिः** कथयद्भिः [र] **कथय** ब्रूहि, **एषः** अयम्, **राजपुत्रः** नृपकुमारः, **कः** किंनामा ?, **इयं** पुरोवर्तिनी, **राज्ञी** राजपत्नी, **का** किंनाम्नी ?, **अयं** पुरोवर्ती, **द्विरदः** हस्ती, **किमभिधानः** किंनामा ?, **इति** इत्थम्, **अनवरतप्रयुक्तया** निरन्तरकृतया, **प्रश्नपरम्परया** प्रश्नसमूहेन, **कदर्थितसकृद्दृष्टकटकग्रामलाकुटिकैः** कदर्थिताः-क्लेशिताः, सकृत्-एकवारम्, दृष्टं-दृष्टिगोचरीकृतम्, कटकं-सेना यैस्तादृशाः, ग्रामलाकुटिकाः-ग्रामवासिदण्डिजना यैस्तादृशैः, **करेणुकाधिरूढं** हस्तिनीमारूढम्, **क्षुद्रगणिकागणमपि** साधारणवेश्यावृन्दमपि, **अन्तःपुरम्** अन्तःपुराङ्गनागणम्, इति **चिन्तयद्भिः** मन्यमानैः, पुनः **धृतोष्णवारणं** गृहीतच्छत्रम्, **चारणमपि** भृत्यमपि, **महाराजपुत्र इति** महाराजकुमार इति, चिन्तयद्भिः, पुनः **कनकनिष्कावृतकन्धरं** कनकस्य-सुवर्णस्य, निष्केण-अष्टोत्तरशतेन, आवृता-व्याप्ता, कन्धरा-ग्रीवा यस्य तादृशम्, **वणिजमपि** आपणिकमपि, **राजप्रसादचिन्तकः** राजप्रीतिप्रार्थी, इति चिन्तयद्भिः, पुनः **पृष्टैरपि** कृतप्रश्नैरपि, **प्रतिवचनम्** उत्तरम्, **अप्रयच्छद्भिः** अप्रददद्भिः, पुनः **आहूतैरपि** कृताह्वानैरपि, **अन्यतः** अन्यत्र, गच्छद्भिः, पुनः **अभिमुखं** सम्मुखम्, **पश्यतोऽपि** अवलोकमानानपि, लोकान्, अङ्गुलीभिः, **दर्शयद्भिः** संकेतयद्भिः, पुनः **चेष्टितं** शरीरचेष्टाविशेषं **शृण्वतामपि** श्रुतिगोचरीभूतध्वनिना जानतामपि, **अशङ्कितैः** तच्छ्रवणशङ्कयापि रहितैः, **उच्चस्वनेन** उच्चशब्देन, **सूचयद्भिः** बोधयद्भिः; पुनः **विषमावतारसंमर्देषु** निम्नोन्नतस्थलावतरणार्थजनसम्मेलनेषु, **स्खलतः** विचलतः, पुनः **दुर्दान्तकरभ-वाजि-वृषभोत्प्लवनेषु** दुर्दान्तः-उद्धतो यः करभः-हस्तिशिशुः, वाजी-अश्वः, वृषभः-वृषः, तेषाम्, उत्प्लवनेषु-उत्कूर्दनेषु, पततः, **च** पुनः, **व्यालदन्तिवेगोपसर्पणेषु** व्यालदन्तिनां-दुष्टहस्तिनाम्, "व्यालो दुष्टगजे सर्पे शठे श्वापद-सिंहयोः" इति हैमः, वेगेन-त्वरया, यद् उपसर्पणं-समीपागमनं तेषु, **पलायमानान्** भयादिना स्थानत्यागेनान्यस्थानं गच्छतो जनान्, **अवलोक्य अवलोक्य** दृष्ट्वा दृष्ट्वा, **समकालकृतकलकलैः** समकालं-एककालम्, कृतः कलकलः-कोलाहलो यैस्तादृशैः; पुनः **सतालशब्दं** प्रसृतहस्तध्वनिपूर्वकम्, **उच्चैस्तराम्** अत्युच्चैः, **हसद्भिः** हासं कुर्वद्भिः [ल]; **कैश्चित्** कैरपि जनैः, **मार्गनिश्चलनिहितदृष्टिभिः** मार्गे-पथि, निश्चलं-निःस्पन्दं यथा स्यात् तथा, निहिते-निवेशिते, दृष्टी लोचने यैस्तादृशैः, पुनः **पश्चात्** पृष्ठदेशतः, **एष्यताम्** आगमिष्यताम्, **दिगन्तविख्यातयशसाम्** आदिगन्तप्रसिद्धयशस्कानाम्, **उर्वीभृतां** नृपाणाम्, **कुमाराणां** राजपुत्राणाम्, **राजपत्नीनां** राज्ञीनाम्, **प्रधानगणिकानां** मुख्यवेश्यानाम्, **च** पुनः, **पट्टहस्तिनां** प्रधानगजानाम्; **दर्शनाशया** दर्शनाभिलाषेण, **क्षुत्-पिपासापरिगतैः** बुभुक्षा-पिपासाव्याप्तैः, अत एव **ऊर्ध्वशोषं शुष्यद्भिः** ऊर्ध्वकण्ठताल्वादिप्रदेशावच्छेदेन शोषणमनुभवद्भिः; पुनः **कैश्चित्** कैरपि, **पृष्ठसङ्गिस्वैरिपामरीपीवरस्तनस्पर्शलुब्धैः**

समन्ततः प्रेक्षकजनेन स्थानमत्यजद्भिः, कैश्चिन्मनोरथशतासादितग्रामपतिसुतासंनिधानैर्लब्धमहानिधानैरिव खलधानतः साधनिकलोकेन निखिलमपि नीयमानं बुसं बुसाय मत्वाऽवधीरयद्भिः [व], कैश्चिद् गृह्यमाणयवसरक्षणव्यग्रैरर्थलोभादभिलषितलञ्चानां लञ्चया लाकुटिकानां क्लेशमनुभवद्भिः [श], कैश्चिदाक्रुष्टहस्तिपकचोदितद्विरदपुरस्कृतैः प्रपलाय्य दूरीकृतात्महननैरात्मनोऽविडम्बनाय ब्राह्मण्यमाविष्कुर्वद्भिः, कैश्चिदनिबद्धलोकलुण्ट्यमानशाकशाकटैरघटितप्रयोजनामवनिपाज्ञां सावज्ञमुपहसद्भिः [ष], कैश्चिदानन्दगद्गदिकागृहीतकण्ठैर्निगृहीतलुण्टाकव्रातवार्तया लुण्टितेक्षुवाटदुःखदुर्बलं कृषीवललोकमपशोकं कुर्वद्भिः, कैश्चिज्जवप्राप्तपरिपालकव्यूहरक्षितसुजातव्रैहेयैरनेकधा नरेन्द्रमभिनन्दयद्भिः [स], कैश्चिदलब्धावकाशठक्करहठनिराकृतैराश्रयाय प्रतिगृहं गृहीतभाण्डैराहिण्डयद्भिः, कैश्चित् कलहनिष्कासितशालीनकुलपुत्रकवर्गैः सगर्वमग्रतो ग्रामपोटानां

टिप्पनकम्—लञ्चया नीवीभव(ज)नेन [श]। शाकशाकटं-शाकक्षेत्रम् [ष]। [व्रैहेयम्-] व्रीहिक्षेत्रम् [स]।

पृष्ठसङ्गिनीनां-पृष्ठसंसर्गिणीनां, स्वैरिणीनां-स्वेच्छाचारिणीनाम्, पामरीणां-नीचाङ्गनानाम्, पीवरस्तनयोः-स्थूलस्तनयोः, स्पर्शे लुब्धैः-संजातलोभैः, अत एव **प्रेक्षकजनेन** दर्शकजनेन, **समन्ततः** सर्वभागेषु, **पीडितैरपि** मर्दितैरपि, **स्थानं** स्वाधिष्ठितप्रदेशम्, **अत्यजद्भिः** अमुञ्चद्भिः; पुनः **कैश्चित्** कैरपि जनैः, **मनोरथशतासादितग्रामपतिसुतासन्निधानैः** मनोरथशतेन-अभिलाषशतेन, आसादितं-प्राप्तं, ग्रामपतिसुतायाः सन्निधानं-सान्निध्यं यैस्तादृशैः, अत एव **लब्धमहानिधानैरिव** लब्धं-प्राप्तं महानिधानं-महानिधिर्यैस्तादृशैरिव, **खलधानतः** धान्यविमर्दनस्थानतः, "खलधानं पुनः खलम्" इति हैमः, **साधनिकलोकेन** सैनिकलोकेन, **नीयमानं** ह्रियमाणं, **निखिलमपि** सर्वमपि, **बुसं** यवादिधान्यम्, **बुसाय मत्वा** तृणमिति मत्वा, **अवधीरयद्भिः** अनाद्रियमाणैः [व]; पुनः **कैश्चित्** कैरपि, **गृह्यमाणयवसरक्षणव्यग्रैः** गृह्यमाणस्य-बलादादीयमानस्य, यवसस्य-घासस्य, रक्षणे-रक्षाकार्ये, व्यग्रैः-व्याकुलैः, **अर्थलोभात्** धनलिप्सावशात्, **अभिलषितलञ्चानाम्** अभिलषिता-अभिप्रेता, लञ्चा-लायते प्रच्छन्नं गृह्यत इति लञ्चा, यैस्तादृशानाम्, **लाकुटिकानां** वेत्रधारिणां रक्षकाणाम्, **लञ्चया** लञ्चासमर्पणेन, **क्लेशं** दुःखम्, **अनुभवद्भिः** प्राप्नुवद्भिः [श]; पुनः **कैश्चित्** कैरपि, **आक्रुष्टहस्तिपकचोदितद्विरदपुरस्कृतैः** आक्रुष्टाः-कृतशब्दा ये हस्तिपकाः-हस्तिवाहकाः, तैः चोदितैः-प्रेरितैः, द्विरदैः-हस्तिभिः, पुरस्कृतैः-अग्रतः कृतैः, **प्रपलाय्य** अतिशयेन पलायनं कृत्वा, **दूरीकृतात्महननैः** दूरीकृतम् आत्मनः-स्वस्य, हननं-हत्या यैस्तादृशैः, **आत्मनः** स्वस्य, **अविडम्बनाय** अतिरस्काराय स्वरक्षणायेत्यर्थः, **ब्राह्मण्यं** ब्राह्मणत्वम्, **आविष्कुर्वद्भिः** प्रकटयद्भिः; पुनः **कैश्चित्** कैरपि, **अनिबद्धलोकलुण्ट्यमानशाकशाकटैः** अनिबद्धैः-निरङ्कुशैः, लोकैः-राजपुरुषादिजनैः, लुण्ट्यमानानि-बलादाच्छिद्यमानानि, शाकशाकटानि-मार्गवर्तिशाकक्षेत्राणि येषां तादृशैः, **अघटितप्रयोजनाम्** असम्पादितफलाम्, **अवनिपाज्ञां** सैन्येन कस्यापि कष्टं न कार्यमित्यादिराजाज्ञाम्, **सावज्ञं** सतिरस्कारम्, उपहसद्भिः [ष]; पुनः **कैश्चित्** कैरपि, **आनन्दगद्गदिकागृहीतकण्ठैः** आनन्देन या गद्गदिका-अव्यक्तशब्दता, तया गृहीतः-आश्रितः कण्ठो येषां तादृशैः, पुनः **लुण्टितेक्षुवाटदुःखदुर्बलं** लुण्टितेन-बलादाच्छिन्नेन, इक्षुवाटेन-इक्षुक्षेत्रेण यद् दुःखं तेन दुर्बलम्, **कृषीवललोकं** कर्षकजनम्, **निगृहीतलुण्टाकव्रातवार्तया** निगृहीतस्य-दण्डितस्य, लुण्टाकानां-बलादपहारकाणां, व्रातस्य-समूहस्य, वार्तया-वृत्तान्तेन, **अपशोकं** शोकरहितम्, **कुर्वद्भिः** सम्पादयद्भिः; पुनः **कैश्चित्** कैरपि, **जवप्राप्तपरिपालकव्यूहरक्षितसुजातव्रैहेयैः** जवेन-शीघ्रतया, प्राप्तेन-लब्धेन, परिपालकव्यूहेन-परिरक्षकसमूहेन, रक्षितानि, सुजातानि-मनोहराणि, व्रैहेयाणि-व्रीहिक्षेत्राणि येषां तादृशैः, **अनेकधा** अनेकप्रकारैः, **नरेन्द्रं** राजानम्, **अभिनन्दयद्भिः** स्तुवद्भिः [स]। पुनः **कैश्चित्** कैरपि, **अलब्धावकाशठक्कुरहठनिराकृतैः** अलब्धः-अदृष्टः, अवकाशः-स्थानं येन, तादृशेन ठक्कुरेण-ऐश्वर्यशालिना गृहपतिना, हठेन-बलात्कारेण, निराकृतैः-निष्कासितैः, अत एव **गृहीतभाण्डैः** उद्धृतभाण्डैः, **प्रतिगृहं** गृहं गृहम्, **आश्रयाय** अवस्थानाय, **आहिण्डयद्भिः** भ्राम्यद्भिः, पुनः **कैश्चित्** कैरपि, **कलहनिष्कासितशालीनकुलपुत्रकवर्गैः** कलहेन निष्कासितः-बहिष्कृतः,

प्रौढिमात्मनः प्रकटयद्भिः [ह], अन्यैस्तु दूरोदस्तकण्ठैः पृष्ठलग्नहृष्टबालकवृन्दकलकलसूचितान् ग्राममध्ये विचरतः स्वच्छन्दचारिणो महामात्रतन्त्रेण परिवृतान् वारणपतीनवलोक्य जातसंक्षोभैर्झटिति कोष्ठकद्वारेषु संग्रहकान् पातयद्भिः पश्चाद्वाटकेषु गोमयपिण्डकूटानि गोपयद्भिर्भग्नवृतिषु निष्कुटेषु त्रपुसकर्कारुकारवेल्लकादिवल्लीफलान्यादायादाय वेश्मनि प्रवेशयद्भिर्गृहधनं च कांस्यपात्रिकासूत्रकम्बलप्रायं बलाधिकृतधामन्यबलाजनस्य न्यासीकुर्वद्भिरनेकवृत्तान्तैर्ग्रामेयकैरवलोक्यमानबलसंहतिः [क्ष] प्रतिमार्गमुत्तम्भिताभिनवतोरणान् स्थानस्थानोपसर्पत्कुसुमफलहस्तवास्तव्यवित्ताढ्यलोकानूर्ध्वीकृतासु तत्क्षणं वेणुयष्टिषु कुड्मलीकृत्य योजितैर्माञ्जिष्ठैश्च माहारजनैश्च कर्पटैः जटालीकृतशीर्णगृहपटलानतिक्रम्य कतिचिद् वेलावनग्रामकानग्रतो दत्तदृष्टिः [ज्ञ] पिधानमिव पातालस्य, मणिकुट्टिममिव त्रिभुवनचतुःशालस्य, जन्मपल्वलमिवाकाशकुवलयस्य, प्रभापटलमिव

टिप्पनकम्—कोष्ठकः-वरण्डकः, संग्रहकाः-पलिहकाः, निष्कुटः-गृहवाटिका [क्ष] । माहारजनानि-कौसुम्भानि [ज्ञ] ॥

शालीनः-अधृष्टो लज्जायुक्तः, कुलपुत्रकाणां-कुलप्रसूतानुकम्पितपुत्राणाम्, वर्गः-समूहो यैस्तादृशैः, **ग्रामपोटानां** ग्रामस्थानां पुंलक्षणानां स्त्रीणाम्, **अग्रतः** अग्रे, **सगर्वं** साभिमानम्, **आत्मनः** स्वस्य, **प्रौढिं** प्रगल्भताम्, **प्रकटयद्भिः** प्रदर्शयद्भिः [ह]; पुनः **अन्यैस्तु** अन्यव्यक्तिभिस्तु, **दूरोदस्तकण्ठैः** दूरम्, उदस्तः-उत्क्षिप्तः, कण्ठः-कण्ठव्यापारो यैस्तादृशैः, अतिशुष्ककण्ठैरित्यर्थः, **पृष्ठलग्नहृष्टबालकवृन्दकलकलसूचितान्** पृष्ठलग्नस्य-पृष्ठसम्बद्धस्य, हृष्टबालकवृन्दस्य-प्रसन्नशिशुसमूहस्य, कलकलेन-कोलाहलेन, सूचितान्-बोधितान्, ग्राममध्ये **विचरतः** भ्रमतः, **स्वच्छन्दचारिणः** स्वेच्छाचारिणः, **महामात्रतन्त्रेण** हस्तिपकप्रधानेन, **परिवृतान्** परिवेष्टितान्, **वारणपतीन्** गजेन्द्रान्, **अवलोक्य** दृष्ट्वा, **जातसंक्षोभैः** उत्पन्नसम्भ्रमैः, **कोष्ठकद्वारेषु** वरण्डकद्वारेषु, **संग्रहकान्** परिघकान्, पातयद्भिः, पुनः **पश्चाद्वाटकेषु** वृतीनां पश्चाद्भागेषु, **गोमयपिण्डकूटानि** गोमयपिण्डसमूहान्, **गोपयद्भिः** रक्षद्भिः, पुनः **भग्नवृतिषु** भग्नाः-भङ्गं प्राप्ताः, वृतयः-प्राकारा येषां तादृशेषु, **निष्कुटेषु** गृहवाटिकासु, **त्रपुस-कर्कारु-कारवेल्लकादिवल्लीफलानि** त्रपुसं नाम-फलविशेषलता, कर्कारुः-कूष्माण्डलता, कारवेल्लकं 'कारेला' प्रसिद्धफलविशेषलता, तदादीनां-तत्प्रभृतीनां, वल्लीनां-लतानां फलानि, **आदाय आदाय** गृहीत्वा गृहीत्वा, **वेश्मनि** गृहे, **प्रवेशयद्भिः** प्रवेश्य गोपयद्भिः, **च** पुनः, **कांस्यपात्रिकासूत्रकम्बलप्रायं** कांस्यपात्रिका-कांस्यस्य-धातुविशेषस्य भाजनम्, सूत्रं-तन्तुः, कम्बलः-ऊर्णातन्तुमयः पटः, तत्प्रायं-तत्प्रचुरम्, **गृहधनं** गृहवित्तम्, **अबलाजनस्य** स्त्रीजनस्य, **बलाधिकृतधामनि** बलेन-स्वसामर्थ्येन बलात्कारेणेत्यर्थः, अधिकृते रक्षिताधिकारे, धामनि-गृहे, **न्यासीकुर्वद्भिः** निक्षिपद्भिः, पुनः **अनेकवृत्तान्तैः** विविधवार्तकैः, बहुविधप्रवृत्तिकैरिति यावत् [क्ष]। पुनः कीदृशोऽहं समरकेतुः ? **कतिचित्** कतिपयान्, **वेलावनग्रामकान्** वेलायाः-जलधितीरस्य यद् वनं तन्मध्यवर्तिनो लघुग्रामान्, **अतिक्रम्य** उल्लङ्घ्य, **अग्रतः** तदग्रे, **दत्तदृष्टिः** क्षिप्तलोचनः, कीदृशान् ? **प्रतिमार्गं** मार्गे मार्गे, **उत्तम्भिताभिनवतोरणान्** उत्तम्भितानि, उद्बद्धानि, अभिनवानि-नवीनानि, तोरणानि-द्वाराग्रे स्तम्भोपरि निबद्धानि बहिर्द्वाराणि येषु तादृशान्, पुनः **स्थानस्थानोपसर्पत्कुसुमफलहस्तवास्तव्यवित्ताढ्यलोकान्** स्थाने स्थाने उपसर्पन्तः-उपगच्छन्तः, कुसुमफलहस्ताः-पुष्पफलरूपोपहारहस्ताः, वास्तव्याः-तद्ग्रामवासिनः, वित्ताढ्याः-धनाढ्याः, लोकाः-जना येषु तादृशान्, पुनः **तत्क्षणं** तत्कालमेव, **ऊर्ध्वीकृतासु** उन्नमितासु, **वेणुयष्टिषु** वंशदण्डेषु, **कुड्मलीकृत्य** आकुञ्च्य, **योजितैः** उत्क्षिप्तैः, **माञ्जिष्ठैः** मञ्जिष्ठाख्यरागविशेषरक्तैः, **च** पुनः, **माहारजनैः** माहारजनेन-कुसुम्भाख्यरागविशेषेण रक्तैः, **कर्पटैः** पटखण्डैः, **जटालीकृतशीर्णगृहपटलान्** जटालीकृतं-व्याप्तं, शीर्णानां-भग्नानां, गृहाणां पटलं-समूहो येषु तादृशान् [ज्ञ]। कीदृशमम्भोनिधिम् ? **पातालस्य** अधोलोकस्य, **पिधानमिव** आवरणमिव, पुनः **त्रिभुवनचतुःशालस्य** त्रिभुवनरूपस्य चतुःशालस्य-चतसृणां शालानां समाहारस्य, अन्योऽन्याभिमुखगृहतुष्टयस्य, **मणिकुट्टिममिव** मणिखचितं मध्यवर्ति संस्कृतभूमितलमिव, पुनः **आकाशकुवलयस्य** आकाशरूपस्य कमलस्य,

दिग्मण्डलेन्द्रनीलवलयस्य, छायाचक्रमिव ब्रह्मस्तम्बतरुगहनस्य, प्रच्छदपटमिव महीतलमहाशयनस्य, अदृष्टपर्यन्ततया दृष्टान्तमिव संसारस्य, मूर्ततापरिणाममिव कालस्य, रूपान्तरग्रहणमिव शब्दराशेः, उदाहरणमिव निःश्रेयससुखानाम्, अनुकारमिव महाकविप्रज्ञाऽऽलोकस्य [अ], सर्वतश्चान्धकारितदिगन्तराभिरन्धकारातिकन्धराकान्तिकालीभिः पातालतिमिरेभ्य इव जृम्भिताभिरितस्ततः सर्पदहिकुलप्रभाभिरिव संतर्पिताभिरसुरलोकादिव लब्धनिर्गमाभिरवगाहावतीर्णदिग्नागमदक्षालनादिव क्षुभिताभिरन्तःप्रसुप्ताच्युतशरीरद्युत्येव दत्तसंस्काराभिरनिलविलुलितैरौर्वज्वलनधूमैरिवानुरञ्जिताभिरन्तःकरणवासिवैवस्वतानुजादेहलावण्येनेव लिप्ताभिस्तटतमालकाननच्छायानिर्गमैरिव निरर्गलीकृतप्रसराभिरुल्लसन्तीभिरम्भसः प्रभावर्तिभिरत्यन्तधीराणामपि मनसि साध्वसमादधानम् [आ], मुद्रितमुखरहंसनूपुरस्वनाभिः त्वरितगतिवशोत्कम्पमानपृथुपयोधरतटाभिर्मुक्तवाचालक्रौञ्चमालामेखलानि पुलिनजघनस्थलानि बिभ्रतीभिरितस्ततो वलितविलोलतारशफरलोचनाभिर्बहलशैवलप्रवालकस्तूरिकास्तबककलङ्कितानि पङ्कमलिनेन नवनीरवाससा सुदूरमावृण्वतीभिर्मुखानि विजृम्भिताभिनव-

---

टिप्पनकम्—**वैवस्वतानुजा**–यमानुजा [आ]। **सुघटितकाष्ठस्य गगनारघट्टस्य** काष्ठाः–दिशः, काष्ठानि–दारूणि च [ई]।

जन्मपल्वलमिव जन्मस्थानभूतजलाशयमिव, पुनः **दिङ्मण्डलेन्द्रनीलवलयस्य** दिङ्मण्डलरूपस्य इन्द्रनीलमणिनिर्मितकङ्कणस्य, **प्रभापटलमिव** द्युतिसमूहमिव, पुनः **ब्रह्मस्तम्बतरुगहनस्य** ब्रह्माण्डरूपस्य वृक्षसमूहस्य, **छायाचक्रमिव** छायामण्डलमिव, पुनः **महीतलमहाशयनस्य** भूमण्डलरूपमहाशय्यायाः, **प्रच्छदपटमिव** आस्तरणवस्त्रमिव, पुनः **अदृष्टपर्यन्ततया** अदृष्टान्तिमावधिकतया, **संसारस्य** जगतः, **दृष्टान्तमिव** उपमानमिव, आदर्शभूतमिवेति यावत्, पुनः **कालस्य** कालाख्यामूर्तद्रव्यस्य, **मूर्ततापरिणाममिव** मूर्ततया क्रियादिवद्द्रव्यभावेन विकारभूतमिव, पुनः **शब्दराशेः** शब्दसमूहस्य, **रूपान्तरग्रहणमिव** रूपान्तरापत्तिमिव, पुनः **निःश्रेयससुखानां** मोक्षसुखानाम्, **उदाहरणमिव** निरवसानताया दृष्टान्तमिव, पुनः **महाकविप्रज्ञाऽऽलोकस्य** महाकविप्रतिभाप्रकाशस्य, **अनुकारमिव** अनुकरणमिव [अ], पुनः **अम्भसः** जलस्य, **प्रभावर्तिभिः** प्रभारूपाङ्गलेपैः, **अत्यन्तधीराणामपि** परमधैर्यशालिनामपि, **मनसि** हृदये, **साध्वसं** भयम्, **आदधानं** जनयन्तम्, कीदृशीभिः? **सर्वतः** सर्वभागेषु, **अन्धकारितदिगन्तराभिः** अन्धीकृतदिङ्मध्याभिः, पुनः **अन्धकारातिकन्धराकान्तिकालीभिः** अन्धकस्य–तदाख्यराक्षसस्य, अरातिः–शत्रुः शिवः, तस्य या कन्धरा–ग्रीवा, तस्या या कान्तिः–कृष्णवर्णः, तद्वत् कालीभिः–कृष्णवर्णाभिः, **पातालतिमिरेभ्य इव** पातालस्थान्धकारेभ्य इव, **जृम्भिताभिः** जृम्भया प्रकाशिताभिः, पुनः **इतस्ततः** अत्र तत्र, **सर्पदहिकुलप्रभाभिः** सर्पताम्–उद्वेल्लताम्, अहिकुलानां–सर्पगणानां, प्रभाभिः–कान्तिभिः, **सन्तर्पिताभिरिव** परिपोषिताभिरिव, पुनः **असुरलोकात्** दैत्यलोकात्, **लब्धनिर्गमाभिरिव** प्राप्तनिस्सरणाभिरिव, पुनः **अवगाहावतीर्णदिङ्नागमदक्षालनात्** अवगाहाय–सलिलान्तःप्रवेशाय, अवतीर्णैः–आगतैः, दिङ्नागैः–दिग्गजैः, मदानां–दानवारीणां, क्षालनात्–मार्जनात्, **क्षुभिताभिरिव** कलुषिताभिरिव, पुनः **अन्तःप्रसुप्ताच्युतशरीरद्युत्या** अन्तः–मध्ये, प्रसुप्तस्य–शयितस्य, अच्युतस्य–विष्णोः, शरीरद्युत्या–शरीरकान्त्या, **दत्तसंस्काराभिरिव** कृतसंस्काराभिरिव, पुनः **अनिलविलुलितैः** पवनोद्धूतैः, **और्वज्वलनधूमैः** और्वज्वलनः–वाडवाग्निः, तस्य धूमैः, **अनुरञ्जिताभिरिव** मलिनिताभिरिव, पुनः **अन्तःकरणवासिवैवस्वतानुजादेहलावण्येन** अन्तःकरणवासिन्याः–हृदयवास्तव्यायाः, वैवस्वतानुजायाः–यमानुजाया यमुनाया इत्यर्थः, देहलावण्येन–शरीरकान्त्या, **लिप्ताभिरिव** मिश्रिताभिरिव, पुनः **तटतमालकाननच्छायानिर्गमैः** तटेषु यानि तमालकाननानि–तमालाख्यतरुवनानि, तेषां छायानां निर्गमैः–निःसरणैः, **निरर्गलीकृतप्रसराभिः** निरर्गलीकृतः–अप्रतिहतीकृतः–प्रसरः–प्रसरणं यासां तादृशीभिरिव, **उल्लसन्तीभिः** उद्दीप्यमानाभिः [आ]। पुनः कीदृशम्? **विजृम्भिताभिनवमेघदुर्दिनेषु** विजृम्भितेन–उद्भूतेन, अभिनवेन–सद्यःसम्भृतसलिलेन, मेघेन, दुर्दिनेषु–अन्धकारावृतेषु, **दिनेषु** वासरेषु,

मेघदुर्दिनेषु दिनेषूत्पथेनागत्यागत्य निम्नगाभिसारिकाभिर्गाढमुपगूढम् [इ], मुहुरवतरन्त्या तोयमादायादाय पुनरूर्ध्वमतिदूरमुत्पतन्त्या सान्द्रशीकरक्षोदविरचितानेकसुरचापया जगदुपवनं सेक्तुममरपतिना प्रकल्पितस्य सर्वतः सुघटितकाष्ठस्य गगनारघट्टस्य घटीमालयेव जलदसंतत्या सततमुदच्यमानम् [ई], विषमवाहनविसंस्थुलस्य निजरथस्याष्टमं तुरङ्गममसमग्रताजनितवैरूप्यस्य चात्मवपुषः षोडशीं कलामन्वेष्टुमिव मथनदृष्टदिव्याश्वशशिखण्डसंभवाभ्यामहिमगभस्तिभ्यामनवरतकृतमज्जनोन्मज्जनम् [उ], अगस्त्यजठरानलमिव पानावसरलग्नं युगान्तविद्युद्वलयमिव संवर्तकाभ्रगर्भगलितमनवरतमानीयमानं वृद्धिमुदकैरुदरैकदेशेन दहन-

---

उत्पथेन विरुद्धमार्गेण, आगत्य आगत्य, **निम्नगाभिसारिकाभिः** निम्नं-नीचं गच्छन्तीति निम्नगा नद्यः, तद्रूपाभिः, अभिसारिकाभिः-परपुरुषगामिनीभिः कामिनीभिः, **गाढं** अत्यन्तं यथा स्यात् तथा, **उपगूढम्** आलिङ्गितम्, कीदृशीभिः? **मुद्रितमुखरहंसनूपुरस्वनाभिः** मुखराः-वाचाला ये हंसाः-पक्षिविशेषाः, तद्रूपाणां नूपुराणां-पादाभरणविशेषाणां, स्वनाः-ध्वनयः, मुद्रिताः-निरुद्धा याभिस्तादृशीभिः, वर्षासु नदीजलानां दूषिततया हंसानां मानससरोवरप्रस्थानश्रवणादिति भावः, पुनः **त्वरितगतिवशोत्कम्पमानपृथुपयोधरतटाभिः** त्वरितगतिवशेन-ससम्भ्रमगमनवशेन, उत्कम्पमानः-उत्-ऊर्ध्वं कम्पमानः, उद्गच्छन्नित्यर्थः, पृथुपयोधरः-स्थूलस्तनरूपः, तटो यासां तादृशीभिः, पुनः **मुक्तक्रौञ्चमालामेखलानि** मुक्ता-त्यक्ता, क्रौञ्चानां-तज्जातीयपक्षिविशेषाणां, माला-पङ्क्तिरूपा, मेखला-काञ्ची यैस्तादृशानि, **पुलिनजघनस्थलानि** सिकतामयस्थलरूपाणि कटिपुरोभागस्थलानि, **बिभ्रतीभिः** धारयन्तीभिः, **इतस्ततः** अत्र तत्र, **वलितविलोलतारशफरलोचनाभिः** वलितानि-व्यापारितानि, विलोलताराणि-तरलकनीनिकानि, शफररूपाणि-मत्स्यविशेषरूपाणि, लोचनानि-नेत्राणि याभिस्तादृशीभिः, **वलितविलोलतामरसे**ति पाठे तु तामरसरूपाणि-कमलरूपाणि लोचनानि याभिरित्येवं व्याख्येयम्, पुनः **बहलशैवल-प्रवाल-कस्तूरिकास्तबककलङ्कितानि** बहलानां-विपुलानाम्, शैवलानां-जलतृणविशेषाणाम्, प्रवालानां-विद्रुमाणाम्, तद्रूपणामित्यर्थः, कस्तूरिकाणां-मृगमदानां, स्तबकेन-गुच्छेन, कलङ्कितानि-चिह्नितानि, **मुखानि** अग्रभागरूपाणि वदनानि, **पङ्कमलिनेन** कर्दमकलुषितेन, **नवनीरवाससा** नवीनजलरूपेणवाससा-वस्त्रेण, **सुदूरम्** अतिदूरपर्यन्तम्, **आवृण्वतीभिः** आच्छादयन्तीभिः [इ] । पुनः **जलदसंतत्या** मेघपङ्क्त्या, **सततम्** अनवरतम्, **उदच्यमानम्** उद्ध्रियमाणजलम्, कीदृश्या? **मुहुः** अनेकवारम्, **अवतरन्त्या** आपतन्त्या, पुनः **तोयं** जलम्, **आदाय आदाय** गृहीत्वा गृहीत्वा, पुनः **अतिदूरम्** अत्यन्तदूरम्, **ऊर्ध्वम्** उपरि, **उत्पतन्त्या** उद्गच्छन्त्या, पुनः **सान्द्रशीकरक्षोदविरचितानेकसुरचापया** सान्द्राणां शीकराणां-जलकणानां, क्षोदैः-चूर्णैः, विरचिताः-निर्मिताः, अनेके सुरचापाः-इन्द्रधनूंषि यया तादृश्या, कयेव? **जगदुपवनं** जगद्रूपमारामम्, **सेक्तुं** सेकेन संवर्द्धयितुम्, **अमरपतिना** इन्द्रेण, **प्रकटितस्य** आविष्कृतस्य, **सर्वतः** सर्वभागेषु, **सुघटितकाष्ठस्य** सुघटितानि-सन्निवेशितानि काष्ठानि यस्मिंस्तादृशस्य, अन्यत्र सुघटिताः काष्ठाः-दिशो यत्र तस्य, **गगनारघट्टस्य** आकाशरूपजलनिष्कासनयन्त्रस्य, **घटीमालयेव** घटीपङ्क्त्येव [ई] । पुनः **मथनदृष्टदिव्याश्व-शशिखण्डसम्भवाभ्यां** मथनेन-आलोडनेन, दृष्टः-परीक्षितः, दिव्याश्वस्य-स्वर्गीयाश्वस्य, उच्चैःश्रवस इत्यर्थः, शशिखण्डस्य-चन्द्रखण्डस्य च, सम्भवः-उत्पत्तिर्याभ्यां तादृशाभ्याम्, **अहिमहिमगभस्तिभ्याम्** अहिमः-उष्णः, गभस्तिः-किरणो यस्य सोऽहिमगभस्तिः सूर्यः, हिमः-शीतो गभस्तिः-किरणो यस्य स हिमगभस्तिश्चन्द्रः, ताभ्याम्, **अनवरतकृतमज्जनोन्मज्जनम्** अनवरतं-निरन्तरं, कृतं मज्जनम्-अन्तरवगाहनम्, उन्मज्जनम्-उत्प्लवनं च, प्रवेशनिर्गमावित्यर्थः, यस्मिंस्तादृशम्, किं कर्तुमिव? **विषमवाहनविसंस्थुलस्य** विषमैः-विषमसंख्यैः सप्तभिरित्यर्थः, वाहनैः-अश्वैः, विसंस्थुलस्य-शिथिलगतिकस्य, **निजरथस्य** स्वरथस्य, अष्टमं **तुरङ्गमम्** अश्वम्, **अन्वेष्टुमिव** गवेषयितुमिव सूर्येण, **असमग्रताजनितवैरूप्यस्य** असमग्रतया-अपूर्णतया, जनितम्-उत्पादितम्, वैरूप्यम्-अचारुत्वं यस्य तादृशस्य, **आत्मवपुषः** स्वशरीरस्य, **षोडशीं** षोडशसंख्यापूरणीम्, **कलाम्** अंशम्, अन्वेष्टुमिव चन्द्रेण [उ] । पुनः **उदरैकदेशेन** स्वोदरैकभागेन, **और्वाभिधानं** वाडवाख्यम्, **दहनम्** अग्निम्, **दधानं** धारयन्तम्, कमिव? **पानावसरलग्नम्** अगस्त्यकृतशोषणसमयसम्पृक्तम्, **अगस्त्यजठरानलमिव** अगस्त्यस्य-तदाख्यमुनेः, उदराग्निमिव, पुनः **संवर्तकाभ्रगर्भगलितं** संवर्तकाख्यमेघगर्भनिर्गतम्, **युगान्तविद्युद्वलयमिव** प्रलयकालिकविद्युन्मण्डलमिवेति चोत्प्रेक्षा, पुनः

मौर्वाभिधानं दधानम् [ऊ], अमराङ्गनागात्रभूषणोचितैरतिमात्रगम्भीरेऽपि पयसि भास्वरतया करतलस्थितैरिव विभाव्यमानैरत्यन्तविशदतया च सुरभीप्रस्रवेनेव स्नपितैरैरावतकरशीकरनिकरेणेव संवर्धितैर्धूर्जटिहठाकृष्टशिशुचन्द्रमुक्ताश्रुबिन्दुशङ्काविधायिभिर्लक्ष्मीस्तनस्वेदलेशैरिव लब्धकाठिन्यैरमृतशुक्तिगर्भसंभवैर्मुक्ताफलैरलंकृताभ्यन्तरम् [ऋ], अपरैरपि महाप्रमाणैः क्वचित् प्रलयवातविधूतपुष्करावर्तकमेघमुक्तैः क्वचित् कुलिशकर्कशहिरण्याक्षवक्षोऽभिघातदलितमहावराहदंष्ट्राङ्कुरोच्छलितैः क्वचित् कमठपतिपृष्ठकषणोत्थपावकप्रदीप्तमन्दरनितम्बवेणुस्तम्बनिष्ठ्यूतैः क्वचिद्वेदान्वेषणक्लान्तहरिशकुलगलरन्ध्रोज्झितैः क्वचित् प्रौढकेशरिनखरदारितैरावणकुम्भकूटभ्रष्टैः क्वचिन्मधुकैटभरोषितजलशायिशार्ङ्गिनिर्दयापूरितपाञ्चजन्यशङ्खोद्गीर्णैः क्वचिन्मथनाविष्टबलिहठाकृष्टवासुकिफणापीठगलितैर्भिन्नजातिभिर्मौक्तिकैः स्तबकिततलम् [ॠ], सर्वतः प्रसारितायतज्वालाजिह्वस्य सततमा-

---

टिप्पनकम्—हरिशकुलः–विष्णुमत्स्यः [ॠ]।

उदकैः जलैः, **अनवरतं** निरन्तरं, **वृद्धिं** वैपुल्यम्, **आनीयमानं** प्राप्यमाणम् [ऊ]। पुनः **अमृतशुक्तिगर्भसम्भवैः** अमृतं–सुधा, तदुत्पन्ना या शुक्तिस्तद्गर्भोत्पन्नैः, **मुक्ताफलैः** मुक्तामणिभिः, **अलङ्कृताभ्यन्तरं** भूषिताभ्यन्तरम्, कीदृशैः ? **अमराङ्गनागात्रभूषणोचितैः** अमराङ्गनानां–देवाङ्गनानाम्, गात्रभूषणोचितैः–शरीराभरणयोग्यैः, पुनः **अतिमात्रगम्भीरेऽपि** अत्यन्तागाधेऽपि, **पयसि** जले, **भास्वरतया** दीप्तिमत्तया, **करतलस्थितैरिव** हस्ततलस्थितैरिव **विभाव्यमानैः** प्रतीयमानैः, **च** पुनः, **अत्यन्तविशदतया** अत्यन्तस्वच्छतया, **सुरभीप्रस्रवेन** धेनुदुग्धेन, **स्नपितैरिव** क्षालितैरिव, पुनः **ऐरावतकरशीकरनिकरेण** ऐरावतस्य–इन्द्रगजस्य, करशीकरनिकरेण–शुण्डादण्डजलकणसमूहेन, **संवर्धितैरिव** सम्यग्वर्धितैरिव, पुनः **धूर्जटिहठाकृष्टशिशुचन्द्रमुक्ताश्रुबिन्दुशङ्काविधायिभिः** धूर्जटिना–शिवेन, हठाकृष्टेन–बलादाकृष्टेन, शिशुचन्द्रेण–बालचन्द्रेण, मुक्ताः–त्यक्ता ये अश्रुबिन्दवस्तच्छङ्काकारिभिः, पुनः **लक्ष्मीस्तनस्वेदलेशैरिव** लक्ष्मीस्तनघर्मोदबिन्दुभिरिव, **लब्धकाठिन्यैः** प्राप्तकाठिन्यैः [ऋ]। पुनः, **अपरैरपि** अन्यैरपि, **महाप्रमाणैः** अधिकप्रमाणैः, **भिन्नजातिभिः** नानाजातीयैः, **मौक्तिकैः** मुक्तामणिभिः, **स्तबकिततलं** सञ्जातः स्तबकः–गुच्छो यस्मिंस्तादृशं, तलम्–अधःस्थलं यस्य तादृशम्, कीदृशैः ? **क्वचित्** कुत्रचित् स्थले, **प्रलयवातविधूतपुष्करावर्तकमेघमुक्तैः** प्रलयवातेन–प्रलयकालिकपवनेन, विधूतः–विक्षिप्तो यो, पुष्करावर्तकः–तत्संज्ञकः, मेघः–जलधरस्तेन, मुक्तैः–पातितैः; पुनः **क्वचित्** कस्मिंश्चित् स्थले, **कुलिशकर्कशहिरण्याक्षवक्षोऽभिघातदलितमहावराहदंष्ट्राङ्कुरोच्छलितैः** कुलिशकर्कशेन–वज्रवत् कठोरेण, हिरण्याक्षस्य–हिरण्यकशिपोः, वक्षसा–उरःस्थलेन, योऽभिघातः–आघातः, तेन दलितात्–विशीर्णात्, महावराहस्य–महाशूकरस्य, दंष्ट्राङ्कुरात्–दन्ताभिनवोद्गमात्, उच्छलितैः–उत्पतितैः, पुनः **क्वचित्** कुत्रापि, **कमठपतिपृष्ठकषणोत्थपावकप्रदीप्तमन्दरनितम्बवेणुस्तम्बनिष्ठ्यूतैः** कमठपतेः–कूर्मराजस्य, पृष्ठकषणेन–पृष्ठसङ्घर्षणेन, उत्थः–उद्भूतो यः पावकः–अग्निः, तेन प्रदीप्तात्–प्रज्वलितात्, मन्दरनितम्बवेणुस्तम्बात्–मन्थाचलमध्यभागस्थितवंशसमूहात्, निष्ठ्यूतैः–निर्गलितैः, पुनः **क्वचित्** क्वापि स्थले, **वेदान्वेषणक्लान्तहरिशकुलगलरन्ध्रोज्झितैः** पयोधिपतितवेदगवेषणाय क्लान्तः–श्रान्तो यो हरिशकुलः–विष्णोरवतारभूतो मत्स्यः, तस्य गलरन्ध्रात्–ग्रीवाविवरात्, उज्झितैः,–पतितैः; पुनः **क्वचित्** कुत्रापि, **प्रौढकेसरिनखरदारितैरावणकुम्भकूटभ्रष्टैः** प्रौढेन–प्रबलेन, केसरिणा–सिंहेन, नखरदारितः–नखभिन्नः, य ऐरावणः–ऐरावतनामकः सागरस्थ इन्द्रगजः, तदीयकुम्भकूटात्–मस्तकशृङ्गात्, भ्रष्टैः–गलितैः, पुनः **क्वचित्** क्वापि, **मधुकैटभरोषितजलशायिशार्ङ्गिनिर्दयापूरितपाञ्चजन्यशङ्खोद्गीर्णैः** मधु-कैटभाभ्यां तदाख्यदैत्याभ्यां, रोषितेन–क्रोधितेन, जलशायिना–समुद्रशायिना, शार्ङ्गिणा–विष्णुना, निर्दयम्–अत्यन्तम्, आपूरितात्–नादितात्, पाञ्चजन्यात्–पञ्चजनाख्यदैत्यविशेषभवात् शङ्खात्, उद्गीर्णैः–उन्मुक्तैः; पुनः **क्वचित्** कुत्रचित् स्थले, **मथनाविष्टबलिहठाकृष्टवासुकिफणापीठगलितैः** मथने–समुद्रालोडने, आविष्टेन–साग्रहेण, बलिना–तदाख्यदैत्यराजेन, हठेन–बलात्, आकृष्टः–कृताकर्षणो यो वासुकिः–तदाख्यसर्पराजः, तस्य फणापीठात्–फणाप्रदेशात्, गलितैः–च्युतैः [ॠ]। **कैलासविशदैः** कैलासाख्यरजतपर्वतवद् धवलैः, **फेनराशिभिः** फेनपुञ्जैः, **आशामुखानि** दिङ्मुखानि, **धवलयन्तं**

वर्ज्यमानैरपि मुखे पयोभिरनुपजाततृप्तेरौर्वदहनस्य दर्शनाज्झटिति निःसृतैरट्टहासच्छेदैरिव कैलासविशदैः फेनराशिभिराशामुखानि धवलयन्तम् [ल], अमृतपङ्कैकशरणजीर्णजलकरिकुलातिवाह्यमाननिरवसानकालकूटविषदाहवेदनमामोदावकृष्टपन्नगदृढाश्लिष्टसुरतरुजटाच्छेदप्ररूढविटपमासन्ननगरायातदैत्यदारिकान्विष्यमाणकौस्तुभसजातीयरत्नोपलशकलमुदश्रुजलदेवतादृश्यमानलक्ष्मीचिरोपभुक्तप्रदेशं त्रिदशनीतशेषकतिपयाप्सरःसंचारसूचितं मथनस्थानमुद्वहन्तम् [ऌ], गृहीतवेलैः सत्कृत्यैरिव वनैः परिवृतममृतस्यन्दिभिर्गुरूपदेशैरिव शशाङ्कपादैराहितोदयं विस्तारितरङ्गैः कुशीलवैरिव नदीपूरैर्नर्त्यमानमुल्लासितवेत्रयष्टिभिः प्रतीहारैरिव मरुद्भिर्दिक्षु संचार्यमाणं [ए] स्वदेहोद्भवेन दुष्पुत्रेणेव वाडवाग्निना शोष्यमाणमूर्मिमालाभिरप्यनासादितपरपारमाशागजैरप्यसोढगर्जोद्गारं खेचरैरप्यवीक्षितशिखाविश्रामं सर्वज्ञेनाप्यविज्ञातसर्वजलचरनामग्रामं तिमिङ्गिल-

---

टिप्पनकम्—**गृहीतवेलैः सत्कृत्यैरिव वनैः** एकत्र वेला—अर्ईलाछेदनम्(?) अन्यत्र पर्यन्तभूमिः। **विस्तारितरङ्गैः कुशीलवैरिव नदीपूरैः** एकत्र विस्तृतकल्लोलैः, अन्यत्र विस्तारितनर्तनस्थानैः, कुशीलवाः—नटाः । **उल्लासितवेत्रयष्टिभिः** एकत्र वेत्रयष्टिः—दण्डः, अन्यत्र जलवंशः [ए] ।

शुभ्रयन्तम्, कीदृशैः ? **और्वदहनस्य** वाडवानलस्य, दर्शनात्, **झटिति** शीघ्रम्, **निःसृतैः** निर्गतैः, **अट्टहासच्छेदैरिव** महाहासखण्डैरिवेत्युत्प्रेक्षा, कीदृशस्य तस्य ? **सर्वतः** सर्वदिक्षु, **प्रसारितायतज्वालाजिह्वस्य** प्रसारिता—विस्तारिता, आयता—दीर्घा, ज्वालारूपा जिह्वा येन तादृशस्य; पुनः मुखे **सततम्** अनवरतम्, **आवर्ज्यमानैरपि** आह्रियमाणैरपि, **पयोभिः** जलैः, **अनुपजाततृप्तेः** अनुत्पन्नपिपासानिवृत्तेः [ल] । पुनः **त्रिदशनीतशेषकतिपयाप्सरःसञ्चारसूचितमथनस्थानं**-त्रिदशैः—देवैः, आनीताभ्यः—गृहीताभ्यः, शेषाः—अवशिष्टा याः कतिपयाः—परिमिताः, अप्सरसः—स्वर्वेश्याः, तासां सञ्चारेण—विहारेण, सूचितं मथनस्थानं—मन्थनस्थलम्, **उद्वहन्तं** धारयन्तम्, कीदृशं तत् ? **अमृतपङ्कैकशरणजीर्णजलकरिकुलातिवाह्यमाननिरवसानकालकूटविषदाहवेदनम्** अमृतपङ्कः—सुधाकर्दम एव, शरणं—स्थानं यस्य तादृशेन, जीर्णेन—जरावस्थेन, जलकरिकुलेन—जलहस्तियूथेन, अतिवाह्यमाना—व्यतीयमाना, सह्यमानेत्यर्थः, कालकूटेन—तद्रूपेण, विषेण—विषविशेषेण, यो दाहः—तापः, तद्वेदना—तद्दुःखं यस्मिंस्तादृशम्; पुनः **आमोदावकृष्टपन्नगदृढाश्लिष्टसुरतरुजटाच्छेदप्ररूढविटपम्** आमोदैः—अतिसौरभैः, अवकृष्टाः—आकृष्टा ये पन्नगाः—सर्पाः, तैः दृढम्—अत्यन्तम्, आश्लिष्टानाम्—आलिङ्गितानाम्, सुरतरुजटानां—समुद्रस्थकल्पवृक्षशिफानां, छेदैः—खण्डैः, प्ररूढः—उद्भिन्नः, विटपः—वृक्षो यस्मिंस्तादृशम्, पुनः **आसन्ननगरायातदैत्यदारिकान्विष्यमाणकौस्तुभसजातीयरत्नोपलशकलम्** आसन्ननगरेभ्यः—निकटनगरेभ्यः, आयाताभिः—आगताभिः, दैत्यदारिकाभिः—दैत्यकन्यकाभिः, अन्विष्यमाणानि—गवेष्यमाणानि, कौस्तुभसजातीयानां—कौस्तुभसमानजातीयानां, रत्नोपलानां—रत्नपाषाणानाम्, शकलानि—खण्डानि यस्मिंस्तादृशम्; पुनः **उदश्रुजलदेवतादृश्यमानलक्ष्मीचिरोपभुक्तप्रदेशम्,** उदश्रुभिः—उद्गतं अश्रु—नेत्रजलं यासां तादृशीभिः, जलदेवताभिः—जलाधिष्ठातृदेवताभिः, दृश्यमानः—दृष्टिगोचरीक्रियमाणः, लक्ष्म्या—लक्ष्मीदेव्या, चिरोपभुक्तः—दीर्घकालोपभुक्तः, प्रदेशो यस्मिंस्तादृशम् [ऌ] । पुनः **वारि** जलम्, **उद्वहन्तं** धारयन्तम्, कीदृशम् ? **सत्कृत्यैरिव** सत्कर्मकैरिव, **गृहीतवेलैः** गृहीता वेला—तटम्, पक्षे कर्मकरणावसरो यैस्तादृशैः, वनैः **परिवृतं** परिवेष्टितं व्याप्तमित्यर्थः; पुनः **गुरूपदेशैरिव** गुरूणां—धर्माचार्याणाम्, अनुशासनैरिव, **अमृतस्यन्दिभिः** सुधास्राविभिः, पक्षे मोक्षविधायिभिः, **शशाङ्कपादैः** चन्द्रमरीचिभिः, **आहितोदयं** जनितविकाशम्; पुनः **कुशीलवैरिव** नाटकीयनायकबन्दिभिरिव, **विस्तारितरङ्गैः** विस्तारिणः—विस्तारवन्तः, तरङ्गा येषां तादृशैः, पक्षे विस्तारितः—स्वकृतकीर्तिगानशब्दैर्व्याप्तः, रङ्गः—नाट्यशाला यैस्तादृशैः, **नदीपूरैः** नदीप्रवाहैः, **नर्त्यमानं** कार्यमाणनर्तनम्; पुनः **प्रतीहारैरिव** द्वारपालैरिव, **उल्लासितवेत्रयष्टिभिः** उल्लासिता—उद्यता, पक्षे उद्वेलिता, वेत्रयष्टिः—वेत्रदण्डो जलवंशो वा यैस्तादृशैः, **मरुद्भिः** पवनैः, **दिक्षु** दिशासु, **सञ्चार्यमाणं** कार्यमाणसञ्चारम् [ए]; पुनः **दुष्पुत्रेणेव** दुष्टसुतेनेव, **स्वदेहोद्भवेन** स्वशरीरजातेन, **वाडवाग्निना** वाडवाख्यसमुद्रस्थाग्निविशेषेण, **शोष्यमाणं** क्रियमाणशोषणम्; पुनः **ऊर्मिमालाभिरपि** तरङ्गपङ्क्तिभिरपि, किमुतान्यैः **अनासादितपरपारम्** अनासादितः परः—उत्तरः, पारो यस्य तादृशम्; पुनः **आशागजैरपि** दिग्गजैरपि, किमुतान्यैः, **असोढगर्जोद्गारम्** असोढः—सहनकर्मता-

गिलैरप्यलङ्घितभीषणावर्तं मैनाकगोत्रगिरिभिरप्यनवगाढकुक्षिगुहागर्तं [ऐ] प्रभवं विषस्य पीयूषस्य च पात्रं जलस्य जातवेदसश्च पदं वृद्धेः क्षयस्य च सदनमसुरारेर्दानवानां च धुर्यं मर्यादावतामदृष्टसीम्नां च कुलमन्दिरं मदिराया द्विजराजस्य च [ओ] निवातकवचयुद्धमिव मुक्ताफलवज्रेन्द्रनीलप्रभासुरदुरालोकं वृत्रमिवोपकण्ठलग्नवज्रानुविद्धफेनच्छटापहृतहृदयासुखं सुराचलमिव स्वर्णदीप्रकटकान्तं स्थिरमपि विसारि चारुकल्लोलमपि

टिप्पनकम्—द्विजराजः-चन्द्रः [ओ] । **निवातकवचयुद्धमिव मुक्ताफलवज्रेन्द्रनीलप्रभासुरदुरालोकं** निवातकवचः-दानवविशेषः, तस्य युद्धमिव प्रेरितनिष्फलकुलिशशक्र-कृष्णतेजोऽसुराभ्यां दुःखदर्शनीयम्, अन्यत्र मौक्तिक-हीरक-मरकतैः प्रभासुर-दुरालोकम्, तेषां वा प्रभा तया सुराणामपि दुःखदृशम् । [**वृत्रमिवोपकण्ठलग्नवज्रानुविद्धफेनच्छटापहृतहृदयासुखं**] **वृत्रमिवोपकण्ठलग्नवज्रानुविद्धफेनच्छटा**···पहृतं लोकमनसामसुखं-दुःखं येन स तथोक्तस्तम् । **सुराचलमिव स्वर्णदीप्रकटकान्तं** एकत्र सुवर्णदीप्यमानप्रस्थपर्यन्तम्, अन्यत्र गङ्गाव्यक्तभर्तारम् । **स्थिरमपि विसारि** यदि स्थिरं कथं प्रसरणशीलम्? अन्यत्र मत्स्यवत् । **चारुकल्लोलमपि कूर्मि** यदि शोभनोर्मि कथं कुत्सितकल्लोलम्? अन्यत्र सकच्छपम् । **तार्क्ष्यवपुरिवाखण्डितं सर्पदशनैः** अहिदन्तैः, अन्यत्र सर्पत्-प्रसरत्, अशनैः-शीघ्रम् । **वसुन्धराया मधुरिपोश्च वासः** एकत्र वासः-वस्त्रम्, अन्यत्र निवासः [औ] ।

मनापादितः, गर्जोद्गारः–गर्जनातिरेको यस्य तादृशम्; पुनः **खेचरैरपि** आकाशगामिभिरपि, किमुतान्यैः **अवीक्षितशिखाविश्रामम्** अवीक्षितः–अदृष्टः, शिखायाः–अग्रभागस्य, विश्रामो–विरामो यस्य तादृशम्; पुनः **सर्वज्ञेनापि** सर्वज्ञात्रापि, **अविज्ञातसर्वजलचरनामग्रामम्** अविज्ञातः–अविदितः, सर्वजलचराणाम्–अशेषजलजन्तूनां, नामग्रामः–नामसमूहो यस्य तादृशम्; पुनः **तिमिङ्गिलगिलैरपि** "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः । तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव!" इत्यन्यत्रोक्तमहामत्स्यैरपि, **अलङ्घितभीषणावर्तम्** अलङ्घितः–न लङ्घितः, भीषणः, आवर्तः–जलभ्रमो यस्य तादृशम्; पुनः **मैनाकगोत्रगिरिभिरपि** स्वोदरस्थमैनाकवंशजपर्वतैरपि, किमुतान्यैः, **अनवगाढकुक्षिगुहागर्तम्** अनवगाढम्–अगाधतयाऽप्रविष्टम्, कुक्षिरूपायाः–उदररूपायाः, गुहायाः–कन्दरायाः, गर्तः–श्वभ्रं यस्य तादृशम् [ऐ]; **च** पुनः, विषस्य, पुनः **पीयूषस्य** अमृतस्य, परस्परविरुद्धयोरपि तयोरित्यर्थः, **प्रभवम्** उत्पत्तिस्थानम्; पुनः जलस्य, **च** पुनः, **जातवेदसः** अग्नेः, परस्परविरोधिनोरपि तयोरित्यर्थः, **पात्रं** स्थानम्, पुनः **वृद्धेः** समृद्धेः, **च** पुनः, तद्विरुद्धस्य **क्षयस्य** ह्रासस्य, **स्थानम्** अधिकरणम्; पुनः **असुरारेः** विष्णोः, **च** पुनः, तद्विरोधिनां **दानवानां** दैत्यानाम्, **सदनं** गृहम्; पुनः **मर्यादावतां** व्यवस्थाशालिनाम्, तद्विरुद्धानाम्, **अदृष्टसीम्नाम्** अदृष्टा–न दृष्टा, सीमा–व्यवस्था, पक्षे अवधिर्येषां तादृशानां वस्तूनां, **धुर्यम्** अग्रेसरम्; पुनः **मदिरायाः** तदाख्यमादकवस्तुनः, **च** पुनः, **द्विजराजस्य** तद्विरुद्धब्राह्मणस्य, पक्षे चन्द्रस्य, **कुलमन्दिरम्** उत्पत्तिगृहम् [ओ]; पुनः **निवातकवचयुद्धमिव** निवातः–निवृत्तो वातः–वायुर्यस्मात् तादृशः, दृढ इत्यर्थः, कवचः–वर्म येषां तादृशानां तन्नामकासुराणां युद्धमिव, **मुक्ताफलवज्रेन्द्रनीलप्रभासुरदुरालोकं** मुक्तं–प्रहितम्, अफलं निष्फलं, वज्रं येन तादृशेन, इन्द्रेण, नीलप्रभैः, असुरैः–राक्षसैश्च, दुरालोकं–दुर्निरीक्ष्यम्, पक्षे मुक्ताफलं–मुक्तामणिः, वज्रं–हीरकमणिः, इन्द्रनीलं नीलमणिः, तैः प्रभासुरम्–अतिभासुरम्, अत एव दुरालोकं–दुःखेन आलोकितुं शक्यम्; पुनः **वृत्रमिव** वृत्रासुरमिव, **उपकण्ठलग्नवज्रानुविद्धफेनच्छटाऽपहृतहृदयासुखम्** उपकण्ठलग्नाभिः–निकटलग्नाभिः, वज्रानुविद्धाभिः–हीरकमणिसम्पृक्ताभिः, फेनच्छटाभिः–जलविकारराशिभिः, अपहृतं–निवारितं, हृदयासुखं–निर्धनताप्रयुक्तदुःखभाजां जनानां हृदयदुःखं येन तादृशम्, पक्षे कण्ठसमीपलग्नाभिः, वज्रेण–अस्त्रविशेषेण, अनुविद्धाभिः–संलग्नाभिः, फेनच्छटाभिः–अब्धिकफराशिभिः, अपहृतं–हृदयासुखं–तत्पीडितजनहृदयदुःखं येन तादृशम्; पुनः **सुराचलमिव** मेरुगिरिमिव, **स्वर्णदीप्रकटकान्तं** स्वर्णद्याः–स्वर्नद्या गङ्गायाः, प्रकटं–प्रकाशमानं, कान्तं–पतिम्, पक्षे स्वर्णेन–सुवर्णेन, दीप्रः–भासुरः, कटकस्य–नितम्बस्य, अन्तः–स्वरूपं चरमावयवो वा यस्य तादृशम्; पुनः **स्थिरमपि** निवृत्तगतिकमपि, **विसारि** विशेषेण गमनशीलमिति विरोधः, तदुद्धारे तु **विसारि** विसाराः–मत्स्याः सन्ति अस्मिन्निति व्याख्येयम्; पुनः **चारुकल्लोलमपि** चारवः–मनोहराः, कल्लोलाः–महातरङ्गा यस्य तादृशमपि, **कूर्मि** कुत्सिताः–ऊर्मयो

कूर्मि ताक्ष्र्यवपुरिवाखण्डितं सर्पदशनैर्वसुंधराया मधुरिपोश्च वास इति विश्रुतमुद्वहन्तं चारि भगवन्तमम्भोनिधिमपश्यम् [औ] ।

तस्य चाविषमविस्तीर्णावकाशे सर्वतो वहत्स्वादुसलिलस्रोतसि चलाचलप्रान्तपरिसरे सन्निविष्टम्, अनतिसन्निकृष्टप्रधानसचिवावासम्, उल्लासितानेकवर्णघनवितानैरुत्पातगगनमिव दिगन्तैः परिगतमशेषतः सामन्तशिविरैः, प्रतिद्वारमुच्छ्रितानेकमकरतोरणम्, अनेककक्षान्तरोपेतम्, इतस्ततः प्रकल्पिताधिकारिकर्मशालं, कुण्डलीकृतशक्रकोदण्डशोभाविडम्बनदक्षाभिः शरीररक्षाधिकारनियुक्तानां वीरपुरुषाणामन्योऽन्यलग्नाभिरनेकवर्णगुणलयनिकाभिस्त्रिः परिक्षिप्तम्, ऊर्ध्वनिखातनिश्चलस्थूणाश्रेणिसंयतया वेणुदण्डिकामय्या महाप्रमाणया वृत्या समन्ततः परिवृतैः श्वेतैश्च शितिभिश्च लोहितैश्च कल्माषैश्च महाकायमण्डपिकामण्डिताजिरैरखण्डबुध्नाण्डकपरिमण्डलाकारैः पटागारैः स्थपुटितावकाशं स्वावासमव्रजम् [अं] ।

टिप्पनकम्—उल्लासितानेकघनवितानैः रुद्धीयैयत(?) [रुद्धपर्यन्त] नानावर्णमेघसंघातैः, अन्यत्रोल्लासितानेकवर्णनिबिडचन्द्रोदयैः [अं] ।

यस्य तादृशमिति विरोधः, तदुद्धारे तु कूर्माः–कच्छपाः सन्ति अस्मिन्निति व्याख्येयम्; पुनः **ताक्ष्र्यवपुरिव** गरुडशरीरमिव, **सर्पदशनैः** सर्पदन्तैः, **अखण्डितम्** अविदारितम्; अन्यत्राखण्डितमपरिच्छिन्नम्, अशनैः–शीघ्रं, सर्पत्–प्रसरत्, पुनः **वसुन्धरायाः** पृथिव्याः, **मधुरिपोः** विष्णोश्च, **वासः** वस्त्रं वासस्थानं च इति विश्रुतम् [औ] ।

च पुनः, **तस्य** समुद्रस्य, **चलाचलप्रान्तपरिसरे** चलाचले–चञ्चले, प्रान्तपरिसरे–निकटकच्छस्थले, **सन्निविष्टं** समवस्थितम्, **स्वावासं** स्वनिवासस्थानम्, **अव्रजम्** अगच्छम् । कीदृशे ? **अविषमविस्तीर्णावकाशे** अविषमः–समभूतः, विस्तीर्णः–दीर्घश्च, अवकाशो–निरावरणस्थानं यस्मिंस्तादृशे, पुनः **सर्वतः** सर्वभागेषु, **वहत्स्वादुसलिलस्रोतसि** वहन्ति–स्यन्दमानानि, स्वादूनां–मधुराणां, सलिलानां–जलानां, स्रोतांसि–प्रवाहा यस्मिंस्तादृशे, कीदृशमावासम् ? **अनतिसन्निकृष्टप्रधानसचिवावासम्** अनतिसन्निकृष्टः–अनत्यन्तसन्निहितः, प्रधानसचिवस्य–मुख्यमन्त्रिणः, आवासो–वासभवनं यस्य तादृशम्; पुनः **दिगन्तैः** दिगग्रैः, **उत्पातगगनमिव** युगान्तकालिकाकाशमण्डलमिव, **सामन्तशिविरैः** क्षुद्रनृपसेनासन्निवेशैः, **अशेषतः** सर्वतः, **परिगतं** परिवृतम्, कीदृशैर्दिगन्तैः सेनासन्निवेशैश्चेत्याह–**उल्लासितानेकवर्णघनवितानैः** उल्लासिताः–उन्नमिताः, अनेकवर्णाः–नानावर्णाः, घनाः–निबिडाश्च, वितानाः–उल्लोचाः चन्द्रातपा येषु तादृशैः, पक्षे उल्लासिता नानावर्णा घनाः–मेघा एव वितानाः, तादृशानां घनानां–मेघानां, वितानाः–विस्तारा वा येषु तादृशैः; पुनः **प्रतिद्वारं** सर्वद्वारेषु, **उच्छ्रितानेकमकरतोरणम्** उच्छ्रिताः–उन्नमिताः, अनेके मकरतोरणाः–नक्रमया बाह्यद्वाराणि यस्मिंस्तादृशम्; पुनः **अनेककक्षान्तरोपेतम्** अनेकैः–बहुभिः, कक्षान्तरैः–अवान्तरभवनावलीभेदैः, उपेतं–युक्तम्; पुनः **इतस्ततः** अत्र तत्र, **प्रकल्पिताधिकारिकर्मशालं** प्रकल्पिताः–निर्मिताः, अधिकारिणां–कार्याधिकृतजनानां, कर्मशालाः–कार्यालया यस्मिंस्तादृशम्; पुनः **शरीररक्षाधिकारनियुक्तानां**–राजकीयशरीररक्षणात्मककार्ये कृतनियोगानाम्, **वीरपुरुषाणां** पराक्रमशालिजनानाम्, **अनेकवर्णगुणलयनिकाभिः** अनेकवर्णाः–नानावर्णा ये गुणाः–तन्तवः, तन्मयीभिः, **लयनिकाभिः** मण्डपिकाभिः, **त्रिः** त्रिवारम्, **परिक्षिप्तं** परिवेष्टितम्, कीदृशीभिः ? **कुण्डलीकृतशक्रकोदण्डशोभाविडम्बनदक्षाभिः** कुण्डलीकृतस्य–वलयाकारितस्य, शक्रकोदण्डस्य–इन्द्रधनुषः, या शोभा तद्विडम्बनदक्षाभिः–तदनुकरणकुशलाभिः, पुनः **अन्योऽन्यलग्नाभिः** परस्परसम्बद्धाभिः; पुनः कीदृशम् ? **पटागारैः** वस्त्रमयगृहैः, **स्थपुटितावकाशं** स्थपुटितः–निम्नोन्नतीकृतः, व्याप्त इति यावत्, अवकाशः–अनावृतप्रदेशो यस्मिंस्तादृशम्, कीदृशैः ? **वृत्या** प्राकारेण, **समन्ततः** सर्वतः, **परिवृतैः** परिवेष्टितैः, कीदृश्या वृत्या ? **ऊर्ध्वनिखातनिश्चलस्थूणाश्रेणिसंयतया** ऊर्ध्वया–उन्नतया, यद्वा ऊर्ध्वं–उपरिभागे, निखातया–भूगर्भविस्थापितमूलया, निश्चलया–स्थिरया, स्थूणाश्रेण्या–स्तम्भपङ्क्त्या, संयतया–नियन्त्रितया, पुनः **वेणुदण्डिकामय्या** वंशयष्टिप्रचुरया, **महाप्रमाणया** अधिकप्रमाणया, अत्युन्नतयेत्यर्थः, पुनः **श्वेतैः** शुभ्रवर्णैः, **च** पुनः, **शितिभिः** कृष्णवर्णैः, **च** पुनः, **लोहितैः** रक्तवर्णैः, **च** पुनः, **कल्माषैः** चित्रवर्णैः, पुनः **महाकायमण्डपिका-**

तत्र चाभिनवपितृवियोगशून्येनापि चेतसा चिन्तयन्नमात्यमण्डलेन सह परमण्डलकृत्यमनुपालयन् गमनसामग्रीव्यग्रमात्मपरिग्रहप्राग्रहरलोकमालोकयन्नानीतानि गत्वा सत्वरैर्द्वारपालैरासन्नवेलाकूलनगरेभ्यो यात्राक्षमाणि यानपात्राणि द्वित्राणि दिनान्यतिष्ठम् [अः]। अनुष्ठितसकलतत्कालकृत्यश्च पुरः प्रतिष्ठासुरन्यतरेद्युरपराह्णसमये समाहूतसकलनिजपरिषद्द्विजातिरुल्लसत्तारतूर्यघोषामुदारवेषयोषिद्वृन्दगीयमानगाम्भीर्यमहिममर्यादादिजलनिधिगुणामाचमनपूतपुरोहितगृहीतकनकार्घपात्रनिक्षिप्तदधिदूर्वाक्षतां स्वयमेवोक्षितैर्भक्ष्यबलिभिर्विलेपनैः पुष्पदामभिरंशुकै रत्नालंकारैश्च बहुविकल्पैरुपकल्पितामनल्पया भक्त्या भगवतो रत्नाकरस्य पूजां प्रातिष्ठिपम् [क]। अतीतभूयिष्ठायां च शर्वर्यामाहते प्रयाणपटहे, रटत्सु राजद्वारि तारध्वनिषु मङ्गलतूर्येषु, सत्वरोत्थितगृहस्थनिर्दयाक्रोशकर्शितनिद्रेषु निःसरत्सु तृणकुटीरकोटरादतिकष्टमुक्तसंस्तरेषु कर्म-

---

मण्डिताजिरैः महाकायाभिः–विस्तृतस्वरूपाभिः, मण्डपिकाभिः–गृहविशेषैः, मण्डितः–अलङ्कृतः, अजिरः–प्राङ्गणभूमिर्येषां तादृशैः, पुनः **अखण्डबुध्नाण्डकपरिमण्डलाकारैः** अखण्डं–सम्पूर्णं यत् बुध्नं–घटमूलभागः, अण्डकं–ह्रस्वं पक्ष्याद्यण्डं च, तयोरिव परिमण्डलः–वर्तुलः, आकारः–स्वरूपं येषां तादृशैः [अं]।

च पुनः, **तत्र** तस्मिन्नावासे, **अभिनवपितृवियोगशून्येनापि** अभिनवेन–नवीनेन, पितृवियोगेन–पितृविरहेण हेतुना, शून्येनापि–लुप्तसंज्ञेनापि, **चेतसा** चित्तेन, **अमात्यमण्डलेन** मन्त्रिमण्डलेन सह, **परमण्डलकृत्यं** रिपुमण्डलकार्यम्, **चिन्तयन्** विचारयन्; पुनः **गमनसामग्रीव्यग्रं** गमनोपकरणजातसंघटनव्याकुलम्, **आत्मपरिग्रहप्राग्रहरलोकं** स्वपरिवारप्रधानजनम्, **अनुपालयन्** परिरक्षन्; **सत्वरैः** त्वरा–शैघ्र्यं, तत्सहितैः, **द्वारपालैः** प्रतीहारैः, गत्वा, **आसन्नवेलाकूलनगरेभ्यः** आसन्नेभ्यः–सन्निहितेभ्यः, वेलाकूले–तटप्रान्ते, यानि नगराणि तेभ्यः, **आनीतानि** आगमितानि, **यात्राक्षमाणि** प्रयाणसहानि, **यानपात्राणि** जलयानानि, **आलोकयन्** पश्यन्; **द्वित्राणि** द्वे वा त्रीणि वा दिनानि, **अतिष्ठम्** स्थितवान् [अः]।

च पुनः, **अनुष्ठितसकलतत्कालकृत्यः** कृताशेषतात्कालिकक्रियः, **पुरः** अग्रे, **प्रतिष्ठासुः** प्रयातुकामः, **अन्यतरेद्युः** अन्यतरस्मिन् दिने, **अपराह्णसमये** मध्याह्नसमये, **समाहूतसकलनिजपरिषद्द्विजातिः** समाहूताः–सम्यगाहूताः, सकलाः–सर्वे, परिषद्द्विजातयः–सभासदो विप्रा यैस्तादृशः सन्, **अनल्पया** प्रचुरया, **भक्त्या** प्रीत्या, **भगवतः** ऐश्वर्यशालिनः, **रत्नाकरस्य** समुद्रस्य, पूजां **प्रातिष्ठिपं** प्रतिष्ठापितवान् कृतवान् अस्मि, कीदृशीम् ? **उल्लसत्तारतूर्यघोषाम्** उल्लसन्–उच्चरन्, तारः–तीव्रः, तूर्यस्य–वाद्यविशेषस्य, घोषः–ध्वनिर्यस्यां तादृशीम्, पुनः **उदारवेषयोषिद्वृन्दगीयमानगाम्भीर्यमहिममर्यादादिजलनिधिगुणाम्** उदारः–उज्ज्वलः, वेषः–कृत्रिममण्डनं यासां तादृशीनाम्, योषितां–वधूनां, वृन्देन–गणेन, गीयमाना–गानद्वारा वर्ण्यमाना, गाम्भीर्यम्–अगाधता, महिमा–महत्त्वम्, अतिसुदूरविस्तृतत्वम्, मर्यादा–स्थित्यनतिक्रमः, तदादयः–तत्प्रभृतयो, जलनिधिगुणाः–समुद्रसम्बन्धिगुणा यस्यां तादृशीम्, पुनः **आचमनपूतपुरोहितगृहीतकनकार्घपात्रनिक्षिप्तदधिदूर्वाक्षताम्** आचमनेन–जलस्य किञ्चित्पानेन, पूतः–शुद्धहृदयो यः पुरोहितः–पुरोधाः, तेन गृहीतानि–धृतानि, कनकार्घपात्रनिक्षिप्तानि–सुवर्णमयार्घपात्रनिहितानि, दधि, दूर्वा–तृणविशेषः, अक्षतम्–आर्द्रतण्डुलाश्च यस्यां तादृशीम्, पुनः **स्वयमेव** स्वेनैव, **उक्षितैः** पवित्रतापादनार्थं जलेन सिक्तैः, **स्वयमवेक्षितैरिति** पाठे च–आत्मनैव साध्वसाधुनिर्णयार्थमवलोकितैरित्यर्थः, **भक्ष्यबलिभिः** भक्षणीयैः पूजोपहारैः, नैवेद्यद्रव्यैरित्यर्थः, **विलेपनैः** चन्दनकेसरादिसुगन्धिद्रवैः, **पुष्पदामभिः** पुष्पमाल्यैः, **अंशुकैः** वस्त्रैः, **च** पुनः, **बहुविकल्पैः** बहुप्रकारैः, **रत्नालङ्कारैः** रत्नमयाभरणैः, **उपकल्पिताम्** उपपादिताम् [क]। **च** पुनः, **अतीतभूयिष्ठायाम्** अतिक्रान्तबहुतरभागायां, **शर्वर्यां** रात्रौ, **तल्पं** शय्यां, **विमुच्य** विसृज्य, **अल्पपदातिपरिवृतः** कतिपयपादगामिभटपरिवेष्टितः सन्, **बाह्यास्थानमण्डपं** बाह्यसभामण्डपम्, **अगच्छं** गतवानहम्; कस्मिन् कीदृशे ? **प्रयाणपटहे** प्रस्थानसूचकवाद्यविशेषे, **आहते** ताडिते सति; पुनः **राजद्वारि** राजद्वारे, **तारध्वनिषु** तीव्रनादेषु, **मङ्गलतूर्येषु** मङ्गलार्थवाद्यविशेषेषु, **रटत्सु** ध्वनत्सु; पुनः **कर्मकरेषु** भृत्येषु, **तृणकुटीरकोटरात्** तृणरचितह्रस्वकुटीररन्ध्रात्, **निःसरत्सु** निर्गच्छत्सु, कीदृशेषु

करेषु, पुरोनिविष्टरन्धनदक्षदासीसंधुक्षितानलासु ज्वलन्तीषु सर्वतः क्कथनवाचालस्थालीपरम्परापरिकरितचूलासु प्राङ्गणचुल्लीषु [ख], समकालशिथिलितरोमन्थलीलं सहेलमुत्थाय चरति सति पुञ्जितमग्रतः प्रयत्नसंगृहीतं यवसमन्योऽन्यतुण्डताडनरणद्विषाणे विषाणिवृन्दे, प्रयतमनुष्यनिश्चलधृतोर्ध्वदण्डिकासु क्रमसमुत्पाट्यमानकीलपरिपाटिविषमसंकुचद्विस्तारासु चरममुक्ततनिकाचतुष्टयच्युतावष्टम्भासु तिर्यक् पर्यस्यमानासु पटकुटीषु [ग], मुकुलितपटमण्डपे पिण्डीकृतकाण्डपटकप्रकटसामन्तान्तःपुरे दुष्टवाहनारोप्यमाणभयचटुलचेटीलोकबिब्बोकाकृष्टविटचेतसि सहेलचलितसेनापतिसैन्यकोलाहलजनितजनकुतूहले संहृतपण्यविपणिवीथीवृथाभ्रमद्गृहीतमूल्य-

---

टिप्पनकम्—**पर्यस्यमानासु** पात्यमानासु [ग]। मुकुलितं-संकोचितम्, काण्डपटकः-जवनिका, बिब्बोकः-विलासः, कीकटः-दरिद्रः, निघसः-नीरणम्, [घ]।

केषु? **सत्वरोत्थितगृहस्थनिर्दयाक्रोशकर्शितनिद्रेषु** सत्वरं-शीघ्रम्, उत्थितानां-जागृतानां, गृहस्थानां-गृहवर्तिजनानां निर्दयाक्रोशेन-निष्ठुरकोलाहलेन तीव्राह्वानेन वा, कर्शिता-क्षपिता, निद्रा येषां तादृशेषु, पुनः **अतिकष्टमुक्तसंस्तरेषु** अतिकष्टेन-अत्यन्तक्लेशेन, मुक्तः-त्यक्तः, संस्तरः-शय्या यैस्तादृशेषु; पुनः **प्राङ्गणचुल्लीषु** प्राङ्गणस्थिताधिश्रयणीषु, **ज्वलन्तीषु** दीप्यमानासु, कीदृशीषु? **पुरोनिविष्टरन्धनदक्षदासीसन्धुक्षितानलासु** पुरः-अग्रे, निविष्टया-उपविष्टया, रन्धनदक्षया-पाककुशलया, दास्या-कर्मकर्या, सन्धुक्षितः-प्रज्वलितः, अनलः-अग्निर्यासु तादृशीषु, पुनः **सर्वतः** सर्वभागेषु, **क्कथनवाचालस्थालीपरम्परापरिकरितचूलासु** क्कथनेन-अतिपाकेन, वाचालाभिः-शब्दायमानाभिः, स्थालीपरम्पराभिः-पाकभाण्डपङ्क्तिभिः, परिकरिता-व्याप्ता, चूला-ऊर्ध्वभागो यासां तादृशीषु [ख]; पुनः **विषाणिवृन्दे** पशुसमूहे, **अग्रतः** अग्रे, **पुञ्जितं** राशीकृतं, **प्रयत्नसंगृहीतं** प्रयाससञ्चितं, **यवसं** घासं, **सहेलं** सकौतुकं यथा स्यात् तथा, उत्थाय, **चरति** खादति सति, कीदृशे? **समकालशिथिलितरोमन्थलीले** समकालम्-एककालं, शिथिलिता-शिथिलीकृता, रोमन्थस्य-चर्वितस्याकृष्य पुनश्चर्वणस्य, लीला-क्रीडा येन तादृशे, पुनः **अन्योऽन्यतुण्डताडनरणद्विषाणे** अन्योऽन्यतुण्डताडनेन-परस्परमुखकृताभिघातेन, रणन्ति-शब्दायमानानि, विषाणानि यस्य तादृशे; पुनः **पटकुटीषु** वस्त्रमयगृहेषु, **तिर्यक्** कुटिलं यथा स्यात् तथा, **पर्यस्यमानासु** पात्यमानासु, उपसंह्रियमाणास्वित्यर्थः, सतीषु, कीदृशीषु? **प्रयतमनुष्यनिश्चलधृतोर्ध्वदण्डिकासु** प्रयतेन-प्रयत्नवता, समाहितमनस्केनेत्यर्थः, मनुष्येण, निश्चलं-दृढं यथा स्यात् तथा, धृता-गृहीता, ऊर्ध्वदण्डिका-ऊर्ध्वयष्टिर्यासां तादृशीषु, पुनः **क्रमसमुत्पाट्यमानकीलपरिपाटिविषमसंकुचद्विस्तारासु** क्रमेण-पर्यायेण, समुत्पाट्यमानाभिः-समुद्ध्रियमाणाभिः, कीलपरिपाटिभिः-शङ्कुश्रेणिभिः, विषमम्-असमं यथा स्यात् तथा, संकुचन्-संकोचमासादयन्, विस्तारो-दैर्घ्यं यासां तादृशीषु, पुनः **चरममुक्ततनिकाचतुष्टयच्युतावष्टम्भासु** चरममुक्तेन-सर्वतः पश्चाद्विश्लेषितेन, तन्यते-विस्तार्यते पटमण्डपो यया सा तनिका-कोणचतुष्टयावलम्बिनी रज्जुः, तच्चतुष्टयेन च्युतः-स्खलितः, निवृत्त इत्यर्थः, अवष्टम्भः-अवलम्बनं यासां तादृशीषु [ग]; पुनः **उर्वीगन्धर्वनगरे** शून्याधिष्ठान-पुराकार-नीलपीतादिमेघरचनाविशेषो गन्धर्वनगरम्, उर्व्यां-पृथिव्यां, न तु गगने, यद् गन्धर्वनगरं तद् उर्वीगन्धर्वनगरं तस्मिंस्तथा, पृथिवीगतगन्धर्वनगरसदृशे इत्यर्थः, **स्कन्धावारे** सैन्यसन्निवेशे, सैन्यनगरे इत्यर्थः, **अनुवेलं** प्रतिक्षणम्, **विरलतां** अल्पताम्, **व्रजति** प्राप्नुवति सति, कीदृशे स्कन्धावारे? **मुकुलितपटमण्डपे** मुकुलिताः-संकुचिताः, पटमण्डपाः-वस्त्रनिर्मितानि जनविश्रामस्थानानि यस्मिंस्तादृशे, पुनः **पिण्डीकृतकाण्डपटकप्रकटसामन्तान्तःपुरे** पिण्डीकृताः-सर्वतो वेष्टनेन पिण्डाकारं प्रापिता ये काण्डपटकाः-येषां संकोचनेन काण्डाकारो भवति तादृशाः पटविशेषाः, जवनिका इत्यर्थः, तैः प्रकटं-प्रकटतां गतम्, सामन्तानाम्-आज्ञावर्तिक्षुद्रनृपाणाम्, अन्तःपुरं-वनितावृन्दं यस्मिंस्तादृशे, पुनः **दुष्टवाहनारोप्यमाणभयचटुलचेटीलोकबिब्बोकाकृष्टविटचेतसि** दुष्टवाहने-अश्वतरादौ दुष्टाश्वादौ वा आरोप्यमाणानाम्-आरोह्यमाणानां, भयचटुलानां-भयसम्भ्रान्तानां, चेटीलोकानां-भृत्याजनानां, बिब्बोकेन-विलासेन, आकृष्टं-वशीकृतं, विटानां-जारपुरुषाणां, चेतः-हृदयं यस्मिंस्तादृशे, पुनः **सहेलचलितसेनापतिसैन्यकोलाहलजनितजनकुतूहले** सहेलं-सलीलं यथा स्यात् तथा, चलितानां-प्रस्थितानां, सेनापतिसैन्यानां, कोलाहलेन-कलकलेन, जनितम्-उत्पा-

क्रयिकलोके निकटग्रामवासिकीकटकुटुम्बसंगृह्यमाणनिघसयवसेन्धने प्रयत्ननिर्णीयमानपरिकरशून्यसैनिकावासे सर्वतो विचरदनिवारितचमूचरे व्रजति विरलतामनुवेलमुर्वीगन्धर्वनगरे स्कन्धावारे [घ], क्रमेण चोद्गते दिवसकृति कृताभिमतदेवतार्चनविधिषु भोजितभुजिष्यकर्मकरलोकेषु संवृतप्रकीर्णसर्वोपस्करेषु विनीतयुग्याधिरोपितकृतसमायोगपुरन्ध्रिवर्गेष्वागन्तुकपिपासाप्रतिक्रियोद्युक्तभुक्तपरिजनपुनरुक्तोपपादितरेच्यमानचटसोदकेषु चलितवृषयूथमार्गानुलग्ननिष्ठुरजरन्महिषपृष्ठकण्ठालावलम्बितकुतुपकाष्ठपात्रीशूर्पलोहकर्परेषु समन्ततो निपुणनिरूपितावासभूमिषु सदुःखमुक्तोपभुक्तसदनासन्नसान्द्रद्रुमलतागुल्मेषु सागरावतारदेशमुद्दिश्य चलितेषु सर्वतः सैनिकेषु विमुच्य तल्पमल्पपदातिपरिवृतो बाह्यास्थानमण्डपमगच्छम् [ङ] ।

टिप्पनकम्—भुजिष्यः-दासः, युग्यं-वाहनम्, रेच्यमानं-रिक्तीक्रियमाणम्, कुतुपः-लघुकुतुकः [ङ] ।

दितं, जनानां कुतूहलं-कौतुकं यस्मिंस्तादृशे, पुनः **संहृतपण्यविपणिवीथीवृथाभ्रमद्गृहीतमूल्यक्रयिकलोके** संहृतानि-आकुञ्चितानि, पण्यानि-क्रेतव्यवस्तूनि यस्यां तादृश्यां विपणिवीथ्याम्-आपणपङ्क्त्याम्, वृथा-निष्प्रयोजनं, भ्रमन्तः-पर्यटन्तः, गृहीतमूल्याः-धृतमूल्याः, क्रयिकलोकाः-क्रेतारो जना यस्मिंस्तादृशे, पुनः **निकटग्रामवासिकीकटकुटुम्बसंगृह्यमाणनिघसयवसेन्धने** निकटग्रामवासिना, कीकटकुटुम्बेन-अनार्यजातीयेन दरिद्रेण वा परिजनेन, संगृह्यमाणानि-सञ्चीयमानानि, निघसः-भोजनं, त्यक्तभोजनीयवस्तुजातमित्यर्थः, यवसं-घासः, इन्धनं-काष्ठं यस्मिंस्तादृशे, पुनः **प्रयत्ननिर्णीयमानपरिकरशून्यसैनिकावासे** प्रयत्नेन-प्रकृष्टयत्नेन, निर्णीयमानः-निश्चयेन ज्ञायमानः, परिकरैः-सैनिकशरीरोपकरणवस्तुभिः, शून्यः-रिक्तः, सैनिकावासः-सैनिकस्थानं यस्मिंस्तादृशे, पुनः **सर्वतः** सर्वत्र, **विचरदनिवारितचमूचरे** विचरन्तः-भ्रमन्तः, अनिवारिताः-अनियन्त्रिताः, चमूचराः-सेनाचरा यस्मिंस्तादृशे; [घ] । **च** पुनः, **दिवसकृति** दिनकरे, सूर्य इत्यर्थः, **क्रमेण** शनैः, **उद्गते** उदिते सति, **सागरावतारदेशं** समुद्रप्रवेशस्थलम्, **उद्दिश्य** लक्ष्यीकृत्य, **सैनिकेषु** सैन्येषु, **सर्वतः** सर्वदिक्षु, **चलितेषु** प्रस्थितेषु सत्सु, कीदृशेषु? **कृताभिमतदेवतार्चनविधिषु** सम्पादितेष्टदेवतापूजनकार्येषु, पुनः **भोजितभुजिष्यकर्मकरलोकेषु** भोजिताः-भोजनं कारिताः, भुजिष्याः-दासाः, कर्मकराः-भृतकाश्च, वेतनोपजीविनश्चेत्यर्थः, लोकाः-जना यैस्तादृशेषु, पुनः **संवृतप्रकीर्णसर्वोपस्करेषु** संवृताः-उपसंहृताः, प्रकीर्णाः-प्रसारिताः, सर्वे उपस्कराः-व्यञ्जनादिसंस्कारकद्रव्याणि यैस्तादृशेषु, पुनः **विनीतयुग्याधिरोपितकृतसमायोगपुरन्ध्रिवर्गेषु** विनीतयुग्ये-अनुद्धतवाहने, अधिरोपितः-आरोहितः, कृतसमायोगः-विहितपरस्परसंयोगः, पुरन्ध्रीणां-पुत्रवतीनां पतिवत्नीनां, वर्गः-समूहो यैस्तादृशेषु, पुनः **आगन्तुकपिपासाप्रतिक्रियोद्युक्तभुक्तपरिजनपुनरुक्तोपपादितरेच्यमानचटसोदकेषु** आगन्तुकायाः-आगमनशीलायाः, पिपासायाः प्रतिक्रियायै-निवर्तनायै, उद्युक्तेभ्यः-उद्यतेभ्यः, भुक्तपरिजनेभ्यः-कृतभोजनेभ्यः स्वजनेभ्यः, पुनरुक्तोपपादितेन-अनेकशः सम्यक्प्रतिपादनेन, रेच्यमानं-रिक्तीक्रियमाणम्, चटसोदकं-चर्मपुटजलं यैस्तादृशेषु, पुनः **चलितवृषयूथमार्गानुलग्ननिष्ठुरजरन्महिषपृष्ठकण्ठालावलम्बितकुतुप-काष्ठपात्री-शूर्प-लोहकर्परेषु** चलितस्य-प्रस्थितस्य, वृषयूथस्य-बलीवर्दगणस्य, मार्गे, अनुलग्नाः-पश्चाल्लग्ना ये, निष्ठुराः-कठोरा दृढाङ्गा इति यावत्, जरन्तो-वृद्धाः, महिषाः, तेषां पृष्ठे पृष्ठोपरिभागे ये कण्ठालाः-गोणीभेदा जालभेदा वा, तत्र अवलम्बिताः-आलम्बिताः, कुतुपाः-ह्रस्वघृततैलादिपात्राणि, काष्ठपात्र्यः-काष्ठमयभाजनानि, शूर्पाः-प्रस्फोटनानि, लोहकर्पराः-लोहमयकटाहा यैस्तादृशेषु, पुनः **समन्ततः** सर्वतः, **निपुणनिरूपितावासभूमिषु** निपुणं-सम्यक्, निरूपिता-गवेषिता, आवासभूमिः-आवासस्थली यैस्तादृशेषु, पुनः **सदुःखमुक्तोपभुक्तसदनासन्नसान्द्रद्रुमलतागुल्मेषु** सदुःखं-दुःखसहितं यथा स्यात् तथा, मुक्ताः-त्यक्ताः, उपभुक्तसदनासन्नाः-अध्युषितगृहसन्निहिताः, सान्द्राः-निबिडाः, द्रुमाः-वृक्षाः, लतागुल्माः-लतावेष्टितस्कन्धरहितवृक्षाश्च यैस्तादृशेषु [ङ]।

तत्र चापनीतपर्यन्तपरिकरे संवृतोत्कृष्टविष्टरतया यथाकथञ्चिदासीनराजलोके ढौकितेऽध्वयोग्यगजवशावाजिनि निविश्य कृतसमुद्रावतारमार्गावलोकनः प्रत्यूषस्येव पौतिकानां कृताकृतज्ञानाय प्रेषितेन वेत्रिणा सार्धमापतन्तम् [च], असितोत्पलदलश्यामावदातवर्णमर्णवेनेव पूजाप्रीतेन प्रहितमवगाहनार्थमभिनवं वेलावनप्रियङ्गुपादपम्, अचिरमज्जनविशेषस्निग्धसुकुमारवपुषम्, अल्पमालतीपुष्परचितशेखरम्, उल्लिखितशङ्खावदातद्युतिनी तनीयसी नवे दुकूलवाससी वसानम्, अनवसानताम्बूलोपयोगपोषितस्वभावपाटलाधरपुटच्छविम् [छ], इन्दुलाञ्छनच्छायापहारपटुना शरीरप्रभापटलेन जलनिधिजलेनेव सातिरेकलावण्यलाभतृष्णया संनिधावनुज्झितावस्थानं, प्रस्थानकालकल्पितामनल्पविस्तारे वदनलावण्यपयसि निपततां कटकलोकलोचनानामवलम्बनाय नावमिव संगृहीतां चन्दनपङ्कलेखिकामधिललाटतटमादर्शयन्तम् [ज], अभ्यर्णापतत्कर्णधारव्यापारणेषु सविलासमुत्सर्पतो लोचनयुगलस्य क्षौमपाण्डुभिः प्रभानिर्गमैरधिकशोभा-

---

च पुनः, **अपनीतपर्यन्तपरिकरे** अपनीतः–त्यक्तः, पर्यन्तः–पार्श्ववर्ती, परिकरः–परिवारो यस्मिंस्तादृशे, **तत्र** बाह्यसभामण्डपे, यद्वा 'अपनीतपर्यन्तपरिकरे' इत्यनुपदवक्ष्यमाणसप्तम्यन्तपदेनान्वेति । **संवृतोत्कृष्टविष्टरतया** संवृतः–कृतगोपनः, उत्कृष्टः–सुन्दरः, विष्टरः–आसनं यस्य तादृशतया, **यथाकथञ्चिदासीनराजलोके** यथाकथञ्चिदुपविशन्नृपजने, **ढौकिते** प्राप्ते, **अध्वयोग्यगजवशावाजिनि** अध्वयोग्यः–मार्गयोग्यः, यो गजः, वशा–हस्तिनी, वाजी–अश्वः, तत्समाहारे, **निविश्य** उपविश्य, **कृतसमुद्रावतारमार्गावलोकनः** कृतं समुद्रावतारमार्गस्य–समुद्रप्रवेशमार्गस्य, अवलोकनं–दर्शनं निरूपणमित्यर्थः, येन तादृशः सन्, **पञ्चविंशतिवर्षदेशीयं** पञ्चविंशतिवर्षवयस्ककल्पम्, **नाविकयुवानं** नावा चरतीति नाविकः–कर्णधारः, तादृशं **युवानं** यौवनावस्थं जनम्, **अद्राक्षीत्** दृष्टवान्, कीदृशम्? **प्रत्यूषस्येव** प्रभात एव, **पौतिकानां** जलयानवाहकानाम्, **कृताकृतज्ञानाय** कृतमकृतं च यत् कार्यं तन्निरूपणाय, **प्रेषितेन** प्रहितेन, **वेत्रिणा** दण्डधारिणा, **सार्धं** साकम्, **आपतन्तम्** आगच्छन्तम् [च]; पुनः **असितोत्पलदलश्यामावदातवर्णम्** असितं–कृष्णवर्णं, यदुत्पलं–कमलं, तदीयदलस्येव–तदीयपत्रस्येव, श्यामः, अवदातः–विशुद्धश्च, वर्णो–रूपं यस्य तादृशम्, अत एव **पूजाप्रीतेन** अर्चनाप्रसन्नेन, **अर्णवेन** समुद्रेण, **अवगाहनार्थं** प्रवेशार्थं, प्रहितं–प्रेषितम्, **अभिनवं** नवीनं, **वेलावनप्रियङ्गुपादपमिव** तटवर्तिवनसम्बन्धिप्रियङ्गुसंज्ञकश्यामवर्णवृक्षविशेषमिवेत्युत्प्रेक्षा; पुनः **अचिरमज्जनविशेषस्निग्धसुकुमारवपुषम्** अचिरमज्जनेन–किञ्चित्पूर्वकालकृतस्नानेन, विशेषस्निग्धम्–अत्यन्तश्लक्ष्णं, सुकुमारं–कोमलं च, वपुः–शरीरं यस्य तादृशम्; पुनः **अल्पमालतीपुष्परचितशेखरम्** अल्पैः–कतिपयैः, **मालतीपुष्पैः** मालत्याख्यपुष्पैः, रचितं शेखरं–शिरोमाल्यं येन तादृशम्; पुनः **दुकूलवाससी** उत्तराधरपट्टवस्त्रे, **वसानम्** परिदधानम्, कीदृशे? **उल्लिखितशङ्खावदातद्युतिनी** उल्लिखितः–उद्घृष्टः, यः शङ्खः, तस्येव अवदाता–शुभ्रा, द्युतिः–कान्तिर्ययोस्तादृशे, पुनः **तनीयसी** अतिसूक्ष्मे, पुनः **नवे** नवीने; पुनः कीदृशम्? **अनवसानताम्बूलोपयोगपोषितस्वभावपाटलाधरपुटच्छविम्** अनवसानेन–अविरतेन, ताम्बूलोपयोगेन–ताम्बूलभक्षणेन, पोषिता–पुष्टिमापादिता, स्वभावपाटला–स्वभावतः श्वेतरक्ता, अधरपुटच्छविः–ओष्ठपुटयोः कान्तिर्यस्य तादृशम् [छ]; पुनः **इन्दुलाञ्छनच्छायापहारपटुना** इन्दोः–चन्द्रस्य, यत् लाञ्छनं–कलङ्कः, तस्य या छाया–कान्तिः, तदपहारपटुना–तदपहरणनिपुणेन, शरीरप्रभापटलेन–शरीरकान्तिकलापेन, **सन्निधौ** निकटे, **अनुज्झितावस्थानम्** अनुज्झितम्–अत्यक्तम्, अवस्थानम्–अवस्थितिर्यस्मिंस्तादृशम्, कया केनेव? **सातिरेकलावण्यलाभतृष्णया** अधिकसौन्दर्यलिप्सया, **जलनिधिजलेनेव** समुद्रजलेनेवेत्युत्प्रेक्षा; पुनः **अधिललाटतटं** भालतलप्रान्ते, **चन्दनपङ्कलेखिकां** चन्दनद्रवलेखाम्, **आदर्शयन्तं** प्रदर्शयन्तम्, कीदृशीम्? **प्रस्थानकालकल्पितां** प्रयाणसमयरचिताम्, कामिव? **अनल्पविस्तारे** अत्यन्तविस्तृते, **वदनलावण्यपयसि** मुखसौन्दर्यसलिले, **निपततां** निमज्जतां, **कटकलोकलोचनानां** सैनिकजननेत्राणाम्, **अवलम्बनाय** आश्रयणाय, संगृहीतां–सङ्घटितां, **नावमिव** नौकामिवेत्युत्प्रेक्षा [ज]; पुनः **अभ्यर्णापतत्कर्णधारव्यापारणेषु** अभ्यर्णे–निकटे, आपततः–आगच्छतः, कर्णधारस्य–नाविकस्य, व्यापारणेषु–प्रेरणेषु, **सविलासं** विलासपूर्वकम्, **उपसर्पतः** उद्वेलतः, **लोचनयुगलस्य** नेत्र-

धानाय यानपात्राणां सितपटानिव नवानासूत्रयन्तम्, आसक्तकर्णाभरणपद्मरागरागामसुक्तोद्भेदकालकपिलिमानमिव कोमलाविरलनीलकेशकुण्डलिकालङ्कृतां श्मश्रुराजिमुद्वहन्तम् [झ], आमलकीफलस्थूलमुक्ताफलभृता सर्वतः प्रसृतकिरणविसरेण मुक्तासरेण तीरजलगाधतावलोकनसमयलग्नेन जलधिफेनस्तबकवलयेनेव कृतकण्ठपरिवेषम् [ञ], आसक्तमुक्तासरस्फारमहसा हसन्तमिव वेलानदीपुलिनपरिणाहमतिपृथुलेन वक्षःस्थलेन, ग्रस्तसागरागस्त्यजठरस्य ख्यातिदुःखेनेव क्षीणकुक्षिम् [ट], आजानुलम्बमांसलबाहुम्, अतिनिष्ठुरकरप्रकोष्ठनिहितैकैकहाटककटकम्, उभयतः प्रसर्पता सलीलदोलायमानकरतलोपनीतेन प्रकोष्ठकटकेन्द्रनीलकिरणरागेण नीलीरसेनेव भाविसंततप्रयाणसुलभमालिन्यलोपनाय लिपन्तमघनमधिजघनं श्वेतचीनांशुकम् [ठ], अच्छलावण्यलिप्तदिग्मुखेन प्रेङ्खता सललितं पदक्षेपेषु स्थूलपरिमण्डलेनोरुदण्डयुगलेन चण्डपवनप्रेरणादुभयतः प्रच-

---

द्वयस्य, **क्षौमपाण्डुभिः** पट्टवस्त्रवत्पीतसम्बलितशुक्लवर्णैः, **प्रभानिर्गमैः** कान्तिनिस्सरणैः, निस्सृतकान्तिभिरित्यर्थः, **यानपात्राणां** पोतानाम्, **अधिकशोभाधानाय** अत्यन्तशोभोत्पादनाय, **नवान्** नवीनान्, **सितपटान्** श्वेतवस्त्राणि, **आसूत्रयन्तमिव** समन्ततः सीव्यन्तमिवेत्युत्प्रेक्षा; पुनः **श्मश्रुराजिं** चिबुकरोमावलीम्, **उद्वहन्तं** धारयन्तम्, कीदृशीम्? **आसक्तकर्णाभरणपद्मरागरागाम्** आसक्तः–संलग्नः, प्रतिबिम्बित इत्यर्थः, कर्णाभरणपद्मरागस्य–कर्णालङ्करणभूतरक्तमणेः, रागः–रक्तवर्णो यस्यां तादृशीम्, अत एव **अमुक्तोद्भेदकालकपिलिमानमिव** अमुक्तः–अत्यक्तः, उद्भेदकाले–श्मश्रूद्गमकालिकः, कपिलिमा–पिशङ्गिमा यया तादृशीमिवेत्युत्प्रेक्षा, पुनः **कोमलाविरलनीरकेशकुण्डलिकालङ्कृतां** कोमला अविरलाः–सान्द्राश्च ये केशाः, तद्रूपाभिः कुण्डलिकाभिः–कुण्डलैः, कुण्डलाकारलम्बितकुटिलकेशैरित्यर्थः, **अलङ्कृतां** शोभिताम् [झ]; पुनः **मुक्तासरेण** मौक्तिकहारेण, **कृतकण्ठपरिवेषं** कृतः कण्ठस्य परिवेषः–परिवेष्टनं यस्य तादृशम्, कीदृशेन? **आमलकीफलस्थूलमुक्ताफलभृता** आमलकीफलवत्–धात्रीफलवत्, स्थूलानि यानि मुक्ताफलानि–मुक्तामणयः, तेषां धारयित्रा, पुनः **सर्वतः** सर्वदिक्षु, **प्रसृतकिरणविसरेण** प्रसृतकान्तिकलापेन, कीदृशेन केनेव? **तीरजलगाधतावलोकनसमयलग्नेन** तीरस्थानां जलानां गाधतायाः–अनतिगम्भीरतायाः, अवलोकनसमये–दर्शनवेलायाम्, लग्नेन–सम्पृक्तेन, **जलधिफेनस्तबकवलयेनेव** समुद्रफेनगुच्छमण्डलेनेवेत्युत्प्रेक्षा [ञ]; पुनः **वक्षःस्थलेन** उरःप्रदेशेन, **वेलानदीपुलिनपरिणाहं** तटवर्तिनदीसैकतदीर्घताम्, **आहसन्तमिव** तिरस्कुर्वन्तमिवेत्युत्प्रेक्षा, कीदृशेन? **आसक्तमुक्तासरस्फारमहसा** आसक्तं–संलग्नं, मुक्तासरस्य–मुक्ताहारस्य, स्फारं–विस्तृतं, महः–तेजो यत्र तादृशेन, पुनः **अतिपृथुलेन** अत्यन्तस्थूलेन; पुनः **ग्रस्तसागरागस्त्यजठरख्यातिदुःखेनेव** ग्रस्तः–पीतः, सागरः–समुद्रो येन तादृशस्य, अगस्त्यस्य–अगस्त्यमुनेः, जठरस्य–उदरस्य, ख्यात्या–प्रसिद्ध्या यद् दुःखं तेनेव, **क्षीणकुक्षिं** कृशोदरम् [ट]; पुनः **आजानुलम्बमांसलबाहुम्** आजानु–ऊरुपूर्वपर्यन्तम्, लम्बौ–आयतौ, मांसलौ–स्थूलौ, बाहू यस्य तादृशम्; पुनः **अतिनिष्ठुरकरप्रकोष्ठनिहितैकैकहाटककटकम्** अतिनिष्ठुरे–अत्यन्तकठोरे, करप्रकोष्ठे–मणिबन्धे, निहितं–निवेशितम्, एकैकं हाटककटकं–सुवर्णवलयं येन तादृशम्; पुनः **प्रकोष्ठकटकेन्द्रनीलकिरणरागेण** प्रकोष्ठे–मणिबन्धे, यत् कटकं–वलयं, तत्खचितस्य, इन्द्रनीलस्य–तदाख्यनीलमणेः, किरणरागेण–किरणरूपविलेपनेन, किरणसम्बन्धिनीलवर्णेनेत्यर्थः, **अधिजघनं** जघनप्रदेशस्थम्, **अघनम्** असान्द्रं, सूक्ष्ममित्यर्थः, **श्वेतचीनांशुकं** श्वेतवर्णं चीनदेशरचितवस्त्रम्, **भाविसन्ततप्रयाणसुलभमालिन्यलोपनाय** भाविना–भविष्यता, सन्ततप्रयाणेन–अनवरतभ्रमणेन, सुलभं यन्मालिन्यं तस्य लोपनाय–अपनयनाय, **लिम्पन्तं** व्याप्नुवन्तम्, कीदृशेन तेन? **उभयतः** पार्श्वद्वये, **प्रसर्पता** प्रसरता, पुनः **सलीलदोलायमानकरतलोपनीतेन** सलीलं–लीलापूर्वकम्, दोलायमानम्–इतस्ततश्चलनं कुर्वत् यत् करतलं तत्, उपनीतेन–प्रापितेन, केनेव? **नीलीरसेनेव** नीली नाम नीलवर्णा ओषधिः, तत्सम्बन्धिरसेनेवेत्युत्प्रेक्षा [ठ]; पुनः **अच्छलावण्यलिप्तदिङ्मुखेन** स्वच्छकान्तिव्याप्तदिगन्तेन, पुनः **पदक्षेपेषु** पादविक्षेपेषु सत्सु, **सललितं** सविलासम्, **प्रेङ्खता** प्रचलता, **स्थूलपरिमण्डलेन** स्थूलेन परिमण्डलेन–वर्तुलाकारेण, **ऊरुदण्डयुगलेन** जानूपरिभागरूपदण्डद्वयेन, **चण्डपवनप्रेरणात्** उद्धतवाताभिघातात्, **उभयतः** पार्श्वद्वये, **प्रचलितेन्द्रनीलशिलानाङ्गरं** प्रच-

लितेन्द्रनीलशिलानाङ्गरमिव प्रियङ्गुकल्पद्रुमपादपदारुपोतम्, अशोकपादपप्रवालमृदुना संततभ्रमणमृदितवेलाविद्रुमाङ्कुररसद्रवानुरञ्जितेनेव स्वभावपाटलेन चरणद्वयेनोद्भासमानम् [ड], इन्दुकान्ततटलावण्यं ललाटेन शुक्तिसौन्दर्यं श्रवणयुगलेन मौक्तिकाकारं दन्तकुड्मलैर्विद्रुमरागमोष्ठेन कम्बुसौभाग्यं कण्ठेन पुलिनाभोगमुरसा तरङ्गायामं भुजाभ्यामावर्तगाम्भीर्यं नाभिमण्डलेन सततयात्रोपमर्दपीडितादर्णवादिवोपचारेण प्राप्तमुपदर्शयन्तम् [ढ], अनुमार्गलग्नैरनतिदूरवर्तिभिः काककोकिलकलविङ्ककण्ठकालकायैर्मकरैरिवातपं सेवितुमकूपारमध्यादेकहेलया निर्गतैर्मद्गुभिरिव प्रभूतमत्स्याभ्यवहारतृष्णया परित्यक्तपक्षिशरीरैरुरगविषवह्निधूमदण्डैरिव धरामवदार्य रसातलान्निर्यातैश्छायापुरुषैरिव कठोरशरदातपत्रासादेकत्रकृतावासैराशैशवाल्लवणजलराशिसलिलक्षारदग्धतनु-

---

टिप्पनकम्—मद्गुः—जलवायसः। **लवणजलराशिसलिलक्षारदिग्धतनुभिरपि निर्लावण्यैः** ये लवणसमुद्रजलक्षारदिग्धदेहास्ते कथं निर्गतलवणभावाः? अन्यत्र अपगताङ्गचारुत्वाः । **नलस्तम्बैरिव जलाशयोपान्तेषु वृद्धिं गतैः** एकत्र तडागादिपर्यन्तेषु, अन्यत्र जडचित्तसमीपेषु । **कैवर्तैः** धीवरैः [ण]।

लितम्, इन्द्रनीलशिलानाङ्गरम्—इन्द्रनीलमणिखचितं 'नांगर' इति प्रसिद्धं प्रवहणोपकरणं यस्य तादृशम्, **प्रियङ्गुकल्पद्रुमपादपदारुपोतमिव** प्रियङ्गोः—तत्संज्ञकस्य, कल्पद्रुमस्य—कल्पाख्यदिव्यवृक्षरूपस्य च, पादपस्य—वृक्षस्य, यद् दारु—काष्ठं, तन्मयं पोतं—यानपात्रमिवेत्युत्प्रेक्षा; पुनः कीदृशम्? **चरणद्वयेन** पादयुगलेन, **उद्भासमानम्** उद्दीप्यमानम्, कीदृशेन? **अशोकपादपप्रवालमृदुना** अशोकाख्यपादपनूतनदलकोमलेन, पुनः कीदृशेन? **स्वभावपाटलेन** स्वभावतः श्वेतरक्तवर्णेन, केनेव? **सन्ततभ्रमणमृदितवेलाविद्रुमाङ्कुररसद्रवानुरञ्जितेनेव** सन्ततभ्रमणेन—अनवरतविहरणेन, मृदितानां—पादतलाभिहतानाम्, विद्रुमाङ्कुराणां—प्रवालाख्यरत्नहेतुवृक्षाङ्कुराणाम्, रसद्रवैः—रसनिष्यन्दैः, अनुरञ्जितेनेव—कृतरञ्जनेनेवेत्युत्प्रेक्षा [ड]; पुनः **सततयात्रोपमर्दपीडितात्** अनवरतयात्राकृतालोडनेन पीडितात्—सम्मर्दितात्, कृताङ्गमर्दनादित्यर्थः, **अर्णवात्** समुद्रात्, **उपचारेण** प्राभृतकरूपेण, **प्राप्तं** लब्धम्, विशेषणमिदमग्रेऽपि सर्वत्रान्वेति, **इन्दुकान्ततटलावण्यं** चन्द्रकान्तमणितीरसौन्दर्यम्, चन्द्रकान्तमणीनां प्रभावाही यः समीपप्रदेशः, तत्सौन्दर्यमित्यर्थः, **ललाटेन**—भालस्थलेन, **उपदर्शयन्तं** प्रकटयन्तम्, पुनः **श्रवणयुगलेन** कर्णपुटद्वयेन, **शुक्तिसौन्दर्यं** शुक्तिसौष्ठवम्, पुनः **दन्तकुड्मलैः** दन्ताङ्कुरैः, **मौक्तिकाकारं** मुक्तामणिस्वरूपम्, पुनः ओष्ठेन **विद्रुमरागं** प्रवालरक्तताम्, पुनः कण्ठेन **कम्बुसौभाग्यं** शङ्खसौन्दर्यम्, **उरसा** वक्षसा, **पुलिनाभोगं** तटस्थलविशालताम्, पुनः **भुजाभ्यां** बाहुभ्याम्, **तरङ्गायामं** तरङ्गदीर्घताम्, पुनः **नाभिमण्डलेन** वर्तुलाकारनाभिप्रदेशेन, **आवर्तगाम्भीर्यं** जलभ्रमिगम्भीरताम्, भ्रमजलगम्भीरतामित्यर्थः, **उपदर्शयन्तं** प्रकाशयन्तम्, विशेषणमिदमनुपदोक्तनिखिलद्वितीयान्तपदैरन्वेति [ढ]; पुनः **कैवर्तैः** धीवरैः, **परिवृतं** परिवेष्टितम्, कीदृशैः? **अनुमार्गलग्नैः** प्रतिमार्गमिलितैः, पुनः **अनतिदूरवर्तिभिः** किञ्चिन्निकटवर्तिभिः, **काक-कोकिल-कलविङ्क-कण्ठकालकायैः** काकः कोकिलश्च प्रसिद्धपक्षिविशेषः, कलविङ्कः—चटकः, कण्ठकालः—मयूरः, तेषामिव कायः—शरीरं येषां तादृशैः, पुनः **आतपं** सूर्यप्रकाशं, **सेवितुम्** अनुभवितुम्, **एकहेलया** एकचेष्टाविशेषेण, एकदेत्यर्थः, न तु पर्यायेणेत्यर्थः, **अकूपारमध्यात्** समुद्रमध्यात्, **निर्गतैः** निःसृतैः, **मकरैरिव** नक्रैरिवेत्युत्प्रेक्षा, पुनः **प्रभूतमत्स्याभ्यवहारतृष्णया** प्रचुरमत्स्यबुभुक्षया, **परित्यक्तपक्षिशरीरैः** पक्षिशरीरं परित्यज्य धृतकैवर्ताकारैः, **मद्गुभिरिव** जलवायसैरिवेति चोत्प्रेक्षा, पुनः **धरां** भूतलम्, **अवदार्य** उद्भिद्य, **रसातलात्** पातालमध्यात्, **निर्यातैः** निर्गतैः, **उरगविषवह्निधूमदण्डैरिव** सर्पविषरूपस्य वह्नेः—अग्नेः, धूमलेखाभिरिवेति चोत्प्रेक्षा, पुनः **कठोरशरदातपत्रासात्** तीव्रशरत्कालिकातपभयात्, **एकत्र** एकस्मिन् स्थाने, **कृतावासैः** कृतनिवासैः, **छायापुरुषैरिव** छायात्मकनरैरिवेति चोत्प्रेक्षा, पुनः **आशैशवात्** बाल्यादारभ्य, **लवणजलराशिसलिलक्षारदग्धतनुभिरपि** लवणजलराशेः—लवणसमुद्रस्य, सलिलानां—जलानाम्, क्षारेण—क्षाररसेन, दग्धा—गलिता, दिग्धेति पाठे दिग्धा—व्याप्ता, तनुः—शरीरं येषां

भिरपि निर्लावण्यैर्नलस्तम्बैरिव जलाशयोपान्तेषु वृद्धिं गतैर्नौभिरप्यन्तेवासिनीभिस्तरणविद्यामिवोपशिक्षितुं सर्वदा पादतले लुठन्तीभिरुद्भावितमाहात्म्यैर्नक्रादिजलचरवसाञ्जितलोचनैः कैश्चिदंसावसक्तबडिशवेणुयष्टिभिः कैश्चित् करावलम्बमानबालशफरलुम्बिभिरसंनिहितजालैरपि सर्वतः प्रसृतकालकान्तिपरिगताङ्गतया प्रावृतजालैरिवोपलक्ष्यमाणैः साक्षादसुकृतस्येव विवर्तैः कैवर्तैस्तमालविटपमिव कण्टकद्रुमैः परिवृतं, पञ्चविंशतिवर्षदेशीयं नाविकयुवानमद्राक्षम् [ण]।

तस्य च तथाविधं धृतविदग्धोज्ज्वलवेषमाकारं तादृशं च प्रेतप्रायमालोक्य परिवारमुपजातविस्मयस्तत्क्षणमेव पार्श्वतो निविष्टमखिलनौसाधनाध्यक्षं यक्षपालिताभिधानममात्यमुद्दिश्य 'कोऽयम्' इत्यपृच्छम्। 'कुमार ! नाविकोऽयं सकलस्यापि कैवर्ततन्त्रस्यास्य नायकः' इति निवेदिते तेनाश्रद्दधान इव पुनरवदम्—'अत्यन्तविसदृशः कैवर्तानामाकारेण दृश्यते।' स जगाद—'युवराज ! नाकारेणैव सर्वेणापि प्रकारेण विसदृशोऽयमेषाम्, न चैषामन्येषामपि प्रायेण पुरुषाणां बुद्धिधैर्यवचनवैदग्ध्यादिभिः पुरुषगुणैः। शृणु विना विस्तरेण वर्ण्यमानमस्य पूर्ववृत्तान्तम् [त]। अस्ति सुवर्णद्वीपे मणिपुराभिधाननगरनिवासी बहुमतो राज्ञः पौरवर्गस्य च

तादृशैरपि, **निर्लावण्यैः** क्षाररसरहितैरिति विरोधः, तदुद्धारे तु निर्लावण्यैः—शरीरसौन्दर्यरहितैरिति व्याख्येयम्, पुनः **जलाशयोपान्तेषु** तडागादिपर्यन्तेषु, अन्यत्र डलयोरैक्यात् जडचित्तसमीपेषु च, वृद्धिं **गतैः** प्राप्तैः, **नलस्तम्बैरिव** नलाख्यतृणकाण्डैरिवेत्युत्प्रेक्षा, पुनः **तरणविद्यां** तरणकलाम्, **उपशिक्षितुम्** उपादातुं, **सर्वदा** सर्वकाले, **पादतले** चरणतले, **लुठन्तीभिः** श्लिष्यन्तीभिः, **अन्तेवासिनीभिरिव** विद्यार्थिनीभिरिव, **नौभिरपि** नौकाभिरपि, **उद्भावितमाहात्म्यैः** प्रकटितमाहात्म्यैः, पुनः **नक्रादिजलचरवसाञ्जितलोचनैः** नक्रादीनां—मकरादीनाम्, जलचराणां—जलजन्तूनां, वसाभिः—मेदोभिः, तद्रूपाञ्जनैरित्यर्थः, अञ्जिते—आर्द्रीकृते, लोचने—नयने येषां तादृशैः, पुनः **कैश्चित्** कैरपि, **अंसावसक्तबडिशवेणुयष्टिभिः** अंसावसक्ता—स्कन्धलग्ना, बडिशवेणुयष्टिः—मत्स्यवेधकास्त्रविशेषसम्बन्धिवंशदण्डो येषां तादृशैः, पुनः **कैश्चित्** कैरपि, **करावलम्बमानबालशफरलुम्बिभिः** करं—हस्तम्, अवलम्बमाना—आश्रयमाणा, बालशफराणां—बालमत्स्यविशेषाणां, लुम्बिः—स्तबको येषां तैः, पुनः **असंनिहितजालैरपि** न विद्यते सन्निहितः—निकटस्थः, जालः—मत्स्यधारणार्थं बन्धनविशेषो येषां तादृशैरपि, **सर्वतः** सर्वदिक्षु, **प्रसृतकालकान्तिपरिगताङ्गतया** विस्तृतकृष्णकान्तिव्याप्ताङ्गतया, **प्रावृतजालैरिव** परिहितजालैरिव, **उपलक्ष्यमाणैः** प्रतीयमानैः, पुनः **असुकृतस्य** दुरितस्य, साक्षात् **विवर्तैरिव** परिणामभूतैरिवेत्युत्प्रेक्षा, कैः परिवृतं कमिव ? **कण्टकद्रुमैः** कण्टकवृक्षैः, परिवृतं, **तमालविटपमिव** तमालवृक्षमिवेत्युत्प्रेक्षा [ण]।

च पुनः, **धृतविदग्धोज्ज्वलवेषं** धृतः—गृहीतः, विदग्धः—मनोहरः, उज्ज्वलश्च वेषो येन तादृशम्, **तथाविधम्** उक्तप्रकारम्, **तस्य** नाविकयूनः, **आकारं** शरीरम्, **च** पुनः **तादृशं** तथाविधम्, **प्रेतप्रायं** प्रेतमयम्, तस्य, **परिवारं** परिजनम्, **अवलोक्य** दृष्ट्वा, **उपजातविस्मयः** उत्पन्नाश्चर्यः, **तत्क्षणमेव** तत्कालमेव, **पार्श्वतो निविष्टं** पार्श्वोपविष्टम्, **अखिलनौसाधनाध्यक्षम्** अखिलानां—सर्वेषाम्, नौसाधनस्य—नौकासैन्यस्य, अध्यक्षं—नायकम्, **अमात्यं** मन्त्रिणम्, उद्दिश्य कोऽयम् ? इति **अपृच्छत्** पृष्टवान्। **कुमार !** नृपात्मज !, **अयं** पुरोवर्ती, **सकलस्यापि** समस्तस्यापि, अस्य **कैवर्ततन्त्रस्य** धीवरवर्गस्य, नायकः, **नाविकः** कर्णधारः, **इति** इत्थं, **तेन** आमात्येन, **निवेदिते** बोधिते सति, **अश्रद्दधान इव** अविश्वसन्निव, पुनः **अवदम्** उक्तवान् अस्मि, किमित्याह—**आकारेण** शरीरेण, **कैवर्तानां** धीवरजातीयानाम्, **अत्यन्तविसदृशः** अत्यन्तविरूपः, **दृश्यते** प्रतीयते, **सः** अमात्यः, **जगाद** उवाच, **आकारेणैव** आकारमात्रेण, न, किन्तु **सर्वेणापि** सकलेनापि, प्रकारेण, **अयं** पुरोवर्तिजनः, **एषां** कैवर्तानां, **विसदृशः** विलक्षणः:, न च **एषाम्** एषामेव कैवर्तानामेवेत्यर्थः, किन्तु **प्रायेण** बाहुल्येन, **अन्येषामपि** एतद्व्यतिरिक्तानामपि पुरुषाणाम्, **बुद्धिधैर्यवचनवैदग्ध्यादिभिः** बुद्धिः—तात्कालिकमतिः, धैर्यं—धीरता, वचनवैदग्ध्यं—वचनचातुर्यं, तत्प्रभृतिभिः, पुरुषगुणैः, विसदृश इति शेषः, **विना विस्तरेण** संक्षेपेण, **वर्ण्यमानं** मयोपाख्यायमानम्, अस्य **पूर्ववृत्तान्तं** पुरातनवृत्तम्, **शृणु** श्रवणगोचरीकुरु [त]। किमित्याह—**सुवर्णद्वीपे** तदाख्यद्वीपविशेषे, **मणिपुराभिधाननगरनिवासी** तदाख्यनगरवास्तव्यः,

प्रवीणः किमपि लोकयात्रायां सांयात्रिकवणिग् वैश्रवणो नाम । तस्य सर्वदा देवद्विजातिश्रमणगुरुशुश्रूषापरस्य निजभुजार्जितं पूर्वपुरुषोपार्जितं च प्राज्यमर्थमर्थिजनैः सुहृद्भिर्बान्धवैर्विद्वद्भिश्च भुक्तशेषमुपभुञ्जानस्य पश्चिमे वयसि वसुदत्ताभिधानायां गृहिण्यामपश्चिमः सर्वापत्यानां तारको नाम दारकः समुदपादि [थ]। स रूपसंपदा तुलितसुरकुमारः कौमार एव यथाविधिश्रुतशास्त्रः कलासु कृतश्रमः क्रमागतमशेषपुरुषार्थसंपत्तिपात्रमभिनवमधिरुह्य यौवनं यानपात्रं च गृहीतप्रचुरसारभाण्डैर्भूरिशः कृतद्वीपान्तरयात्रैः सहकारिभिरनेकैः सांयात्रिकैरनुगम्यमान इमामेव नगरीं रङ्गशालामागच्छत् [द] । आयातमात्रस्य च तस्य विविधानिबद्धनगरलोकसंपातपरिहाराय विपुलावकाशे जलराशिपरिसरे समावासितस्य समीपवासिना सकलकैवर्तकुलनायकेन जलकेतुनाम्ना कर्णधारेण सार्धं कथञ्चित् सख्यमजनि । परस्परोपचारकर्मणा च प्रौढिमुपगते तत्र कदाचिदारूढनवयौवना त्रिदशवनितेव शापदोषान्निपतिता मनुष्यलोके निकामकमनीयदर्शना प्रियदर्शना नाम

टिप्पनकम्—अशेषपुरुषार्थसंप्राप्तिपात्रं यौवनं पात्रं च-एकत्र सर्वधर्मार्थकामप्राप्तिभाजनम्, अन्यत्र सर्वपुरुषद्रव्यसंस्थापनम् [द]।

राज्ञः नृपस्य, **च** पुनः, **पौरवर्गस्य** पुरवासिवृन्दस्य, **बहुमतः** परमाभिमतः, पुनः **लोकयात्रायां** लोकव्यवहारे, **किमपि** अवर्णनीयः, **प्रवीणः** दक्षः, **वैश्रवणः** तदाख्यः, **सांयात्रिकवणिक्** पोतवणिक्, **अस्ति** विद्यते, **नामे**ति वाक्यालङ्कारे, **तस्य** वैश्रवणस्य, **पश्चिमे वयसि** वार्धक्यावस्थायाम्, **वसुदत्ताभिधानायां** वसुदत्तानाम्न्यां, **गृहिण्यां** भार्यायाम्, **सर्वापत्यानां** सर्वसन्तानानाम्, **अपश्चिमः** उत्कृष्टः, चरमो वा, **तारकः** तत्संज्ञकः, **दारकः** सुतः, **समुदपादि** समुत्पन्नः, **नामे**ति वाक्यालङ्कारे, कीदृशस्य तस्य? **देव-द्विजाति-श्रमण-गुरुशुश्रूषापरस्य** देवाः-प्रसिद्धाः, द्विजातयः-द्विजाः, श्रमणाः-साधवः, गुरुः-धर्मोपदेशकः, तेषां शुश्रूषा-परिचर्या, तत्परस्य-तल्लग्नहृदयस्य, पुनः **निजभुजार्जितं** स्वबाहूपार्जितं, **च** पुनः, **पूर्वपुरुषोपार्जितं** स्वपूर्वजजनोपार्जितम्, प्राज्यं-प्रचुरम्, **अर्थं** धनम्, **अर्थिजनैः** याचकजनैः, **सुहृद्भिः** मित्रजनैः, **बान्धवैः** बन्धुजनैः, **विद्वद्भिश्च** विद्वज्जनैश्च, **भुक्तशेषम्** उपभुक्तावशिष्टम्, उपभुञ्जानस्य [थ]। **रूपसम्पदा** स्वरूपसम्पत्त्या, **तुलितसुरकुमारः** उपमितदेवकुमारः, स तारकः, **कौमार एव** बाल्यकाल एव, **यथाविधिश्रुतशास्त्रः** यथाविधि-विध्यनुसारं, श्रुतं-श्रवणगोचरीकृतम्, अधीतमिति यावत्, शास्त्रम्-आगमो येन तादृशः, पुनः **कलासु** शिल्पविद्यासु, **कृतश्रमः** कृतव्यवसायः, **क्रमागतं** शैशवादिक्रमेण पक्षे पितृपितामहादिक्रमेणोपनतम्, **अशेषपुरुषार्थसंप्राप्तिपात्रम्** अशेषाणां-समस्तानां, पुरुषार्थानां-धर्मार्थकाममोक्षरूपाणां, पक्षे अशेषाणां पुरुषाणां-स्वपूर्वजपुरुषाणां, या अर्थसंप्राप्तिः-धनप्राप्तिः, तस्याः पात्रं-संस्थानम्, **अभिनवं** नवीनं, **यौवनं** युवावस्थां, **च** पुनः, **यानपात्रं** पोतं च, **अधिरुह्य** आरुह्य, **गृहीतप्रचुरसारभाण्डैः** गृहीतानि, प्रचुराणि-विपुलानि, सारभाण्डानि-श्रेष्ठभाजनानि दृढभाजनानि धनपात्राणि वा यैस्तैः, **भूरिशः** बहुशः, **कृतद्वीपान्तरयात्रैः** विहितान्यद्वीपप्रयाणैः, **सहकारिभिः** सहकारिभूतैः, **अनेकैः** बहुभिः, **सांयात्रिकैः** पोतवणिग्भिः, **अनुगम्यमानः** अनुस्रियमाणः, **इमामेव** प्रत्यक्षभूतामेव, **रङ्गशालां** तदाख्यां नगरीम्, **आगच्छत्** आगतवान् [द]। **च** पुनः, **आयातमात्रस्य** आगतमात्रस्य, **विविधानिबद्धनगरलोकसम्पातपरिहाराय** विविधाः-बहुविधाः, अनिबद्धाः-अनियन्त्रिताश्च, ये नगरलोकाः-नगरवास्तव्यजनाः, तेषां सम्पातस्य-समागमस्य, परिहाराय-परिवर्जनाय, **विपुलावकाशे** प्रचुरावकाशान्विते, **जलराशिपरिसरे** समुद्रकच्छप्रदेशे, **समावासितस्य** सम्यङ्निवासितस्य, **तस्य** तारकाख्यकुमारस्य, **समीपवासिना** निकटवास्तव्येन, **सकलकैवर्तकुलनायकेन** समस्तधीवरकुलश्रेष्ठेन, जलकेतुनाम्ना, **कर्णधारेण** नाविकेन, **सार्धं** साकम्, **कथञ्चित्** कथमपि, **सख्यं** मैत्री, **समजनि** सम्यगभूत्। **तत्र** तस्मिन्, सख्य इत्यर्थः, **परस्परोपचारकर्मणा** पारस्परिकसत्कारात्मककार्यद्वारा, **प्रौढिं** पूर्णरूपताम्, **उपगते** प्राप्ते सति, **कदाचित्** कस्मिंश्चित् समये, **आरूढनवयौवना** प्राप्ताभिनवतारुण्या, **शापदोषात्** कस्यापि शापरूपात्-अशुभाशंसनरूपात्, दोषात्, **मनुष्यलोके** मर्त्यभुवने, **निपतिता** अवतीर्णा, **त्रिदशवनितेव** देवाङ्गनेव,

तस्य जलकेतोः सुता सुतारवृत्तमौक्तिकप्रकल्पितं हारमादाय पितुराज्ञया गता तद्गृहम् [ध]। दृष्टश्च स तया प्रथमदर्शन एव रूपातिशयदर्शनारूढदृढतरानुरागया, सस्पृहमुपनीतोपायना च स्थित्वा कञ्चित् कालं कृतप्रत्युपचारा तेन पुनर्गता स्वसदनम्, अनुरागप्रेरिता च तद्दर्शनाशया तैस्तैर्व्यपदेशैरागन्तुमारब्धा प्रतिदिनम् [न]।

एकदा तु तदीयसौधशिखरशालायां सख्या सह क्रीडन्त्याः कथञ्चित् सविधमागतोऽसौ, तद्दर्शनोपारूढसाध्वसा च सत्वरं व्रजन्ती वेपथुविशृङ्खलैः पदैः परिस्खलिता कुट्टिमतले, पतन्त्याश्च तस्याः सोपानपथसंनिधौ सत्वरमुपेत्य तेनावलम्बितः प्रवाल इव बालवनलतायाः करिकलभकेन स्निग्धसुकुमारसरलारुणाङ्गुलिर्दक्षिणः पाणिः, प्रयुक्तपाणिना च मधुरमभिहिता स्मितमुखेन—'सुमुखि! किमिदं समेऽपि स्खलनम्, अलममुना संभ्रमेण, संवृणु क्षोभविगलितस्तनांशुकमस्थान एव विसंस्थुलीभूतमात्मानं, गच्छ गेहम्' इति [प]। सा तु तत्करग्रहणसमकालमेवोत्थितेन सरभसाकृष्टधनुषा कुसुमसायकेन कृतसाहायकेनेव दूरमपसारितसाध्वसा

निकामकमनीयदर्शना अत्यन्तप्रियदर्शना, **प्रियदर्शना** तदन्वर्थसंज्ञिका, तस्य **जलकेतोः** तदाख्यकर्णधारस्य, **सुता** कन्यका, **सुतारवृत्तमौक्तिककल्पितं** सुतारैः-विशुद्धैः, वृत्तैः-वर्तुलाकारैश्च, मौक्तिकैः-मुक्तामणिभिः कल्पितं-निर्मितं, **हारं** माल्यम्, **आदाय** गृहीत्वा, **पितुः** जलकेतोः, **आज्ञया** आदेशेन, **तद्गृहं** तस्य-तारकाख्यकुमारस्य, गृहं, **गता** गतवती [ध]। **च** पुनः, **प्रथमदर्शन एव** प्रथमावलोकनकाले एव, **रूपातिशयदर्शनारूढदृढतरानुरागया** रूपातिशयस्य- रूपोत्कर्षस्य, दर्शनेन आरूढः-उत्पन्नः, दृढतरः-अतिदृढः, अनुरागः-प्रीतिर्यस्यास्तादृश्या, **तया** प्रियदर्शनया, **स** तारकः, **दृष्टः** दृष्टगोचरीकृतः। **च** पुनः, **सस्पृहं** सानुरागम्, **उपनीतोपायना** उपाहृतोपहारा, **कञ्चित्** कियन्तं कालं स्थित्वा, **तेन** कुमारेण, **कृतप्रत्युपचारा** विहितप्रतिसत्कारा सती, पुनः **स्वसदनं** स्वगृहं गता; **च** पुनः, **अनुरागप्रेरिता** तत्प्रीतिप्रवर्तिता सती, **तद्दर्शनाशया** तदवलोकनाकाङ्क्षया, **तैस्तैः व्यपदेशैः** व्यवहारैः छलैर्निमित्तैर्वा, **प्रतिदिनम्**, **आगन्तुं** तद्गृहमुपस्थातुम्, **आरब्धा** प्रवृत्ता [न]।

एकदा तु एकस्मिन् काले तु, **तदीयसौधशिखरशालायां** तारकीयप्रासादशिखरवर्तिभवने, **सख्या** स्ववयस्यया सह, **क्रीडन्त्याः** खेलन्त्याः, प्रियदर्शनाया इति शेषः, **सविधं** समीपम्, **असौ** तारकः, **कथञ्चित्** केनापि प्रकारेण, **आगतः** उपस्थितः। **तद्दर्शनोपारूढसाध्वसा** तद्दर्शनेन-तारकावलोकनेन, आरूढम्-उत्पन्नं, साध्वसं-भयं यस्यास्तादृशी सती, **सत्वरं** शीघ्रं, **व्रजन्ती** अपसरन्ती, **वेपथुविशृङ्खलैः** कम्पनविघटितैः, **पदैः** चरणैः, तद्विक्षेपैरित्यर्थः, **कुट्टिमतले** मणिबद्धभूतले, **परिस्खलिता** निपतितुं प्रवृत्ता। **पतन्त्याः** स्खलन्त्याः, **तस्याः** प्रियदर्शनायाः, **दक्षिणः** वामेतरः, **पाणिः** हस्तः, **तेन** तारकेण, **अवलम्बितः** गृहीतः। कीदृशः? **स्निग्धसुकुमारसरलारुणाङ्गुलिः** स्निग्धाः-सरसाः, न तु रूक्षा इत्यर्थः, सुकुमाराः-कोमलाः, सरलाः-ऋजवः, अरुणाः-रक्तवर्णाश्च, अङ्गुलयो यस्मिंस्तादृशः, किं कृत्वा? **सोपानपथसन्निधौ** सोपानमार्गसमीपे, **सत्वरं** शीघ्रम्, **उपेत्य** आगत्य, केन क इव? **करिकलभकेन** हस्तिशिशुना, **बालवनलतायाः** वनस्थबाललतायाः, **प्रवाल इव** पल्लव इव। **च** पुनः, **प्रयुक्तपाणिना** प्रयुक्तः-अवलम्बनाय प्रहितः, पाणिः-करो येन तादृशेन, तारकेणेति शेषः, **स्मितमुखेन** मन्दहासान्वितमुखेन, **मधुरं** यथा स्यात् तथा, **अभिहिता** उक्ता, प्रियदर्शनेति शेषः, किमित्याह- **सुमुखि!** सुन्दरवदने!, **समेऽपि** अविषमस्थलेऽपि, **इदं** प्रत्यक्षभूतं, **स्खलनं** पतनम्, किं? किंहेतुकम्?, **अमुना** तत्कारणभूतेन, **सम्भ्रमेण** भयजन्यसंक्षोभेण, **अलं** व्यर्थम्, **क्षोभविगलितस्तनांशुकं** क्षोभेण-सम्भ्रमेण, विगलितं-स्खलितं, स्तनांशुकं-स्तनावरणभूतवस्त्रं यस्य तादृशम्, पुनः **अस्थान एव** अनवसर एव, **विसंस्थूलीभूतं**—विक्षिप्तं, विह्वलीभूतमित्यर्थः, **आत्मानं** स्वम्, **संवृणु** उपसंहर, प्रकृतिस्थं कुरु इत्यर्थः, **गेहं** स्वगृहं, **गच्छ** याहि, इति [प]। **सा तु** प्रियदर्शना तु, **तत्करग्रहणसमकालमेव** तारककरग्रहणसमकालमेव, **उत्थितेन** उद्गतेन, **सरभसाकृष्टधनुषा** सरभसं-सत्वरम्, आकृष्टम्-आततं, धनुर्येन तादृशेन, पुनः **कृतसाहाय्यकेन** कृतसहायताकेन, **कुसुमसायकेनेव** कामदेवेनेव, यद्वा कुसुमसायकेन कृतं यत् साहाय्यकं-साहाय्यं तेनेव, **दूरं** दूरदेशम्,

सविभ्रमोल्लासितैकभ्रुवा गुरुणेव नवानुरागेण कारितप्रगल्भकलालापपरिचया चिरकाललब्धावसरया विदग्धसख्येव तत्समागमतृष्णया स्थापिता स्वयं दूतीव्रतविधौ निसर्गमुग्धापि प्रौढवनितेव किञ्चिद् विहस्य वचनमिदमुदीरितवती [फ] । 'कुमार! त्वया गृहीतपाणिः कथमहं विसंस्थूलीभूतमात्मानं संवृणोमि, कथं च गेहादितो गृहान्तरं गच्छामि, सांप्रतमिदमेव मे त्वदीयं सदनमाश्रयः संवृत्तः' इत्युक्त्वा त्रपावनतवदना पुरःप्रसृतधवलनखमयूखोद्द्योतया तदीयवक्रालापश्रवणजातहासयेव वामचरणाङ्गुष्ठलेखया मन्दमन्दमलिखत् कुट्टिमम् [ब] । असावपि युवा तेन तस्याः स्मरविकारदर्शनेन, तेन तत्कालमतिशयस्पृहणीयतां गतेन रूपलावण्यादिगुणकलापेन, तेनामृतस्यन्दशीतलेन करतलस्पर्शेन, तेन च प्रकटितानुरागेण, निपुणया वचनभङ्ग्या कृतेनात्मसमर्पणेन परमरंस्त [भ] ।

सहासवदनश्च मन्दमाश्लिष्य तामानन्दमुकुलायमानलोचनोत्पलां परिघट्य च कपोलोदरे कपोलेन 'सुन्दरि! यदि न यातव्यं गृहान्तरमिति निश्चयस्ते, ततः किम्? एकेन गृहेण, द्रविणसंग्रहो रत्नानि

अपसारितसाध्वसा निष्कासितभया, पुनः **गुरुणेव** शिक्षकेणेव, **सविभ्रमोल्लासितैकभ्रुवा** सविभ्रमं-सविलासं यथा स्यात् तथा, उल्लासिता-उन्नमिता, एका भ्रूः-नेत्रोर्ध्वरोमराजिर्येन तादृशेन, **नवानुरागेण** नूतनप्रणयेन, **कारितप्रगल्भकलालापपरिचया** कारितः-जनितः, प्रगल्भकलालापानां-प्रतिभान्वितमधुरालापानाम्, परिचयो यस्यास्तादृशी सती, पुनः **विदग्धसख्येव** निपुणवयस्ययेव, **चिरकाललब्धावसरया** दीर्घकालप्राप्तावसरया, **तत्समागमतृष्णया** तारकसमागमनेच्छया, **स्वयम्** आत्मनैव, **दूतीव्रतविधौ** दूतीनियमानुष्ठाने, **स्थापिता** नियुक्ता, **निसर्गमुग्धाऽपि** प्रकृत्याऽप्रगल्भापि, **प्रौढवनितेव** प्रगल्भनायिकेव, **किञ्चित्** ईषत्, **विहस्य** हासं कृत्वा, **इदम्** अनुपदमनूद्यमानं वचनम्, **उदीरितवती** उक्तवती [फ], किमित्याह—**कुमार!** तारक! **त्वया** भवता, **गृहीतपाणिः** कृतपाणिग्रहणा, अहम्, **विसंस्थूलीभूतं** विक्षिप्तम्, **आत्मानं** स्वं, **कथं** केन प्रकारेण, **संवृणोमि** उपसंहरामि, **च** पुनः, **इतः** अस्मात्, भावत्कादित्यर्थः, **गेहात्** गृहात्, **गेहान्तरं** गृहान्तरं, **कथं** केन प्रकारेण, **गच्छामि** उपसरामि, **त्वदीयं** भवदीयम्, **इदमेव** प्रत्यक्षभूतमेव, **सदनं** गृहम्, **साम्प्रतम्** अधुना, **आश्रयः** मम शरणं, **संवृत्तः** सम्पन्नः, **इत्युक्त्वा** इति कथयित्वा, **त्रपावनतवदना** लज्जाऽधोमुखी सती, **तदीयवक्रालापश्रवणजातहासयेव** प्रियदर्शनावक्रोक्तिश्रवणोत्पन्नहासयेव, **पुरःप्रसृतधवलनखमयूखोद्द्योतया** पुरः-अग्रे, प्रसृतः-प्रकीर्णः, धवलनखानां-शुभ्रनखानां, मयूखरूपः-किरणरूपः, उद्द्योतः-प्रकाशो यस्यास्तादृश्या, **वामचरणाङ्गुष्ठलेखया** वामपादाङ्गुष्ठलेखया, **कुट्टिमं** मणिबद्धभूमिम्, **अलिखत्** लिखितवती [ब] । **असावपि** सोऽपि, तारकोऽपीत्यर्थः, **युवा** तरुणपुरुषः, **तेन** तदानीन्तनेन, **तस्याः** प्रियदर्शनायाः, **स्मरविकारदर्शनेन** कामविकारानुभवेन, पुनः **तत्कालं** तत्क्षणम्, **अतिशयस्पृहणीयताम्** अत्यन्तकमनीयताम्, **गतेन** प्राप्तेन, **तेन** अनुभूतेन, **रूपलावण्यादिगुणकलापेन** रूपसौन्दर्यादिगुणगणेन, पुनः **अमृतस्यन्दशीतलेन** स्पन्दमानामृतसदृशशीतलेन, **तेन** अनुभूतेन, **करतलस्पर्शेन** हस्ततलाश्लेषेण, **च** पुनः, **प्रकटितानुरागेण** प्रकटितः-अभिव्यक्तः, अनुरागः-प्रीतिर्येन तादृशेन, **निपुणया** प्रागल्भ्यपूर्णया, **वचनभङ्ग्या** वचनरचनाविशेषेण, कृतेन, **तेन** अनुभूतेन, **आत्मसमर्पणेन** आत्मनः-स्वस्य, अधीनीकरणेन, **परम्** अत्यन्तम्, **अरंस्त** अप्रीयत [भ] ।

च पुनः, **सहासवदनः** हसितमुखः सन्, **आनन्दमुकुलायमानलोचनोत्पलाम्** आनन्देन मुकुलायमाने-संकुचन्ती, लोचनोत्पले-नयनकमले यस्यास्तादृशीम्, **तां** प्रियलोचनाम्, **मन्दं** किञ्चित्, **आश्लिष्य** आलिङ्ग्य, **च** पुनः, **कपोलोदरे** गण्डस्थलमध्यभागौ, **कपोलेन** गण्डस्थलेन, **परिघट्य** संश्लिष्य, **सुन्दरि!** मनोहारिणि!, यदि **ते** तव, **गृहान्तरम्** अन्यगृहम्, न **यातव्यं** गन्तव्यम्, इति **निश्चयः** संकल्पः, अस्तीति शेषः, **ततः** तर्हि, **एकेन** एकमात्रेण, **गृहेण** गृहमात्रवस्तुना, **किं** न किमपि स्यादित्यर्थः, किन्तु **द्रविणसंग्रहः** धान्यादिराशिः, **रत्नानि** मौक्तिकहीरकादीनि, **वाहनानि**

वाहनानि परिजनः शरीरं हृदयमिन्द्रियाणि प्राणाः सर्वमेव त्वदीयम्, एतदारोपय स्वेनाङ्गीकारेण गौरवम्' इत्युदीर्य "दुष्कुलादपि ग्राह्यमङ्गनारत्नम्" इत्याचार्यवचनं मनसि कृत्वा स्वजातिनिरपेक्षस्तत्रैव क्षणे ज्वलन्तमन्तर्मदनानलं साक्षीकृत्य भूयो गृहीतपाणिस्तां चकितमृगशावलोचनामत्यन्तमनुरागान्धां योजनगन्धामिव पाराशरः प्रणयिनीमकृत [म]। तस्माच्च पाणिग्रहणदिवसादारभ्य निर्भरानुरागस्तया सर्वाङ्गसुन्दर्या सह विवर्धमानविविधविदग्धपरिहासमश्रान्तचित्रचाटुक्रममप्रकटितस्वस्वामिभावमल्पक्षणोपजायमानानेककोपप्रसादमस्थानसंपाद्यमानस्पृहणीयनिग्रहानुग्रहमनुदिवसमासेवमानो नवयौवनोपभोगमुपभोगसुखमपरकामिनीसुरतसंभोगानां गृहव्यापारयोगानां च प्रायच्छदुदकाञ्जलिम् [य]। जलकेतुना कस्यापि सांयात्रिकस्य तनया वहनभङ्गे सागरादुद्धृत्य परिपालितेयमिति तत्त्ववेदिभिरावेदिततदीयवृत्तान्तोऽपि सहागतैर्वणिग्भिः स्वदेशगमनाय पुनः पुनरभ्यर्थ्यमानोऽपि दर्शनोत्कण्ठितेन ज्ञातिवर्गेण सोपालम्भवचनैः संदेशदानैरुन्मनीक्रियमाणोऽपि त्रपया स्थितोऽत्रैव न गतो निजस्थानम्, आस्थानभूमौ उपगतश्च द्रष्टुमाकृतिगुणाकृष्टचेतसा देवेन

गजाश्वादीनि, **परिजनः** परिवारः, **शरीरं** मदीयगात्रम्, **हृदयम्** अन्तःकरणम्, **इन्द्रियाणि** ज्ञान-कर्मसाधनानि नयन-हस्तादीनि, प्राणाः-जीवितम्, एतत् सर्वं **त्वदीयं** भवदीयम्, **स्वेन** स्वकीयेन, **अङ्गीकारेण** स्वीकारेण, **गौरवं** महत्त्वम्, **आरोपय** आपादय, **इति** इत्थम्, उक्त्वा, अङ्गनारत्नं, दुष्कुलादपि-नीचकुलादपि, ग्राह्यं-गृहीतव्यम्, इति **आचार्यवचनं** नीतिमार्गोपदेशकवाक्यम्, **मनसि** हृदये, **कृत्वा** प्रमाणीकृत्य, **स्वजातिनिरपेक्षः** पाणिग्रहणे स्वस्याज्जात्यनपेक्षः, **तत्रैव** तस्मिन्नेव, क्षणे, **अन्तः** अन्तःकरणे, **ज्वलन्तं** दीप्यमानं, **मदनानलं** कामदेवाग्निम्, **साक्षीकृत्य** पाणिग्रहणसाक्षिभावेनाश्रित्य, **भूयः** पुनरपि, **गृहीतपाणिः** गृहीतप्रियदर्शनाहस्तः सन्, **चकितमृगशावलोचनां** चकितः-सम्भ्रान्तो यो मृगशावः-हरिणशिशुः, तस्येव, लोचने-नयने यस्यास्तादृशीम्, पुनः **अनुरागान्धां** प्रणयान्धाम्, **तां** प्रियदर्शनाम्, **पाराशरः** पराशरात्मजो व्यासः, **योजनगन्धामिव** अन्वर्थतदाख्यकैवर्तकन्यकामिव, **प्रणयिनीं** प्रियाम्, स्ववधूमित्यर्थः, **अकृत** कृतवान् [म]। **च** पुनः, तस्मात् **पाणिग्रहणदिवसात्** विवाहदिनात्, आरभ्य, **निर्भरानुरागः** सान्द्रस्नेहः सन्, **सर्वाङ्गसुन्दर्या** सर्वाङ्गमनोज्ञया, तया सह **उपभोगसुखं** सुरतसम्भोगप्रधानकम्, **नवयौवनोपभोगं** नवयौवनसुखम्, **अनुदिनं** प्रतिदिनम्, **आसेवमानः** सम्यगनुभवन्, **अपरकामिनीसुरतसम्भोगानां** तदन्यवनितारतिसुखानाम्, **च** पुनः, **गृहव्यापारयोगानां** गृहकार्यसम्बन्धानां च, **उदकाञ्जलिं** तिलाञ्जलिं, **प्रायच्छत्** प्रदत्तवान्, त्यागं कृतवानित्यर्थः; कीदृशं नवयौवनोपभोगम्? **विवर्धमानविविधविदग्धपरिहासं** विवर्धमानाः-विशेषेण वर्धमानाः, विविधाः-अनेकविधाः, विदग्धाः-चमत्कृतिपूर्णाः, परिहासा यस्मिंस्तादृशम्, पुनः **अश्रान्तचित्रचाटुक्रमम्** अश्रान्तः-अनवरतः, चित्रचाटूनां-विचित्रमधुरवचनानाम्, क्रमः-धारा यस्मिंस्तादृशम्, पुनः **अप्रकटितस्वस्वामिभावम्** अप्रकटितः-अप्रकाशितः, स्वस्वामिभावः-ईशितव्येशितृभावो यस्मिंस्तादृशम्, पुनः **अल्पक्षणोपजायमानानेककोपप्रसादम्** अल्पक्षणं-कतिपयक्षणाभ्यन्तरे, उपजायमानाः-उत्पद्यमानाः, अनेके-विविधाः, कोपाः-प्रणयक्रोधाः, प्रसादाः-प्रसन्नताश्च यस्मिंस्तादृशम्, पुनः **अस्थानसम्पाद्यमानस्पृहणीयनिग्रहानुग्रहम्** अस्थाने-अनवसरे, सम्पाद्यमानौ-क्रियमाणौ, स्पृहणीयौ-किञ्चित्कालिकत्वेन रमणीयौ, निग्रहानुग्रहौ-बन्धमोक्षौ यस्मिंस्तादृशम् [य]। कस्यापि, **सांयात्रिकस्य** पोतवणिजः, इयं **तनया** कन्या, **वहनभङ्गे** तदीयपोतभग्नतायां सत्याम्, **सागरात्** समुद्रात्, **उद्धृत्य** निष्कास्य, **जलकेतुना** तदाख्यकैवर्तेन, **परिपालिता** रक्षिता इति, **तत्त्ववेदिभिः** यथार्थज्ञातृभिः, **आवेदिततदीयवृत्तान्तोऽपि** विज्ञापितप्रियदर्शनासम्बन्धिवार्तोकोऽपि, पुनः **सहागतैः** आत्मना साकमागतैः, **वणिग्भिः** वाणिज्यवृत्तिकैः, **स्वदेशगमनाय** स्वदेशप्रत्यावर्तनाय, **पुनः पुनः** वारंवारम्, **अभ्यर्थ्यमानोऽपि** प्रार्थ्यमानोऽपि, पुनः **दर्शनोत्कण्ठितेन** तदवलोकनोत्सुकेन, **ज्ञातिवर्गेण** बन्धुवर्गेण, **सोपालम्भवचनैः** साक्षेपवाक्यैः, **सन्देशदानैः** स्वविज्ञप्तिप्रेषणैः, **उन्मनीक्रियमाणोऽपि** गन्तुमुत्सुकीक्रियमाणोऽपि, **त्रपया** लज्जया, **अत्रैव** अस्मिन्नेव स्थाने, स्थितः, **निजस्थानं** स्वस्थानम्, न गतः, **च** पुनः, **आस्थानभूमौ** राजसभाभूमौ, **द्रष्टुम्** अवलोकितुम्, **उपगतः** उपस्थितः, **आकृतिगुणाकृष्टचेतसा** आकृतिगुणेन-आकार-

चन्द्रकेतुना निर्वर्ण्य सुचिरं परिजनादाकर्णिततदीयपूर्वापरवृत्तान्तेन चापलं प्रति पुनः पुनः सपरिहासमाभाषितो मधुरमारोपितबहुमानश्च जामातृप्रतिपत्त्या दत्त्वा जीवनमतिप्रभूतं कृतः प्रभुरखिलस्यापि नाविकतन्त्रस्य [र] । तत्र च कुर्वताधिपत्यमचिरेणैव शिक्षितानेन सकलापि नौप्रचारविद्या, विदितमखिलमपि कर्णधाराणां कर्म, कृतानि बहुकृत्वः सलिलराशौ गमनागमनानि, दृष्टा दूरविप्रकृष्टा अपि द्वीपान्तरभूमयः, प्रत्यक्षीकृताः क्षुद्रा अपि जलपथाः, लक्षितानि तेषु सम्यक्समविषमस्थानानि, किं बहुना, स्वल्पेनापि कालेन जातः स सकलस्यापि कर्णधारचक्रस्य धौरेयः, स चायमेवाधार्यतां धीरेण [ल] ।

अस्य हि किमपि लोकोत्तरं धैर्यम्, असाधारणः सत्त्वावष्टम्भः, दृष्टान्तभूतं पौरुषम्; ईषदपि न स्पृष्ट एष कैवर्तकुलसंपर्कदोषाशङ्किनेव वणिग्जातिसहभुवा भीरुत्वेन; वीर्यमपि शारीरमविचार्यमस्य; जलधिमध्यमग्ननौसमुद्धरणेष्वनेकशः कवलितोऽपि हर्म्यतलप्रणालसलिलपूर इव हेलया निष्क्रामति मकरमुखतः; कराग्रोल्लालितशीकर इव करटभित्तिमाहत्य हरति मदमुदग्रकायानामपि करियादसाम्, मुखान्तरक्षिप्तदुन्दुभ-

---

टिप्पनकम्—**मकरमुखतः** जलचरविशेषवक्त्राद्, अन्यत्र मकरमुखप्रणालात् । **हरति मदम्** एकत्र मदं-मत्तताम्, अन्यत्र दर्पम् । दुन्दुभः-जलसर्पः । **प्रकृष्टजाङ्गुलिक इव न मुह्यति विषमोदकविपत्सु** एकत्र रौद्रजलापत्सु, अन्यत्र विषमिश्रणजलाद्युकापत्सु, जाङ्गुलिकः-विषवैद्यो गारुडिको वा [व] ।

सौष्ठवेन, आकृष्टं चेतो-हृदयं यस्य तादृशेन, **देवेन** राज्ञा चन्द्रकेतुना, **सुचिरं** सुदीर्घकालम्, **निर्वर्ण्य** दृष्ट्वा, **परिजनात्** परिवारसकाशात्, **आकर्णिततदीयपूर्वापरवृत्तान्तेन** श्रुततदीयसमग्रवार्तकेन, **चापलं प्रति** परिणयनविषयकचाञ्चल्य-विषये, **सपरिहासं** परिहासपूर्वकम्, **मधुरं** प्रियं यथा स्यात् तथा, **आभाषितः** उक्तः, **च** पुनः, **जामातृप्रतिपत्त्या** जामातृबुद्ध्या, **आरोपितबहुमानः** कृतप्रचुरसम्मानः, **अतिप्रभूतम्** अत्यधिकम्, **जीवनं** जीविकाम्, दत्त्वा, **अखिलस्यापि** समग्रस्यापि, **नाविकतन्त्रस्य** कर्णधारगणस्य, **प्रभुः** नायकः, कृतः [र] । **च** पुनः, **तत्र** कर्णधारगणे, **आधिपत्यं** प्रभुत्वम्, **कुर्वता** स्थापयता, **अनेन** तारकेण, **सकलापि** समग्रापि, **नौप्रचारविद्या** नौवहनकला, **शिक्षिता** अधिगता, पुनः **अखिलमपि** समग्रमपि, **कर्णधाराणां** नाविकानां, **कर्म** कार्यम्, **विदितं** परिचितम्, पुनः **सलिलराशौ** समुद्रे, **बहुकृत्वः** बहुवारम्, गमनागमनानि कृतानि, पुनः **दूरविप्रकृष्टा अपि** अतिदूरस्थिता अपि, **द्वीपान्तरभूमयः** अन्यद्वीपभूमयः, **दृष्टाः** दृष्टिगोचरीकृताः, पुनः **क्षुद्रा अपि** लघवोऽपि, **जलपथाः** जलमार्गाः, **प्रत्यक्षीकृताः** दृष्टिगोचरीकृताः, पुनः **तेषु** जलपथेषु, **समविषमस्थानानि** समानि-अनिम्नोन्नतानि, विषमाणि-निम्नोन्नतानि च, स्थानानि-स्थलानि, **सम्यक्** अत्यन्तम्, **लक्षितानि** परिचितानि, किं **बहुना** किमधिकेन । **स** तारकः, **स्वल्पेनापि** अल्पेनापि, कालेन, **सकलस्यापि** समग्रस्यापि, **कर्णधारचक्रस्य** नाविकगणस्य, **धौरेयः** अग्रणीः, **जातः** सम्पन्नः, **स च** तारकश्च, **अयमेव** प्रत्यक्षं दृश्यमान एव, **धीरेण** प्राज्ञेन, **अवधार्यतां** निश्चीयताम् [ल] । **हि** निश्चयेन, **अस्य** तारकस्य, **लोकोत्तरं** लोकोत्कृष्टम्, **धैर्यं** धीरत्वम्, पुनः **असाधारणः** उत्कृष्टः, **सत्त्वावष्टम्भः** बलावलम्बः, बलाभिमान इत्यर्थः, यद्वा सत्त्वानां-जन्तूनामाक्रमणम्, पुनः **दृष्टान्तभूतम्** आदर्शभूतम्, **पौरुषं** पराक्रमः । पुनः **एषः** अयम्, **भीरुत्वेन** भयशीलत्वेन, **ईषदपि** किञ्चिदपि, न **स्पृष्टः** कृतस्पर्शः, कीदृशेन ? **वणिग्जातिसहभुवा** वैश्यजातिसहजेन, कीदृशेनेव ? **कैवर्तकुलसम्पर्कदोषाशङ्किनेव** कर्णधारकुलसम्पर्कजन्यकलङ्कशङ्कावतेव । अस्य **शारीरं** शरीरसम्बन्धि, **वीर्यं** सामर्थ्यमपि, **अविचार्यम्** अनाकलनीयम् । **जलधिमध्यमग्ननौसमुद्धरणेषु** जलधिमध्ये-समुद्रमध्ये, मग्नानां नावां, समुद्धरणेषु-ततो निष्कासनकार्येषु, **कवलितोऽपि** मकरभक्षितोऽपि, **हर्म्यतलप्रणालसलिलपूर इव** प्रासादतलस्थित-प्रणालिकास्थजलप्रवाह इव, **मकरमुखतः** जलचरविशेषमुखमार्गतः, अन्यत्र तदाकृतिप्रणालमुखाभ्यन्तरात्, **हेलया** खेलया, अनायासेनेत्यर्थः, **निष्क्रामति** निःसरति । पुनः **कराग्रोल्लालितशीकर इव** कराग्रेण-शुण्डाग्रभागेन, उल्लालितः-उत्क्षिप्तः, **शीकर इव** जलकण इव, **करटभित्तिं** गण्डभित्तिम्, **आहत्य** ताडयित्वा, **उदग्रकायानाम्** उन्नतशरीराणाम्, **करियादसां** हस्तिरूपाणां जलचराणां, जलहस्तिनामित्यर्थः, **मदं** गर्वं मत्ततां च, **हरति** नाशयति, समय-

मणिरितरनाविक इव निराकुलो वसति दिवसमपि रसातलगम्भीरेऽम्भसि; प्रकृष्टजाङ्गुलिक इव दुरुत्तरास्वपि न मुह्यति विषमोदकविपत्सु; तैस्तैरञ्जनैरञ्जितेक्षणः क्षणदास्वपि समस्तवस्तुजातमुपजातयोगिज्ञान इव विज्ञातनिरवशेषविशेषमावेदयति [व]। सर्वथा योग्योऽयं युज्यतेऽस्मिन्नवसरे स्वनावः कर्णधारतां नेतुमात्मनश्च प्रणयीकर्तुम्, अनेन हि प्रगल्भवचसा परेङ्गिताकारज्ञेन भक्तिमता प्रक्रमागतव्याहारिणा च सर्वदा प्रतिपन्नसख्यः सुखेन लङ्घयिष्यत्यलघुविस्तारमपि भगवन्तमवारपारं पारावारं कुमारः, साधयिष्यति च यत्नमन्तरेणापराण्यपि कृच्छ्रसाध्यानि प्रयोजनानि प्रायेण' [श] इति जल्पत्येव तस्मिन् स कैवर्तनायकः सविधमुपससर्प, क्षितितलोपसर्पिणा च शिरसा प्रदर्शितादरः कृत्वा प्रणाममतिचिरप्रणयीव स्पष्टवर्णोच्चारया गिरा सप्रगल्भमुवाच—'युवराज ! त्वदीयविजयप्रयाणघोषणानुपदमेव सागरोपकण्ठमनुप्राप्तोऽहम्, आगत्य च मया कृतानि सर्वाण्यपि सुसूत्राणि यानपात्राणि, प्रगुणिताः समाहृतसमग्रोपकरणाः पोताः, पुञ्जितं तेष्वतिप्राज्यमशनम्, आपूरितानि स्वादुना सलिलेन कृत्स्नान्युदकपात्राणि, समारोपितमप्रमाणमिन्धनम्; [ष]। अपरोऽपि

तीत्यर्थः। पुनः **मुखान्तरक्षिप्तदुन्दुभमणिः** मुखान्तरे–मुखमध्ये, क्षिप्तः-निहितः, दुन्दुभमणिः-दुन्दुभस्य–जलसर्पस्य, मणिर्येन तादृशः, **इतरनाविक इव** अन्यकर्णधार इव, **दिवसमपि** सम्पूर्णदिनं व्याप्यापि, **निराकुलः** स्वस्थः सन्, **वसति** तिष्ठति, क्वेत्याह–**रसातलगम्भीरे** पातालावधिनिम्ने, **अम्भसि** जले, **प्रकृष्टजाङ्गुलिक इव** प्रकृष्टः–उत्कृष्टो यो जाङ्गुलिकः–जाङ्गुलीं–विषविद्यामधीते वेद वा यः सः, विषवैद्यो गारुडिको वेत्यर्थः, स इव, **दुरुत्तरास्वपि** दुष्परिणामास्वपि, मृत्युजनिकास्वपीत्यर्थः, **विषमोदकविपत्सु** विषमभूतासु–अनन्यसमासु दारुणासु वा, उदकविपत्सु–जलजन्यविपत्तिषु, पक्षे विषमिश्रिता ये मोदकाः–मिष्टान्नविशेषाः, तज्जन्यविपत्सु–तज्जन्यव्याधिषु, न **मुह्यति** मोहमनुभवति, किन्तु धीरहृदय एव तिष्ठतीत्यर्थः। पुनः **तैस्तैः** अनेकविधैः, **अञ्जनैः** नयनसंस्कारकजलजन्तुवसादिद्रव्यैः, **अञ्जितेक्षणः** लिप्तलोचनः, **क्षणदास्वपि** रात्रिष्वपि, **उपजातयोगिज्ञान इव** उत्पन्नयोगजदृष्टिरिव, **समस्तवस्तुजातं** निखिलवस्तुगणम्, **विज्ञातनिरवशेषविशेषं** स्वविज्ञातसमग्रभेदं यथा स्यात् तथा, **आवेदयति** बोधयति [व]। **सर्वथा** सर्वप्रकारेण, **योग्यः** निपुणः, अयम्, **अस्मिन्नवसरे** समुद्रयात्रावसरे, **स्वनावः** स्वकीयनौकायाः, **कर्णधारतां** वाहकताम्, **नेतुं** प्रापयितुम्, **च** पुनः, **आत्मनः** स्वस्य, **प्रणयीकर्तुं** सख्यमापादयितुं, **युज्यते** उचितः। **हि** यतः, **प्रगल्भवचसा** निर्भीकवादिना, **परेङ्गिताकारज्ञेन** परेषाम्, इङ्गितः–चेष्टाविशेषान्वितः, य आकारस्तज्ज्ञेन, तत्परिचयचतुरेण, **भक्तिमता** पूज्यजनप्रीतिमता, **च** पुनः, **प्रक्रमागतव्याहारिणा** प्रासङ्गिकार्थवादिना, **अनेन** तारकेण, सर्वदा **प्रतिपन्नसख्यः** अधिगतमैत्रीकः सन्, **कुमारः** समरकेतुः, भवानित्यर्थः, **अलघुविस्तारमपि** अत्यन्तविस्तृतमपि, **भगवन्तम्** ऐश्वर्यवन्तम्, **अवारपारम्** उभयकुलान्वितम्, **पारावारं** समुद्रम्, **सुखेन** अनायासेन, **लङ्घयिष्यति** तरिष्यति, **च** पुनः, **यत्नम्** आयासम्, **अन्तरेणापि** विनापि, **अपराण्यपि** अन्यान्यपि, **कृच्छ्रसाध्यानि** आयाससाध्यानि, **प्रयोजनानि** फलानि, **प्रायेण** बाहुल्येन, **साधयिष्यति** सम्पादयिष्यति [श]। **इति** इत्थं, **तस्मिन्** यक्षपालिते, **जल्पत्येव** कथयति सत्येव, **स** तारकाख्यः, **कैवर्तनायकः** कर्णधाराध्यक्षः, **सविधं** निकटम्, **उपससर्प** उपाजगाम। **च** पुनः, **प्रदर्शितादरः** प्रकटितादरः सन्, **क्षितितलोपसर्पिणा** भूतलावनम्रेण, **शिरसा** मस्तकेन, **प्रणामम्** अभिवादनम्, कृत्वा, **अतिचिरप्रणयीव** अतिप्राचीनस्नेहीव, **स्पष्टवर्णोच्चारया** स्फुटवर्णोच्चारणिकया, **गिरा** वाचा, **सप्रगल्भं** सप्रौढिकम्, **उवाच** उक्तवान्। किमित्याह–**युवराज !** भो नृपकुमार !, अहं **त्वदीयविजयप्रयाणघोषणानुपदमेव** त्वदीयं–भवदीयं, यद् विजयोद्देश्यकं, प्रयाणं–प्रस्थानं, तस्य या घोषणा–सूचना, तदनुपदमेव–तदनन्तरमेव, **सागरोपकण्ठं** समुद्रनिकटम्, **अनुप्राप्तः** आगतः, **आगत्य च** उपस्थाय च, मया **सर्वाण्यपि** समस्तान्यपि, **यानपात्राणि** प्रवहणानि, **सुसूत्राणि** सुष्ठु सूत्रबद्धानि, **कृतानि** सम्पादितानि, पुनः **समाहृतसर्वोपकरणाः** संगृहीतसमग्रोपकरणाः, **पोताः** लघुप्रवहणानि, **प्रगुणिताः** सज्जिताः, पुनः **तेषु** पोतेषु, **अतिप्राज्यम्** अतिप्रचुरम्, **भोजनं** भोजनीयं वस्तु, **पुञ्जितं** राशीकृतम्, पुनः **कृत्स्नानि** सकलानि, **उदकपात्राणि** जलपात्राणि, **स्वादुना** मधुरेण, **सलिलेन** जलेन, **आपूरितानि** पूर्णीकृतानि, पुनः **अप्रमाणम्** अपरिच्छिन्नं, प्रचुरतरमित्यर्थः, **इन्धनं** काष्ठम्, **समा-**

देहस्थितिसाधनमधिकृतैर्यः कश्चिदर्पितः सोऽपि सर्पिस्तैलकम्बलौषधप्रायः प्रायशो विन्यस्तः समस्तोऽपि द्वीपान्तरदुरापो द्रव्याणां कलापः, स्थापिताश्च सर्वतः समारोपितसमर्थनाविकास्तीर्थेषु दृढकाष्ठगुम्फनिष्ठुरा नावः, प्रतिष्ठते अनवरतमारुह्यारुह्य तासु गृहीतनानाविधास्त्रः शिबिरवीरलोकः, निवर्तते नगरसंमुखमखिलोऽपि तत्तत्कार्यमङ्गीकृत्य प्रवर्तितः प्रस्थानकाले रथाश्ववारणादिर्नौतन्त्रयात्रायामनुपयुक्तः सेनापरिच्छदः, कुमारस्यापि शत्रुविजयाय सज्जीकृता विजययात्राभिधाना नौः, यदि न कश्चित् कार्यविलम्बस्ततः प्रस्थीयतामभ्युदयाय' इति [स]। अहं तु तद्वचनानन्तरमेव सत्वरमुपसृत्य मौहूर्तिकेन शंसितप्रस्थानक्षणस्तत्क्षणमेव राजलोकपरिवृतो गत्वा समासन्ननीरमर्णवतीरदेशं, तथैवोर्ध्वस्थितः पुरस्थितानुत्तमाङ्गावर्जनेन विनयाञ्जलिकर्मणा नर्मालापेन स्मितेन स्निग्धावलोकितेन च यथोचितं प्रयुक्तेन कृतानुव्रजनान् स्वाभिजनवृद्धबान्धवान् सुहृदो राजसेवकान् नगरलोकांश्च प्रत्येकं व्यसर्जयम् [ह]। अथ ससंभ्रमेण नौर्नौरिति समकालमुच्चैर्व्याहरतः प्रतीहारवृन्दस्य शब्दमाकर्ण्य तूर्णमानीयत तटाभ्यर्णमर्णवस्य नाविकगणेन नौः, तां

टिप्पनकम्—स्वाभिजनः-स्वकुलम् [ह]।

रोपितं निहितम् [ष]। पुनः **अपरोऽपि** तदन्योऽपि, **देहस्थितिसाधनं** शरीरोपकरणभूतः, **सर्पिस्तैलकम्बलौषधप्रायः** घृततैलादिप्रचुरः, **द्वीपान्तरदुरापः** अन्यद्वीपदुर्लभः, यः **कश्चित्** कोऽपि, **द्रव्याणां** वस्तूनाम्, **कलापः** समूहः, **अधिकृतैः** नियुक्तजनैः, **अर्पितः** दत्तः, **सोऽपि** असावपि, **प्रायशः** प्रायेण, समस्तोऽपि, **विन्यस्तः** निवेशितः। **च** पुनः, **समारोपितसमर्थनाविकाः** समारोपिताः—सम्यगारोहिताः, समर्थाः—नौवाहनक्षमाः, नाविकाः—कर्णधारा यासु ताः, पुनः **तीर्थेषु** तत्तजलावतारस्थलेषु, **दृढकाष्ठगुम्फनिष्ठुराः** प्रबलकाष्ठनिवेशनदृढाः, **नावः** नौकाः, **सर्वतः** समन्ततः, **स्थापिताः** निवेशिताः। **गृहीतनानाविधास्त्रः** धृतविविधास्त्रः सन्, **शिबिरवीरलोकः** सेनाशूरजनः, **तासु** नौषु, **अनवरतं** सततम्, **आरुह्य आरुह्य** प्रत्येकम् आरुह्य, **प्रतिष्ठते** प्रस्थानं करोति। **नौतन्त्रयात्रायां** नौसाध्ययात्रायाम्, **अनुपयुक्तः** अनपेक्षितः, **अखिलोऽपि** सर्वोऽपि, **रथाश्ववारणादिः** रथ-तुरग-गजप्रभृतिः, **सेनापरिच्छदः** सेनापरिवारः, तत्तत्कार्यम्, **अङ्गीकृत्य** स्वीकृत्य, **प्रवर्तितः** प्रेरितः सन्, **प्रस्थानकाले** प्रयाणवेलायाम्, नगरसम्मुखं **निवर्तते** प्रत्यावर्तते। **कुमारस्यापि** भवतोऽपीत्यर्थः, **शत्रुविजयाय** शत्रुविजयनिमित्तम्, **विजययात्राभिधाना** अन्वर्थतदाख्या, नौः, **सज्जीकृता** सज्जिता। यदि **कश्चित्** कोऽपि, **कार्यविलम्बः** प्रस्थानविलम्बो न, अस्तीति शेषः, तर्हि **अभ्युदयाय** शत्रुविजयाय, **प्रस्थीयतां** प्रस्थानं विधीयताम् [स]। **अहं तु** अहं समरकेतुस्तु, **तद्वचनानन्तरमेव** तत्कथनानन्तरमेव, **सत्वरं** शीघ्रम्, **उपसृत्य** उपगत्य, **मौहूर्तिकेन** मुहूर्ताभिज्ञेन, **शंसितप्रस्थानक्षणः** सूचितप्रस्थानमुहूर्तः सन्, **तत्क्षणमेव** तत्कालमेव, **राजलोकपरिवृतः** नृपजनपरिवेष्टितः, **समासन्ननीरम्** अतिसन्निहितजलम्, **अर्णवतीरदेशं** समुद्रतटप्रदेशम्, गत्वा, **तत्रैव** तत्तीरदेश एव, **तथैवेति** पाठे तेनैव प्रकारेण, राजलोकपरिवृताकारेणैवेत्यर्थः, **ऊर्ध्वस्थितः** तीरदेशोपरि अनुपविष्टः सन्, **पुरः स्थितान्** अग्रे स्थितान्, **स्वाभिजनवृद्धबान्धवान्** स्ववंश्यान् वयोवृद्धबन्धुजनान्, **सुहृदः** मित्राणि, **च** पुनः, **राजसेवकान्** राजशुभचिन्तकान्, **नगरलोकान्** नगरवास्तव्यजनान्, **प्रत्येकम्** एकैकम्, **व्यसर्जयं** प्रत्यावर्तयम्, कीदृशान्? **यथोचितं** यथायोग्यम्, **प्रयुक्तेन** कृतेन, **उत्तमाङ्गावर्जनेन** उत्तमाङ्गस्य—मस्तकस्य, आवर्जनेन—किञ्चिन्नमनेन, पुनः **विनयाञ्जलिकर्मणा** विनयपूर्वकाञ्जलिबन्धरूपकार्येण, पुनः **नर्मालापेन** प्रेमपूर्वकाभाषणेन, **स्मितेन** मन्दहासेन, **च** पुनः, **स्निग्धावलोकितेन** स्नेहपूर्णावलोकनेन, **कृतानुव्रजनान्** कृतानुगमनान्, कतिपयपदान्यनुगम्येत्यर्थः [ह]।

अथ अनन्तरम्, **नौर्नौः** आनीयतामिति शेषः, इति **उच्चैः** उच्चस्वरेण, **समकालं** युगपत्, **व्याहरतः** उद्घोषयतः, **प्रतीहारवृन्दस्य** द्वारपालवर्गस्य, **शब्दम्** उद्घोषम्, **आकर्ण्य** श्रुत्वा, **ससम्भ्रमेण** संभ्रान्तेन, **नाविकगणेन** कर्ण-

चाहमुपसृत्य प्रथमकृतसागरप्रणामो भक्तिप्रवणेन चेतसा शिरसा च बद्धाञ्जलिः प्राणंसिषम्, अध्यरोहं च पूर्वाधिरूढेन दूरमवनम्य दत्तहस्तावलम्बस्तारकेण [क्ष]। सपरिग्रहे च पुरोभागवर्तिनं मत्तवारणकमध्यमध्यास्य बद्धासने मयि कृतोत्तरीयसंवरणाश्चरणाभ्यामेव सत्वरमुपसृत्य सर्वे राजपुत्राः सपरिजनाः स्वानि स्वानि यानपात्राण्यधिरुरुहुः, प्रतस्थिरे च परिवार्य माम् [ज्ञ]।

अथ श्रुतिपथप्रमाथी हसन्निव समन्ततः प्रसृतनौनिवहसंक्षोभितस्य वारिधेर्धैर्यम्, कुर्वन्निव द्वीपान्तरवासिनां सर्वसामन्तानामाह्वानम्, ग्राहयन्निव सैन्यावकाशदानाय दश दिशोऽवधानम्, दध्वान ध्वजिन्या मुखे मुखरः प्रयाणमङ्गलशङ्खः [अ]। तस्य चानुप्रहतझल्लरीपटहपणवादिवाद्यनादानुसृतेन बन्दिवृन्दजयशब्दकोलाहलशालिना शकुनपाठकश्लोककलकलबहलेन गृहीततारस्वानगायनीगीतरवतरङ्गितेन विधृतकुसुमाक्षतद्विजातिमण्डलीमन्त्रोच्चारस्फारितेन तिरयता दिगन्तराणि तारगम्भीरेण रणितेन द्विगुणीकृतगमनरभसः, [आ], स्थगितनिःशेषसंधिरन्ध्रया दासपुरन्ध्रिदत्तपिष्टपञ्चाङ्गुलया ध्वजाग्रबद्धाभिनववर्णांशुकपताकया

धारवर्गेण, **अर्णवस्य** समुद्रस्य, **तटाभ्यर्णे** तटनिकटम्, **तूर्णं** सत्वरम्, नौः, **आनीयत** आनीता। **च** पुनः, अहम्, उपसृत्य, **प्रथमकृतसागरप्रणामः** पूर्वं कृतसमुद्राभिवादनः, **बद्धाञ्जलिः** रचिताञ्जलिः सन्, **भक्तिप्रवणेन** प्रीत्युन्मुखेन, **चेतसा** हृदयेन, **शिरसा च** मस्तकेन च, **तां** नावम्, **प्राणंसिषं** प्रणतवान्। **च** पुनः, **पूर्वाधिरूढेन** पूर्वं तत्रारूढेन, तारकेण, **दूरं** दूरपर्यन्तम्, **अवनम्य** आनम्रीभूय, **दत्तहस्तावलम्बः** दत्तः–कारितः, हस्तावलम्बः–स्वकरावलम्बनं यस्मै तादृशः सन्, **अध्यारोहम्** अध्यारूढवानहम् [क्ष]। **च** पुनः, **पुरोभागवर्तिनं** अग्रभागवर्तिनम्, **मत्तवारणकमध्यम्** मत्तान् वारयतीति व्युत्पत्त्या प्रमादजातपतनादिनिवारकस्थानविशेषमध्यभागमित्यर्थः, मत्तवारणं च सामान्यतो लोके मरण्डा इति नाम्ना ख्यातम्, **अध्यास्य** उपविश्य, **सपरिग्रहे** परिजनसहिते, मयि, **बद्धासने** अधिष्ठितासने सति, **कृतोत्तरीयसंवरणाः** विहितोत्तरीयपटोपसंहाराः, **सपरिजनाः** सपरिवाराः, सर्वे **राजपुत्राः** राजकुमाराः, **चरणाभ्यामेव** स्वस्वपादाभ्यामेव, **सत्वरं** शीघ्रम्, **उपसृत्य** उपगत्य, **स्वानि स्वानि** स्वकीयानि स्वकीयानि, **यानपात्राणि** पोतान्, **अधिरुरुहुः** अभिरूढवन्तः। **च** पुनः, माम्, **परिवार्य** परिवेष्ट्य, **प्रतस्थिरे** प्रस्थिताः [ज्ञ]।

अथ अनन्तरम्, **श्रुतिपथप्रमाथी** श्रवणपथाभिघाती, **मुखरः** शब्दायमानः, **प्रयाणमङ्गलशङ्खः** प्रस्थानकालिकमङ्गलार्थशङ्खः, **ध्वजिन्याः** सेनायाः, **मुखे** अग्रभागे, **दध्वान** ध्वनितवान्, किं कुर्वन्निव? **समन्ततः** सर्वतः, **प्रसृतनौनिवहसंक्षोभितस्य** प्रसृतेन नौनिवहेन-नौगणेन, संक्षोभितस्य–उद्वेलितस्य, **वारिधेः** समुद्रस्य, **धैर्यं** धीरताम्, **हसन्निव** हासेन निन्दन्निव, पुनः **द्वीपान्तरवासिनाम्** अन्यद्वीपवास्तव्यानाम्, **सर्वसामन्तानां** निखिलक्षुद्रनृपाणाम्, **आह्वानं** स्वसमीपानयनं कुर्वन्निव, पुनः **सैन्यावकाशदानाय** सैनिकसमावेशनाय, **दश दिशः** दशसंख्यका दिशः, **अवधानं** तत्परताम्, **ग्राहयन्निव** प्रापयन्निव [अ]। **अनुप्रहतझल्लरी-पटह-पणवादिवाद्यनादानुसृतेन** अनु–पश्चात्, प्रहतानां–ताडितानाम्, झल्लरी-पटह-पणवादीनां–तत्संज्ञकानां, वाद्यानां–वाद्यविशेषाणां, नादेन–ध्वनिना, अनुसृतेन अनुगतेन, पुनः **बन्दिवृन्दजयशब्दकोलाहलशालिना** वन्दिवृन्दस्य–स्तुतिपाठकगणस्य, ये जयशब्दाः–जयकाराः, तत्कोलाहलशोभिना, पुनः **शकुनपाठकश्लोककलकलबहलेन** शकुनपाठकानां–प्रस्थानकालिकमङ्गलपाठकानाम्, ये श्लोकाः तत्कलकलबहलेन–तत्कोलाहलप्रचुरेण, पुनः **गृहीततारस्वनगायनीगीतरवतरङ्गितेन** गृहीतः–आश्रितः, तारस्वनः–उच्चध्वनिर्याभिस्तादृशीनां, गायनीनां–गायिकानां, गीतरवैः–गानशब्दैः, तरङ्गितेन–प्रचितेन, पुनः **विधृतकुसुमाक्षतद्विजातिमण्डलीमन्त्रोच्चारस्फारितेन** विधृतं–विशेषेण धृतं, कुसुमं–पुष्पम्, अक्षतम्–आर्द्रतण्डुलाश्च यया तादृश्या, द्विजातिमण्डल्या–द्विजसमूहेन यो मन्त्रोच्चारः–आशीर्वादगर्भितमन्त्रोच्चारणं, तेन स्फारितेन–विस्तारितेन, पुनः **दिगन्तराणि** दिङ्मध्यानि, **तिरयता** स्थगयता, पुनः **तारगम्भीरेण** उच्चगम्भीरेण, **तस्य** शङ्खस्य, **रणितेन** ध्वनिना, **द्विगुणीकृतगमनरभसः** द्विगुणीकृतगमनवेगः [आ]। एवंविधोऽहं समरकेतुः, पुनः कीदृशः? **नावा** नौकया, **उह्यमानः** तार्यमाणः, कीदृश्या? **स्थगितनिःशेषसन्धिरन्ध्रया** स्थगितानि–पूरितानि, निःशेषाणि-समस्तानि, सन्धिरन्ध्राणि–सन्धिच्छिद्राणि यस्यास्तादृश्या, पुनः **दासपुरन्ध्रिदत्तपिष्टपञ्चाङ्गुलया** दासस्य–भृत्यस्य, पुरन्ध्र्या–कुटुम्बिन्या, दत्तं–निवेशितम्,

समाहृतसमस्तनिजोपकरणेन सत्यपि स्वकर्मसावधाने संनिधानवर्तिनि नाविकव्राते विनीततप्रतिपादनाय कर्णधारतां प्रतिपद्य सद्यो धृतारित्रेण तारकेणाधिष्ठितया पृष्ठतोऽनुकूलपवनास्फालनतरङ्गितेन फेनपाण्डुना सलिलसंघातेन पुरस्ताच्च सितपटेन प्रवर्त्यमानया व्रजन्त्याप्यतिजवेन दुर्विभावत्वाद् गतेरनुज्झितस्थानयेवोह्यमानया नावोह्यमानः [इ], प्रतिवेलमपसरत्सानुविस्तारान् निरन्तरोपलक्ष्यमाणसान्तरालतरुगणान् सुवेलगिरिदर्शनाय सेनया सह प्रचलितानिवावलोकयन् वेलावनाचलान् [ई], अलघुविस्तारपिहितदिक्चक्रेण चकितनक्रचक्रोन्मुच्यमानपुरोवर्त्मना पवनासूत्रितविचित्रभङ्गाभिर्गाढसंमर्दभयादूर्मिमालाभिरिव वारिधेरन्तरिक्षमुत्पतिताभिः फेनमुक्ताफलशङ्खधवलाभिर्ध्वजपताकाभिरुपपादितवनावनीविलासेन संसर्पता विविधकवचशस्त्रशिरस्त्रपूरितेन पोतसंतानेन पर्वतसेतुनेवापरेण सीमन्तयन् दक्षिणां दिशं क्षणेनैवादृश्यतीरभागमविभाव्यमान-

---

टिप्पनकम्—ऊह्यमानया वितर्क्यमाणया [इ]।

पिष्टपञ्चाङ्गुलं-पिष्टातकाभिधवर्णचूर्णद्रवार्द्रितं, पञ्चाङ्गुलं-पञ्चाङ्गुलि समाहारो यस्यां तादृश्या, पुनः **ध्वजाग्रबद्धाभिनववर्णांशुकपताकया** ध्वजाग्रे-पताकास्तम्भाग्रे, बद्धा-लम्बिता, अभिनववर्णांशुकपताका-नवीनवर्णविशिष्टश्लक्ष्णवस्त्ररूपपताका यस्यां तादृश्या, पुनः **समाहृतसमस्तनिजोपकरणेन** समाहृतानि-संगृहीतानि, समस्तानि-अशेषाणि, निजोपकरणानि-निजानि नौवहनोपकरणवस्तूनि येन तादृशेन, तथा **स्वकर्मसावधाने** स्वकार्यविहितहृदये, **नाविकगणे** कर्णधारगणे, **सन्निधानवर्तिनि** निकटवर्तिनि, सत्यपि, **विनीतताप्रतिपादनाय** विनीतताप्रकटनाय, **कर्णधारतां** नाविकतां, प्राप्य, **सद्यः** तत्क्षणम्, **धृतारित्रेण** धृतं-गृहीतम्, अरित्रं-जलोत्क्षेपकं येन तादृशेन, तारकेण, **अधिष्ठितया** अध्यासितया, पुनः **पृष्ठतः** पश्चात्, **अनुकूलपवनास्फालनतरङ्गितेन** अनुकूलवाय्वाघाततरङ्गितेन, **फेनपाण्डुना** फेनप्रयुक्तपाण्डुवर्णेन, **सलिलसंघातेन** जलसमूहेन, **पुरस्ताच्च** अग्रतश्च, **सितपटेन** श्वेतवस्त्रेण, तदात्मकपताकयेत्यर्थः, **प्रवर्त्यमानया** प्रेर्यमाणया, पुनः **अतिजवेन** अतिवेगेन, **व्रजन्त्यापि** गच्छन्त्यापि, **गतेः** गमनस्य, **दुर्विभावत्वात्** दुर्लक्ष्यत्वात्, **अनुज्झितस्थानयेव** अत्यक्तस्थानयेव, **ऊह्यमानया** तर्क्यमाणया [इ]। पुनः कीदृशोऽहम्? **प्रतिवेलं** प्रतितटम्, **अपसरत्सानुविस्तारान्** अपसरन्तः-अपगच्छन्तः, सानुविस्ताराः-पर्वतसम्बन्धिसमप्रदेशविस्तारा येषु तादृशान्, **निरन्तरोपलक्ष्यमाणसान्तरालतरुगणान्** निरन्तरम्-अव्यवहितं यथा स्यात् तथा, उपलक्ष्यमाणः-दृश्यमानः, सान्तरालानां-व्यवहितानां, तरूणां गणः-समूहो येषु तादृशान्, **वेलावनाचलान्** तटस्थितवनव्याप्तपर्वतान्, **अवलोकयन्** निरीक्षमाणः, कीदृशानिव? **सुवेलगिरिदर्शनाय** सुवेलाख्यपर्वतदर्शनाय, सेनया सह **प्रचलितानिव** प्रस्थितानिव, अत्र तरुगणस्य सेनास्थानीयत्वं पर्वतस्य च नृपस्थानीयत्वं बोध्यम् [ई]। पुनः कीदृशोऽहम्? **पोतसंतानेन** जलयानगणेन, दक्षिणां दिशं **सीमन्तयन्** केशवेशयुततामिवापादयन्, व्याप्नुवन्नित्यर्थः। कीदृशेन पोतसन्तानेन? **अलघुविस्तारपिहितदिक्चक्रेण** अलघुविस्तारेण-अतिविस्तारेण, पिहितम्-आवृतम्, दिक्चक्रं-दिङ्मण्डलं येन तादृशेन, पुनः **चकितनक्रचक्रोन्मुच्यमानपुरोवर्त्मना** चकितेन-सम्भ्रान्तेन, नक्रचक्रेण-जलजन्तुगणेन, उन्मुच्यमानं-परित्यज्यमानं, पुरोवर्त्म-अग्रभागो यस्य तादृशेन, पुनः **ध्वजपताकाभिः** ध्वजदण्डलम्बितपताकाभिः, **उपपादितवनावनीविलासेन** उपपादितः-निष्पादितः, वनावन्याः-लिङ्गसाम्यात् वनभूमिरूपवनितायाः, विलासः-शृङ्गारचेष्टा येन तादृशेन, कीदृशीभिः? **पवनासूत्रितविचित्रभङ्गाभिः** पवनेन-स्रोद्गमितवायुना, आ-समन्तात्, सूत्रिताः-रचिताः, विचित्राः-विलक्षणाः, भङ्गाः-वक्रभावा विच्छित्तयो वा यासां तादृशीभिः, पुनः **गाढसंमर्दभयात्** अत्यन्तपोतसंघर्षभयात्, **अन्तरिक्षं** गगनम्, **उत्पतिताभिः** उच्छलिताभिः, **वारिधेः** समुद्रस्य, **ऊर्मिमालाभिरिव** तरङ्गमालाभिरिवेत्युत्प्रेक्षा, पुनः **फेन-मुक्ताफल-शङ्खधवलाभिः** फेन-मुक्ताफल-शङ्खसदृशश्वेताभिः, यद्वा फेन-मुक्ताफल-शङ्खैर्धवलाभिरिति ऊर्मिमालाभिरित्यस्यापि विशेषणम्, पुनः **संसर्पता** सञ्चरता, पुनः **विविधकवचशस्त्रशिरस्त्रपूरितेन** विविधैः, कवचैः-वर्मभिः, शस्त्रैः-खड्गादिभिः, शिरस्त्रैः-शिरस्त्राणकरणविशेषैः, पूरितेन-पूर्णेन, केनेव? **अपरेण** अन्येन पूर्वं रामसेनासंतरणसमयाद् भिन्नेनेवेति भावः, **पर्वतसेतुनेव** पर्वतरूपसेतुनेव, **क्षणेनैव** निमेषमात्रेणेव,

पर्यन्तग्रामनगरसंनिवेशं प्रदेशमासादयम् [उ] । ततः प्रभृति सैकतेषु क्षितिमर्कोपलेषु ज्वलनोद्गतिं जलमानुषेषु जनपदप्रचारमशनिभीतागतक्षितिधरेषु पक्षिव्यवहारं जलचरेषु तिर्यग्जातिं विद्रुमवनेषु काननस्फातिमीक्षमाणः [ऊ], पृष्ठतो वहद्भिरप्रतीक्षितसमग्रसंगलत्पदातितन्त्रैः श्रुत्वा श्रुत्वानुचरपुरुषेभ्यः प्रयाणवार्तामतिजवेन निजमण्डलेभ्यः प्रधावितैरनीकपतिभिः सामन्तैश्च भयसंभ्रान्तैरनवरतमनुसृतगतिः [ऋ], गत्वा स्थानस्थानेषु लब्धोदयानहितोपचारैः परमुपचयं प्राप्तान् सर्वतः समासादितप्रसरानाविष्कृतानेकविकाराननवरतकृतरुजो जनस्य दुष्टव्रणानिव नृपान् कांश्चित् तन्त्रशक्त्या कांश्चिन्मन्त्रशक्त्या कांश्चिन्निशितशस्त्रव्यापारेण कांश्चित् क्षारैर्दूतवचनैः कांश्चिद् रक्तापकर्षणेन कांश्चित् तीक्ष्णक्षुरप्रभेदेन कांश्चिदेकदेशदहनेन कांश्चित् सर्वमण्डलोपमर्दनेन दर्पज्वरमत्याजयम् [ॠ], उज्झितोष्मणश्च प्रकटितप्रसन्नमुखरागान् विगलितोन्नतीनविध-

---

टिप्पनकम्—मण्डलं-वृत्तता देशश्च [ॠ]।

अदृश्यतीरभागम् अदृश्यः–अनुपलक्ष्यः, तीरभागो यस्मिंस्तादृशम्, **अविभाव्यमानपर्यन्तग्रामनगरसन्निवेशम्** अविभाव्यमानः–अप्रतीयमानः, पर्यन्तग्रामनगराणां–प्रान्तस्थग्रामनगराणां, सन्निवेशो यस्मिंस्तादृशम्, अतिदूरमित्यर्थः, **प्रदेशं** समुद्रमध्यदेशम्, **आसादयं** प्राप्तवान् अस्मि [उ]। **ततः** तस्मात्, प्रदेशादित्यर्थः, **प्रभृति** आरभ्य, न तु ततः प्राक्, **सैकतेषु** सिकतामयस्थलेषु, **क्षितिं** भूमिम्, पुनः **अर्कोपलेषु** सूर्यकान्तशिलासु, न त्वन्यत्र, **ज्वलनोद्गतिं** पावकोद्गमम्, पुनः **जलमानुषेषु** जलीयमनुष्येषु न त्वन्यमानुषेषु, **जनपदप्रचारं** मनुजचरणव्यवहारम्, पुनः **अशनिभीतागतक्षितिधरेषु** अशनेः–वज्रात्, भीताः, अत एव आगता ये क्षितिधराः–पर्वताः, तेष्वेव, **पक्षिव्यवहारं**–पक्षिणः–पक्षवन्त इमे इत्यादिव्यवहारम्, **जलचरेषु** जलीयहस्त्यादिषु, **तिर्यग्जातिं** पशुजातिम्, पुनः **विद्रुमवनेषु** प्रवालवनेषु, **काननस्फातिं** वनविस्तारम्, **ईक्षमाणः** पश्यन् [ऊ]। पुनः **भयसम्भ्रान्तैः** भयसंक्षुब्धैः, **अनीकपतिभिः** सेनानायकैः, **च** पुनः, **सामन्तैः** क्षुद्रनृपैः, **अनवरतं** निरन्तरम्, **अनुसृतगतिः** अनुगतगतिकः, कीदृशैः ? **पृष्ठतः** पश्चाद्, **वहद्भिः** गच्छद्भिः, **अप्रतीक्षितसमग्रसंगलत्पदातितन्त्रैः** अप्रतीक्षितः–अनपेक्षितः, समग्राणां–समस्तानां, संगलतां–सार्थभ्रष्टानां, पदातीनां–पादगामिसैन्यानां, तन्त्रः–समूहो यैस्तादृशैः, पुनः **अनुचरपुरुषेभ्यः** अनुचरजनेभ्यः, **प्रयाणवार्तां** मदीयप्रस्थानप्रवृत्तिम्, **श्रुत्वा श्रुत्वा** असकृत् श्रवणगोचरीकृत्य, **अतिजवेन** अतिवेगेन, **निजमण्डलेभ्यः** स्वस्वराष्ट्रेभ्यः, **प्रधावितैः** कृतप्रधावनैः [ऋ]।

गत्वा तत्र तत्रोपसृत्य, **जनस्य** लोकसम्बन्धिनः, **दुष्टव्रणानिव** दुष्टानि–क्षरद्रक्तपूयादीनि क्षतानीव, **स्थानस्थानेषु** तत्तत्स्थानेषु, **लब्धोदयान्** प्राप्ताधिपत्यान्, पक्षे प्राप्तोद्गमान्, पुनः **अहितोपचारैः** लोकाहितकरणैः, पक्षे अपथ्याचरणैः, **परम्** उत्कृष्टम्, **उपचयम्** अभ्युदयं, पक्षे वृद्धिं, प्राप्तान्, पुनः **सर्वतः** सर्वत्र, **समासादितप्रसरान्** प्राप्तप्रसारान्, पुनः **आविष्कृतानेकविकारान्** आविष्कृताः–प्रकटिताः, अनेके विकाराः–काम-क्रोध-लोभ-मोह-मदरूपाः, पक्षे व्यथा यैस्तादृशान्, पुनः **अनवरतकृतरुजः** निरन्तरविहितलोकपीडान्, पक्षे निरन्तरविहितज्वरान्, **कांश्चित्** कतिपयान्, **नृपान्** प्रतिकूलनृपतीन्, **तन्त्रशक्त्या** प्रधानशक्त्या, पक्षे औषधशक्त्या, पुनः **कांश्चित्** कतिपयान्, **मन्त्रशक्त्या** मन्त्रणबलेन, पक्षे मन्त्रमाहात्म्येन, पुनः **कांश्चित्** कतिपयान्, **निशितशस्त्रव्यापारेण** तीक्ष्णशस्त्रप्रहारेण, पक्षे तीक्ष्णच्छुरिकयोद्भेदनेन; पुनः **कांश्चित्** कतिपयान्, **क्षारैः** रूक्षैः, पक्षे क्षारद्रवनिक्षेपैः, **दूतवचनैः** दूतोक्तिभिः, पुनः **कांश्चित्** कतिपयान्, **रक्तापकर्षणेन** रुधिराकर्षणेन, पक्षे अनुरक्तजनापरञ्जनेन, पुनः **कांश्चित्** कतिपयान्, **तीक्ष्णक्षुरप्रभेदेन** तीक्ष्णेन, क्षुरेण–बाणेन, यद्वा क्षुरप्रेण–बाणविशेषेण, यः प्रभेदः–मार्मिकभेदनं, भेदः–सामान्यतो भेदनं तेन, पक्षे तीक्ष्णो यः क्षुरः–नापितास्त्रं तेन यः प्रभेदः–प्रकृष्टभेदनम्, यद्वा क्षुरप्रः–घासच्छेदनास्त्रं तेन यो भेदस्तेन, पुनः **कांश्चित्** कतिचित्, **एकदेशदहनेन** एकदेशस्य–शरीरावयवस्य, एकजनपदस्य च, पक्षे व्रणैकदेशस्य, दहनेन–दाहेन, पुनः **कांश्चित्** कतिचित्, **सर्वमण्डलोपमर्दनेन** सर्वस्य–समग्रस्य, मण्डलस्य–देशस्य अमात्यादिवर्गस्य वा, पक्षे वर्तुलव्रणभागस्य, उपमर्दनेन–विघट्टनेन, पक्षे समीपतो मर्दनेन, **दर्पज्वरं** गर्वोष्माणम्, **अत्याजयम्** व्यमोचयम् [ॠ]। **च** पुनः, **उज्झितोष्मण**

मानगतीनभिषेकविधिना पट्टबन्धेनान्यैश्च निर्वृतिकरै राज्यदानादिभिर्मधुरोपचारैः पुनस्तामेव प्राक्तनीं प्रकृतिमानयम् [ल] । आत्मीकृतासन्नसामन्तचक्रश्च क्रमेण निरन्तरक्रमुकवनानि, प्रतिनगरमुपलक्ष्यमाणानेकभूमिकप्रभूतप्रासादानि, स्थानस्थानदृश्यमाननानामणिसुवर्णरजताकराणि, तत इतः पुञ्जितमहाप्रमाणशुक्तिकूटप्रकटितमौक्तिकप्राचुर्याणि, चन्दनविटपवृतिपरिक्षेपरक्षितक्षेत्रवलयानि, संपतत्समुद्रचरमहापक्षिरक्षणाक्षणिकवनपालपालितारामबालवृक्षाणि, बन्धकीजनावन्ध्यग्रामतरङ्गिणीतीरतमालतरुनिकुञ्जानि, देशान्तरापतदनेकसांयात्रिकप्रवेशनिरवकाशपर्यन्तानि, दुर्गतगृहेष्वपि प्राप्यनरपतिभूषणोचितानन्तरत्नानि रेणुगगनयोत्सृज्य-

---

टिप्पनकम्—ऊष्मा–दर्पं उष्णत्वं च । **प्रसन्नमुखरागान्** एकत्र गताग्रभागरक्तत्वान्, अन्यत्र प्रसादवद्वक्त्रविकारान् । **विगलितोन्नतीन्** गतोदयांश्च [गतोदयान् विगलितवृद्धींश्च] । **अविद्यमानगतीन्** एकत्र अविद्यमानपूयप्रवाहान्, अन्यत्र अविद्यमानप्रचारान् । **अल्पैश्च निर्वृतिकरै राज्यदानादिभिर्मधुरोपायैः** एकत्र घृतादिवितरणैः, अन्यत्र राज्यादिप्रदानैः [ल] । क्रमुकं–पूगीफलम् । बन्धकी–स्वैरिणी [ल्छ] ।

मुक्तदर्पज्वरान्, पक्षे त्यक्ततापान्, पुनः **प्रकटितप्रसन्नमुखरागान्** प्रसन्नतावन्मुखविकारान् पक्षे प्रकर्षेण गताग्रभागरक्तत्वान्, पुनः **विगलितोन्नतीन्** निवृत्ताभ्युदयान्, पक्षे निवृत्तवृद्धीन्, पुनः **अविद्यमानगतीन्** अविद्यमानजीवनोपायान् अविद्यमानप्रचारान् वा, पक्षेऽविद्यमानपूयप्रवाहान्, तानिति शेषः, **अभिषेकविधिना** स्नपनविधिना, पक्षे प्रक्षालनविधिना, **पट्टबन्धेन** पट्टे–राजसिंहासने, बन्धेन–निवेशनेन, पक्षे व्रणोपरि वस्त्रवेष्टनेन, **च** पुनः, **अन्यैः** तदतिरिक्तैः, **राज्यदानादिभिः** राज्यार्पणप्रभृतिभिः, पक्षे **आज्यदानादिभिः** घृतदानादिभिः, **निर्वृतिकरैः** सुखजनकैः, **मधुरोपचारैः** प्रियचिकित्साभिः, पक्षे मनोज्ञव्यवहारैः, तामेव, **प्राक्तनीं** पुरातनीम्, **प्रकृतिं** राष्ट्रं पक्षे स्वभावं स्वस्थतामित्यर्थः, **आनयं** प्रापयम् [ल] । **च** पुनः, **आत्मीकृतासन्नसामन्तचक्रः** आत्मीकृतम्–आत्मतामापादितम्, स्वायत्तीकृतमित्यर्थः, आसन्नानां–सन्निहितानां, सामन्तानां–लघुनृपाणां, चक्रं–मण्डलं येन तादृशः सन्, **द्वीपान्तराणि** अन्यद्वीपान्, **प्रसाधयन्** परिभ्रमणेन अलङ्कुर्वन्, यद्वा वशीकुर्वन्नित्यर्थः, **सुवेलनामानं** तत्संज्ञकम्, **अचलराजं** पर्वतराजम्, **अव्रजम्** अगच्छम्, इत्यग्रेणान्वेति । कीदृशानि द्वीपान्तराणि? **निरन्तरक्रमुकवनानि** निरन्तराणि–निबिडानि, क्रमुकवनानि–पूगीफलकाननानि येषु तादृशानि, पुनः **प्रतिनगरं** नगरे नगरे, **उपलक्ष्यमाणानेकभूमिकप्रासादानि** उपलक्ष्यमाणाः–दृश्यमानाः, अनेकभूमिकाः–अनेकखण्डकाः, प्रभूताः–प्रचुराः, प्रासादाः–हर्म्याणि येषु तादृशानि, पुनः **स्थानस्थानदृश्यमाननानामणिसुवर्णरजताकराणि** स्थानस्थानेषु–तत्तत्स्थानेषु, दृश्यमानाः नानामणीनां–हीरकमौक्तिकादिमणीनां, सुवर्णानां रजतानां च, आकराः–खनयो येषु तादृशानि, पुनः **इतस्ततः** अत्र तत्र, **पुञ्जितमहाप्रमाणशुक्तिकूटप्रकटितमौक्तिकप्राचुर्याणि** पुञ्जितानां–संहतानां, महाप्रमाणानाम्–अधिकप्रमाणकानां, शुक्तीनां, कूटेन–राशिना, प्रकटितम्–आविष्कृतं, मौक्तिकानां–मुक्तामणीनां, प्राचुर्यं–बाहुल्यं येषु तादृशानि, पुनः **चन्दनविटपवृतिपरिक्षेपरक्षितक्षेत्रवलयानि** चन्दनविटपवृत्या–चन्दनशाखानिर्मितया, वृत्या–प्राकारेण, यः परिक्षेपः–परिवेष्टनं, तेन रक्षितं क्षेत्रवलयं–केदारमण्डलं येषु तादृशानि, पुनः **संपतत्समुद्रचरमहापक्षिरक्षणाक्षणिकवनपालरक्षितारामबालवृक्षाणि** संपतद्भ्यः आपतद्भ्यः, समुद्रचरेभ्यः–समुद्रसञ्चारिभ्यः, महापक्षिभ्यः–पक्षिराजेभ्यः, रक्षणे–पुष्पफलादिसंरक्षणे, अक्षणिकाः–स्थायिनः, व्यग्रा वा, ये वनपालाः–उद्यानपालाः, तैः रक्षिताः–पालिताः, आरामस्य–उद्यानस्य, बालवृक्षाः–नववृक्षा येषु तादृशानि, पुनः **बन्धकीजनावन्ध्यग्रामतरङ्गिणीतीरतमालतरुनिकुञ्जानि** बन्धकीजनैः–कुलटाजनैः, अवन्ध्याः–सहिताः, ग्रामतरङ्गिणीनां–ग्रामनदीनाम्, **तीरेषु** तीरवर्तिनः, तमालतरूणां–तमालवृक्षाणां, निकुञ्जाः–लतामण्डपा येषु तादृशानि, पुनः **देशान्तरापतदनेकसांयात्रिकप्रवेशनिरवकाशपर्यन्तानि** देशान्तरेभ्यः–अन्यदेशेभ्यः, आपतताम्–आगच्छताम्, अनेकेषां, सांयात्रिकानां–पोतवणिजां, प्रवेशेन, निरवकाशाः–अवकाशशून्याः, परिपूरिता इत्यर्थः, पर्यन्ताः–प्रान्तभूमयो येषु तादृशानि, पुनः **दुर्गतगृहेष्वपि** दरिद्रगृहेष्वपि, **प्राप्यनरपतिभूषणोचितानन्तरत्नानि** प्राप्याणि–लभ्यानि, नरपतिभूषणोचितानि–राजाभरणयोग्यानि, महार्हाणीत्यर्थः, अनन्तानि–असंख्येयानि रत्नानि येषु तादृशानि, पुनः **रेणुगणनया**

मानजात्यजातरूपाणि [ऌ], प्रत्यहं च स्वीकृतसलिलमध्यसंचारणोचिताञ्जनैरग्नितैलादिद्रव्यसंग्रहपरैः कूपस्तम्भकानुत्तम्भयद्भिः सितपटानासूत्रयद्भिर्नाङ्गरानाहरद्भिः स्वादुजलकूपिकासु फलकसंधिरन्ध्राणि सर्वतः स्थगयद्भिः पौतिकैरशून्यवेलाकूलनगराणि [ए], उभयतो वेणुकर्परावरणकृतरक्षेष्वसंकीर्णखरताडपर्णकोत्कीर्णकर्णाटादिलिपिषु पुस्तकेषु विरलमवलोक्यमानसंस्कृतानुविद्धस्वदेशभाषानिबद्धकाव्यप्रबन्धानि [ऐ], स्तोकार्यलोकानि, स्वल्पधर्माधर्मविवेकानि, विरलवर्णाश्रमाचाराणि, परिमितपाखण्डिव्यवहाराणि, रुचिरोद्भटस्त्रीवेषरचनानि, दुरवबोधभाषावचनानि [ओ], स्वभावभीषणाकारैर्विकृतवेषाडम्बरधारिभिः संनिधानवर्तितया यमादिवागतक्रौर्यैस्त्रिशङ्कोरिव प्रनष्टास्पृश्यसंनिधिपरिहारवासनै रावणादिवोत्पन्नपरदारग्रहणाभिलाषैर्लङ्कानिशाचरलोकादिव संक्रान्तकायकालकान्तिभिः शब्दशास्त्रकारैरिव विहितह्रस्वदीर्घव्यञ्जन-

---

धूलिबुद्ध्या, **उत्सृज्यमानजात्यजातरूपाणि** उत्सृज्यमानानि-उत्क्षिप्यमाणानि, अपसार्यमाणानीत्यर्थः, जात्यानि-प्रशस्तानि, जातरूपाणि-सुवर्णानि येषु तादृशानि [**ऌ**]; **च** पुनः, **प्रत्यहं** प्रतिदिनम्, **स्वीकृतसलिलमध्यसंचारणोचिताञ्जनैः** स्वीकृतं-गृहीतं, सलिलमध्यसञ्चारणाय-जलमध्यप्रचारणाय, उचितं-योग्यम्, अञ्जनं-नेत्रसंस्कारककज्जलविशेषो यैस्तादृशैः, पुनः **अग्नितैलादिद्रव्यसंग्रहपरैः** अग्नितैलादिकस्य-शीताभिभावकद्रव्यस्य, संग्रहे-सञ्चये, परैः-संलग्नैः, पुनः **कूपस्तम्भान्** कूपो नाम नावादौ रज्ज्वाधारः काष्ठमयो वृक्षः, तद्दण्डान्, **उत्तम्भयद्भि** उन्नमयद्भिः, पुनः **सितपटान्** श्वेतवस्त्राणि, **आसूत्रयद्भिः** आरचयद्भिः, पुनः **नाङ्गरान्** पोतगतिरोधकान् 'नांगर' इति प्रसिद्धान् नौकोपकरणविशेषान्, **आहरद्भिः** तत्रानयद्भिः, पुनः **स्वादुजलकूपिकासु** मधुरजलशालिकाष्ठादिनिर्मितकृत्रिमक्षुद्रकूपेषु, **फलकसन्धिरन्ध्राणि** फलकसन्धिषु-तदीयकाष्ठपट्टसंश्लेषणस्थानेषु, यानि रन्ध्राणि-छिद्राणि तानि, **स्थगयद्भिः** आच्छादयद्भिः काष्ठखण्डादिनिवेशेन पूरयद्भिः, **पौतिकैः** पोतवाहकैः, **अशून्यवेलाकूलनगराणि** अशून्यानि-अरहितानि, अधिष्ठितानीति यावत्, वेलायां-कच्छे, कूले-तीरे च, यद्वा वेलाकूले-तटप्रान्ते नगराणि येषु तादृशानि [**ए**], पुनः पुस्तकेषु, **विरलम्** अल्पं यथा स्यात् तथा, **अवलोक्यमानसंस्कृतानुविद्धस्वदेशभाषानिबद्धकाव्यप्रबन्धानि** अवलोक्यमानाः-उपलभ्यमानाः, संस्कृतानुविद्धाभिः-संस्कृतभाषामिश्रिताभिः, स्वदेशभाषाभिः-स्वाभिजनभाषाभिः, निबद्धाः-प्रणीताः, काव्यप्रबन्धाः-काव्यग्रन्था येषु तादृशानि, कीदृशेषु पुस्तकेषु ? **उभयतः** भागद्वये, **वेणुकर्परावणकृतरक्षेषु** वेणुकर्पररूपाभ्यां-पाटितवंशखण्डरूपाभ्याम्, आवरणाभ्याम्-आवेष्टनाभ्यां, कृता रक्षा येषां तादृशेषु, पुनः **असंकीर्णखरताडपर्णकोत्कीर्णकर्णाटादिलिपिषु** असंकीर्णेषु-विस्तृतेषु, खरेषु-तीक्ष्णेषु कठिनेषु वा, ताडपर्णकेषु-तालपत्रेषु, उत्कीर्णाः-उत्कीर्य लिखिताः, कर्णाटादिलिपयः-कर्णाटादिदेशाक्षराणि येषु तादृशेषु [**ऐ**], पुनः **स्तोकार्यलोकानि** स्तोकाः-अल्पाः, आर्यलोकाः-"कर्तव्यमाचरन् काममकर्तव्यमनाचरन्। तिष्ठति प्रकृताचारे यः स आर्य इति स्मृतः॥" इत्यन्यत्रोक्ता आचारवन्तो जना येषु तादृशानि, पुनः **स्वल्पधर्माधर्मविवेकानि** अत्यल्पधर्माधर्मविभागानि, पुनः **विरलवर्णाश्रमाचराणि** स्वल्पब्राह्मणादिवर्णगार्हस्थ्याद्याश्रमोचिताचाराणि, पुनः **परिमितपाखण्डिव्यवहाराणि** परिमिताः-परिगणिताः, प्रचुरिताः, अल्पा इति यावत्, पाखण्डिनां-पापखण्डनकृतां, व्यवहाराः-आचारा येषु तादृशानि, पुनः **परिमितरुचिरोद्भटस्त्रीवेषरचनानि** परिमिता-परिगणिता, रुचिरा-मनोहरा, उद्भटा-आडम्बरपूर्णा च, स्त्रीणां वेषरचना-वेषविन्यासो येषु तादृशानि, पुनः **दुरवबोधभाषावचनानि** दुरवबोधा-दुर्वेद्यार्था, भाषाः-वचनानि तद्ग्रथितपदवाक्यानि च येषु तादृशानि [**ओ**], पुनः **पन्नगैः** सर्पैः, **महारत्ननिधानानीव** उत्तमरत्ननिधीनिव, **निषादाधिपैः** चाण्डालजातिविशेषाधिपैः, **संरक्षितानि** सम्यक्पालितानि, कीदृशैः ? **स्वभावभीषणाकारैः** स्वभावतो भयानकाकारैः, पुनः **विकृतवेषाडम्बरधारिभिः** विकृतः-बीभत्सो यो वेषाडम्बरः-वेषविस्तारः, तद्धारणशीलैः, पुनः **सन्निधानवर्तितया** दक्षिणदिगवस्थितयमनिकटवर्तितया, **यमादिव** यमसकाशादिव, **आगतक्रौर्यैः** प्राप्तघातुकवृत्तिकैः, पुनः **त्रिशङ्कोरिव** त्रिशङ्कुः-नृपविशेषः, तद्रूपहेतोरिव, **प्रनष्टास्पृश्यसन्निधिपरिहारवासनैः** प्रनष्टा-विध्वस्ता, अस्पृश्यसन्निधिपरिहारस्य-स्पर्शायोग्यवस्तुसामीप्यपरित्यागस्य, वासना-संस्कारो येषां तादृशैः, पुनः **रावणादिव** रावणरूपहेतोरिव, **उत्पन्नपरदारग्रहणाभिलाषैः** उत्पन्नः परदारग्रहणस्य-पराङ्गनाऽऽकर्षणस्य, अभिलाषः-वाञ्छा येषां तादृशैः, पुनः **लङ्कानिशाचरलोकादिव** लङ्कावास्तव्यराक्षसजनादिव,

कल्पनैरनल्पताडपत्रताडङ्कपूरितैकैककर्णच्छिद्रैरन्यायप्रियतया च शस्त्रिका अप्यङ्गीकृतातिविकटकलहाः कटीभागेनाकलयद्भिः [औ] काललोहकटकान्यपि नितान्तमुखरनिष्ठुराणि प्रकोष्ठगतानि धारयद्भिर्दग्धस्थाणुभिरिवोपलब्धचैतन्यैरञ्जनगिरिशिलास्तम्भैरिवोपजातहस्तपादैः पन्नगैरिव महारत्ननिधानानि निषादाधिपैः संरक्षितानि, प्रसाधयन् द्वीपान्तराणि [अं] दूरादेव दृश्यमानश्यामवनलेखमम्बरोल्लेखिना शिखरसंघातेन लङ्घिताखिलाशामुखमुदयास्तशैलमेखलामूलमिलितपूर्वपाश्चात्यभागमसकृद्दर्शितमुग्धमौक्तिकोल्लासह्रासया प्रारब्धपरिहासयेव लवणजलनिधिवेलया वीचिहस्तापवर्जितैः पयोभिरनवरतमाहन्यमानं सुवेलनामानमचलराजमव्रजम् [अः] ।

तस्य च शिखरिणः स्वभावरमणीयेषु, सर्वतः स्तबकिततिलकचम्पकाशोकबकुलेषु, कलहायमान-

---

टिप्पनकम्—**शब्दशास्त्रकारैरिव विहितह्रस्वदीर्घव्यञ्जनकल्पनैः** एकत्र कृतह्रस्वदीर्घव्यञ्जनसंज्ञाविधानैः, अन्यत्र कृतलघुदीर्घकूर्चकर्तनैः । **शस्त्रिका अप्यङ्गीकृतविकटकलहा** एकत्र कलहः-युद्धम्, [अन्यत्र] फलकम् [औ] । निषादाधिपाः-शबरपतयः [अं] ।

संक्रान्तकायकालकान्तिभिः संक्रान्ताः-समापतिताः, कायकालकान्तयः-देहकृष्णद्युतयो येषु तादृशैः, पुनः **शब्दशास्त्रकारैरिव** व्याकरणकारैरिव, **विहितह्रस्वदीर्घव्यञ्जनकल्पनैः** विहिता-कृता, ह्रस्वदीर्घाणां-लघुबृहद्रूपाणां, व्यञ्जनानां-विशिष्टाञ्जनलेखानां श्मश्रूणां वा, कल्पना-रचना कर्त्तनं वा यैस्तादृशैः, पक्षे ह्रस्वानां-ह्रस्वसंज्ञकानां, दीर्घाणां-दीर्घसंज्ञकानां स्वराणां, व्यञ्जनानां-हलां च कल्पना संकेतो यैस्तादृशैः, पुनः **अनल्पताडपत्रताडङ्कपूरितैकैककर्णच्छिद्रैः** अनल्पं-दीर्घं, यत् ताडपत्रं-तालपर्णं, तद्रूपैः, ताडङ्कैः-तदाख्यकर्णाभरणैः, पूरितम्-एकैकस्य कर्णस्य, छिद्रं-विवरं यैस्तादृशैः, पुनः **अन्यायप्रियतया** अन्यायरसिकतया, **शस्त्रिका अपि** छुरिका अपि, **अङ्गीकृतातिविकटकलहाः** अङ्गीकृताः-स्वीकृताः, अतिविकटाः-अतिविकरालाः, पक्षे अतिविस्तृताः, कलहाः-युद्धानि, पक्षे फलका याभिस्ताः, **कटीभागेन** कटीप्रदेशेन, **आकलयद्भिः** धारयद्भिः, [औ], पुनः **प्रकोष्ठकगतानि** मणिबन्धस्थितानि, **काललोहकटकान्यपि** कृष्णलोहमयानि वलयान्यपि, **नितान्तमुखरनिष्ठुराणि** अत्यन्तवाचालकठोराणि, धारयद्भिः, पुनः **उपलब्धचैतन्यैः** प्राप्तचैतन्यैः, **दग्धस्थाणुभिरिव** दग्धनिष्फलशाखवृक्षैरिवेत्युत्प्रेक्षा, पुनः **उपजातहस्तपादैः** उत्पन्नकरचरणैः, **अञ्जनगिरिशिलास्तम्भैरिव** श्यामलाचलशिलारूपैः स्तम्भैरिवेति चोत्प्रेक्षा [अं], कीदृशमचलराजम्? **दूरादेव** दूरदेशादेव, **दृश्यमानश्यामवनलेखं** दृश्यमाना-उपलक्ष्यमाणा, श्यामवनलेखा-श्यामवनराजिर्यस्मिंस्तादृशम्, पुनः **अम्बरोल्लेखिना** गगनचुम्बिना, **शिखरसंघातेन** शिखरसमूहेन, **लङ्घिताखिलाशामुखं** लङ्घिताखिलदिङ्मुखम्, पुनः **उदयास्तशैलमेखलामूलमिलितपूर्वपाश्चात्यभागम्** उदया-ऽस्तशैलयोः-उदयाचला-ऽस्ताचलयोः, मेखलामूलेन-नितम्बमूलेन, मिलितौ-संसृष्टौ, पूर्व-पाश्चात्यभागौ यस्य तादृशम्, पुनः **असकृद्दर्शितमुग्धमौक्तिकोल्लासह्रासया** असकृत्-पुनः पुनः, दर्शितौ-प्रकटितौ, मुग्धमौक्तिकानां-मनोज्ञमुक्तामणीनाम्, उल्लासह्रासौ-वृद्धिहानी, यया तया, अत एव **प्रारब्धपरिहासयेव** प्रवर्तितपरिहासयेवेत्युत्प्रेक्षा, **लवणजलनिधिवेलया** लवणसमुद्रनीरविकाररूपया, **वीचिहस्तापवर्जितैः** तरङ्गरूपहस्तैः गृहीतैः, **पयोभिः** जलैः, **अनवरतं** निरन्तरम्, **आहन्यमानं** ताड्यमानम् [अः] ।

च पुनः, **तस्य** सुवेलसंज्ञकस्य, **शिखरिणः** पर्वतस्य, **तटवनेषु** पर्यन्तवनेषु, **कण्टकितानेकसंगरव्यतिकरखिन्नवाहिनीकः** कण्टकिताः-रोमाञ्चान्विताः क्षुद्रारिसहिता वा, अनेके ये संगराः-संग्रामाः, तेषां व्यतिकरेण-सम्पर्केण, खिन्ना-श्रान्ता, वाहिनी-सेना यस्य तादृशः, **कुतूहलात्** कौतुकवशात्, **इतस्ततः** तत्रात्र, **विचरन्** परिभ्रमन्; कीदृशेषु तेषु? **स्वभावरमणीयेषु** स्वभावतः सुन्दरेषु, **सर्वतः** समन्ततः, **स्तबकिततिलकचम्पकाशोकबकुलेषु** स्तबकिताः-गुच्छान्विताः, तिलक-चम्पका-ऽशोक-बकुलाः-तत्तत्संज्ञककुसुमविशेषा येषु, यद्वा पुष्पगुच्छान्विता कलिकाकलापान्विता । तत्तत्पुष्पवृक्षा येषु तादृशेषु, पुनः **कलहायमानमत्तपिककुलालापवाचालविकचचूतमालेषु** कलहायमानानां-

मत्तपिककुलालापवाचालविकचचूतमालेषु, परिमलमिलितमधुकरीनिकरान्धकारितकोरकितसरससहकारेषु, रत्नाविलसमुद्रशैवलप्रवालजटिलितराजतालीमूलजटाजालकेषु, घटितसेतुवानरविकीर्णगिरिकूटकुटिलितान्तरालमार्गेषु, [क] इतस्ततः सखीस्नेहदूराकृष्टमनसा त्रिजटया विनोदितदयितविरहक्षाममैथिलीकेषु, अनेकशः क्रीडानिमित्तमागतया प्रधाननक्तंचरीभिः सह पादचारेण विचरन्त्या लतामन्दिरेषु मन्दोदर्या सविभ्रमावचितविकचमन्दारेषु, सेतुशिखरोत्सङ्गलवङ्गतरुतलासीनकिन्नरमिथुनगीयमानरामचन्द्रचरिताद्भुतेषु [ख], प्रशान्तनक्तंचरोपद्रवतया संचरद्भिरचकितैः समीपाश्रमनिवासिभिस्तापसकुमारकैः प्रकटितविभीषणसौराज्येषु, जनकानुकारिभिर्मारीचमृगसमागतानामरण्यमृगीणामुदरसंभवैर्भ्रमद्भिरेणकैः स्वदेहकाञ्चनप्रभया पिशङ्गितोद्देशेषु, निद्रानिषण्णकुम्भकर्णाभिनन्दितशिशिरहरिचन्दनवीथीकेषु, जानकीवैमुख्यदुःखक्षामदशकण्ठातिवाहितोत्कण्ठेषु, तटवनेषु, कण्टकितानेकसंगरव्यतिकरखिन्नवाहिनीकः कुतूहलादितस्ततो विचरन् [ग];

टिप्पनकम्—त्रिजटा—रावणभगिनी [ख]। कण्टकिताः-रोमाञ्चिताः [ग]।

कलहं कुर्वतां, मत्तपिककुलानाम्–उन्मत्तकोकिलकुलानाम्, आलापैः–गुञ्जनैः, वाचालाः–शब्दायमानाः, विकचचूतमाला–विकसितरसालपङ्क्तिर्येषु तादृशेषु, पुनः **परिमलमिलितमधुकरीनिकरान्धकारितकोरकितसरससहकारेषु** परिमलमिलितानां-सौरभसङ्गतानां, मधुकरीणां–भ्रमरीणां, निकरेण–गणेन, अन्धकारिताः–अन्धकारान्विताः, सरसाः–मकरन्दाक्ताः, सहकाराः–अतिदूरगामिसौरभान्विता आम्रा येषु तादृशेषु, पुनः **रत्नाविलसमुद्रशैवलप्रवालजटितराजतालीमूलजटाजालकेषु** रत्नाविलस्य–रत्नकलुषितस्य, समुद्रस्य, शैवलैः–जलतृणैः, प्रवालैः–विद्रुमैः, जटिलितानि–व्याप्तानि, राजतालीनां–पूगद्रुमाणां, मूलजटाजालानि–शिफासंघाता येषु तादृशेषु, पुनः **घटितसेतुवानरविकीर्णगिरिकूटकुटिलितान्तरालमार्गेषु** घटितः–रचितः, सेतुः–समुद्रबन्धो यैस्तादृशैः, वानरैः, विकीर्णैः–विक्षिप्तैः, विघटितैरिति यावत्, गिरिकूटैः–पर्वतशृङ्गैः, कुटिलिताः–वक्रीकृताः, अन्तरालमार्गाः–मध्यमार्गा येषु तादृशेषु [क], पुनः **इतस्ततः** अत्र तत्र, **सखीस्नेहदूराकृष्टमानसा** सखीस्नेहेन–सखीभूतसीताप्रेम्णा, आकृष्टं मनो यस्यास्तादृश्या, **त्रिजटया** तत्संज्ञकराक्षस्या, **विनोदितदयितविरहक्षाममैथिलीकेषु** विनोदिता–आश्वासिता, दयितविरहेण–दयितस्य-भर्तुः, रामचन्द्रस्येत्यर्थः, विरहेण–वियोगेन, क्षामा–कृशा, मैथिली–सीता येषु तादृशेषु, पुनः **प्रधाननक्तञ्चरीभिः** प्रधानराक्षसीभिः, सह, **पादचारेण** पद्भ्यां गमनेन, **लतामन्दिरेषु** लतामण्डपेषु, **विचरन्त्या** भ्रमन्त्या, **मन्दोदर्या** तत्संज्ञकरावणभार्यया, **सविभ्रमावचितविकचमन्दारेषु** सविभ्रमं–सविलासं यथा स्यात् तथा, अवचिताः–त्रोटिताः, मन्दाराः–तदाख्यदिव्यतरुकुसुमानि येषु तादृशेषु, पुनः **सेतुशिखरोत्सङ्गलवङ्गतरुलतासीनकिन्नरमिथुनगीयमानरामचन्द्रचरिताद्भुतेषु** सेतुशिखरोत्सङ्गे–सेतुशिखरमध्ये, या लवङ्गतरुलताः–लवङ्गवृक्षारूढलताः, तासु–तासां मध्ये, आसीनैः–उपविशद्भिः, किन्नरमिथुनैः–किन्नरदम्पतिभिः, गीयमानैः, रामचन्द्रचरितैः, अद्भुतेषु–विस्मयावहेषु [ख], पुनः **प्रशान्तनक्तञ्चरोपद्रवतया** प्रशान्तः–निवृत्तः, नक्तञ्चरैः–राक्षसैः, उपद्रवो येषु तत्तया, **अचकितैः** असम्भ्रान्तैः, **संचरद्भिः** विचरद्भिः, समीपाश्रमनिवासिभिः, निकटस्थिताश्रमवास्तव्यैः, **तापसकुमारैः** तपस्विबालकैः, **प्रकटितविभीषणसौराज्येषु** प्रकटितम्–अभिव्यक्तं, विभीषणस्य–रावणानुजस्य, सौराज्यं–सात्त्विकमाधिपत्यं येषु तादृशेषु, पुनः **एणकैः** अनुकम्पितैः एणैः–मृगैः, **स्वदेहकाञ्चनप्रभया** स्वशरीरसम्बन्धिसुवर्णकान्त्या, **पिशङ्गितोद्देशेषु** पिशङ्गितः–पीतवर्णतामापादितः, उद्देशः–ऊर्ध्वप्रदेशो येषु तादृशेषु, कीदृशैः ? **जनकानुकारिभिः** जनकस्य–जनयितुर्मारीचस्य, अनुकारिभिः–अनुकरणं कुर्वद्भिः, तद्वर्णयुक्तैरित्यर्थः, पुनः **मारीचमृगसमागतानां** मारीचात्मकमृगपार्श्वमायातानाम्, तेन सहाभिरतानामित्याशयः, **अरण्यमृगीणां** वन्यमृगीणाम्, **उदरसम्भवैः** उदरोत्पन्नैः, पुनः **भ्रमद्भिः** विचरद्भिः। पुनः **निद्रानिषण्णकुम्भकर्णाभिनन्दितशिशिरहरिचन्दनवीथीकेषु** निद्रानिषण्णेन–निद्रया स्थितेन, कुम्भकर्णेन–तत्संज्ञकदीर्घनिद्ररावणभ्रात्रा, अभिनन्दिता–समर्थिता, अलङ्कृतेति यावत्, शिशिरहरिचन्दनानां–शीतलचन्दनविशेषाणां, वीथी–पङ्क्तिर्येषु तादृशेषु, पुनः **जानकीवैमुख्यदुःख-**

'इह निर्झरेषु दृष्टलङ्कानिर्णीतदशकण्ठकण्ठच्छेदनिर्वृतेन दशरथात्मजेन स्नात्वा जटायुषे निर्वर्तितः प्रथमो निवापाञ्जलिः [घ], इह प्रहर्षास्फोटनसंक्रान्तसरसगैरिकपङ्कपञ्चाङ्गुलैर्दृश्यमानमूर्तिमत्प्रतापानलशिखैरिव भुजशिखरैः खर्वयन्तस्त्रिकूटगिरिकूटानि घटितसमग्रसेतुबन्धा बन्धुरं ववल्गुरङ्गदपुरोगाः प्लवगपतयः [ङ], इयमसमञ्जसक्षिप्तलङ्काप्राकारकाञ्चनशिलाशबला शिबिरसन्निवेशभूः सुग्रीवस्य, एषा परस्परविलक्षणलक्ष्यमाणराक्षसकपिकरङ्कावयवा रामरावणयोराजिभूमिः [च], इह सकलदिग्मुखान्तरालव्यापिघोषस्य त्रिष्वपि भुवनेषु सर्पतः पौलस्त्ययशसो रथस्येव प्रवर्तकः प्रयत्नवद्भिः क्षपाचरैरनेकधाकृतरक्षोऽपि प्रसह्य मारुतिना भुजबलेन भग्नोऽक्षः [छ], इह कन्दरायामरातिदारितप्रधानवीरविद्राणविजयाध्यवसायेन सायंचरचक्रवर्तिना तैस्तैरसुकुमारैरुपक्रमैरकाल एव त्याजितो निद्रां महानिद्रायै सहोदरः [ज], इह

टिप्पनकम्—अङ्गदः—वालिपुत्रः [ङ]। **सकलदिङ्मुखान्तरालव्यापिघोषस्य पौलस्त्ययशसो रथस्येव भग्नोऽक्षः** एकत्र घोषः—घोषणं प्रसरणम्, अन्यत्र चीत्कारः, अक्षः—रावणसुतो धूश्च, मारुतिः—हनुमान् [छ]। महानिद्रा—मरणम् [ज]।

क्षामदशकण्ठातिवाहितोत्कण्ठेषु जानक्याः—सीतायाः, वैमुख्येन—प्रतिकूलतया, यद्दुःखं तेन क्षामेण—कृशेन, दशकण्ठेन—रावणेन, अतिवाहिता—व्यतिक्रान्ता, उत्कण्ठा—तदानुकूल्योत्सुकता येषु तादृशेषु [ग] । **इह** अस्मिन् स्थाने, **निर्झरेषु** प्रवाहेषु, **दृष्टलङ्कानिर्णीतदशकण्ठकण्ठच्छेदनिर्वृतेन** दृष्टायां लङ्कायां निर्णीतेन, दशकण्ठकण्ठच्छेदेन—दशकण्ठस्य—रावणस्य, कण्ठच्छेदेन—कण्ठकर्तनेन, निर्वृतेन—सुखितेन, **दशरथात्मजेन** रामेण, **स्नात्वा** स्नानं कृत्वा, **जटायुषे** तत्संज्ञकाय गृध्रप्रवराय, प्रथमः **निवापाञ्जलिः** श्रद्धाञ्जलिः, **निर्वर्तितः** निष्पादितः [घ]। **इह** अस्मिन् स्थाने, **अङ्गदपुरोगाः** अङ्गदनामकवालिपुत्रादयः, **प्लवगपतयः** कपिश्रेष्ठाः, **घटितसमग्रसेतुबन्धाः** घटितः—सम्पादितः, समग्रः, सेतोः—पुलिनस्य, बन्धः—प्रबन्धो यैस्तादृशाः, **बन्धुरम्** अत्युन्नतानतं यथा स्यात् तथा, **ववल्गुः** धारागत्या जग्मुः, कीदृशाः ? **भुजशिखरैः** उन्नतभुजाग्रैः, **त्रिकूटगिरिकूटानि** त्रिकूटगिरेः—त्रीणि कूटानि शृङ्गाणि यस्य इत्यन्वर्थसंज्ञकपर्वतविशेषस्य, कूटानि—शिखराणि, **खर्वयन्तः** ह्रस्वयन्तः, कीदृशैः ? **प्रहर्षास्फोटनसंक्रान्तसरसगैरिकपङ्कपञ्चाङ्गुलैः** प्रहर्षेण—अतिहर्षेण, यत् आस्फोटनम्—आस्फालनं, तेन संक्रान्तः, सरसस्य—आर्द्रस्य, गैरिकस्य—रक्तधातुविशेषस्य, पङ्को यस्मिन् तादृशं, पञ्चाङ्गुलं—पञ्चानामङ्गुलीनां समाहारो येषु तादृशैः, अत एव **दृश्यमानमूर्तिमत्प्रतापानलशिखैरिव** दृश्यमाना—प्रतीयमाना, प्रतिभासमानेत्यर्थः, मूर्तिमतः—आकृतिमतः, प्रतापानलस्य—प्रतापाग्नेः, शिखा—ज्वाला येषु तादृशैरिवेत्युत्प्रेक्षा [ङ] । **असमञ्जसक्षिप्तलङ्काप्राकारकाञ्चनशिलाशबला** असमञ्जसं—क्रोधावेशवशेन असङ्गतं यथा स्यात् तथा, क्षिप्ताभिः, लङ्काप्राकारभूताभिः, काञ्चनशिलाभिः—सुवर्णशिलाभिः, शबला—चित्रिता, **सुग्रीवस्य** तदाख्यकपिराजस्य, इयं **शिबिरसन्निवेशभूः** सैन्यावाससन्निवेशस्थानम् । **परस्परविलक्षणलक्ष्यमाणराक्षसकपिकरङ्कावयवा** परस्परविलक्षणं—परस्परविरूपं यथा स्यात् तथा, लक्ष्यमाणाः—प्रतीयमानाः, राक्षसानां कपीनां वानराणां च, करङ्काः—अस्थिमात्रावशिष्टशवाः, तन्मस्तकानि वा, एवावयवा यस्यास्तादृशी, एषा रामरावणयोः, **आजिभूमिः** रणक्षेत्रम् [च] । **सकलदिङ्मुखान्तरालव्यापिघोषस्य** सकलदिङ्मुखान्तरालव्यापी—समस्तदिगन्तमध्यव्यापकः, घोषः—संशब्दनं प्रसरणं च यस्य तादृशस्य, पुनः **त्रिष्वपि** स्वर्ग-मर्त्य-पातालरूपेष्वपि, **भुवनेषु** लोकेषु, **सर्पतः** प्रसिध्यतः, **पौलस्त्ययशसः** पौलस्त्यः—रावणः, तत्कीर्तेः, रथस्येव, **प्रवर्तकः** प्रचारकः, **अक्षः** तदाख्यो रावणकुमारः, पक्षे रथाङ्गधूः, **प्रयत्नवद्भिः** प्रयत्नशालिभिः, **क्षपाचरैः** निशाचरैः, **अनेकधाकृतरक्षोऽपि** अनेकवारं रक्षितोऽपि, **मारुतिना** हनुमता, **भुजबलेन** बाहुविक्रमेण, **प्रसह्य** बलात्कारेण, **इह** अस्मिन् स्थाने, **भग्नः** नाशितः [छ] । **इह** अस्यां, **कन्दरायां** गुहायाम्, **अरातिदारितप्रधानवीरविद्राणविजयाध्यवसायेन** अरातिभिः—शत्रुभिः, दारितैः—खण्डितैः, मारितैरिति यावत्, प्रधानवीरैः—प्रधानभटैः, विद्राणः—भग्नः, विजयाध्यवसायः—विजयोद्योगो यस्य तादृशेन, **सायञ्चरचक्रवर्तिना** राक्षससम्राजा, **सहोदरः** स्वानुजः, कुम्भकर्ण इति यावत्, **असुकुमारैः** कठोरैः, **तैस्तैः** अनेकविधैः, **उपक्रमैः** उपद्रवैः, **अकाल एव** असमय एव,

क्रमाक्रान्तसकलाम्बरेण साडम्बरमुदञ्चता ज्वलनजन्मना नीलेन धूमोत्पीलेनेव नयननलिनेषु विस्तारितः प्रहस्तप्रणयिनीनामश्रुधारासारः [झ], इदमुपान्तनिर्झरासन्नप्ररूढविरलविशल्यौषधिलवमवदारितोरःस्थलस्य शक्त्या समिति सुमित्रासुतस्य मूर्च्छानिपतनस्थानम् [ञ], अमी नेमिनिष्पिष्टकपिशिरःकपालकर्परशुक्तिकाशकलशारिताः शरविसरवर्षिणि रामभद्रे पुनरुक्तमुपसृतापसृतरावणरथस्य क्षयसमयशोषितमहानदीप्रवाहानुकारिणः चक्रमार्गाः [ट], इयं स्वामिभक्तेरग्रजशक्तेश्च जगति ज्ञापनाय विभीषणेन प्रतिष्ठापिता द्रुतापतच्छिन्नकुम्भकर्णोत्तमाङ्गत्रासितस्य दाशरथेर्यथाप्रथममायतपदान्तराप्रतीपापसर्पणसरणिः [ठ], इह लतावेश्मन्यपनीतरक्षोगृहनिवासनिर्वादकलङ्काया जनकदुहितुर्वेपमानस्वेदार्द्रकरकिसलयेन दाशरथिना कथञ्चिदुन्मोचितो हुताशनप्रवेशलग्नो धूमदण्ड इव धूम्रकुटिलायतशिखो वेणीबन्धः [ड],

---

टिप्पनकम्—नीलः-रामप्रधानः, प्रहस्तः-रावणप्रधानः, आसारः-वेगवद्वृष्टिः [झ] । नेमिः-चक्रधारा [ट] । अग्रजशक्तेः कुम्भकर्णसामर्थ्यस्य, सरणिः-मार्गः [ठ] ।

महानिद्रायै मृत्यवे, निद्रां **त्याजितः** मोचितः, जागारित इत्यर्थः [ज]। **क्रमाक्रान्तसकलाम्बरेण** क्रमेण आक्रान्तं-व्याप्तं, सकलं-समग्रम्, अम्बरं-गगनमण्डलं वस्त्रं च येन तादृशेन, पुनः **साडम्बरं** सविस्तारम्, **उदञ्चता** उद्गच्छता, **धूमोत्पीलेनेव** धूमावरोधेनेव, **ज्वलनजन्मना** अग्निजातेन, नीलेन-श्यामवर्णेन रामप्रधानेन च, कज्जलेन वा, **प्रहस्तप्रणयिनीनां** प्रहस्तस्य-रावणप्रधानस्य याः प्रणयिन्यः-प्रियाः, तासां, **नयननलिनेषु** नयनारविन्देषु, **अश्रुधाराऽऽसारः** अश्रुधारासम्पातः, **इह** अस्मिन् स्थाने, **विस्तारितः** विस्तारमापादितः [झ]। इदं **सुमित्रासुतस्य** लक्ष्मणस्य, **मूर्च्छानिपतनस्थानं** मूर्च्छया यन्निपतनं-निपातः, तद्भूमिः, कीदृशम्? **उपान्तनिर्झरासन्नप्ररूढविरलविशल्यौषधिलवम्** उपान्ते-समीपे, ये निर्झराः-स्रोतांसि, तदासन्ने-तन्निकटप्रदेशे, प्ररूढाः-उत्पन्नाः, विरलानाम्-अनिबिडानां, विशल्यौषधीनां-विशल्यासंज्ञकौषधीनां, लवाः-लेश यस्मिंस्तादृशम्, कीदृशस्य तस्य? **समिति** युद्धे, **शक्त्या** शस्त्रविशेषेण, **अवदारितोरःस्थलस्य** खण्डितवक्षःस्थलस्य [ञ]। **नेमिनिष्पिष्टकपिशिरःकपालकर्परशुक्तिकाशकलशारिताः** नेमिभिः-चक्रान्तभागैः, निष्पिष्टानां-सञ्चूर्णितानां, कपिशिरःकपालकर्पराणां-वानरमस्तकानां ये कपालकर्पराः-कपालाख्यघटावयवसदृशाः शिरोऽस्थिमण्डलरूपकपालास्तेषां, शुक्तिकाशकलैः-कपालखण्डात्मकखण्डैः शारिताः-चित्रिताः, **रामभद्रे** रामचन्द्रे **शरविसरवर्षिणि** बाणगणवृष्टिकारिणि सति, **पुनरुक्तम्** असकृत् सूचितं यथा स्यात् तथा, **उपसृतापसृतरावणरथस्य** उपसृतः-समीपगतः, अपसृतः-दूरगतश्च यो रावणस्य रथस्तत्सम्बन्धिनः, **क्षयसमयशोषितमहानदीप्रवाहानुकारिणः** क्षयसमये-प्रलयकाले, शोषिता-शुष्कतां नीता, या महानदी, तत्प्रवाहानुकारिणः, **अमी** इमे, **चक्रमार्गाः** रथाङ्गप्रचारमार्गाः [ट] । **स्वामिभक्तेः** स्वामिनि-रामचन्द्रे या भक्तिः-प्रीतिस्तस्याः, **च** पुनः, **अग्रजशक्तेः** अग्रजस्य-स्वज्येष्ठभ्रातुः, रावणस्येत्यर्थः, या शक्तिः-पराक्रमस्तस्याः, **प्रख्यापनाय** विख्यापनार्थं, **बिभीषणेन** तदाख्यरावणानुजेन, **प्रतिष्ठापिता** प्रकल्पिता, इयम्, **द्रुतापतच्छिन्नकुम्भकर्णोत्तमाङ्गवित्रासितस्य** द्रुतं-सत्वरम्, आपतता, छिन्नेन-खण्डितेन, कुम्भकर्णस्य-तदाख्यरावणानुजस्य, उत्तमाङ्गेन-मस्तकेन, वित्रासितस्य-बिभीषितस्य, **दाशरथेः** रामचन्द्रस्य, **यथाप्रथमं** यथापूर्वम्, **आयतपदान्तराप्रतीपापसर्पणसरणिः** आयतेन-दीर्घेण, पदान्तरेण-पादविक्षेपान्तरेण, यत् अप्रतीपम्-अप्रतिकूलम्, स्खलनशङ्काशून्यमित्यर्थः, अपसर्पणम्-अपसरणं, तस्य सरणिः-मार्गः [ठ]। **इह** अस्मिन्, **लतावेश्मनि** लतागृहे, **अपनीतरक्षोगृहनिवासनिर्वादकलङ्कायाः** अपनीतः-अग्निप्रवेशेन विरोधितः, रक्षोगृहनिवासनिर्वादकलङ्कः-राक्षसगृहाधिकरणकनिवासापवादरूपः कलङ्को यया तादृश्याः, **जनकदुहितुः** जानक्याः, **धूम्रकुटिलायितशिखः** धूम्रा-कृष्णलोहितवर्णा, कुटिला-वक्रा, आयता च शिखा-अग्रभागो यस्य तादृशः, **वेणीबन्धः** प्रोषितभर्तृकोचितकेशरचनाविशेषरूपाया वेण्या बन्धः, **वेपमानस्वेदार्द्रकरकिसलयेन** वेपमानः-कम्पमानः, स्वेदार्द्रः-स्रवद्घर्मोदकार्द्रः, करकिसलयः-करपल्लवो यस्य तादृशेन, **दाशरथिना** रामेण, **उन्मोचितः** विश्लेषितः, क इव? **हुताशनप्रवेशलग्नः** अग्निप्रवेशसम्पृक्तः, **धूमदण्ड**

इतो निवर्तितानुव्रजत्सुरव्रजेन निजगोत्रराजधानीमयोध्यां प्रति यियासुना दशास्यदमनेन सविलासमध्यासितमहार्हमणिवातायनः कौतुकोत्ताननयनजानकीविलोकितगतिरनुकूलपवनप्रसारितैः पताकाबाहुभिः परिरब्धुमिव चिरोत्सृष्टदृष्टां कुबेरपुरमम्बरपथेन प्रधावितः पुष्पकनामा विमानराजः [ढ]; इत्यादिपिशुनितानेकरामायणमहापुरुषवृत्तान्तैरन्तिकस्थितैस्तत्रत्यनरपतिभिरुत्खातरोपितैरनुपदं प्रदर्शितान् लङ्कापुरीपरिसरोद्देशान् सहर्षमीक्षमाणः कतिचिद्दिनान्यतिष्ठम् [ण] ।

एकदा तु तत्रस्थशिबिर एव प्रेषितागतैः प्रणिधिपुरुषैः प्रवर्तितः सज्जीकृत्य प्राज्यवस्त्राभरणदानावर्जितसकलनाविका नाव आत्तकतिपयदिवसपाथेयैः प्रधानपार्थिवसूनुभिरन्यैश्च जन्यशतनिर्व्यूढपौरुषैः पदातिपुरुषैरनुगम्यमानस्तत्क्षणमेवाविक्षेपेणोदचलम् [त] । अविलम्बितगतिश्च पश्चिमेन सेतोर्गत्वातिदूरमूरीकृतचौर्यवृत्तेरतिविषमदुर्गबलगर्वितस्य पर्वतकनाम्नः किरातराजस्य राजधान्यामवस्कन्दमप्रतर्कितमपातयम्, अदय-

---

टिप्पनकम्—**कुबेरपुरम्** अलकाम् [ढ] । जन्यं–संग्रामः । विक्षेपः–धाटकः [त] । **अवस्कन्दं** धाटकम् [थ] ।

इव धूमरेखेवेत्युत्प्रेक्षा [ड] । **इतः** अस्मात् स्थानात्, **निवर्तितानुव्रजत्सुरव्रजेन** निवर्तितः-परावर्तितः, अनुव्रजन्–अनुगच्छन्, सुरव्रजः–देवगणो येन तादृशेन, **निजगोत्रराजधानीं** स्ववंशराजधानीरूपाम्, अयोध्यां, **प्रतियियासुना** प्रत्यावर्तितुकामेन, यद्वा **अयोध्यां प्रति** अयोध्याभिमुखं, **यियासुना** जिगमिषुणा, **दशास्यदमनेन** रावणगर्वहारिणा रामचन्द्रेण, **सविलासं** विलाससहितम्, **अध्यासितमहार्हमणिवातायनं** अध्यासितम्-अधिष्ठितं, महार्हमणीनाम्–अत्युत्तममणिमयं, वातायनं–गवाक्षो यस्य तादृशः, **पुष्पकनामा** तन्नामकः, **विमानराजः** उत्तममाकाशयानम्, **अम्बरपथेन** गगनमार्गेण, **प्रधावितः** शीघ्रं यातः, कीदृशः ? **कौतुकोत्ताननयनजानकीविलोकितगतिः** कौतुकेन-दिदृक्षारसेन, उत्तानम्–उन्नतं, नयनं यस्यास्तादृश्या जानक्या विलोकिता–दृष्टा, गतिः–गमनं यस्य तादृशः, किं कर्तुमिव ? **चिरोत्सृष्टदृष्टां** चिरात्–दीर्घकालात्, उत्सृष्टं–त्यक्तं, दृष्टं–दर्शनं यस्यास्तादृशीं, यद्वा चिरात् त्यक्तां विलोकितां च, **कुबेरपुरीं** कुबेरस्वामिकाम् अलकापुरीम्, **अनुकूलपवनप्रसारितैः** अभिमुखवाहिवायुविस्तारितैः, **पताकाबाहुभिः** पताकात्मकभुजैः, **परिरब्धुमिव** आलिङ्गितुमिव [ढ] । **इत्यादिपिशुनितानेकरामायणमहापुरुषवृत्तान्तैः** इत्यादयः–एवंप्रभृतयः, पिशुनिताः–सूचिताः, अनेके रामायणसम्बन्धिनः, महापुरुषस्य–मर्यादापुरुषस्य भगवतो रामचन्द्रस्य, वृत्तान्ताः–वार्ता यैस्तादृशैः, **उत्खातरोपितैः** पूर्वम् उत्खातैः–उत्पाटितैः, स्वपदात् प्रच्यावितैरित्यर्थः, पश्चात् पुनः रोपितैः–स्वपदे प्रतिष्ठापितैः, **अन्तिकस्थितैः** समीपस्थितैः, नरपतिभिः, **अनुपदं** प्रतिस्थानं, प्रदर्शितान्, **लङ्कापरिसरोद्देशान्** लङ्कापर्यन्तस्थोर्ध्वदेशान्, **सहर्षं** सानन्दम्, **ईक्षमाणः** पश्यन्, **कतिचित्** कतिपयानि, दिनानि, **अतिष्ठं** स्थितवानहम् [ण] । **एकदा तु** एकस्मिन् दिने तु, **तत्रस्थशिबिर एव** तत्स्थानस्थसैनिकावास एव, **प्रेषितागतैः** पूर्वं प्रेषितैः पश्चादागतैः, **प्रणिधिपुरुषैः** गूढचरजनैः, **प्रवर्तितः** कारितप्रवृत्तिकः, अहमिति शेषः, **प्राज्यवस्त्राभरणदानावर्जितसकलनाविकाः** प्राज्यवस्त्राभरणानां–प्रचुरवस्त्रालङ्करणानां, दानेन–वितरणेन, आवर्जिताः–आनमिताः, परितोषिता इति यावत्, सकलाः–समस्ताः, नाविकाः–कर्णधारा यासां तादृशीः, नावः, **सज्जीकृत्य** संनद्धाः संभृता निभृता वा कृत्वा, **आत्तकतिपयदिवसपाथेयैः** आत्तं–गृहीतं, कतिपयदिवसपाथेयं–कतिपयदिनमार्गभोज्यवस्तु यैस्तादृशैः, **प्रधानपार्थिवसूनुभिः** प्रधानराजकुमारैः, **च** पुनः, अन्यैः, **जन्यशतनिर्व्यूढपौरुषैः** जन्यशते–संग्रामशते निर्व्यूढम्–अपरिसमाप्तं, पौरुषं–पराक्रमो येषां तादृशैः, **पदातिपुरुषैः** पादगामिजनैः, **अनुगम्यमानः** अनुस्रियमाणः, **तत्क्षणमेव** तत्कालमेव, **अविक्षेपेण** सङ्घीभावेन, घाटीरूपेणेत्यर्थः, **उदचलम्** उच्चलितवान्, उत्थाय चलितवानित्यर्थः [त] । **च** पुनः, **अविलम्बितगतिः** अविलम्बिता–सत्वरा, गतिः–गमनं यस्य तादृशः सन्, सेतोः **पश्चिमेन** पश्चाद्भागेन, **अतिदूरं** बहुदूरं, गत्वा, **ऊरीकृतचौर्यवृत्तेः** ऊरीकृता–स्वीकृता, चौर्यरूपा वृत्तिः–जीविका येन तादृशस्य, **अतिविषमदुर्गबलगर्वितस्य** अतिविषमं–परमदुर्धर्षं, यद् दुर्गं–पर्वतादिकं रिपुप्रवेशप्रतिरोधकं दुर्गमं स्थानं, तदात्मकं यद् बलं–सामर्थ्यम्, यद्वा बलं–सैन्यं च, ताभ्यां गर्वितस्य–मदान्वितस्य, **पर्वतकनाम्नः** तत्संज्ञ-

शस्त्रपातविद्राविताखिलदस्युलोकश्च शोकलम्बालकं सबालकमादाय तदीयमन्तःपुरपुरन्ध्रिसार्थमर्थसंभारं च भूयः स्वशिबिराभिमुखोऽभवम् [थ]। प्रस्थितस्य च प्रथम एव प्रयाणके मम त्रिभागशेषायां निशीथिन्यामत्रिनामा भट्टपुत्रः 'क्व युवराजः, क्व युवराजः' इति पृच्छञ्जवनिरायतपातया नौकया निकटमाजगाम [द], जगाद च—"कृतप्रणामः कुमारसेनापतिर्विज्ञापयति—योऽयमनतिदूरे दर्शितपरिमण्डलाभोगदर्शनीयाकृतिरुन्नत्य पर्याप्ताम्बरो गौरीस्तन इव त्र्यम्बकोरःस्थलस्य स्थपुटयन् विस्तारमर्णवजलस्य वामतोऽवलोक्यते [ध], एष चूडालंकारः पञ्चशैलकद्वीपस्य लीलावतंसकः सागरस्य क्रीडास्थाननगरममरमिथुनानां सिद्धिक्षेत्रं विद्याधरगणानामग्रिमो रामणीयकेन सर्वपर्वतानां रत्नकूटो नाम सानुमान् [न], एष किल हृदयस्खलन्मैथिलीविरहशोकशङ्कोर्लङ्कापुरीमभि प्रस्थितस्य दाशरथेराज्ञया पर्वतानाहरद्भिः प्लवगयूथाधिपैरुत्पाट्य हाटकगिरेः सानुरानीतः [प], उपनीतश्च भुजबलावलेपादनादरप्रसारितैककरतलस्य सेनापतेर्नलस्य तेनापि

टिप्पनकम्—नौकया लघुनावा [द]। **स्थपुटयन्** निम्नोन्नतं कुर्वन् [ध]।

कस्य, **किरातराजस्य** भिल्लाधिपतेः **अप्रतर्कितम्** आकस्मिकम्, **अवस्कन्दम्** आक्रमणम्, **अपातयं** कृतवानहम्। **च** पुनः, **अदयशस्त्रपातविद्राविताखिलदस्युलोकः** अदयशस्त्रपातैः निर्दयशस्त्राघातैः— विद्राविताः कारितपलायनाः, अखिलाः-समस्ताः, दस्युलोकाः-चौरशत्रुजना येन तादृशः, **शोकलम्बालकं** शोकेन लम्बमानकेशम्, **सबालकं** बालसहितं, **तदीयं** रिपुसम्बन्धिनम्, **अन्तःपुरपुरन्ध्रिसार्थम्** अन्तःपुराङ्गनासमूहम्, **च** पुनः, **अर्थसंभारं** धनराशिम्; **आदाय** गृहीत्वा, **भूयः** पुनः, **स्वशिबिराभिमुखः** स्वसैन्यावासाभिमुखः, तद्गमनोद्यत इत्यर्थः, **अभवं** जातः [थ]। **प्रस्थितस्य** कृतप्रयाणकस्य, प्रथम एव मम **प्रयाणके** प्रस्थाने, **त्रिभागशेषायां** अवशिष्टतृतीयभागायां, **निशीथिन्यां** रात्रौ, **अत्रिनामा** तत्संज्ञकः, **भट्टपुत्रः** भट्टकुमारः, 'क्व युवराजः क्व युवराजः' अस्तीति शेषः, इति **पृच्छन्** प्रश्नं कुर्वन्, **जवनिरायतपातया** जवेन-वेगेन, निरायतः—अतिदीर्घः, पातः—सञ्चारो यस्यास्तादृश्या, **जवनिरायतपताकया** इति पाठे तु जवेन-वेगेन, नितराम्, आयताः-दीर्घीभूताः, पताका यस्यास्तादृश्या, **नौकया** लघुनावा, **निकटं** समीपम्, **आजगाम** आगतवान् [द]। **च** पुनः, **जगाद** उक्तवान्। किमित्याह-**कृतप्रणामः** विहिताभिवादनः, **कुमारसेनापतिः** कुमारस्य-भवतः, सेनाध्यक्षः, **विज्ञापयति** सूचयति, यद्वा हे कुमार ! कृतप्रणामः सेनापतिर्विज्ञपायतीत्यर्थः, किमित्याह-**अनतिदूरे** किञ्चिद्दूरे, **दर्शितपरिमण्डलाभोगदर्शनीयाकृतिः** दर्शिता-दृष्टिगोचरतां गमिता, परिमण्डलेन—वर्तुलेन, आभोगेन—विस्तारेण, दर्शनीया, आकृतिः—आकारो येन तादृशः, पुनः **उन्नत्य** उन्नतो भूत्वा, उद्गत्येत्यर्थः, **पर्याप्ताम्बरः** व्याप्तगगनमण्डलः, **त्र्यम्बकोरःस्थलस्य** शिववक्षःस्थलस्य, गौरीस्तन इव, **अर्णवजलस्य** समुद्रजलस्य, विस्तारं, **स्थपुटयन्** आच्छादयन्, निम्नोन्नतं कुर्वन् वा, योऽयं, **वामतः** वामभागे, **अवलोक्यते** दृश्यते, **एष** सोऽयं **रत्नकूटः** अन्वर्थतत्संज्ञः, **सानुमान्** पर्वतः, अस्तीति शेषः, **नामे**ति वाक्यालङ्कारे, कीदृशः ? **पञ्चशैलकद्वीपस्य** पञ्चशैलाः-पर्वताः सन्ति यस्मिंस्तस्मिन्नन्वर्थतत्संज्ञकद्वीपस्य, **चूडालङ्कारः** मस्तकालङ्कारः, पुनः **सागरस्य** समुद्रस्य, **लीलावतंसकः** क्रीडालङ्कारः, पुनः **अमरमिथुनानां** देवदम्पतीनां, **क्रीडास्थानं** क्रीडाक्षेत्रम्, **विद्याधरगणानां** विद्याधरः-प्राप्तातिशयमानुषविशेषः, तत्समूहानां, **सिद्धिक्षेत्रम्** अणिमाद्यष्टसिद्धिपीठम्, पुनः **रामणीयकेन** सौन्दर्येण, **सर्वपर्वतानां** निखिलपर्वतानाम्, **अग्रिमः** अग्रेसरः [न]। **हृदयस्खलन्मैथिलीविरहशोकशङ्कोः** हृदये स्खलन्-आपतन्, मैथिलीविरहजन्यशोकरूपः शङ्कुः—कीलको बाणः शूलं वा यस्य तादृशस्य, पुनः **लङ्कापुरीमभि** लङ्काऽभिमुखं, **प्रस्थितस्य** कृतप्रस्थानस्य, **दाशरथेः** रामचन्द्रस्य, आज्ञया पर्वतान्, **आहरद्भिः** सेतुबन्धार्थमानयद्भिः, **प्लवगयूथाधिपैः** मर्कटगणाधिपैः, **उत्पाट्य** त्रोटयित्वा, **हाटकगिरेः** सुवर्णपर्वतस्य, सुमेरोरित्यर्थः, **एषः** सोऽयं, **सानुः** समस्थलरूप एकदेशः, **किल** निश्चयेन, आनीतः [प]। **च** पुनः, **भुजबलावलेपात्** बाहुबलाभिमानात्, **अनादरप्रसारितैककरतलस्य** अनादरेण प्रसारितम् एकं

रमणीयतातिशयदर्शनप्रीतमनसा सुचिरमवलोक्य नायमुद्रागतुङ्गद्युतिपिशङ्गिताशामुखो वज्रमणिरिव कृत्रिमैर्मणिभिः पाषाणमृन्मयैरमीभिरचलैः सहैकत्र समवायमर्हतीति विमृश्य सेतोः पृथक् पाथोनिधौ निहितः, पयोधिनापि पुत्रबहुमानादात्मनः क्रीडागिरित्वेनोपकल्पितः [फ], तदत्र विपुलावकाशपरिसरे सुप्रापशीतलस्वादुनिर्झराम्भसि स्वच्छन्दलभ्यचन्दनादिपादपैधसि निरन्तरफलितनालिकेलकदलीपनसपिण्डखर्जूरप्रायतरुषण्डे तरङ्गिणीतीरसुलभदेवतार्चनोचितविशालमणिशिले युक्तमावासयितुम् [ब]; यतो दूरमायाता वरूथिनी, व्यथितो निशीथिनीजनितजाड्योद्रेकेण समुद्रमरुता सर्व एव सुखोचितो जनः, श्रमविकलबाहवो न वाहयन्ति सत्वरमरित्राणि यानपात्रेषु पौतिकाः, न शक्नुवन्ति निद्रावशीकृताः कर्तुमवष्टम्भं कूपस्तम्भकेषु कर्णधाराः, समीरोऽपि संप्रति प्रतीपगतिः प्रवाति, नाभिधावन्ति शिबिरगामिनं मार्गमर्गलितानीव प्रेर्यमाणान्यपि पुरो निर्यामकैः प्रवहणानि, नास्ति कश्चिन्नेदीयानितश्चलितानामाश्रयो-

---

टिप्पनकम्—**उपनीतश्च** ढौकितश्च, वानरैरिति शेषः [फ] । एधः-काष्ठम् [ब] । **अरित्रं**-यानपात्रवहित्रम् । **नेदीयान्** प्रत्यासन्नतरः [भ] ।

करतलं येन तादृशस्य, सेनापतेः, **नलस्य** तत्संज्ञकमर्कटस्य, **उपनीतः** उप-समीपं, नीतः-उपस्थापितः । **रमणीयतातिशयदर्शनप्रीतमनसा** रमणीयतातिशयस्य-तदीयसौन्दर्योत्कर्षस्य, दर्शनेन प्रीतं-प्रसन्नं मनो यस्य तादृशेन, **तेनापि** नलेनापि, **सुचिरम्** अतिदीर्घकालम्, **अवलोक्य** दृष्ट्वा, **नायमुद्रागतुङ्गद्युतिपिशङ्गिताशामुखः** उद्रागाभिः-उत्कटवर्णाभिः, तुङ्गद्युतिभिः-उच्चैःप्रसृतकान्तिभिः, पिशङ्गितानि-पीतिमानमापादितानि, आशामुखानि-दिङ्मुखानि येन तादृशः, **अयं** सुमेरुसानुः, **वज्रमणिः** हीरकमणिः, **कृत्रिमैः** कल्पितैः, मणिभिः, **पाषाणमृन्मयैः** प्रस्तरमृत्तिकामयैः, **अमीभिः** एभिः, **अचलैः** पर्वतैः सह, **एकत्र** एकस्मिन् स्थाने, **समवायं** सम्मेलनं, न, **अर्हति** तद्योग्यो भवति, **इति** इत्थं, **विमृश्य** विचार्य, सेतोः, **पृथक्** बहिः, **पाथोनिधौ** समुद्रे, **निहितः** स्थापितः । **पयोधिनापि** समुद्रेणापि, **पुत्रबहुमानात्** पुत्रसदृशस्नेहातिशयात्, **आत्मनः** स्वस्य, **क्रीडागिरित्वेन** क्रीडोपयोगिपर्वतत्वेन, **उपकल्पितः** स्वीकृतः [फ] । **तत्** तस्माद्धेतोः, **अत्र** अस्मिन्, **विपुलावकाशपरिसरे** विपुलः-विस्तृतः, अवकाशः-स्थितियोग्यतासम्पादकप्रदेशो यत्र तादृशे, परिसरे-पर्वतसमीपप्रदेशे, **आवासयितुं** सैन्यं निवासयितुं, **युक्तम्** उचितम्, कीदृशे ? **सुप्रापशीतलस्वादुनिर्झराम्भसि** सुप्रापम्-अनायासलभ्यं, शीतलं स्वादु-मधुरं च, निर्झरस्य-पर्वतान्निःसृतजलप्रवाहस्य, अम्भः-जलं यस्मिंस्तादृशे, पुनः **स्वच्छन्दलभ्यचन्दनादिपादपैधसि** स्वच्छन्दं-स्वाधीनं यथा स्यात् तथा, लभ्यानि-प्राप्याणि, चन्दनादिपादपानां-चन्दनादिवृक्षसम्बन्धीनि, एधांसि-काष्ठानि यस्मिंस्तादृशे, पुनः **निरन्तरफलितनालिकेलकदली पनस-पिण्ड-खर्जूरप्रायतरुषण्डे** निरन्तरफलितैः-अनवरतफलितैः, नालिकेलादिभिः, प्रायाः-प्रचुराः, तरुषण्डाः-तरुवनानि यस्मिन् तादृशे, पुनः **तरङ्गिणीतीरसुलभदेवतार्चनोचितविशालमणिशिले** तरङ्गिण्याः-नद्याः, तीरे सुलभा-सुकरा, देवतार्चनोचिता-देवपूजनयोग्या, विशाला, मणिशिला-मणिमयफलकं यस्मिंस्तादृशे [ब] । **यतः** यस्माद्धेतोः, दूरम्, **आयाता** आगता, **वरूथिनी** सेना, **सर्व एव** सकलोऽपि, **सुखोचितः** सुखकराहारविहाराभ्यस्तः, **जनः** लोकः, **निशीथिनीजनितजाड्योद्रेकेण** निशीथिन्या-रात्र्या, जनितः-उत्पादितः, जाड्योद्रेकः-शैत्यातिशयो यस्मिंस्तादृशेन, **समुद्रमारुता** समुद्रवायुना, **व्यथितः** पीडितः, अस्तीति शेषः । **श्रमविकलबाहवः** श्रमेण विकलाः-विह्वलाः, बाहवो-भुजा येषां तादृशाः, **पौतिकाः** पोतवाहकाः, **यानपात्रेषु** पोतेषु, **अरित्राणि** जलविक्षेपककाष्ठानि, **सत्वरं** शीघ्रं, न **वाहयन्ति** सञ्चारयन्ति । **निद्रावशीकृताः** निद्रया अधीनीकृताः, **कर्णधाराः** नाविकाः, **कूपस्तम्भकेषु** गुणवृक्षदण्डेषु, **अवष्टम्भम्** अवरोधं, कर्तुं न, **शक्नुवन्ति** पारयन्ति । **सम्प्रति** इदानीं, **समीरोऽपि** वायुरपि, **प्रतीपगतिः** प्रतिकूलगतिः, **प्रवाति** वहति । **निर्यामकैः** वाहकैः, **पुरः** अग्रे, **प्रेर्यमाणान्यपि** प्रचार्यमाणान्यपि, **प्रवहणानि**

चितोऽन्यः प्रदेशो द्वीपसंनिवेशः पर्वतो वा, सर्वतो वेत्रलतावनाकीर्णमपारीयमर्ण एव केवलम् [भ], अतो विलम्ब्य त्रिचतुराण्यहानि प्रतिपाल्य पृष्ठानुपातिनं सैनिकलोकं विधाय रिपुयोधमार्गणव्यथितमर्मणो वीरवर्गस्य व्रणकर्म कृत्वा विचित्रतरुफलोपपादनेन क्षीणपाथेयसंग्रहदुःस्थस्य दुर्गतपदातिसार्थस्य क्षुधः प्रतीकारं प्रगुणीकृत्य पटुपवनपाटितसितपटानि गिरितटाघातविघटितफलकसंधिबन्धानि यानपात्राणि पूरयित्वा स्वादुसलिलेन रिक्तजलभाण्डानि गृहीत्वा कियन्मात्रमपि सारमिन्धनदारु गम्यते प्रतिदिनमविच्छिन्नैः प्रयाणैः, इति [म] श्रुत्वा प्रभुः प्रमाणम्" अहं तु क्षणमात्रकृतविमर्शः प्रतिगृह्य चेतसा तस्य वचनमेवं क्रियते इत्युदीर्य तं व्यसर्जयम् [य]। गते च तत्र यथागतमतीते च कियत्यपि कालक्षणे संक्षोभितसकलजलचरः स्ववासतरुखण्डोड्डीनभारुण्डपक्षिपक्षाक्षेपरवविस्तारितस्तटशायिमहाकायकरिमकरपतनवेगदूरोच्छलितपयसा संभ्रममुत्थाय निरूप्यमाण इव पुनरमृतमन्थनारम्भभीतेनाम्भोधिना सत्वरोत्थानविस्तरद्गुहामुखोत्पतत्केसरिकुलैश्च

पोताः, **अर्गलितानीव** केनापि निरुद्धानीव, **शिबिरगामिनं** सैनिकाऽऽवासगामिनं, **मार्गं** पन्थानं, न, **अभिधावन्ति** शीघ्रं गच्छन्ति । **इतः** अस्मात् प्रदेशात्, **चलितानां** प्रस्थितानाम्, **आश्रयोचितः** विश्रामयोग्यः, **नेदीयान्** अतिनिकटः, **द्वीपसन्निवेशः** द्वीपसंस्थानरूपः, **पर्वतः** तद्रूपो वा, **अन्यः** कश्चित्, प्रदेशः, **नास्ति** न वर्तते; किन्तु **सर्वतः** सर्वत्र, **वेत्रलतावनाकीर्णं** वेत्राख्यलतावनव्याप्तम्, केवलम्, **अपारीयं** पाररहितम्, **अर्ण एव** जलमेव, अस्तीति शेषः [**भ**]। **अतः** अस्मात् कारणात्, **त्रिचतुराणि** त्रीणि वा चत्वारि वा, **अहानि** दिनानि, **विलम्ब्य** विलम्बं कृत्वा, पुनः **पृष्ठानुपातिनं** पृष्ठानुगामिनं, **सैनिकलोकं** सैन्यजनं, **प्रतिपाल्य** प्रतीक्ष्य, पुनः **रिपुयोधमार्गणव्यथितमर्मणः** रिपुयोधानां–शत्रुभटानां, मार्गणैः–बाणैः, व्यथितानि–दुःखितानि, मर्माणि–मर्मस्थानानि यस्य तादृशस्य, **वीरवर्गस्य** स्ववीरगणस्य, **व्रणकर्म** व्रणचिकित्सां, **विधाय** कृत्वा, पुनः **क्षीणपाथेयसंग्रहदुःस्थस्य** क्षीणेन–व्ययं गतेन, पाथेयसंग्रहेण–पथि भोजनीयवस्तुजातेन, दुःस्थस्य–दुरवस्थितस्य, **दुर्गतपदातिसार्थस्य** दरिद्रपादगामिगणस्य, **विचित्रतरुफलोपपादनेन** विविधवृक्षफलसंग्रहेण, **क्षुधः** बुभुक्षायाः, **प्रतीकारं** प्रशमनं कृत्वा, पुनः **पटुपवनपाटितसितपटानि** पटुपवनैः–तीव्रवायुभिः, पाटिताः–छिन्नाः, सितपटाः–बद्धवस्त्राणि येषु तादृशानि, पुनः **गिरितटाघातविघटितफलकसन्धिबन्धानि** गिरितटाघातैः पर्वतप्रान्ताघातैः, विघटितः–विश्लेषितः, फलकसन्धीनां–काष्ठपट्टिकासम्मेलनप्रदेशानां, बन्धो येषु तादृशानि, **यानपात्राणि** पोतान्, **प्रगुणीकृत्य** प्रकृष्टगुणानि विधाय, सज्जीकृत्येत्यर्थः, पुनः **रिक्तजलभाण्डानि** शून्यजलपात्राणि, **स्वादुसलिलेन** मधुरजलेन, **पूरयित्वा** पूर्णीकृत्य, पुनः **कियन्मात्रं** कियत्प्रमाणकं, **सारं** दृढम्, **इन्धनदारु** पावकोद्दीपनकाष्ठं, गृहीत्वा, **अविच्छिन्नैः** विच्छेदरहितैः, **प्रयाणैः** प्रस्थानैः, प्रतिदिनं **गम्यते** गंस्यते [**म**]; **इति** इत्थं, सन्देशं **श्रुत्वा** श्रवणगोचरीकृत्य, **प्रभुः** त्वं, **प्रमाणं** तदनुसारकर्तव्याकर्तव्यावधारणसमर्थः, इति, अहं तु **क्षणमात्रकृतविमर्शः** क्षणमात्रविहितभावनः, **चेतसा** हृदयेन, **तस्य** सेनापतेः, **वचनं** वाक्यं, **प्रतिगृह्य** आदाय, एवं **क्रियते** अनुष्ठीयते, **इत्युदीर्य** इत्युक्त्वा, **तं** भट्टपुत्रं, **व्यसर्जयं** त्यक्तवान् अस्मि [**य**] । **तत्र** तस्मिन् भट्टपुत्रे, **यथाऽऽगतं** येन प्रकारेण आगमनं कृतं तथा, गते सति, **च** पुनः, **कियत्यपि** कतिपये, **कालक्षणे** कालसम्बन्धिनि क्षणे, **अतीते** व्यतीते सति, **तारगम्भीरः** उच्चगम्भीरः, **सैन्यावासभेरीध्वनिः** शिबिरसंनिवेशसूचकभेरीनादः, **समन्तात्** सर्वतः, **दिगन्तराणि** दिङ्मध्यानि, **तस्तार** आच्छादितवान्, व्याप्तवान् इत्यर्थः, कीदृशः ? **संक्षोभितसकलजलचरः** संक्षोभिताः–सम्भ्रमिताः, सकलाः–समस्ताः, जलचराः–जलजन्तवो येन तादृशः, पुनः **स्ववासतरुखण्डोड्डीनभारुण्डपक्षिपक्षाक्षेपरवविस्तारितः** स्ववासभूतात्–स्वनिवासाधिकरणभूतात्, तरुखण्डात्–वृक्षवनात्, उड्डीनानाम्–उत्पतितानां, भारुण्डपक्षिणां–तदाख्यपक्षिजातिविशेषाणां, पक्षाक्षेपरवैः–पक्षोत्क्षेपणध्वनिभिः, विस्तारितः–विस्तारमापादितः, पुनः **तटशायिमहाकायकरिमकरपतनवेगदूरोच्छलितपयसा** तटशायिनां–तटसुप्तानां, महाकायानां–विशालशरीराणां, करिणां–जलहस्तिनां, मकराणां–नक्राणां च, पतनवेगेन–समुद्रनिपातवेगेन, दूरमुच्छलितं, पयः–जलं यस्य तादृशेन, अत एव **पुनरमृतमन्थनारम्भभीतेन** पुनः–द्वितीयवारं, य अमृतमन्थनस्य–सुरासुरकर्तृकामृतोद्धरणार्थविलोडनस्य, आरम्भः–उपक्रमः, तद्भीतेन, **अम्भोधिना** समुद्रेण, **ससम्भ्रमं** सम्भ्रमपूर्वकम्, उत्थाय, **निरूप्यमाण इव** निश्चीयमान इवेत्युत्प्रेक्षा, **च** पुनः; **सत्वरोत्थानविस्तरद्गुहामुखोत्पतत्केसरिकुलैः** सत्वरोत्थानेन–ससम्भ्रमोत्थानेन, विस्तरन्ति–विस्तारमापद्य-

कुलिशपातशङ्काविदीर्णहृदयनिर्गलत्प्राणैरिव निशम्यमानो मैनाकवर्ग्यैर्गिरिभिः समन्तात् तस्तार दिगन्तराणि तारगम्भीरः सैन्यावासभेरीध्वनिः [र], येन श्रुतिविषयमायातेन स्तम्भितेवाऽऽहूतेव दत्ताज्ञेव सा वरूथिनी क्षणमेकमखिलापि निश्चला बभूव, उच्चचाल च गतिरभसचलितध्वजावचूलचामरा प्रत्यचलम्, अन्योऽन्य-संघट्टविघटितानेकयानपात्रा च प्राप कष्टेन घट्टोद्देशम् [ल]। अथ दशाशामुखविसर्पी सर्पितस्तारतुमुलेन प्रतिवेलमास्फालितवेलातटानामुदधिवीचीनामुदञ्चता दूरमश्रान्तसंतानेन कलकलेन विघटितजलदेवतावृन्द-निद्रः [व]–

'भद्र! सर पुरः किञ्चित्; आर्य! देहि गमनमार्गम्; अङ्ग! मा पीडय ममाङ्गमङ्गेन; मङ्गलक! कोऽयं बलदर्पः? कूर्पराघातैः परानाहंसि; हंस! हस्यसे दूरमुत्क्षिप्तनिवसनाग्रपल्लवोऽनया, लावण्यवति! पृष्ठतो निबिडलग्ना पीडयसि मामन्तर्बहिश्चातिनिष्ठुरेण वलगता पुरस्तनपीठेन; तरङ्गिके! दूरमपसर, विघ्निता गतिस्तव

टिप्पनकम्—तालतुमुलेन उच्चाव्यक्तशब्देन [व]।

मानानि, दीर्घीभवन्तीत्यर्थः, पुनः गुहामुखात्–कन्दराग्रात्, उत्पतन्ति–उच्छलन्ति, केसरिकुलानि–सिंहगणा येषु तादृशैः, **मैनाकवर्ग्यैः** मैनाकजातीयैः, **गिरिभिः** पर्वतैः, **कुलिशपातशङ्काविदीर्णहृदयनिर्गलत्प्राणैरिव** कुलिशपातशङ्कया–वज्रपातशङ्कया, विदीर्णात्–पाटितात्, हृदयात्, निर्गलन्तः–निर्गच्छन्तः प्राणा येषां तादृशैरिवेत्युत्प्रेक्षा, **निशम्यमानः** श्रूयमाणः [र]। **श्रुतिविषयं** श्रवणगोचरताम्, **आयातेन** आगतेन, प्राप्तेनेत्यर्थः, **येन** भेरीध्वनिना, **स्तम्भितेव** निरुद्धेव, **आहूतेव** कृताह्वानेव, **दत्ताज्ञेव** कृतादेशेव, **अखिलापि** समस्तापि, **वरूथिनी** सेना, एकं क्षणं **निश्चला** स्थिरा, **बभूव** अभूत्। **च** पुनः, **गतिरभसचलितध्वजावचूलचामरा** गतिरभसेन–गमनवेगेन, चलितानि–उद्धूतानि, ध्वजावचूलचामराणि–ध्वजाधोमुखशिखचामराणि यस्यां तादृशी सती, **च** पुनः, **प्रत्यचलं** पर्वतं प्रति, **उच्चचाल** उत्कर्षेण चलितवती। **अन्योऽन्यसङ्घट्टविघटितानेकयानपात्रा** अन्योऽन्यसङ्घट्टेन–परस्परसङ्घर्षेण, विघटितानि–विश्लेषितानि, विदारितानीति यावत्, अनेकानि यानपात्राणि–पोता यस्यास्तादृशी सती, **कष्टेन** क्लेशेन, **घट्टोद्देशं** तीरोर्ध्वदेशं, **प्राप** प्राप्तवती [ल]। **अथ** अनन्तरं, **शिबिरलोकस्य** सैनिकजनस्य, **कलकलः** कोलाहलः, **'उल्ललास** उदभूत्' इत्यग्रेणान्वेति, कीदृशः? **दशाशामुखविसर्पी** दशदिगन्तप्रसरणशीलः, पुनः **प्रतिवेलं** तस्यां तस्यां जलधिनीरविकाररूपायां वेलायाम्, **आस्फालितवेलातटानाम्** आहतनिरुक्तवेलाविषयतीराणाम्, **उदधिवीचीनां** समुद्रतरङ्गाणां, दूरम्, **उदञ्चता** उद्गच्छता, पुनः **अश्रान्तसन्तानेन** अविच्छिन्नपरम्परेण, पुनः **तारतुमुलेन** उच्चगम्भीरेण, **कलकलेन**–कोलाहलेन, **विसर्पितः** प्रसारितः, वर्धित इति यावत्। पुनः कीदृशः कलकलः? **विघटितजलदेवतावृन्दनिद्रः** विघटिता–विध्वंसिता, जलदेवतावृन्दस्य-जलवासिदेवगणस्य, निद्रा येन तादृशः, पुनः **इत्यादिश्रूयमाणानेकसैनिकशतालापः** इत्यादयः–एवंविधाः, श्रूयमाणा अनेके सैनिकशतस्य–शतसंख्यकसैनिकानाम्, आलापाः–आभाषणानि यस्मिंस्तादृश इति दूरवर्ति-विशेषणान्तरम् [व], तत्र किमादयस्तदालापा इत्याह—

भद्र! कल्याणिन्!, **पुरः** अग्रे, **किञ्चित्** ईषत्, **सर** गच्छ; **आर्य!** श्रेष्ठ!, **गमनमार्गं** गमनावकाशं, देहि; **अङ्ग!** भो!, मम **अङ्गं** शरीरावयवम्, **अङ्गेन** शरीरावयवेन, तत्संघट्टनेनेत्यर्थः, **मा** न, **पीडय** व्यथय; **मङ्गलक!** कल्याणिन्! यद्वा तत्संज्ञक! **अयम्** अनुभूयमानः, **बलदर्पः** बलगर्वः, कः? येनेति शेषः, **कूर्पराघातैः** भुजमध्यग्रन्थिकृताभिघातैः, **परान्** अन्यान्, **आहंसि** ताडयसि; **हंस!** तत्संज्ञक!, **दूरमुत्क्षिप्तनिवसनाग्रपल्लवः** दूरमुत्क्षिप्तः–आर्द्रताभयादत्यन्त-मुपरिगात्रे समानीतः, निवसनापल्लवः–वस्त्रप्रान्तभागरूपः पल्लवो येन तादृशः, **अनया** स्त्रिया, **हस्यसे** विडम्ब्यसे; **लावण्यवति!** सौन्दर्यवति!, **पृष्ठतः** पृष्ठभागे, **निबिडलग्ना** अतिसंसृष्टा, त्वमिति शेषः, **अतिनिष्ठुरेण** अतिकठिनेन, पुनः **पुरः** अग्रे, **वलता** गच्छता, **स्तनपीठेन** स्तनतलेन, **अन्तः** मनसि, **बहिश्च** बाह्यप्रदेशे च, **पीडयसि** क्लेशयसि; **तरङ्गिके!** तन्नाम्नि! दूरम्, **अपसर** अपगच्छ, तव **जघनभित्त्या** कटिपुरोभागरूपभित्त्या, **सर्वतः** सर्वभागेषु, **निरुद्धमार्गस्य**

जघनभित्त्या सर्वतो निरुद्धमार्गस्यास्य सैनिकवर्गस्य; लवङ्गिके! परिकरबन्धदर्शनेऽपि परिचारकः स्विन्नसकलगात्रयष्टिर्यथैष कम्पते तथावश्यमवतरन्त्यास्तरीतस्तव घनस्तनजघनभारेण पीडितो व्रीडयिष्यति प्रेक्षकजनम्; व्याघ्रदत्त! धाव, शीघ्रमेषा विपद्यते निपतिता पोतात् पितामही मकरिकायास्तव श्वश्रूः; अश्रूणि किं सृजसि? विसृज वार्तामपि तस्य तथाविधस्थानपतितस्य दस्युनगरनारीकर्णभूषणसुवर्णस्य; स्तेनलूनग्रन्थिः पथि प्राप्स्यति विनाशं विना शम्बलेन बलभद्रकः; भद्रकं भवति यद्यासाद्यते समग्रमुग्रजनसंमर्दपीडितेन मया परेषामर्पितं सर्पिः; वयस्य! वसुदत्त! किमुत्तरं दास्यामि भर्त्तुराविष्टस्य? विनष्टाः क्षारोदकेन मोदकाः; [श] मन्थरक! सा स्थवीयसी कन्था गलितमात्रैव करतलाद् गिलिता तिमिङ्गिलेन, गललग्नहस्तेन मर्तव्यमधुना हिमर्त्तौ शीतेन; भ्रातर्! उत्प्लुत्य नौफलकाद् दत्तफालेन निष्फलमेव भग्नस्त्वया जानुः, अनुचराधीनेन धीधनेनाधुना व्यवहर्तव्यम्; अग्निमित्र! परिहृत्य तीर्थमुत्पथेन व्रजन्नतिथिर्भविष्यसि ग्राहाणाम्; अरे ग्रहिक! मा वृथा कुट्टय पृष्ठकर्परे कूर्मम्, उदरमर्म पीडयाऽस्य निबिडमङ्गुलीयुगलेन;

टिप्पनकम्—**स्थवीयसी** स्थूलतरा। ग्राहः–जलचरः। प्रसेवकः–कोत्थलकः। **निरनुक्रोशो** निर्दयः, **क्रोशरुन्दं** गव्यूतिविस्तीर्णम्। प्लवकः–मण्डूकः [ष]।

अवरुद्धमार्गस्य, **अस्य** वर्तमानस्य, **सैनिकवर्गस्य** सैन्यसमूहस्य, **गतिः** गमनं, **विघ्निता** प्रतिबद्धा; **लवङ्गिके!** तत्संज्ञिके!, **परिकरबन्धदर्शनेऽपि** उत्तरीयाधरीयवस्त्राभ्यां दृढगात्रबन्धावलोकनेऽपि, **स्विन्नसकलगात्रयष्टिः** स्विन्ना–स्वेदार्दा, सकला–संपूर्णा, गात्रयष्टिः–शरीररूपा यष्टिर्यस्य तादृशः, एषः, **परिचारकः** सेवकः, यथा **कम्पते** कम्पं प्राप्नोति तथा, **तरीतः** नौकातः, **अवतरन्त्याः** अधो गच्छन्त्याः, तव, **घनस्तनजघनभारेण** घनयोः–सान्द्रयोः, स्तनयोः, जघनयोः–कटिपुरोभागयोश्च, भारेण, **पीडितः** क्लेशितः सन्, **प्रेक्षकजनं** दर्शकजनं, **व्रीडयिष्यति** लज्जयिष्यति; **व्याघ्रदत्त!** व्याघ्रदत्तनामक!, **धाव** सत्वरमागच्छ, **पोतात्** जलयानपात्रात्, **निपतिता** स्खलिता, **मकरिकायाः** तत्संज्ञकस्त्रियाः, **पितामही** पितृमाता, तव **श्वश्रूः** श्वशुरभार्या, एषा, **शीघ्रं** झटिति, **विपद्यते** म्रियते; **अश्रूणि** नेत्रजलानि, **किं** किमर्थं, **सृजसि** मुञ्चसि, **तथाविधस्थानपतितस्य** तादृशस्थाने भ्रष्टस्य, दुरवगाहप्रदेशे स्खलितस्येति यावत्, **तस्य** अनुभूतपूर्वस्य, **दस्युनगरनारीकर्णभूषणसुवर्णस्य** शत्रुनगरस्थकामिनीकर्णालङ्करणभूतस्य, सुवर्णस्य, **वार्तामपि** कथामपि, **विसृज** त्यज; **बलभद्रकः** तन्नामा कश्चित् पथभ्रष्टः सैनिकः, **स्तेनलूनग्रन्थिः** स्तेनेन–चौरेण, लूना–उन्मुक्ता, ग्रन्थिः–पाथेयबन्धो यस्मिंस्तादृशं यथा स्यात् तथा, **पथि** मार्गे, शम्बलेन–पाथेयेन, विना, विनाशं प्राप्स्यति; **भद्रकं** कल्याणं, **भवति** भविष्यति, यदि **उग्रजनसम्मर्दपीडितेन** उग्रेण–भयानकेन, जनसम्मर्देन–जनसङ्घर्षेण, पीडितेन–व्यथितेन, **मया परेषाम्** अन्येषाम्, अर्पितं, **समग्रं** समस्तं, **सर्पिः** घृतम्, **आसाद्यते** प्राप्यते; **वयस्य!** सखे!, **वसुदत्त** तन्नामक!, **आविष्टस्य** कोपावेशमापन्नस्य, **भर्तुः** स्वामिनः, किम्? **उत्तरं** प्रतिवचनं, **दास्यामि** वक्ष्यामि, **क्षारोदकेन** क्षाररसवता जलेन, **मोदकाः** खाद्यविशेषाः, **विनष्टाः** विध्वस्ताः; **मन्थरक!** तन्नामक! **स्थवीयसी** अतिस्थूला, सा **कन्था** प्रावरणविशेषः, **करतलात्** हस्ततलात्, **गलितमात्रैव** स्खलितमात्रैव, **तिमिङ्गलेन** मत्स्यविशेषेण, **गिलिता** भक्षिता, **हिमर्त्तौ** हेमन्तऋतौ, **अधुना** सम्प्रति, **गललग्नहस्तेन** गले लग्नो हस्तो यस्मिंस्तादृशेन, **शीतेन** तुषारपातेन, **मर्तव्यं** मरणावसर उपस्थितः; **भ्रातः!** बन्धो!, **नौफलकात्** नौपट्टिकातः, **उत्प्लुत्य** उत्पत्य, **दत्तफालेन** कृतकूर्दनेन त्वया, **निष्फलमेव** वृथैव, **जानुः** ऊरुपर्व, **भग्नः** व्रणितः, **अधुना** सम्प्रति, **धीधनेन** धीमता, **अनुचराधीनेन** भृत्याधीनेन तद्द्वारकेणैवेत्यर्थः, **व्यवहर्तव्यं** व्यवहर्तुं शक्यं, न तु स्वयमेव; **अग्निमित्र!** तत्संज्ञक!, **तीर्थम्** अवतरणमार्गं, **परिहृत्य** त्यक्त्वा, **उत्पथेन** प्रतिकूलमार्गेण, **व्रजन्** गच्छन्, **ग्राहाणां** जलजन्तुविशेषाणाम्, **अतिथिः** प्राघुणिकः, **भविष्यसि** सम्पत्स्यते; अरे **ग्रहिक!** ग्रहणशील! तन्नामक! वा, **पृष्ठकर्परे** तस्य पृष्ठकटाहे, **कूर्मं** कच्छपं, **वृथा** व्यर्थं, मा **कुट्टय** ताडय, किन्तु **अस्य** कूर्मस्य, **निबिडं** सान्द्रम्, **उदरमर्म** उदरग्रन्थिम्, अङ्गुलीद्वयेन–अङ्गुलीयुगलेन, **पीडय** व्यथय;

नोद्गिलिष्यत्यन्यथा चिरेणापि चरणम्; आसन्नमरणः कृष्यतामितो वेत्रगहनादेष मुण्डनिहिततण्डुलप्रसेवको वृद्धसेवकः, प्रविष्टः सङ्कटे; निरनुक्रोशं जनमाक्रोशसि, न तु क्रोशसि रुद्धमिदमग्रतो निजतुन्दम्; तीरमासाद्य श्रमविसंस्थुलः स्थूलपाषाणशङ्कया पृष्ठदेशे निषण्णस्त्रासदूरोत्प्लुतेन स्थलशायिना महाप्लवकेन पश्यत कथं पातितः पुनरगाधे पयोधिवारिणि वराको वरुणकः' [ष]

इत्यादिश्रूयमाणानेकसैनिकशतालापः, क्वचित् पलायमानपुलिनशायिजलमानुषमिथुनचरणचालितवालुकारणितरमणीयः, क्वचित् प्रधावितोद्धृत्तजननिर्दयाक्रान्तशुक्तिसंपुटस्फुटनरवविस्फारितः, क्वचिद् दलितसरसविद्रुमाङ्कुरटसत्कारदन्तुरः, क्वचित् पिच्छिलशिलातलस्खलितनिपतत्पदातिदत्तहास्यसहवासिलोकतालध्वनितरङ्गितो विस्तारवत्यपि नितान्तमवतारमार्गे कृच्छ्रलब्धान्तरस्य सत्वरं तीरमवतरतः शिबिरलोकस्योल्ललास कलकलः [स] ।

टिप्पनकम्—दन्तुरः–करालः [स]।

अन्यथा तत्पीडनाभावे, **चरणं** पादं, **चिरेणापि** दीर्घकालेनापि, न **उद्गिलिष्यति** मुखादुन्मोक्ष्यति; पुनः **मुण्डनिहिततण्डुलप्रसेवकः** मस्तकधृततण्डुलपोट्टलिकः, पुनः **सङ्कटे** विपदि, **प्रविष्टः** मग्नः, अत एव **आसन्नमरणः** निकटमृत्युः, **एषः** अयं, **वृद्धसेवकः** जराजीर्णसेवकः, **इतः** अस्मात्, **वेत्रगहनात्** वेत्रवनात्, **कृष्यताम्** अपसार्यताम्; **निरनुक्रोशं** निर्दयं यथा स्यात् तथा, **निरनुक्रोश** इति पाठे निर्दय इत्यर्थः। **जनं** लोकम्, **आक्रोशसि** तर्जयसि, **तु** किन्तु, **अग्रतः** अग्रे, **रुद्धं** कृतावरोधं, **निजतुन्दं** स्वकीयमांसलोदरं, न **क्रोशसि** शोचसि, **क्रोशनिरुद्धम्** इति पाठे तु क्रोशविस्तीर्णमित्यर्थः; **तीरं** तटम्, **आसाद्य** प्राप्य, **श्रमविसंस्थुलः** श्रमविह्वलः, पुनः **स्थूलपाषाणशङ्कया** स्थूलप्रस्तरसन्देहेन, **पृष्ठदेशे** पश्चाद्भागे, **निषण्णः** उपविष्टः, **वराकः** शोचनीयः, **वरुणकः** तदाख्यसैनिकः, **त्रासदूरोत्प्लुतेन** भयदूरोत्पतितेन, **स्थलशायिना** स्थलशयनशीलेन, **महाप्लवकेन** महामण्डूकेन, **पश्यत** अवलोकयत, **अगाधे** गम्भीरे, **पयोधिवारिणि** समुद्रजले, **कथं** केन प्रकारेण, **पुनरिति** वाक्यालङ्कारे निश्चये वा, **पातितः** मज्जितः [ष]।

पुनः कीदृशः कलकलः? **क्वचित्** कस्मिंश्चित् प्रदेशे, **पलायमानपुलिनशायिजलमानुषमिथुनचरणचालितवालुकारणितरमणीयः** पलायमानस्य–सेनाभयाद् विद्रुतस्य, पुलिनशायिनः–सैकततटस्वापशीलस्य, जलमानुषमिथुनस्य–जलीयमनुष्यदम्पत्योः, चरणाभ्यां–पादाभ्यां, चालितानाम्–उत्क्षिप्तानाम्, वालुकानां–सिकतानां, रणितैः शब्दविशेषैः, रमणीयः मनोहरः; पुनः **क्वचित्** कस्मिंश्चित् प्रदेशे, **प्रधावितोद्धृत्तजननिर्दयाक्रान्तशुक्तिसम्पुटस्फुटनरवविस्फारितः** प्रधावितैः–प्रकर्षेण कृतधावनैः, उद्धृत्तजनैः–उद्धतलोकैः, निर्दयं–नितान्तम्, आक्रान्तस्य–आमर्दितस्य, शुक्तिसम्पुटस्य–सम्पुटितशुक्तेः, स्फुटनेन–विश्लेषेण, यो रवः–शब्दः, तेन विस्फारितः–विस्तारितः; पुनः **क्वचित्** कुत्रचित् प्रदेशे, **दलितसरसविद्रुमाङ्कुरटसत्कारदन्तुरः** दलितानां–खण्डितानां, सरसानाम्–आर्द्राणां, विद्रुमाङ्कुराणां–प्रवालाङ्कुराणां, टसत्कारेण–ध्वनिविशेषेण, दन्तुरः–समृद्धः; पुनः **क्वचित्** क्वापि स्थले, **पिच्छिलशिलातलस्खलितनिपतत्पदातिदत्तहास्यसहवासिलोकतालध्वनितरङ्गितः** पिच्छिलात्–चिक्कणात्, शिलातलात्–प्रस्तरतलात्, स्खलितैः–विचलितैः, अत एव निपतद्भिः, पदातिभिः–पादगामिभिः, दत्तैः–कृतैः, हास्यसहवासिभिः–हास्यसहभाविभिः, लोकानां तालध्वनिभिः–करतलशब्दध्वनिभिः, तरङ्गितः–वर्धितः। कीदृशस्य शिबिरलोकस्य? **नितान्तम्** अत्यन्तम्, **विस्तारवत्यपि** विस्तृतेऽपि, **अवतारमार्गे** समुद्रावतारस्थले, **कृच्छ्रलब्धान्तरस्य** कृच्छ्रेण–क्लेशेन, लब्धं–प्राप्तम्, अन्तरम्–अवकाशो येन तादृशस्य, पुनः **सत्वरं** शीघ्रं, **तीरं** तटम्, **अवतरतः** आगच्छतः [स]।

क्रमेण चोत्तीर्णे कियत्यपि राजलोके, रिक्तीकृतोदरलघुषु तटनिकटमानीयमानेषु यानपात्रेषु, प्रस्थितेष्वावासाय पर्वतस्य पूर्वदक्षिणं भूभागमुत्सुकेषु सैनिकवृन्देषु, मुकुलितसितपटेषु दृढनिखातनिष्ठुरकाष्ठकीलनियमितनौकेषु सर्वतोऽवलम्बितस्थूलनाङ्गरशिलानिगडितपोतेषु गृहीतसर्वात्मोपकरणेष्वपसरत्सु नाविकेषु, नायकोपलालनारूढगर्वेषु खर्वीभूय युगपद्गृहीतबहुजनोत्क्षिप्तभरकेष्वावासभूमिं व्रजत्सु भारभुज्यमानभुजसंधिमर्मसु कर्मकरेषु, सरभसप्रधावितेन पुरोयायिना क्लिष्टसेवकजनेन परिगृह्यमाणेषु मणिगुहागृहेषु, हठनिराकृतलुण्टाककीकटप्रायलोके स्वीकुर्वति सगर्वमुपतटप्ररूढप्रौढलवलीलवङ्गकर्पूरपादपानि स्वादुसलिलनिर्झरणानि राजवल्लभविटवण्ठवर्गे [ह], भुजङ्गभयपरिहृतश्रीखण्डशाखिखण्डेषु शिखण्डिरुतमुखरितांल्लतामण्डपानाश्रयत्सु विद्वत्सु, पर्यन्तरोपितशङ्कुसंयम्यमानतनिनणीकेष्वितस्ततो विस्तार्यमाणेष्वमात्यपटसद्मसु,

---

टिप्पनकम्—लवली–चन्दनलता [ह]।

च पुनः, **क्रमेण** पर्यायेण, **कियत्यपि** कतिपयेऽपि, **राजलोके** नृपजने, **उत्तीर्णे** समुद्रादूर्ध्वमागते सति; पुनः **रिक्तीकृतोदरलघुषु** रिक्तीकृतेन–रिक्ततामापादितेन, उदरेण–मध्यभागेन, लघुषु–लघुतामापन्नेषु, **यानपात्रेषु** पोतेषु, **तटनिकटं** तटसमीपम्, **आनीयमानेषु** आगम्यमानेषु सत्सु; पुनः **उत्सुकेषु** आवासोद्यतेषु, **सैनिकवृन्देषु** सैनिकगणेषु, **आवासाय** निवासाय, **पूर्वदक्षिणं** पूर्वदक्षिणदिगन्तरालस्थितं, पर्वतस्य **भूभागं** भूम्येकदेशं; **प्रस्थितेषु** प्रयातेषु सत्सु; पुनः **नाविकेषु** कर्णधारेषु, **अपसरत्सु** अपगच्छत्सु सत्सु, कीदृशेषु? **मुकुलितसितपटेषु** मुकुलितः–उपसंहृतः, सितपटः–नौकोर्ध्वव्याधूयमानश्वेतवस्त्रं यैस्तादृशेषु, पुनः **दृढनिखातनिष्ठुरकाष्ठकीलनियमितनौकेषु** दृढनिखातेन–दृढम्–अत्यन्तं यथा स्यात् तथा, निखातेन–भूगर्भनिवेशितेन, निष्ठुरकाष्ठकीलेन–दृढकाष्ठमयकीलेन, नियमिता–नियन्त्रिता नौका यैस्तादृशेषु, पुनः **सर्वतः** सर्वभागेषु, **अवलम्बितस्थूलनाङ्गरशिलानिगडितपोतेषु** अवलम्बिताभिः–नमिताभिः, स्थूलाभिः–नाङ्गरशिलाभिः–यानपात्रावष्टम्भकलङ्गरेतिख्यातशिलाविशेषैः, निगडितः–नियन्त्रितः, पोतः–यानपात्रं यैस्तादृशेषु, पुनः **गृहीतसर्वात्मोपकरणेषु** गृहीतानि सर्वाणि, आत्मनः–स्वस्य, उपकरणानि–नौवहनोपकरणवस्तूनि यैस्तादृशेषु; पुनः **कर्मकरेषु** किङ्करेषु, **आवासभूमिं** निवासस्थानं, **व्रजत्सु** गच्छत्सु सत्सु, कीदृशेषु? **नायकोपलालनारूढगर्वेषु** नायकस्य–स्वामिनः, तत्कर्तृकयेत्यर्थः, उपलालनया–वात्सल्योचितक्रियया, रूढः–उत्पन्नः, गर्वः–अभिमानो येषु तादृशेषु, पुनः **खर्वीभूय** ह्रस्वतामापद्य, **युगपत्** एककालं, **गृहीतबहुजनोत्क्षिप्तभरकेषु** गृहीतः, बहुजनोत्क्षिप्तः–अधिकजनैः, एकस्योपरि निक्षिप्तः, भरः–भारो यैस्तादृशेषु, पुनः **भारभुज्यमानभुजसन्धिमर्मसु** भारेण भुज्यमानं–कुटिलायमानं, भुजसन्धिमर्म–बाहुसन्धिस्थानरूपं मर्म येषां तादृशेषु; **मणिगुहागृहेषु** मणिमयकन्दरात्मकगृहेषु, **क्लिष्टसेवकजनेन** श्रान्तभृत्यजनेन, **परिगृह्यमाणेषु** समाश्रीयमाणेषु, कीदृशेन? **सरभसप्रधावितेन** सत्वरं कृतप्रधावनेन, पुनः **पुरोयायिना** अग्रगामिना; पुनः **राजवल्लभविटवण्ठवर्गे** राजप्रियजारमूर्खगणे, **स्वादुसलिलनिर्झरणानि** मधुरजलस्रोतांसि, **सगर्वं** साभिमानं, **स्वीकुर्वति** पानावगाहनार्थमङ्गीकुर्वति सति, कीदृशे? **हठनिराकृतलुण्टाककीकटप्रायलोके** हठेन–बलात्, निराकृताः–अपसारिताः, लुण्टाकाः–लुण्ठनशीला ये कीकटाः–कृपणा दरिद्रा वा, तत्प्रायाः–तत्प्रचुराः, लोकाः–जना येन तादृशे, कीदृशानि? **उपतटप्ररूढप्रौढलवलीलवङ्गकर्पूरपादपानि** उपतटं–तटनिकटे, प्ररूढाः–उत्पन्नाः, लवलीनां–क्षुद्रामलकानां चन्दनलतानां वा, लवङ्गानां कर्पूराणां च, पादपाः–वृक्षा येषां तादृशानि [ह]; पुनः **विद्वत्सु** विज्ञजनेषु, **लतामण्डपान्** लतागृहान्, **आश्रयत्सु** निषेवमाणेषु सत्सु, कीदृशेषु? **भुजङ्गभयपरिहृतश्रीखण्डशाखिखण्डेषु** भुजङ्गभयेन–सर्पभयेन, परिहृतः–परित्यक्तः, श्रीखण्डशाखिनां–चन्दनवृक्षाणां, खण्डः–श्रेणी यैस्तादृशेषु, कीदृशान्? **शिखण्डिरुतमुखरितान्** मयूरशब्दवाचालितान्; पुनः **इतस्ततः** अत्र तत्र, **आमात्यपटसद्मसु** सचिवसम्बन्धिवस्त्रमयगृहेषु, **विस्तार्यमाणेषु** प्रसार्यमाणेषु सत्सु, कीदृशेषु? **पर्यन्तरोपितशङ्कुसंयम्यमानतनिनणीकेषु** पर्यन्तरोपितेन–प्रान्तनिखातेन, शङ्कुना–कीलेन, संयम्यमानं–नियन्त्र्यमाणं, तनीनां–पटविस्तारकरज्जूनां, नणीकं–समूहो येषु तादृशेषु; पुनः **सामन्तेषु** क्षुद्रनृपेषु,

दूरविक्षिप्तकण्टकद्रुमविटपवलयितावासेष्वावासयत्सु सत्वरान्तर्वंशिकनिवेश्यमानशुद्धान्तवनितानिशान्तेषु सामन्तेषु, अप्रतीक्षितवितन्यमानदूष्ये निषीदति मणिस्थलीषु स्थूलवसनाच्छादितवपुषि निद्राभरालसदृशि विलासिनीजने [क्ष]।

पुष्कलशुष्कचन्दनकाष्ठसंदीपितानलेषु मुहुर्मुहुर्जठरपृष्ठपरिवर्तनेन व्यपनयत्सु परुषरजनीपवनसंपर्कजनितमङ्गजाड्यमूर्ध्वस्थितेषु दुःस्थितपदातिषु, प्रकाशितनभसि तिरस्कृततरुलतालीनतमसि विप्रलब्धप्रभातसमयोत्सुकचक्रवाकवयसि विलुप्तशैलौषधिज्वलनतेजसि भग्नवनचरमिथुनरहसि संक्षोभितक्षपाचरसदसि सर्पति दिक्षु सर्वतः संधुक्षितानामाशुशुक्षणीनां महीयसि महसि, मुखरितदरीमुखे प्रवृत्ते वातुमन्तःशिबिरमुद्वृत्तसैनिकोपद्रवप्रकुपिताद्रिनिःश्वास इव सोष्मणि सधूमे क्षपाचरमयामानिले [अ], सहसैव तस्य शिखरिणः पश्चिमोत्तराद् दिगन्तरादुदधिमारुतप्रेरितो विरुतसंघात इव संनिकृष्टप्रभातसमयनष्टनिद्राणां वरुण-

---

टिप्पनकम्—दूष्यं–पटगृहम् [क्ष] । वयः–पक्षी, आशुशुक्षणिः–अग्निः [अ] ।

दूरविक्षिप्तकण्टकद्रुमविटपवलयितावासेषु दूरविक्षिप्तैः–दूरदूरविकीर्णैः, कण्टकद्रुमविटपैः–कण्टकवृक्षशाखाभिः, वलयिताः–वेष्टिता ये आवासाः–निवासस्थानानि, तेषु **आवासयत्सु** निवासयत्सु सत्सु, कीदृशेषु? **सत्वरान्तर्वंशिकनिवेश्यमानशुद्धान्तवनितानिशान्तेषु** सत्वरं–शीघ्रम्, अन्तर्वंशिकैः–अन्तःपुराधिकृतजनैः, निवेश्यमानं–समावेश्यमानं, शुद्धान्तवनितानाम्–अन्तःपुराङ्गनानां, निशान्तं–गृहं यैस्तादृशेषु; पुनः **विलासिनीजने** विलासशीलनारीजने, **मणिस्थलेषु** मणिमयभूमिषु, **निषीदति** उपविशति सति, कीदृशे? **अप्रतीक्षितवितन्यमानदूष्ये** अप्रतीक्षितम्–अनपेक्षितं, वितन्यमानं–विस्तार्यमाणं, दूष्यं–पटगृहं येन तादृशे, पुनः **स्थूलवसनाच्छादितवपुषि** स्थूलवसनेन–स्थूलवस्त्रेण, आच्छादितं, वपुः–शरीरं येन तादृशे, पुनः **निद्राभरालसदृशि** निद्राभरेण–निद्राधिक्येन, अलसा–खिन्ना, दृक्–दृष्टिर्यस्य तादृशि [क्ष]; पुनः **ऊर्ध्वस्थितेषु** दण्डायमानतयावस्थितेषु, **दुःस्थितपदातिषु** दुःखेनावस्थितपादगामिषु, **परुषरजनीपवनसम्पर्कजनितं** कठोररात्रिवायुसंसर्गजनितम्, **अङ्गजाड्यम्** अङ्गनिश्चेष्टतां, **व्यपनयत्सु** दूरीकुर्वत्सु सत्सु, केन? **पुष्कलशुष्कचन्दनकाष्ठसन्दीपितानलेषु** पुष्कलेन–प्रचुरेण, शुष्केन–नीरसेन, चन्दनात्मकेन काष्ठेन, सन्दीपिताः–प्रज्वालिता ये, अनलाः–अग्नयः, तेषु, **जठरपृष्ठपरिवर्तनेन** उदरपश्चाद्भागपरावर्तनेन; पुनः **सन्धुक्षितानाम्** उद्दीपितानाम्, **आशुशुक्षणीनाम्** अग्नीनां, **महीयसि** अतिमहति, **महसि** तेजसि, **दिक्षु** दिशां मध्ये, **सर्वतः** समन्ततः, **सर्पति** प्रसरति सति, कीदृशे? **प्रकाशितनभसि** उद्भासितगगनमण्डले, पुनः **तिरस्कृततरुलतालीनतमसि** तिरस्कृतं–निराकृतं, तरुलतालीनं–तरुषु–वृक्षेषु लतासु च, लीनं–लग्नं, तमः–अन्धकारो येन तादृशे, पुनः **विप्रलब्धप्रभातसमयोत्सुकचक्रवाकवयसि** विप्रलब्धम्–अरुणोदयप्रत्यायनया वञ्चितं, प्रभातसमयोत्सुकं–प्रातःकालागमनोत्कण्ठितं, चक्रवाकजातीयं, वयः–पक्षी येन तादृशे, पुनः **विलुप्तशैलौषधिज्वलनतेजसि** विलुप्तं–तिरोहितं, शैलौषधीनां–पर्वतस्यौषधीनां सम्बन्धिनः, ज्वलनस्य–अनलस्य स्वाभाविकस्य, तेजो येन तादृशि, पुनः **भग्नवनचरमिथुनरहसि** भग्नं–निराकृतं, वनचरमिथुनानां–वनेचरदम्पतीनां, रहः–एकान्तो येन तादृशे, पुनः **संक्षोभितक्षपाचरसदसि** संक्षोभितं–विघटितं, क्षपाचराणां–रात्रिचराणां, सदः–गोष्ठी येन तादृशे; पुनः **क्षपाचरमयामानिले** क्षपायाः–रात्रेः, यश्चरमः–अन्तिमो, यामः–प्रहरः, तत्सम्बन्धिनि, अनिले–वायौ; **अन्तःशिबिरं** शिबिरमध्ये, **वातुं** प्रसर्पितुं, प्रवृत्ते सति, कीदृशे? **मुखरितदरीमुखे** शब्दायितकन्दराग्रे, पुनः **उद्वृत्तसैनिकोपद्रवप्रकुपिताद्रिनिःश्वास इव** उद्वृत्तानाम्–उद्धतानां, सैनिकानाम्, उपद्रवेण, प्रकुपितस्य–अतिक्रुद्धस्य, अद्रेः–पर्वतस्य, निःश्वास इव–नासिकामारुत इव, **सोष्मणि** ऊष्मणा–उष्णतया सहिते, पुनः **सधूमे** धूमसहिते [अ]। **सहसैव** शीघ्रमेव, **तस्य** प्रकृतस्य, **शिखरिणः** पर्वतस्य, पश्चिमोत्तरात्, **दिगन्तरात्** दिङ्मध्यात्, **दिव्यमङ्गलगीतनिनदः** मनोज्ञमङ्गलगानध्वनिः, **तं प्रदेशं** तीरप्रदेशम्, **आजगाम** आगतः, क इव? **उदधिमारुतप्रेरितः** समुद्रपवनोद्वेलितः, **सन्निकृष्टप्रभातसमयनष्टनिद्राणां** सन्निकृष्टेन–प्रत्यासन्नेन, प्रभातसमयेन–प्रातःकालेन,

यानवहंसयूथानाम्, आभरणनिस्वन इव स्वनिवासवीथिप्रस्थितानामसुरनगराभिसारिकाव्रातानाम्, अनारतप्रसृतमुरजमृदङ्गझल्लरीकांस्यतालझात्कृतिः, अन्तरान्तरा विसर्पदुच्छृङ्खलशङ्खकाहलाकोलाहलः, स्फुटप्रसृतटङ्कारेण वारंवारमास्फालितद्विगुणबाहुफलकानामुल्लासितो मल्लानामास्फोटरवेण, सविस्तरस्तुतिवृत्तपाठपुरःसरीभिरितस्ततो विस्तारितस्तारमुच्चरन्तीभिश्चतुरचारणवृन्दजयशब्दपरम्पराभिः, अनेकवेणुवीणारवसहस्रसंवर्धितः, प्लावयन्निवामृतस्रोतसा गगनमार्गमाजगाम तं प्रदेशमतिशयश्रव्यो दिव्यमङ्गलगीतनिनदः [आ]। श्रुत्वा च तमहमश्रुतपूर्वमवधाननिश्चलेन चेतसा परमयोगीव क्षणमात्रमुपजाततत्प्रभवदर्शनाभिलाषः प्रेष्य निकटवर्तिनं नरेन्द्रलोकमात्मपरिजनं च पार्श्वविधृतचामरच्छत्रधारादिद्वित्रपरिचारकः, तत्कालमन्तिकस्थमुदधिकूलासन्नसलिलस्थिरावस्थापितनावमच्छिन्नसंतानमागच्छतस्तस्य गीतध्वनेर्दत्तावधानं ध्याननिश्चलनयनतारकं तारकमवोचम् [इ]—'सखे! किमपि सुन्दरो गीतनिःष्यन्दः श्रुतिविषयमवतरन्नेष वारंवारमभिनवाम्भोदगर्जोद्गार

टिप्पनकम्—कांस्यतालाः-कंसालकानि [आ]।

नष्टा—क्षीणा, निद्रा येषां तादृशानां, **वरुणयानहंसयूथानां** वरुणः—पश्चिमाशापतिः, तस्य यानभूताः—वाहनभूता ये हंसास्तेषां, यूथानां—राशीनाम्, **विरुतसंघात इव** निनादसमूह इव, पुनः **स्वनिवासवीथिप्रस्थितानां** निजवासपङ्क्तिप्रयातानाम्, **असुरनगराभिसारिकाव्रातानां** राक्षसपुरवास्तव्यव्यभिचारिणीगणानाम्, **आभरणनिस्वन इव** अलङ्करणझणत्कार इव; पुनः **अनारतप्रसृतमुरज-मृदङ्ग-झल्लरीकांस्यतालझात्कृतिः** अनारतप्रसृता—अविरत-प्रवृद्धा, मुरज-मृदङ्ग-झल्लरी-कांस्यतालानां—तत्तदाख्यवाद्यविशेषाणां, झात्कृतिः—ध्वनिविशेषो यस्मिंस्तादृशः; पुनः **अन्तराऽन्तरा** मध्ये मध्ये, **विसर्पदुच्छृङ्खलशङ्ख-काहलाकोलाहलः** विसर्पन्—प्रसरन्, उच्छृङ्खलः—उच्चः, शङ्खस्य, काहलायाः—महाढक्कायाः, कोलाहलः—ध्वनिर्यस्मिंस्तादृशः; पुनः **स्फुटप्रसृतटङ्कारेण** स्फुटं—स्पष्टं यथा स्यात् तथा, प्रसृतः प्रवृद्धः, टङ्कारः—ध्वनिविशेषो येन तादृशेन, **वारं वारम्** अनेकवारम्, **आस्फालितद्विगुणबाहुफलकानाम्** आस्फालितेन—आहननेन यद्वा आस्फालिते—आहते, द्विगुणे—द्विगुणस्थूले, बाहुफलके—भुजपरिघौ येषां यैर्वा तेषां, **मल्लानां** मल्लपुरुषाणाम्, **आस्फोटरवेण** भुजास्फालनध्वनिना, **उल्लासितः** उन्नमितः; पुनः **चतुरचारणवृन्दजयशब्दपरम्पराभिः** चतुरस्य—निपुणस्य, चारणवृन्दस्य—बन्दिगणस्य, जयशब्दपरम्पराभिः—जयकारश्रेणीभिः, **इतस्ततः** अत्र तत्र, **विस्तारितः** वर्धितः, कीदृशीभिः? **सविस्तरस्तुतिवृत्तपाठपुरस्सरीभिः** सविस्तरः—विस्तारसहितो यः, स्तुतिपाठ-वृत्तयोः—प्रशंसाचारित्रयोः, पाठः—कीर्तनं, तत्पुरस्सरीभिः—तत्प्रमुखाभिः, पुनः **तारम्** उच्चैः, **उच्चरन्तीभि** उद्गच्छन्तीभिः, पुनः **अनेकवेणु-वीणारवसहस्रसंवर्धितः** अनेकेषां वेणूनां—वंशमयवाद्यानां, वीणानां च रवसहस्रैः—सहस्रसंख्याकध्वनिभिः, **संवर्धितः** विस्तारितः; किं कुर्वन्निव? **अमृतस्रोतसा** अमृतप्रवाहेण, **गगनमार्गम्** आकाशमार्गम्, **प्लावयन्निव** प्रवाहयन्निव; पुनः कीदृशः? **अतिशयश्रव्यः** अत्यन्तश्रवणार्हः [आ]। अहं **परमयोगीव** उत्कृष्टयोगीव, **अवधाननिश्चलेन** ऐकाग्र्यस्थिरेण, चेतसा, **अश्रुतपूर्वं** पूर्वमश्रुतं, **तं** निनदं, श्रुत्वा, **क्षणमात्रं** किञ्चित्कालम्, **उपजाततत्प्रभवदर्शनाभिलाषः** उपजातः—उत्पन्नः, तत्प्रभवस्य—तदुत्पत्तिस्थानस्य, दर्शनाभिलाषः—साक्षात्काराभिलाषो यस्य तादृशः, **निकटवर्तिनं** पार्श्ववर्तिनं, **नरेन्द्रलोकं** नृपजनम्, **आत्मपरिजनं** स्वपरिवारं च, **प्रेष्य** प्रस्थाप्य, **पार्श्वविधृतचामरच्छत्रधारादिद्वित्रपरिचारकः** पार्श्वे—निकटे, विधृताः—अवस्थापिताः, चामरच्छत्रधारादयः, द्वित्राः—द्वौ वा त्रयो वा, परिचारकाः—सेवका येन तादृशः, **तारकं** तदाख्यकर्णधारकम्, **अवोचम्** उक्तवान्, कीदृशम्? **तत्कालं** तत्क्षणम्, **अन्तिकस्थं** निकटस्थम्, पुनः **उदधिकूलासन्नसलिलस्थिरावस्थापितनावम्** उदधिकूलस्य—समुद्रतटस्य, आसन्ने—निकटे, सलिले—जले, स्थिरं यथा स्यात् तथा, अवस्थापिता—धृता नौर्येन तादृशम्, पुनः **अच्छिन्नसन्तानम्** अविरतसन्ततिकं यथा स्यात् तथा, **आगच्छतः** आपततः, **तस्य** प्रकृतस्य, **गीतध्वनेः** गानशब्दस्य, तच्छ्रवण इत्यर्थः, **दत्तावधानं** समाहितहृदयं, **ध्याननिश्चलनयनतारकं** ध्यानेन—मनःसमाधानेन, निश्चला—स्थिरा, नयनतारका—नेत्रकनीनिका यस्य तादृशम् [इ]। किमवोचमित्याह—**सखे!** मित्र!, **किमपि सुन्दरः** अनिर्वचनीयमनोहरः, एषः **गीतनिःष्यन्दः** गीतप्रवाहः, **गीतनिनाद** इति पाठे तु गानध्वनिः, वारं

इव मयूरं सारसकुलक्काण इव निर्जलारण्यपथिकमधिकोद्भूतहर्षमाकर्षति ममान्तःकरणम् । आयासितश्च त्वमधुना न युज्यसे नियोजयितुम्, तथापि ब्रवीमि यदि नातिमात्रमध्वश्रमो बाधाकरः शरीरस्य, मन्दोद्यमं वा न यात्रां प्रति मनः, ततः प्रगुणीकुरु गमनाय नावं [ई], यावदद्यापि पृष्ठतो वहति शिबिरं, यावदवतारयन्ति तीरभुवि सेनावरा यथास्वं कस्वराणि, यावन्निरन्तराणि संचरन्ति सामन्तानामितस्ततो यानपात्राणि, यावच्च मुक्तासत्संनिधिर्निवेशयति पटमन्दिराणि परितो राजकुलमाकुलाऽऽकुलोऽङ्गरक्षवर्गः, तावदनुपलक्षिता एव यामः [उ], पश्यामश्च दिव्यगीतध्वनेरस्य प्रारम्भकं लोकं, यत्र च क्वापि नगरे वा नगे वा सागरोदरसैकते वा ध्वनन्त्यमूनि वादित्राणि तत्र नियतमत्यद्भुतेन कस्यचिन्महाराजस्य राज्याभिषेकेण वा लोकत्रयख्यातचरितस्य खेचरेन्द्रस्य विद्यासिद्धिलाभेन वा प्रकृष्टरूपाकृष्टसकलराजकस्य कन्यारत्नस्य स्वयंवरप्रक्रमेण वा शक्रादिसुरवृन्दारकप्रतिष्ठितस्य देवताविशेषस्य यात्राव्यतिकरेण वा भवितव्यं, न ह्यल्पीयसि प्रयोजने यत्र तत्र चोत्सवे कदाचिदेवंविधो भवति सकलत्रिभुवनचमत्कारकारी समारम्भः, समासन्नदेशप्रभवश्च वाद्यध्वनिरसाविति व्यक्ततयैव तालल्यविशेषाणामवगतम्' [ऊ]

टिप्पनकम्—कस्वराणि उपस्करम् [उ]।

वारं, **श्रुतिविषयं** श्रवणपथम्, **अवतरन्नेव** आगच्छन्नेव, एष इति स्थाने एव इति पाठः, **अधिकोद्भूतहर्षं** प्रचुरोत्पन्नानन्दं यथा स्यात् तथा, मम अन्तःकरणम्, **आकर्षति** आकृष्य वशीकरोति, कं क इव ? मयूरम्, **अभिनवाम्भोदगर्जोद्गार इव** नवीनमेघगर्जनातिशय इव, पुनः **निर्जलारण्यपथिकं** निर्जलवनमार्गगामिनं, **सारसकुलक्काण इव** सारसकुलस्य–समीपस्थजलाशयसूचकसारसजातीयपक्षिसमूहस्य, क्वाणः–शब्द इव । **अयासितः** श्रमितः, त्वम्, **अधुना** सम्प्रति, **नियोजयितुं** प्रकृतगायकान्वेषणाय व्यापारयितुं, न **युज्यसे** योग्यो वर्तसे, **तथाऽपि** तदयोग्यत्वेऽपि, **ब्रवीमि** वच्मि, यदि **अध्वश्रमः** मार्गगमनपरिश्रमः, शरीरस्य, **अतिमात्रम्** अत्यन्तं, **बाधाकरः** दुःखाकरः, न स्यादिति शेषः, **वा** अथवा, **यात्रां प्रति** यात्राविषये, मनः, **मन्दोद्यमं** शिथिलोद्यमं, न अस्तीति शेषः, **ततः** तर्हि, नावं, **गमनाय** प्रयाणाय, **प्रगुणीकुरु** सज्जय [ई] । अद्यापि यावत्, **पृष्ठतः** पृष्ठभागे, **शिबिरं** सैन्यसमूहः, **वहति** आयाति; यावत् **तीरभुवि** तीरभूमौ, **सेनावराः** सेनाश्रेष्ठाः, **यथास्वं** यथायथं, **कस्वराणि** उपस्करनिकरम्, **अवतारयन्ति** अधो नयन्ति; यावत् **निरन्तराणि** निरवकाशानि, निरवच्छिन्नानीत्यर्थः, **सामन्तानां** क्षुद्रनृपाणां, **यानपात्राणि** पोताः, **इतस्ततः** अत्र तत्र, **सञ्चरन्ति** प्रचलन्ति; **च** पुनः, यावत् **मुक्तासत्सन्निधिः** त्यक्तास्मत्सामीप्यः, **आकुलाकुलोऽङ्गरक्षवर्गः** अतिव्यग्रान्तःकरणोऽङ्गरक्षाधिकृतगणः, **राजकुलं** राजमन्दिरं, **परितः** सर्वतः, **पटमन्दिराणि** वस्त्रगृहाणि, **निवेशयति** स्थापयति; तावत् **अनुपलक्षिता एव** केनाप्यलक्षिता एव सन्तः, **यामः** गच्छामः [उ] । **च** पुनः, **अस्य** प्रत्यक्षं श्रूयमाणस्य, **दिव्यगीतध्वनेः** मनोहरगायनशब्दस्य, **प्रारम्भकं** प्रवर्तकं, **लोकं** जनं, पश्यामः; **यत्र** यस्मिन्, **क्वापि** कुत्रापि, नगरे वा, **नगे वा** पर्वते वा, **सागरोदरसैकते वा** समुद्रमध्यवर्तिसिकतामयस्थले वा, **अमूनि** तानि, **वादित्राणि** वाद्यानि, **ध्वनन्ति** नन्दन्ति, तत्र **नियतं** निश्चितं, **कस्यचित्** अविज्ञातनाम्नः, **महाराजस्य** महानृपस्य, **अत्यद्भुतेन** अत्याश्चर्यावहेन, **वा** अथवा, **लोकत्रयख्यातचरितस्य** भुवनत्रयप्रसिद्धचरित्रस्य, **खेचरेन्द्रस्य** विद्याधरेन्द्रस्य, **विद्यासिद्धिलाभेन** विद्याप्रौढिप्राप्त्या, **वा** अथवा, **प्रकृष्टरूपाकृष्टसकलराजकस्य** प्रकृष्टरूपेण–उत्कृष्टस्वरूपेण, आकृष्टं–वशीकृतं, सकलं–समग्रं, राजकं–राजसमूहो येन तादृशस्य, **कन्यारत्नस्य** कुमारिकारत्नस्य, **स्वयंवरप्रक्रमेण** स्वयंवरसमारम्भेण, **वा** अथवा, **शक्रादिसुरवृन्दारकप्रतिष्ठितस्य** शक्रादिभिः–इन्द्रादिभिः, सुरवृन्दारकैः–सुरश्रेष्ठैः, प्रतिष्ठितस्य–प्रतिष्ठामापन्नस्य, देवताविशेषस्य, **यात्राव्यतिकरेण** यात्रासम्मर्देन, **भवितव्यं** भवितुं योग्यं, **हि** यतः, **अल्पीयसि** अत्यल्पे, **प्रयोजने** उद्देश्ये, **यत्र तत्र चोत्सवे** साधारणोत्सवे च, **एवंविधः** एतादृशः, **सकलत्रिभुवनचमत्कारकारी** समग्रस्वर्ग-मर्त्य-पाताललोककौतुकावहः, **समारम्भः** समारोहः, कदाचिद्, **न भवति** न जायते । असौ **वाद्यध्वनिः** वाद्यशब्दः,

इति ब्रुवाणे मयि क्षणमधोमुखः स तूष्णीं स्थित्वा जगाद—'युवराज! गम्यते न कश्चिदपि दोषः, दृश्यते च कौतुकमिदम्, किं तु सर्वत एव दुर्गः पर्वतस्यास्य पर्यन्तेषु तोयराशिर्न शक्यते महान्तं यत्नमन्तरेण यानपात्रिकैरवगाहयितुम्; अत्र हि महाप्रमाणाः संचरन्ति जलचराः, पदे पदे प्रकृतिदुस्तराः प्रवहणानां निवर्तयन्ति गतिमावर्ताः, स्थाने स्थाने शिथिलयन्ति यात्रोत्साहमतिशयोदग्रास्तटग्रावाणः [ऋ]। ईदृशे च निसर्गदुरवतारे नीरधावनवधारिते कर्णधारेषु केनापि निरपाये पथि यथावदविभाव्यमानसमानसमविषमभागायां विभावर्यामनुक्षणमपेक्षणीयसाहायकेष्वनासन्नवर्तिष्वपरयानपात्रेषु यानमत्यन्तसक्लेशमिति मन्यमानस्य मे मनाङ्मन्दायते चित्तम्, अभिलाषस्तु न केवलं कुमारस्य ममाप्यस्ति गन्तुम्, यतः—पूर्वमप्येकदाऽस्माभिरिहावासितैः श्रुतोऽयमासीदन्यैरपि कर्णधारैरनेकशः कथितमत्र ध्वनेरस्य सामान्येन समुत्थानं न तु विशेषतः—यतोऽयं प्रवर्तते यो वास्य प्रवर्तक इति कुतोऽपि विशेषोपलब्धिरुपजाता [ॠ], इत्यभिहिते तेन समधिकोत्पन्नकौतुकः पुनरवोचम्—'सखे! यदि तवाप्यभिलाषस्तदलं विलम्बितुम्, उत्तिष्ठ गमननिष्ठो भव,

---

टिप्पनकम्—यानं गमनम् [ऋ]।

समासन्नदेशप्रभवः अतिनिकटदेशोत्पन्नः, इति **ताल-लयविशेषाणां** तालशब्दः करतले करास्फोटे कांस्यमयवाद्यभेदे गीतादौ द्वित्रमात्रादिकालक्रियामानादौ च वर्तते, नृत्यगीतवाद्यानामेकतानता लयः, तद्विशेषाणां—तत्प्रकाराणाम्, **व्यक्ततयैव** स्फुटतयैव, **अवगतं** निश्चितम् [ऊ]। मयि, **इति** अनुपदोक्तप्रकारं, **ब्रुवाणे** कथयति सति, **सः** तारकः, **अधोमुखः** अवनतवदनः सन्, क्षणं **तूष्णीं** निःशब्दं, स्थित्वा, **जगाद** उक्तवान्, किमित्याह—युवराज! **गम्यते** तदनुसन्धानाय प्रस्थीयते, **कश्चिदपि** कोऽपि, **दोषः** आलस्यादिः, न विद्यत इति शेषः, **च** पुनः, **इदं** वर्तमानं, **कौतुकं** उत्सवः, तावकं तदन्वेषणौत्सुक्यं वा, **दृश्यते** अनुभूयते, **किन्तु** परन्तु, **सर्वत एव** सर्वेष्वेव मार्गेषु, **दुर्गः** दुरवगाहः, अस्य सुवेलाख्यस्य पर्वतस्य, **पर्यन्तेषु** प्रान्तेषु, विद्यमान इति शेषः, **तोयराशिः** समुद्रः, **यानपात्रिकैः** पोतिकैरपि, **महान्तं** प्रचुरं, **यत्नम्** आयासम्, **अन्तरेण** विना, **अवगाहयितुं** प्रवेष्टुं, न **शक्यते** पार्यते; **हि** यतः, **अत्र** अस्मिन् समुद्रे, **महाप्रमाणाः** अतिविस्तृताः, **जलचराः** जलजन्तवः, **सञ्चरन्ति** उच्छलन्ति, पुनः **पदे पदे** स्थाने स्थाने, **प्रकृतिदुस्तराः** स्वभावतो दुरतिक्रमाः; **आवर्ताः** जलभ्रमयः, **प्रवहणानां** पोतानां, **गतिं** गमनं, **निवर्तयन्ति** निरुन्धन्ति; पुनः **स्थाने स्थाने** प्रत्येकस्थाने, **अतिशयोदग्राः** अत्यन्तोन्नताः, **तटग्रावाणः** तटस्थप्रस्तराः, **यात्रोत्साहं** प्रयाणोद्यमं, **शिथिलयन्ति** मन्दीकुर्वन्ति [ऋ]। **ईदृशे** एवंविधे, **निसर्गदुरवतारे** स्वभावतो दुरवगाहे, **नीरधौ** समुद्रे, **कर्णधारेषु** कैवर्तानां मध्ये, केनापि, **अनवधारिते** अनिर्णीते, **निरपाये** निरापत्के, **पथि** मार्गे, **यथावत्** यथायथम्, **अविभाव्यमानसमानसमविषमभागायाम्** अविभाव्यमानौ- अनवधार्यमाणौ, अत एव समानौ—तुल्यौ, समविषमभागौ—समतल-विषमोन्नतभागौ यस्यां तादृश्यां, **विभावर्यां** रात्रौ, **अनुक्षणं** प्रतिक्षणम्, **अपेक्षणीयसहायकेषु** अपेक्षणीयम्—आश्रयणीयम्, सहायकं—साहाय्यं येषां तादृशेषु, **अपरयानपात्रेषु** अन्यपोतेषु, **अनासन्नवर्तिषु** अनिकटवर्तिषु सत्सु, **यानं** प्रयाणम्, **अत्यन्तसक्लेशम्** अतिक्लेशसाध्यम्, इति **मन्यमानस्य** बुध्यमानस्य, **मे** मम, **चित्तं** हृदयं, **मनाक्** किञ्चित्, **मन्दायते** शिथिलायते; **गन्तुं** प्रस्थातुम्, **अभिलाषस्तु** वाञ्छा तु, केवलं **कुमारस्य** भवतः, **न** न, अपितु ममापि **अस्ति** वर्तते। **यतः** यस्माद्धेतोः, **एकदा** एकस्मिन् काले, पूर्वमपि, **इह** अस्मिन् स्थाने, **आवासितैः** निवासितैः, अस्माभिः, **अयं** ध्वनिः, **श्रुतः** श्रवणगोचरीकृतः, आसीत्, **अन्यैरपि** वर्तमानकर्णधारव्यतिरिक्तैरपि, **कर्णधारैः** कैवर्तैः, **अत्र** अस्मिन् स्थाने, **अस्य** प्रकृतस्य, ध्वनेः, **सामान्येन** अविशेषेण, **समुत्थानं** समुद्गमः, **कथितम्** उक्तम्, आसीत्, न तु **विशेषतः** विशेषेण, **यतः** यस्मात् स्थानात्, **अयं** ध्वनिः, **प्रवर्तते** प्रादुर्भवति, **वा** अथवा, **अस्य** ध्वनेः, यः **प्रवर्तकः** प्रादुर्भाविक इति, **कुतोऽपि** कस्मादपि, **विशेषोपलब्धिः** विशेषपरिचयः, **उपजाता** अभूत् [ॠ]। **इति** इत्थं, **तेन** तारकेण, **अभिहिते** उक्ते सति, **समधिकोत्पन्नकौतुकः** उत्पन्नप्रचुरतरौत्सुक्यः सन्, पुनः **अवोचम्** उक्तवानहम्, किमित्याह—**सखे!** भो मित्र! यदि

मैकान्ततो विनिपातभीरुर्मन्त्रीव यात्राभियोगभङ्गार्थमर्थशास्त्रप्रदर्शितेन वर्त्मना देशकालसहायवैकल्यादीनि कारणान्यकारणमेव दर्शय, सक्लेशमस्तु यदि वा क्लेशरहितम्, अवश्यमेव तावद् गन्तव्यमवगन्तव्यं च गीतध्वनेरस्य तत्त्वम्, अकृतगमनो न तावदधुना प्रयत्नेनापि शक्नोमि चेतसः कुतूहलतरलितस्य त्वराभङ्गं कर्तुं, कृत्वापि कृच्छ्रेणावासमुपगतः प्रत्यग्रेण पश्चात्तापहुतभुजा दन्दह्यमानदेहो दिवसमपि न स्वस्थचित्तः स्थास्यामि, प्राप्तनिजभूमेरपि समुद्रवार्तावसरेषु स्मरणमस्योपजायमानं न मे कारणमनणीयसो रणरणकस्य न भविष्यति [लृ]। एवं च स्थिते क्लेशोऽपि वरमल्पकालमनुभूतः शरीरेण स्तोको न जीविताvधिर्मनसा महान् शोकः, यदि च निमित्तशास्त्रं प्रमाणं ततः सोऽपि गच्छतामस्माकमिह नास्ति, सर्वत्र निरपाया प्रमोदहेतुश्च यात्रेयमिति भावय स्वयं तत्त्वदृष्ट्या, नहि सन्निकृष्टायामापदि दुरुपपादायां च कल्याणसंपदि कदाचिदीदृशी निरातङ्कता त्वरा च चित्तवृत्तेर्भवति, तदलमपायशङ्कया, कुरु स्थिरमस्थान एव भङ्गुरीभूतं चेतः, चिन्तय प्रस्थानकालोचितं सकलमात्मीयकल्पम्, अर्पय तमस्तिरोहितवस्तुसाक्षात्करणाय रजनीसमयक्षेपणीयमीक्षणयोरञ्जनम्, नियोजयाऽन्ययानपात्रिकासत्तिनिरपेक्षः सहायपक्षे युगायतं निजमेव भुजयुगलम्, अध्य-

---

तवापि, **अभिलाषः** तदन्वेषणैषणा, वर्तत इति शेषः, **तत्** तर्हि, **विलम्बितुं** तदन्वेषणे विलम्बं कर्तुम्, **अलं** व्यर्थम्, उत्तिष्ठ, **गमननिष्ठः** प्रयाणपरः, भव। मन्त्रीव **विनिपातभीरुः** अनर्थागमभयान्वितः सन्, **यात्राभियोगभङ्गार्थं** प्रयाणोद्यमविलोपार्थम्, **अर्थशास्त्रप्रदर्शितेन** नीतिशास्त्रप्रदर्शितेन, **वर्त्मना** मार्गेण, **देशकालसहायवैकल्यादीनि कारणानि** समुचितदेशकालाभावादिप्रयाणप्रतिबन्धहेतून्, **अकारणमेव** अहेतुकमेव, **एकान्ततः** नियमेन, न **दर्शय** ब्रूहि। यदि **सक्लेशं** क्लेशपूर्वकम्, **वा** अथवा, **क्लेशरहितं** विनैव क्लेशम्, **अस्तु** गमनं भवतु, अवश्यं **तावत्** प्रथमं, **गन्तव्यं** तत्र प्रस्थातव्यम्, **च** पुनः **अस्य** श्रूयमाणस्य, **गीतध्वनेः** गानशब्दस्य, **तत्त्वं** याथातथ्यम्, **अवगन्तव्यं** निश्चेतव्यम्। **अकृतगमनः** अविहिततदन्वेषणार्थप्रयाणः, **प्रयत्नेनापि** महता यत्नेनापि, **कुतूहलतरलितस्य** तदौत्सुक्याकुलितस्य, **चेतसः** हृदयस्य, **त्वराभङ्गम्** औत्सुक्यशान्तिम्, **तावदिति** वाक्यालङ्कारे, **अधुना** इदानीं, कर्तुं न, **शक्नोमि** पारयामि; **कृच्छ्रेण** क्लेशेन, **कृत्वापि** कथञ्चन तद्भङ्गं विधायापि, **आवासं** निजनिवासस्थानम्, **उपगतः** उपस्थितः सन्, **प्रत्यग्रेण** अभिनवेन, **पश्चात्तापहुतभुजा** यथावत् तदकरणजन्यानुतापवह्निना, **दन्दह्यमानदेहः** जाज्वल्यमानशरीरः, **दिवसमपि** दिनमेकमपि, **स्वस्थचित्तः** प्रकृतिस्थमनाः, न **स्थास्यामि** वर्तिष्ये। **प्राप्तनिजभूमेरपि** उपगतस्वराजधानीकस्यापि, **मे** मम, **समुद्रवार्तावसरेषु** समुद्रयात्रावृत्तान्तकीर्तनावसरेषु, **अस्य** गानध्वनेः, स्मरणम्, **उपजायमानं** प्रवर्तमानं सत्, **अनणीयसः** अत्यधिकस्य, **रणरणकस्य** उद्वेगस्य, कारणं, **न भविष्यति** भविष्यत्येवेत्यर्थः [लृ]। **एवं स्थिते च** ईदृशस्थितौ तु, शरीरेण **अल्पकालं** किञ्चित् कालम्, **अनुभूतः** उपभुक्तः, **स्तोकः** अल्पः, **क्लेशोऽपि** दुःखमपि, **वरम्** ईषत्प्रियम्, किन्तु **मनसा** अन्तःकरणेन, अनुभूत इति शेषः, **जीविताvधिः** जीवनपर्यन्तः, **शोकः** पश्चात्तापः, न वर इति शेषः। यदि च **निमित्तशास्त्रं** शकुनशास्त्रं प्रमाणम्, **ततः** तर्हि, **सोऽपि** क्लेशोऽपि, **इह** अस्मिन् मार्गे, **गच्छतां** प्रतिष्ठमानानाम्, अस्माकं, **नास्ति** न सम्भवति, **सर्वत्र** सर्वस्मिन् मार्गे, **निरपाया** क्लेशरहिता, प्रत्युत **प्रमोदहेतुश्च** शुभजनिका च, इयं यात्रा, भवेदिति शेषः, इति स्वयं **तत्त्वदृष्ट्या** यथार्थधिया, **भावय** आलोचय, हि यतः, **आपदि** विपत्तौ, **सन्निकृष्टायां** प्रत्यासन्नायां, **च** पुनः, **कल्याणसम्पदि** शुभसम्पत्तौ, **दुरुपपादायां** दुरवापायां विप्रकृष्टायामिति यावत्, **कदाचित्** कदापि, **चित्तवृत्तेः** मनोवृत्तेः, **ईदृशी** एवंविधा, **निरातङ्कता** अपायशङ्काशून्यता, **च** पुनः, **त्वरा** तदनुसन्धानार्थप्रयाणातुरता, न **भवति** सम्भवति, **तत्** तस्माद्धेतोः, **अपायशङ्कया** आपत्तिसंशयेन, **अलं** व्यर्थम्; **अस्थान एव** अनवसर एव, **भङ्गुरीभूतम्** अपायशङ्कया सम्भ्रान्तं, **चेतः** अन्तःकरणं, **स्थिरीकुरु** स्वास्थ्यमापादय। **प्रस्थानकालोचितं** प्रयाणावसरोचितं यथा स्यात् तथा, **सकलं** सर्वमपि, **आत्मीयकल्पम्** आत्मनः कर्तव्यविधिः, **चिन्तय** अवधेहि, पुनः **तमस्तिरोहितवस्तुसाक्षात्करणाय** निशान्धकारावृतवस्तुविलोकनार्थं, **रजनीसमयक्षेपणीयं** रात्रिकालेऽर्पणीयम्, **ईक्षणयोः**–नेत्रयोः, **अञ्जनं**–संस्कारकद्रव्यम्, **अर्पय** लगय; **अन्ययानपात्रिकासत्तिनिरपेक्षः** अन्यपोतप्रत्यासत्त्यपेक्षारहितः सन्, **सहायपक्षे** सहकारि-

वसितस्य ते गोष्पदमदृश्यमानपारः सकलोऽप्यकूपारः, किं पुनश्चक्षुःपरिच्छेद्यमहिमा तदेकदेशः ?' [ऌ] इति ब्रुवाणे मयि क्षणं स दोलायमानचित्तः स्थित्वा पुनरवादीत्—'कुमार ! भ्रूक्षेपमात्रव्यापारणीये मयि किमियता वचनविस्तरेण ?, यद्यवश्यमेव गन्तव्यमिति निश्चयस्तन्न कश्चिदपि ते कौतुकप्रतिपन्थी, प्रस्थीयताम् अभ्युदयाय, सज्जोऽयमाजन्मनः परिपोषितः सर्वेष्वन्यराजकार्येष्वनुपयुक्त एतावन्मात्रप्रयोजनः प्रेष्यजनः' इत्यभिधाय प्रणतेन मूर्ध्ना बद्ध्वा नमस्काराञ्जलिमुदन्वते तत्क्षणोपनताभिप्रेतशकुनप्रगुणितमनोवृत्तिः प्रवर्तयामास गमनायासदोलायमानध्वजध्वनितकिङ्किणीनिबद्धोद्धुरविरावां नावम्, प्रावर्तयच्च प्राचेतसेन मसृणमसृणमनुसृततूर्यनिस्वनो दिक्पथेन [ए] । प्रस्थितायां च तस्यां सहसैव स्पन्दिताधरपुटमचिरभाविनमानन्दमिव मे निवेदयामास दक्षिणं चक्षुः, आश्चर्यदर्शनत्वरयेव सर्वतो विभाव्यमानरम्यरोमोद्भेदमश्वमिव जात्यमनिमित्तमेवारुरोह हर्षप्रकर्षमन्तरात्मा, हृदयप्रसर्पदुद्दामहर्षोत्थापितश्च किञ्चित् सशेषनिद्र इव प्रारभत जृम्भितुमायताध्वपरिश्रमप्रसुप्तो गमनोत्साहः [ऐ] ।

टिप्पनकम्—**प्राचेतसेन** वारुणेन । **मसृणमसृणं** मन्दं मन्दम् [ए] । **सशेषनिद्र इव जृम्भितुं** जृम्भां मोक्तुम्, अन्यत्र विकासितुम् [ऐ] ।

पदे, **युगायतं** वृषस्कन्धारोप्यशकटाग्रदण्डवद्दीर्घं, **निजं** स्वकीयं, **भुजयुगलमेव** बाहुद्वयमेव, **नियोजय** जलचरावर्ततटप्रावादिगमनप्रतिबन्धकापनयनाय स्थापय, **अध्यवसितस्य** गमनोद्युक्तस्य, **ते** तव, **अदृश्यमानपारः** अलक्ष्यमाणचरमावधिः, **सकलोऽपि** समग्रोऽपि, **अकूपारः** सागरः, **गोष्पदं** गोपदप्रमाणः, तर्हि **चक्षुःपरिच्छेद्यमहिमा** चक्षुषैव प्रमेयमहत्ताकः, **तदेकदेशः** सागरैकावयवः, **किं पुनः** तस्य गोष्पदत्वं किमुतेत्यर्थः [ऌ] । मयि, **इति** इत्थं, **ब्रुवाणे** कथयति सति, **सः** तारकः, **क्षणं** क्षणपर्यन्तं, **दोलायमानचित्तः** गमनागमनानवधारणक्षुब्धहृदयः सन्, **स्थित्वा** मौनमास्थाय, पुनः, **अवादीत्** उक्तवान्, किमित्याह—कुमार !, **भ्रूक्षेपमात्रव्यापारणीये** भ्रूक्षेपात्मकसंकेतमात्रप्रवर्तनीये, मयि, **इयता** एतावता, **वचनविस्तरेण** वागाडम्बरेण, किं प्रयोजनमिति शेषः, न किमपीत्यर्थः, यदि अवश्यमेव, किं **गन्तव्यं** प्रस्थातव्यमिति निश्चयः, अस्तीति शेषः, **तत्** तर्हि, **ते** तव, **कश्चिदपि** कोऽपि, **कौतुकप्रतिपन्थी** गमनाभिलाषप्रतिबन्धी, न, वर्तत इति शेषः, **अभ्युदयाय** मङ्गलाय, **प्रस्थीयतां** गन्तुमारभ्यताम्, **आ जन्मनः** जन्मारभ्य, **परिपोषितः** प्रतिपालितः, **सर्वेषु** समस्तेषु, **अन्यराजकार्येषु** राजोचितकार्यान्तरेषु, **अनुपयुक्तः** अकृतोपयोगः, किन्तु **एतावन्मात्रप्रयोजनः** एतत्कार्यमात्रोपयोगी, अयं **प्रेष्यजनः** भृत्यजनः, **सज्जः** प्रस्थानाय सन्नद्धः, अस्तीति शेषः । **इत्यभिधाय** इत्युक्त्वा, **प्रणतेन** अवनतेन, **मूर्ध्ना** मस्तकेन, **उदन्वते** समुद्राय, **नमस्काराञ्जलिं** नमस्कारात्मककरसम्पुटं, **बद्ध्वा** विरचय्य, **तत्क्षणोपनताभिप्रेतशकुनप्रगुणितमनोवृत्तिः** तत्क्षणोपनतैः—तत्कालोपस्थितैः, अभिप्रेतशकुनैः—अभिमतशुभसूचकवस्तुभिः, प्रगुणितमनोवृत्तिः—प्रवर्तितचित्तवृत्तिः सन्, **गमनायासदोलायमानध्वजध्वनितकिङ्किणीनिबद्धोद्धुरविरावां** गमनायासेन—गमनवेगेन, दोलायमाने—व्याधूयमाने, ध्वजे—पताकायां, ध्वनिताभिः—ध्वनिं कुर्वन्तीभिः, किङ्किणीभिः—क्षुद्रघण्टिकाभिः, निबद्धाः—कृताः, उद्धुराः—उच्चाः, विरावाः—ध्वनयो यस्यां तादृशीं, नावं **प्रवर्तयामास** प्रेरयामास; **च** पुनः, **प्राचेतसेन** वरुणस्वामिकेन, पश्चिमेनेत्यर्थः, **दिक्पथेन** दिङ्मार्गेण, **अनुसृततूर्यनिस्वनः** अनुसृतः तूर्यस्य—वाद्यविशेषस्य, निस्वनः—निनादो येन तादृशः, **मसृणमसृणं** मन्दं मन्दं यथा स्यात् तथा, **प्रावर्त्तयत्** प्रेरितवान्, नावमिति शेषः [ए] । **च** पुनः, **तस्यां** नावि, **प्रस्थितायां** गन्तुं प्रवृत्तायां सत्याम्, **सहसैव** अकस्मादेव, **मे** मम, **स्पन्दिताधरपुटं** किञ्चिच्चलितपुटाकाराधराधोभागं, दक्षिणं चक्षुः, **अचिरभाविनं** शीघ्रभाविनम्, **आनन्दं** शुभं, **निवेदयामास इव** सूचयामास इवेत्युत्प्रेक्षा । पुनः **आश्चर्यदर्शनत्वरयेव** आश्चर्यावलोकनौत्सुक्येनेव, **सर्वतः** परितः, **विभाव्यमानरम्यरोमोद्भेदं** विभाव्यमानः—लक्ष्यमाणः, रम्यः—मनोहरः, रोमोद्भेदः—रोमाञ्चो यस्मिंस्तादृशं, **जात्यं** प्रशस्तम्, अश्वमिवेत्युत्प्रेक्षा, **अन्तरात्मा** अन्तःकरणं, **हर्षप्रकर्षं** हर्षोत्कर्षम्, **अनिमित्तमेव** अकस्मादेव, **आरुरोह** आरूढवान् । **च** पुनः, **आयताध्वपरिश्रमप्रसुप्तः** आयतेन—दीर्घेण, अध्वना—मार्गेण, मार्गगमनेनेति यावत्, यः परिश्रमः—खेदः, तेन प्रसुप्तः—प्रशयितः, **गमनोत्साहः** गानध्वनिगवेषणार्थप्रयाणोत्साहः, **हृदयप्रसर्पदुद्दामहर्षोत्थापितः** हृदये—अन्तःकरणे,

अथ तेन सा स्वभावधीरेण, सम्यगभ्यस्तयानपात्रप्रचारकर्मणा, यथाविभागमवस्थितैः स्थैर्यवद्भिरन्तिकस्थसकलस्वोपकरणैरमूढबुद्धिभिर्विधुरेषु पञ्चषैः कर्णधारैरात्मनः सहायीकृतैरनुगम्यमानेन, सर्वतो दत्तसप्रयत्नदृष्टिना रक्षता निपुणमद्रितटसंघट्टम्, अनुवेलमीक्षमाणेन सुश्लिष्टबन्धानपि फलकसन्धीन्, निरुन्धता तूर्णमूर्णासिक्थकेन सूक्ष्ममपि विवरेभ्यः क्षरत्तोयमनुक्षणम्, अनिलसंक्षोभेषु नूतनाः संयोजयता रज्जूः; अजर्जरस्यापि वारं वारमापादयता सितपटस्य पाटवम् [ओ];

'इतश्चङ्क्रम्यते मकरचक्रम्, इतः परिक्रामति नक्रनिकरः, इतः सरति शिशुमारश्रेणिः, इतः प्रसर्पति सर्पपङ्क्तिः, उत्सर्पयत दीपिकाः, प्रकाशयत सर्वतो मार्गम्, अपसारयत निकटचारिणो दूरं दुष्टजलचरान्; अयमनुप्रस्थमचलस्य चटुलवेल्लितलाङ्गूलवल्लिरार्द्रवल्लूरशङ्कया रक्तांशुकपताकासु पातितदृष्टिरुत्पित्सुरिव चेष्टते सिंहमकरः, किरत रंहसाभिमुखमस्य पयसि ज्वलन्तीरग्नितैलच्छटाः; इदमकस्मादस्मदवलोकनक्षुभितमुत्रस्त-

---

टिप्पनकम्—पञ्चषैः पञ्चषट्प्रमाणैः। सिक्थकं-दमनम्। **क्षरत्** प्रविशत् [ओ]।

प्रसर्पता-प्रसरता, उदाम्ना-उद्धतेन, हर्षेण, उत्थापितः-जागरितः सन्, **किञ्चित्** ईषत्, **सशेषनिद्र इव** अवशिष्टनिद्र इव, **जृम्भितुं** जृम्भां मुखविकासरूपां मोक्तुम्, अन्यत्र विकसितुं, **प्रारभत** प्रावर्तत [पे]।

अथ अनन्तरं, **सा** नौः, **तेन** तारकेण, **नीयमाना** उह्यमाना सती, **स्वल्पेनैव** अत्यल्पेनैव, समयेन, दूरं **जगाम** गतवतीत्यग्रेणान्वेति; कीदृशेन तेन? **स्वभावधीरेण** प्राकृतिकधैर्यशालिना; पुनः **सम्यगभ्यस्तयानपात्रप्रचारकर्मणा** सम्यक्-सुष्ठु यथा स्यात् तथा, अभ्यस्तम्-अनुशीलितं, यानपात्रस्य-पोतस्य, प्रचाररूपं-संचालनरूपं, कर्म-कार्यं येन तादृशेन; पुनः **यथाविभागं** यथास्थानम्, **अवस्थितैः** उपविष्टैः, पुनः **स्थैर्यवद्भिः** स्थिरैः, पुनः **अन्तिकस्थसकलसोपकरणैः** अन्तिकस्थं-पार्श्ववर्ति, सकलं-समग्रं, स्वस्य उपकरणं येषां तादृशैः, पुनः **विधुरेषु** आपत्सु, **अमूढबुद्धिभिः** अविवेकशून्यहृदयैः, पुनः **आत्मनः** स्वस्य, **सहायीकृतैः** सहकारितां नीतैः, **पञ्चषैः** पञ्चभिः षड्भिर्वा, **कर्णधारैः** नाविकैः, **अनुगम्यमानेन** अनुस्रियमाणेन; पुनः **सर्वतः** परितः, **दत्तसप्रयत्नदृष्टिना** व्यापारितसावधानदृष्टिकेन; पुनः **अनुवेलं** प्रतितटम्, **अद्रितटसंघट्टं** पर्वतैकदेशसंघर्षम्, **निपुणं**-सम्यक्, **रक्षता** तादृशसंघट्टनं परिहारयता; पुनः **सुश्लिष्टबन्धानपि** दृढबन्धानपि, **फलकसन्धीन्** नौकाघटककाष्ठपट्टिकासन्धिस्थानानि, **ईक्षमाणेन** अवलोकमानेन; पुनः **विवरेभ्यः** नौकाछिद्रेभ्यः, **क्षरत्** प्रविशत्, **सूक्ष्ममपि** स्वल्पमपि, **तोयं** जलम्, **ऊर्णासिक्थकेन** ऊर्णातन्तुमिश्रितमधूत्सृष्टेन, **तूर्णं** सत्वरं, **निरुन्धता** वारयता; पुनः **अनिलसंक्षोभेषु** पवनोद्वेलनेषु सत्सु, **अनुक्षणं** प्रतिक्षणं, **नूतनाः** नवीनाः, रज्जूः, **संयोजयता** संघटयता; पुनः **अजर्जरस्यापि** अशीर्णस्यापि, **सितपटस्य** नौकोपरिसंघटितश्वेतवस्त्रस्य, **वारं वारम्** अनेकवारम्, **पाटवम्** उत्सर्पणसौष्ठवम्, **आपादयता** सम्पादयता [ओ]।

पुनः **अवसरेषु** यथावसरम्, **इत्यादि** एवमादिकं, यथाक्रमं, **साध्वसकरं** भयजनकं, **च** पुनः, **कर्तव्योपदेशपरं** कर्तव्यावेदनपरं, **च** पुनः, **सप्रार्थनं** प्रार्थनापरं, **च** पुनः, **सपरिहासं** परिहाससहितं, **जल्पता** कथयता, इत्यग्रिमं विशेषणम्। किमादीत्याह—**इतः** अस्मिन् स्थाने, **मकरचक्रं** मकरजातीयजलजन्तुगणः, **चङ्क्रम्यते** पुनः पुनरतिशयेन वोच्छलति, पुनः **इतः** अस्मिन् स्थाने, **नक्रनिकरः** नक्रजातीयजलजन्तुगणः, **परिक्रामति** सञ्चरति, पुनः **इतः** अस्मिन् प्रदेशे, **शिशुमारश्रेणिः** शिशुमारजातीयजलजन्तुसन्ततिः, **सरति** गच्छति, पुनः **इतः** अत्र स्थाने, **सर्पपङ्क्तिः** जलीयसर्पसमूहः, **प्रसर्पति** प्रचरति, **दीपिकाः** दीपान्, **उत्सर्पयत** उत्थापयत, पुनः मार्गं **सर्वतः** परितः, **प्रकाशयत** उद्भासयत, पुनः **निकटचारिणः** निकटगामिनः, **दुष्टजलचरान्** हिंसकजलजन्तून्, दूरम्, **अपसारयत** अपनयत। पुनः **अचलस्य** पर्वतस्य, **अनुप्रस्थं** प्रस्थः-पर्वतस्य वासयोग्यभूमिः, प्रस्थं प्रस्थं प्रतीति अनुप्रस्थम्, **चटुलवेल्लितलाङ्गूलवल्लिः** चटुलं-सजवं यथा स्यात् तथा, वेल्लिता-उच्छलिता, लाङ्गूलरूपा-पुच्छरूपा, वल्लिः-लता येन तादृशः, अयं **सिंहमकरः** सिंहरूपो मकरः, **आर्द्रवल्लूरशङ्कया** आर्द्रमांसशङ्कया, **रक्तांशुकपताकासु** रक्तवर्णवस्त्रनिर्मितपताकासु, **दत्तदृष्टिः** उत्क्षिप्तचक्षुः सन्, **उत्पित्सुरिव** उत्पतितुमिच्छुरिव, **चेष्टते** चेष्टां करोति, **रंहसा** वेगेन, **अस्य** सिंहस्य, **अभिमुखं** सम्मुखे, **पयसि**

कलभसंवरणविहस्तयूथपं तीरशायि जलहस्तियूथमग्रपथेन पाथोनिधिमवतितीर्षति, त्वरितमुत्सारयत युगपदाहितेन हस्ततालशब्देन दूरम्; असौ रसातलात् सद्य एवोन्मग्नो वज्राग्निधूम्रिकामषीकल्माषपक्षसंपुटैः शिखरिभिरधिष्ठितपृष्ठभागो मठ इव सपारापतः संचरति कमठो, मा प्रतिष्ठध्वमभिमुखमेव निकषा प्रस्थितो नेष्यत्यपथेन नावम् [औ]; असावपि विदारितगिरिकन्दराकारतुण्डो मानदण्ड इव सागरस्य ग्रासीकृताक्रन्दज्जलकरिजटालवदनैर्बालमत्स्यैरनुसृताभिर्मत्सीभिरनुगम्यमानो मृगयते निजग्रासोचितं सत्त्वं सत्वरमितस्ततः स्तिमितया गत्या तिमिङ्गिलो, मा विधत्त कलकलं, यातु निभृतमेव, विकृत एष महतेऽनर्थाय; वञ्च्यतामयमतिचटुलवीचिवेगाकृष्टैर्भ्रमद्भिरन्तःकुलालचक्रक्रमेण रिक्तोदरलघुभिररित्रैरावेदितो द्वारमिव रसातलस्य वामतः समीपवर्ती शीघ्रमावर्तो; लङ्घ्यतामयमपि क्षेपीयः क्षयसमयसन्ध्यानुरञ्जिताम्बरैकदेशविडम्बी दक्षिणतः प्रतिक्षणमुदञ्चता फणचक्रवालरत्नरागपटलेन क्रमनिपीतकल्लोलकालिमा पातुमनिलमुद्यतस्य कस्यचिन्महाहे-

---

टिप्पनकम्—वल्लूरं–मांसम् । विहस्तः–व्याकुलः । कल्माषः–कर्बुरः । **निकषा समीपम् [औ]** ।

जले, **ज्वलन्तीः** उद्दीप्यमानाः, **अग्नितैलच्छटाः** साग्नितैलधाराः, **किरत** क्षिपत । पुनः **अकस्मात्** अतर्कितम्, **अस्मदवलोकनक्षुभितम्** अस्मदवलोकनेन–अस्मद्दर्शनेन, क्षुभितं–सम्भ्रान्तम्, पुनः **उत्त्रस्तकलभसंवरणविहस्तयूथपम्** उत्त्रस्तानां–विभीतानां भयाद् भ्रान्तानामिति यावत्, कलभानां–हस्तिशावकानां, संवरणेन–संघटनेन, विहस्तः–व्यग्रहस्तः, यूथपः–यूथाधिपहस्ती यस्मिंस्तादृशं, **तीरशायि** तटसुप्तम्, इदं जलहस्तियूथं, **पाथोनिधिं** समुद्रम्, **अवतितीर्षति** अवतरीतुम्–अवगाहितुम् इच्छति, **युगपदाहितेन** एककालावच्छेदेनोत्पादितेन, **हस्ततालशब्देन** प्रसृतहस्ततलध्वनिना, **त्वरितं** शीघ्रं, दूरम्, **उत्सारयत** अपनयत, हस्तियूथमिति शेषः । पुनः **रसातलात्** पातालात्, **सद्य एव** तत्क्षणमेव, **उन्मग्नः** ऊर्ध्वमागतः, पुनः **वज्राग्निधूम्रिकामषीकल्माषपक्षसम्पुटैः** वज्राग्निना–इन्द्रोत्क्षिप्तवज्रेण, धूम्रिकाणां–शिंशपावृक्षाणां, या मषी–कज्जलं, तेन कल्माषं–चित्रं श्यामलं वा, पक्षसम्पुटं येषां तैः, **शिखरिभिः** पर्वतैः, **अधिष्ठितपृष्ठभागः** आक्रान्तपृष्ठप्रदेशः, असौ **कमठः** कच्छपः, **सञ्चरति** उद्गच्छति, क इव? **सपारापतः** पारापतैः–कपोतैः, अधिष्ठितः, **मठ इव** देवालय इव, मा **प्रतिष्ठध्वं** प्रयात, **अभिमुखमेव** सम्मुखमेव, **निकषा** समीपं, **प्रस्थितः** कृतप्रयाणः, **अपथेन** कुमार्गेण, नावं, **नेष्यति** गमयिष्यति, असाविति शेषः [औ] । पुनः **विदारितगिरिकन्दराकारतुण्डः** विदारितं–विकासितं, गिरिकन्दराकारं–पर्वतगुहाकारं, तुण्डं–मुखं येन तादृशः, पुनः **मानदण्ड इव** परिच्छेदकदण्ड इव, **सागरस्य** समुद्रस्य, पुनः **मत्सीभिः** मत्स्यस्त्रीभिः, **अनुगम्यमानः** अनुस्रियमाणः, कीदृशीभिः? **ग्रासीकृताक्रन्दज्जलकरिजटालवदनैः** ग्रासीकृतैः–कवलितैः, आक्रन्दद्भिः–सशब्दं रुदद्भिः, जलकरिभिः–जलहस्तिभिः, जटालं–व्याप्तं, वदनं येषां तादृशैः, **बालमत्स्यैः** शैशवावस्थमत्स्यैः, **अनुसृताभिः** अनुगताभिः, असावपि, **तिमिङ्गिलः** शतयोजनविस्तृतमत्स्यविशेषः, **स्तिमितया** स्थिरया, गत्या, **इतस्ततः** अत्र तत्र, **सत्वरं** शीघ्रं, **निजग्रासोचितं** स्वभक्षणयोग्यं, **सत्त्वं** जीवं, **मृगयते** अन्विष्यति, **कलकलं** कोलाहलं, मा **विधत्त** कुरुत, **महते** अधिकाय, **अनर्थाय** अहिताय, स्याद् इति शेषः, **विकृतः** दुरुत्थतः, **एषः** अयं, **निभृतं** स्थिरमेव यथा स्यात् तथा, **यातु** गच्छतु । पुनः **अतिचटुलवीचिवेगाकृष्टैः** अतिचटुलाः–अतिचञ्चलाः, ये वीचयः–तरङ्गाः, तेषां वेगैः–आकृष्टैः–कृताकर्षणैः, **कुलालचक्रक्रमेण** कुम्भकारचक्रभ्रमिप्रकारेण, **अन्तः** समुद्रस्य मध्ये, भ्रमद्भिः, **रिक्तोदरलघुभिः** रिक्तं–जलरहितं, यद् उदरं मध्यभागः, तेन लघुभिः–लघुत्वमापन्नैः, संचालने गतगुरुत्वैरित्यर्थः, **अरित्रैः** नौकाचालनकाष्ठैः, **आवेदितः** ज्ञापितः, पुनः **रसातलस्य** पातालस्य, **द्वारं** प्रवेशस्थानमिव, **वामतः** वामभागे, समीपवर्ती, अयम्, **आवर्तः** जलभ्रमिः, शीघ्रं **वञ्च्यतां** प्रतार्यतां वर्ज्यतामिति यावत् । पुनः **क्षयसमयसन्ध्यानुरञ्जिताम्बरैकदेशविडम्बी** क्षयसमये–प्रलयकाले, या सन्ध्या तया अनुरञ्जितं–रक्तीकृतं यदम्बरम्–आकाशः, तदेकदेशविडम्बी–तदेकदेशानुकारी, पुनः **दक्षिणतः** दक्षिणभागतः, **प्रतिक्षणं** प्रतिपलम्, **उदञ्चता** उद्गच्छता, **फणचक्रवालरत्नरागपटलेन** फणमण्डलस्थरत्नसम्बन्धिरक्तिमसमूहेन, **क्रमनिपीतकल्लोलकालिमा** क्रमेण

रुद्गमनशंसी सागरोद्देशः, तटमिव पुरस्तरङ्गैरुल्ललद्भिरुद्भाव्यते कुरुत वंशक्षेपमन्तर्वारि, दुर्वात इव दृश्यते मुकुलयत सितपटरज्जुजालम्, अग्रतो विसारिमत्स्य इव वहति लम्बयत नांगरानविलम्बितं [अं]; मित्राणि! मन्दोऽतिमात्रं मरुत्, प्रलम्बैर्बाहुभिर्वाहयत सत्वरमरित्राणि; मकरक! मनागुदञ्चय मार्गतटरुहश्चन्दनतरोरस्य तिरश्चीमुपरिशाखाम्, मूर्ख! किमधोमुखं स्थितोऽसि मुधा, बधान हस्ते एनं मण्डूकमस्तकमणिम्, अवश्यं न दृश्यसे दन्दशूकैः; सकुलक! विधेहि वेदोद्धारिणः शकुलस्य केलिम्, उद्धर रक्ततैलपङ्कमग्नमूलामिमां नावम्, अधीर! माऽवधीरय मद्वचः, विचर निराकुलो, नक्रवसयाऽञ्चितलोचनस्य स्थलं ते सकलमम्बुधिजलं; शम्बूक! बाढं प्रचलायसे, न चेतयसि ग्राहेणापि गृह्यमाणचरणः, चेतसि कृतं वैलक्ष्येण, क्षालय क्षारेण सामुद्रेण वारिणा वारं वारमास्यं, यास्यति द्रागेव निद्रा सहेक्षणाभ्यां क्षयं; राजिलक! तर्जितोऽपि नोपरमसि, प्रगुणयायिनीमपि नावमागस्त्यीं गतिं ग्राहयसि, अस्ति कच्चिन्न ते दिङ्मोहः? यदुदाहृतामप्यहृदय! न जानास्युत्तराशावर्तनीम्, प्रवर्तस्व दृष्ट्वा दृष्ट्वा सप्तर्षिमण्डलम्' [अः]

टिप्पनकम्—क्षेपीयः क्षिप्रतरम् [अं]। ऊर्ध्वं च ऊर्ध्वं खुत्पाटयन् (? उदञ्चय ऊर्ध्वमुत्पाटय) [अः]।

निपीतः-तिरोभावितः, कल्लोलस्य-महातरङ्गस्य, कालिमा-कृष्णता यस्मिंस्तादृशः, अत एव **अनिलं** पवनं, पातुम्, **उद्यतस्य** कृतोद्योगस्य, **कस्यचित्** अविज्ञातनामकस्य, **महाहेः** महासर्पस्य, **उद्गमनशंसी** उत्सर्पणावेदकः, अयं **सागरोद्देशः** सागरान्तर्गतोन्नतदेशः, **क्षेपीयः** अतिशीघ्रम्, **लङ्घ्यताम्** अतिक्रम्यताम्, यः सागरोद्देशः, **पुरः** अग्रे, **उल्ललद्भिः** उच्छलद्भिः, तरङ्गैः, **तटमिव** तीरमिव, **उद्भाव्यते** प्रत्याप्यते, अत एव **अन्तर्वारि** जलमध्ये, **वंशक्षेपं** मानकृते गतिरोधनादिकृते वा वंशप्रक्षेपणं, कुरुत; पुनः **दुर्वात इव** उद्धतपवन इव, दृश्यते, अत एव **सितपटरज्जुजालं** सितपटानां-श्वेतवस्त्राणां, रज्जूनां च, जालं-समूहं, **मुकुलयत** संकोचयत, पुनः अग्रे **विसारिमत्स्य इव** विसारिजातीयमत्स्यविशेष इव, **वहति** स्पन्दते, अत एव **नांगरान्** लाङ्गराणि, **अविलम्बितं** सत्वरं, **लम्बयत** नमयत [अं]। पुनः **मित्राणि!** भो सखायः!, **मरुत्** पवनः, **अतिमात्रम्** अत्यन्तं, **मन्दः** अनुद्धतः, अस्तीति शेषः, अतः **प्रलम्बैः** दीर्घैः, **बाहुभिः** भुजैः, **अरित्राणि** नौसञ्चारणकाष्ठानि, **वाहयत** चालयत। पुनः **मकरक!** तत्संज्ञक!, **मार्गतटरुहः** मार्गप्रान्तप्ररूढस्य, यद्वा मार्गभूततटप्ररूढस्य, **अस्य** पुरोवर्तिनः, **चन्दनतरोः** चन्दनवृक्षस्य, **तिरश्चीं** कुटिलाम्, **उपरिशाखाम्** ऊर्ध्वशाखां, **मनाक्** किञ्चित्, **उदञ्चय** उन्नय, **मूर्ख!** भो निष्प्रज्ञ!, **मुधा** व्यर्थम्, **अधोमुखम्** अवनतमुखं यथा स्यात् तथा, **किम्?** किमर्थम्, **स्थितः** उपविष्टः, **असि** वर्तसे, **एनम्** इमं, **मण्डूकमस्तकमणिं** मण्डूकस्य-भेकस्य, मस्तके यो मणिः-रत्नं, तं हस्ते **बधान** गृहाण, **दन्दशूकैः** सर्पैः, **अवश्यं** निश्चितं, **न दृश्यसे** तन्महिम्ना न द्रक्ष्यसे। **सकुलक!** तत्संज्ञक!, **रक्ततैलपङ्कमग्नमूलां** रक्तं-रक्तवर्णं रुधिरस्वरूपं वा, यत् तैलं तन्मये, पङ्के-कर्दमे, मग्नं मूलं यस्यास्तादृशीं, नावम्, **उद्धर** तत्पङ्कादुन्नय, **वेदोद्धारिणः** प्रलयपयोधेः वेदान् उद्धृतवतः, **शकुलस्य** मत्स्यविशेषस्य, **केलिं** लीलां, **विधेहि** कुरु, **अधीर!** धैर्यशून्य!, **मद्वचः** मद्वाक्यं, मा **अवधीरय** तिरस्कुरु, **निराकुलः** स्वस्थः सन्, **विचर** समुद्रमार्गे विहर, **नक्रवसया** नक्राख्यजलचरमज्जया, **अञ्चितलोचनस्य** आर्द्रितनयनस्य, **ते** तव, **सकलं** समग्रम्, **अम्बुधिजलं** समुद्रजलं, **स्थलं** स्थलतुल्यम्, अस्तीति शेषः। पुनः **शम्बूक!** तत्संज्ञक!, **बाढम्** अत्यन्तं, **प्रचलायसे** घूर्णसे, **ग्राहेणापि** तदाख्यहिंस्रजलचरेणापि, **गृह्यमाणचरणः** आक्रम्यमाणपादोऽपि, **न चेतयसे** न अवधत्से, **चेतसि** मनसि, **वैलक्ष्येण**, विषादेन, **कृतं** व्यर्थं, **क्षारेण** क्षाररसान्वितेन, **सामुद्रेण** समुद्रसम्बन्धिना, **वारिणा** जलेन, **वारंवारम्** अनेकवारम्, **आस्यं** मुखं, मुखमण्डलमिति यावत्, **क्षालय** सिञ्च, **द्रागेव** शीघ्रमेव, **ईक्षणाभ्यां** नेत्राभ्यां, सह, निद्रा, **क्षयं** विनाशं, **यास्यति** प्राप्स्यति। पुनः **राजिलक!** तत्संज्ञक!, **तर्जितोऽपि** भर्त्सितोऽपि, न **उपरमसि** निवर्तसे, **प्रगुणयायिनीमपि** ऋजुगामिनीमपि, नावम्, **आगस्त्यीम्** अगस्त्यसम्बन्धिनीं, दक्षिणामिति यावत्, **गतिं** मार्गं, **ग्राहयसि** गमयसि, **ते** तव, **कच्चित्** कोऽपि, **दिङ्मोहः** दिग्भ्रमः, न? स्वाभिलषितज्ञापनाय कृते प्रश्ने 'कच्चित्' इत्यस्य वर्तमानत्वाद्

इत्यादि साध्वसकरं च कर्तव्योपदेशपरं प्रार्थनं च सपरिहासं च जल्पता॰वसरेषु, नीयमाना, क्वचिच्चिरकालसंगलनसान्द्राणि कदाचिदप्यदलितानि यानपात्रैः पाटयन्ती शुकहरितशैवलपटलानि, क्वचित् सांयात्रिकप्रचारविरहादतिस्फीततां गतैरहरहः स्फुटतां शुक्तिसंपुटानां मुक्ताफलैर्निरन्तरनिचितेषु सैकतेषु सुखप्रसुप्तानि प्रबोधयन्ती जलमानुषमिथुनानि, क्वचिद् दूरत एव श्रूयमाणमुखरपक्षिरवाणि संभ्रमोत्पतनसविशेषविततदेहायामानि जलनिधिमध्यशायीनि शैलतरुखण्डेषु पिण्डयन्ती भारुण्डाण्डजकुलानि, स्वल्पेनैव समयेन दूरं जगाम। प्रगुणवातप्रेरिता च व्रजन्ती तत्रातिदीर्घेऽपि वारिधेरध्वनि गगन इव मेघलेखा प्रायशो न कचिच्चस्खाल, प्रदक्षिणीकृत्य च क्रमेण तं क्षितिध्रमभिमुखीबभूव तस्य तूर्यशब्दप्रभवस्य पर्वतोद्देशस्य [क]।

सोऽपि प्रदेशस्तां दूरादेव दर्शितोर्ध्वध्वजभुजामात्मानमिव संज्ञया दर्शयन्तीमन्तिकागतां विज्ञाय सद्य एव तं वाद्यशब्दं कदाचित् तारं कदाचिन्मन्दमुच्चरन्तमच्छिन्नसंतानमाह्वानशब्दमिव संजहार। विरते च वादित्रनिःस्वने सततगमनोद्यमोऽपि पुनराकर्णनाशया तथैव तारकः स्तोकं गत्वा सत्वरमाचकर्ष नावम् [ख]।

दिङ्मोह एवेति तात्पर्यम्, **अहृदय!** हे हृदयशून्य!, **उदाहृतामपि** उक्तामपि, **उत्तराशावर्तनीम्** उत्तरदिङ्मार्गम्, **न जानासि** न परिचिनोषि, **सप्तर्षिमण्डलं** मरीच्यादिसप्तर्षितारागणं, **दृष्ट्वा दृष्ट्वा** असकृदवलोक्य, **प्रवर्तस्व** प्रवृत्तिं कुरु [अः]।

पुनः कीदृशी सा नौः? **शुकहरितशैवलपटलानि** शुकसदृशहरितवर्णजलतृणपुञ्जान्, **पाटयन्ती** उन्मूलयन्ती, कीदृशानि? **क्वचित्** कुत्रचित्, **चिरकालसंगलनसान्द्राणि** दीर्घकालजलसम्पातनिबिडानि, पुनः **यानपात्रैः** पोतैः, कदाचिदपि, **अदलितानि** अखण्डितानि। पुनः **क्वचित्** कुत्रचित् प्रदेशे, **जलमानुषमिथुनानि** जलीयमनुष्यदम्पतीन्, **प्रबोधयन्ती** जागरयन्ती, कीदृशानि **सैकतेषु** सिकतामयस्थलेषु, **सुखप्रसुप्तानि** सुखेन शयितानि, कीदृशेषु? **अहरहः** प्रत्यहं, **स्फुटतां** दलतां, **शुक्तिसम्पुटानां** सम्पुटानां सम्पुटितशुक्तीनां, **मुक्ताफलैः** मुक्तामणिभिः, **निरन्तरनिचितेषु** निरवकाशव्याप्तेषु, कीदृशैः? **सांयात्रिकप्रचारविरहात्** पोतवणिक्प्रचाराभावात्, **अतिस्फीतताम्** अत्युज्ज्वलतां, **गतैः** प्राप्तैः। पुनः **क्वचित्** कुत्रचित् स्थाने, **भारुण्डाण्डजकुलानि** भारुण्डाख्यपक्षिविशेषगणान्, **शैलतरुखण्डेषु** पार्वतीयवृक्षपङ्क्तिषु, **पिण्डयन्ती** समूहयन्ती, कीदृशानि? **दूरत एव** दूरादेव, **श्रूयमाणमुखरपक्षिरवाणि** श्रूयमाणः–श्रवणगोचरतां नीयमानाः, मुखरपक्षिणां-वाचालपक्षिणां, रवाः–शब्दा यैस्तादृशानि, पक्षिस्थाने 'पक्ष' इति पाठे श्रूयमाणा मुखराः पक्षा येषामित्यर्थः, पुनः **संभ्रमोत्पतनसविशेषविततदेहायामानि** सम्भ्रमेण–अन्तःक्षोभेण, यत् उत्पतनम्–उड्डयनं, तेन सविशेषम्–अत्यन्तं, विततः-विस्तृतः, देहायामः–शरीरदैर्घ्यं येषां तादृशानि, पुनः **जलनिधिमध्यशायीनि** समुद्रमध्यशयनशीलानि। **च** पुनः, **प्रगुणवातप्रेरिता** अनुकूलपवनप्रेरिता, **व्रजन्ती** गच्छन्ती, **सा नौरि**ति शेषः, **तत्र** तस्मिन्, **वारिधेः** समुद्रस्य, **अध्वनि** मार्गे, **गगने** आकाशमार्गे, **मेघलेखा इव** मेघपङ्क्तिरिव, **प्रायशः** प्रायेण, **क्वचित्** कुत्रापि स्थाने, न **चस्खाल** स्खलितवती, **क्रमेण** दक्षिणादिमार्गक्रमेण, तं **क्षितिध्रं** सुवेलपर्वतं, **प्रदक्षिणीकृत्य** परिभ्रम्य, **तूर्यशब्दप्रभवस्य** तूर्याख्यवाद्यविशेषध्वनिप्रादुर्भावास्पदस्य, **तस्य** प्रकृतस्य, **पर्वतोद्देशस्य** पर्वतरूपोर्ध्वदेशस्य, **अभिमुखीबभूव** सम्मुखीबभूव, नौरिति शेषः [क]।

सोऽपि प्रकृतवाद्यशब्दोद्गमस्थानभूतोऽपि, **प्रदेशः** एकदेशः, दूरादेव, **दर्शितोर्ध्वध्वजभुजां** दर्शितः–स्वागमनसंकेतनाय दृष्टिगोचरतां गमितः, ऊर्ध्वध्वजरूपः–नौकोपरितनपताकात्मकः, भुजः–बाहुर्यया तादृशीम्, अतः **संज्ञया** तादृशसङ्केतेन, **आत्मानमिव** स्वमिव, **दर्शयन्तीं** साक्षात्कारयन्तीं, **तां** नावम्, **अन्तिकागतां** समीपमागतां, **विज्ञाय** निश्चित्य, **सद्य एव** तत्क्षणमेव, तं **वाद्यशब्दं** तूर्याख्यवाद्यध्वनिम्, **आह्वानशब्दमिव** आह्वानात्मकध्वनिमिव, **संजहार** उपसंहृतवान्, निवारितवानिति यावत्, कीदृशम्? **कदाचित्** कस्मिंश्चित् क्षणे, **तारं** तीव्रं, कदाचित् **मन्दं** यथा स्यात् तथा, **उच्चरन्तम्** उद्गच्छन्तम्, पुनः **अच्छिन्नसन्तानम्** अविरतधारम्। **वादित्रनिःस्वने** वाद्यध्वनौ, **विरते** निवृत्ते सति, **पुनराकर्णनाशया** पुनः श्रवणाशया, **सततगमनोद्यमोऽपि** अविरतगमनप्रयत्नोऽपि, **तारकः** तदाख्यकर्णधारः,

उवाच च विगतहर्षः—'कुमार! विश्रान्त एष तावदत्रैव प्रदेशे मार्गदेशकोऽस्माकमातोद्यध्वनिः। आज्ञापय किमधुना कर्तव्यम्, किमेवमेव बद्धवेगा पुरस्तादबद्धलक्ष(क्ष्य)मेव प्रवर्त्स्यत इयं नौः, उत पश्चान्निवर्त्स्यते, यद्यवश्यमेव पुरः प्रयातव्यं द्रष्टव्यं च कौतुकमिति निश्चयः कुमारस्य, तन्न किञ्चिद् विलम्बेन विचारेण वा कृतेन प्रयोजनम्, अनेनैव पर्वतनितम्बावलम्बिना मार्गेण गम्यते यावत् किमपि दृष्टमथ न किञ्चिद् गतेन दृष्टेन वा कौतुकेन साध्यसिद्धिरिति बुद्धिस्तदलमात्मना वृथैव क्लेशितेन, प्रस्थीयते स्थानादित एव प्रतीपं, गम्यते शिबिरम्, आश्वास्यते सर्वतस्त्वददर्शनेन विक्लवीभूतो भृत्यबान्धवमित्रलोकः, क्रियन्ते प्रस्तुतानि राज्यकार्याणि, कौतुकानि त्वपर्यवसानायामत्र दण्डयात्रायामदृश्यपारे भगवत्यकूपारे विचरतो यदृच्छया कुमारस्य पदे पदे सुलभदर्शनानि, किं च तैः, अयमेव हि तावदवधिरद्भुतानां निदर्शनं दर्शनीयानां संकेतशाला कुतूहलकारिणां युज्यते रत्नकूटशैलः कथमपि प्रसङ्गदृष्टो द्रष्टुमनुग्रहीतुं च सपरिग्रहस्य विविधक्रीडाभिः [ग]। अत्र हि पदे पदे सुन्दरतया सुरलोकस्यापि जनितव्रीडानि क्रीडास्थानानि, स्थाने स्थाने सर्वर्तुकानि वनानि, वने वने विकचरत्नकुसुमस्तबकतारकितानि कल्पतरुखण्डानि, खण्डे खण्डे बहुप्रपञ्चाः काञ्चनलता-

---

तथैव पूर्ववदेव, **स्तोकम्** अल्पं, गत्वा, नावं, **सत्वरं** शीघ्रम्, **आचकर्ष** निवर्तयामास [**ख**]। **च** पुनः, **विगतहर्षः** नष्टहर्षः सन्, **उवाच** उक्तवान्, किमित्याह—**कुमार!** युवराज!, अस्माकं, **मार्गदेशकः** मार्गविदकः, **एषः** अयम्, **आतोद्यध्वनिः** वाद्यविशेषध्वनिः, **अत्रैव** अस्मिन्नेव, **प्रदेशे** स्थाने, **विश्रान्तः** निवृत्तः, **अधुना** सम्प्रति, किं **कर्तव्यं** कर्तुमुचितम्, इति **आज्ञापय** आदिश। **एवमेव** इत्थमेव, **बद्धवेगा** जनितवेगा, इयं नौः किम्, **अबद्धलक्ष्यमेव** अनिश्चितगन्तव्यप्रदेशमेव यथा स्यात् तथा, **पुरस्तात्** अग्रे, **प्रवर्त्स्यते** प्रेरिष्यते, **उत** अथवा, पश्चात् **निवर्त्स्यते** निवर्तयिष्यते, मयेति शेषः। यदि **कुमारस्य** भवतः, **अवश्यमेव** नूनमेव, **पुरः** अग्रे, **प्रस्थातव्यं** प्रस्थातुमुचितम्, **च** पुनः, **कौतुकम्** उत्सवः, **द्रष्टव्यं** द्रष्टुमुचितम् इति, **निश्चयः** संकल्पः, वर्तत इति शेषः, **तत्** तर्हि, कृतेन, **विलम्बेन** कालात्ययेन, **वा** अथवा, **विचारेण** विवेचनेन, न **किञ्चिद्** अल्पमपि, **प्रयोजनं** फलम्, किं तु **पर्वतनितम्बावलम्बिना** पर्वतकटिभागावलम्बिना, मार्गेण, **यावत्** यावन्तं कालं, **किमपि** कौतुकमिति शेषः, **दृष्टं** दृष्टिगोचरं, स्यादिति शेषः, तावत् **गम्यते** प्रस्थीयते, **अथ** यदि, **गतेन** गमनेन, **वा** अथवा, **दृष्टेन** दृग्गोचरीकृतेन, **कौतुकेन** उत्सवेन, न **साध्यसिद्धिः** प्रयोजननिष्पत्तिः, इति **बुद्धिः** निश्चयः, स्यादिति शेषः, **तत्** तर्हि, **वृथैव** व्यर्थमेव, **क्लेशितेन** आयासितेन, **आत्मना** स्वेन, **अलं** व्यर्थम्, **इत एव** अस्मादेव स्थानात्, **प्रतीपं** पश्चात्, **प्रस्थीयते** प्रयाणं क्रियते, **शिबिरं** सैन्यावासः, **गम्यते** प्राप्यते, **त्वददर्शनेन** त्वद्दर्शनाभावेन, **विक्लवीभूतः** व्याकुलीभूतः, **भृत्य-बान्धव-मित्रलोकः** सेवकबन्धुसुहृज्जनः, **सर्वतः** समन्ततः, **आश्वास्यते** सान्त्व्यते, पुनः **प्रस्तुतानि** प्रकृतानि, राज्यकार्याणि क्रियन्ते। **अपर्यवसानायां** निरवधिकायाम्, **अत्र** अस्यां, **दण्डयात्रायां** दीर्घयात्रायाम्, **अदृश्यपारे** अलक्ष्योत्तरावधिके, **भगवति** ऐश्वर्यवति, **अकूपारे** सागरे, **यदृच्छया** स्वेच्छया, **विचरतः** विहरतः, **कुमारस्य** भवतः, **पदे पदे** स्थाने स्थाने, **कौतुकानि तु** उत्सवास्तु, **सुलभदर्शनानि** अनायासदर्शनानि, स्युरिति शेषः। **च** पुनः, **तैः** अनन्तरोपवर्णितकौतुकैः, **किम्** न किमपि प्रयोजनमित्यर्थः। **अद्भुतानाम्** आश्चर्याणाम्, **अवधिः** चरमसीमा, प्रधानकेन्द्रमिति यावत्, पुनः **दर्शनीयानां** द्रष्टुं योग्यानां, वस्तूनां, **निदर्शनम्** आदर्शभूतः, पुनः **कुतूहलकारिणाम्** उत्सवकारिणां, **संकेतशाला** संकेतगृहम्, **कथमपि** कथञ्चित्, **प्रसङ्गदृष्टः** प्रसङ्गवशादवलोकितपूर्वः, अयमेव **रत्नकूटशैलः** रत्नकूटपर्वतः, **हि** निश्चयेन, **तावद्**इति वाक्यालङ्कारे, **द्रष्टुं** दृष्टिगोचरीकर्तुं, **सपरिग्रहस्य** सपरिवारस्य, **विविधक्रीडाभिः** अनेकक्रीडाभिः, **अनुग्रहीतुम्** अनुकम्पयितुं च, **युज्यते** योग्यो वर्तते [**ग**]। **हि** यतः, **अत्र** अस्मिन् पर्वते, **पदे पदे** स्थाने स्थाने, **सुन्दरतया** मनोहारितया, **सुरलोकस्यापि** स्वर्गलोकस्यापि, **जनितव्रीडानि** उत्पादितलज्जानि, **क्रीडास्थानानि** क्रीडाक्षेत्राणि; पुनः **स्थाने स्थाने** प्रतिस्थानम्, **सर्वर्तुकानि** युगपत्सर्वर्तुसुखावहानि, वनानि, इदं 'दृश्यन्ते' इति वक्ष्यमाणक्रिययाऽन्वेति, पुनः **वने वने** प्रतिवनम्, **विकचरत्नकुसुमस्तबकतारकितानि** विकचानां–विकसितानां, रत्नानां–स्वजातिश्रेष्ठानां रत्नरूपाणां वा, कुसुमानां–पुष्पाणां, यः स्तबकः–गुच्छः, तेन तारकितानि–संजाततारकाणीव, **कल्पतरुखण्डानि** कल्पवृक्षपङ्क्तयः, पुनः **खण्डे खण्डे** प्रतिखण्डम्,

दोलाः, प्रतिदोलमान्दोलनक्रीडानन्दितानि दृश्यन्ते सततमनवद्यवेषाणि विद्याधरद्वन्द्वानि, अपि च सानौ सानौ निशम्यते कर्णामृतं किन्नरगीतम्, भृगौ भृगावाकर्ण्यते निर्झरणझात्कृतमतिस्फीतम्, सरिति सरिति विलसन्ति रत्नवालुकापुलिनेषु चित्राः पक्षिणः, काले काले वाति विस्तारितरतिकेलिरमराणां समीरणो दक्षिणः, प्रदेशे प्रदेशे चिन्तिते चित्तस्य जायते परा प्रीतिः, वस्तुनि वस्तुनि विभाविते भवति लोचनद्वयस्य द्रष्टव्यदर्शनेच्छानिवृत्तिः [घ]। तथा च छाययापि पत्रपादपच्छायानामपसरति देहिनामङ्गग्लानिः, गन्धेनापि पुष्पद्रुमगन्धानामन्धीभवन्ति घ्राणानि, वातेनापि चैत्रवातस्य विकटमुद्वहन्ति वनलताः कुसुमाट्टहासम्, वार्तयापि दयितवार्ताया मनसि मानिनीनां करोति मन्मथः स्थानाधिपत्येनावासम्। किं चापरोक्षवर्णनेन, निर्णेष्यति यथावस्थितं स्वरूपमस्य स्वयमेवानुभूय स्वामी' इति जल्पित्वा जोषमभजत् [ङ]।

अहं त्वकाण्ड एव खण्डितगमनरभसेन तस्यानेन वचसानवसानेन पथापि जनितव्यथः 'कष्टं, न लेशोऽप्यभिलषितसंपत्त्या सुखस्य संजातः, क्लेश एव केवलमनुभूतः' इति भावयन्नुद्भूतगाढोद्वेगतस्तत्क्षणमधो-

---

टिप्पनकम्—**छायया** लेशेन। **जोषं** मौनम् [ङ]।

बहुप्रपञ्चाः बहुविस्ताराः, **काञ्चनलतादोलाः** काञ्चनाख्यनागकेसरलतारूपा दोलाः, पुनः **प्रतिदोलं** दोलायां दोलायाम्, **आन्दोलनक्रीडानन्दितानि** आन्दोलनात्मकक्रीडासंजातानन्दानि, **सततम्** अविरतम्, **अनवद्यवेषाणि** अनिन्द्यवेषविशिष्टानि, **विद्याधरद्वन्द्वानि** विद्याधरदम्पतयः, **दृश्यन्ते** दृष्टिगोचरीभवन्ति। **सानौ सानौ** प्रतिसमस्थलं, **कर्णामृतं** कर्णयोरमृततुल्यं, **किन्नरगीतं** किन्नराणां–देवयोनिविशेषाणां, गीतं, **निशम्यते** श्रूयते। **भृगौ भृगौ** प्रतिप्रपातस्थानं, **अतिस्फीतं** अतिस्फुटम्, **निर्झरणझात्कृतं** स्रोतःस्यन्दनध्वनिविशेषः, **आकर्ण्यते** श्रूयते। पुनः **सरिति सरिति** प्रतिनदि, **रत्नवालुकापुलिनेषु** श्रेष्ठसिकतामयस्थलेषु, यद्वा रत्नरूपसिकतामयप्रदेशेषु, **चित्राः** चित्रवर्णाः, पक्षिणः, **विलसन्ति** विराजन्ते। पुनः **काले काले** समये समये, **अमराणां** देवानां, **विस्तारितरतिकेलिः** प्रवर्धितरतिक्रीडः, **दक्षिणः** दक्षिणदिग्वाही, **समीरणः** पवनः, **वाति** वहति। पुनः **प्रदेशे प्रदेशे** प्रत्येकप्रदेशे, **चिन्तिते** समालोचिते सति, **चित्तस्य** हृदयस्य, **परा** उत्कृष्टा, **प्रीतिः** तृप्तिः, **जायते** उत्पद्यते। पुनः **वस्तुनि वस्तुनि** प्रत्येकवस्तुनि, **विभाविते** विचारिते सति, **लोचनद्वयस्य** नेत्रद्वयस्य, **द्रष्टव्यदर्शनेच्छानिवृत्तिः** दर्शनीयवस्त्वन्तरदर्शनौत्सुक्यनिवृत्तिः, जायते इति शेषः [घ]। **च** पुनः, तथा **पत्रपादपच्छायानां** पत्रावृतवृक्षकृतानातपानाम्, **छाययाऽपि** लेशेनापि, **देहिनां** शरीरिणाम्, **अङ्गग्लानिः** शरीरतापः, **अपसरति** नश्यति। पुनः **पुष्पद्रुमगन्धानां** पुष्पवृक्षाऽऽमोदानां, **गन्धेनापि** लेशेनापि, **घ्राणानि** घ्राणेन्द्रियाणि, **अन्धीभवन्ति** व्यामुह्यन्ति। पुनः **चैत्रवातस्य** चैत्रमासात्मकवसन्तकालिकपवनस्य, **वातेनापि** वहनेनापि संचरणेनापीति यावत्, **वनलताः** वनस्थलतिकाः, **विकटं** सुन्दरं, **कुसुमाट्टहासम्** पुष्परूपं महाहासम्, **उद्वहन्ति** उत्सृजन्ति, पुनः **दयितवार्तायाः** पतिवृत्तान्तस्य, **वार्तयापि** चर्चयापि, **मानिनीनां** मानवतीनां, **मनसि** हृदि, **मन्मथः** कामदेवः, **स्थानाधिपत्येन** स्थानस्वामिभावेन, **आवासं** निवासं, करोति। **अपरोक्षवर्णनेन** प्रत्यक्षीभूतवस्तुवर्णनेन, **किम्?** किमपि न प्रयोजनमिति भावः, **स्वामी** अधिपतिः, भवानिति यावत्, **यथावस्थितं** वस्तु सत्, **अस्य** प्रकृतशैलस्य, स्वरूपं, **स्वयम्** आत्मनैव, **अनुभूय** साक्षात्कृत्य, **निर्णेष्यति** अवधारयिष्यति। **इति** इत्थं, **जल्पित्वा** उक्त्वा, **जोषं** मौनम्, **अभजत्** अशिश्रयत् [ङ]। अहं तु, **अकाण्ड एव** अनवसर एव, **खण्डितगमनरभसेन** खण्डितः–निवारितः, गमनरभसः–गमनवेगो येन तादृशेन, **अनेन** अनुपदमुक्तेन, **तस्य** तारकस्य, **वचसा** वाक्येन, पुनः **अनवसानेन** निरवधिकेन, **पथापि** मार्गेण च, **जनितव्यथः** उत्पादितदुःखः सन्, 'वचसानवसानेन पथापि' इति स्थाने **वचसा पथ्येनापि** इति पाठे हितकारिणापि वाक्येनेत्यर्थः, **कष्टं** दुःखम्, **अभिलषितसम्पत्त्या** अभिलाषितस्य–अभीष्टस्य, सम्पत्त्या–प्राप्त्या, सुखस्य–आनन्दस्य, **लेशोऽपि** अल्पमात्रापि, न **सञ्जातः** समुत्पन्नः, केवलं क्लेश एव, **अनुभूतः** उपभुक्तः, इति **भावयन्** विचारयन्, **उद्भूतगाढोद्वेगतः** उत्पन्ननितान्तसम्भ्रमवशात्, **तत्क्षणं**

मुखोऽभवम्। अदत्तोत्तरश्च तस्मै तदाकस्मिकमालोच्यालोच्य चापलमात्मनो मनसि जातहासो विस्मयत्रपाविषादानां युगपदास्पदतामगच्छम्। अकरवं च जातपरमानुतापश्चेतसि—'हन्त, कस्मान्मया मिथ्याकुतूहलतरलितेन सहसैव तूर्यरवमुपसृत्य धावता शिशुनेव लघुतां परामात्माऽऽनीतः, किमित्यचिन्तितात्मविनिपातदुःखेन शिखरिणेव कुलिशपातभीरुणा संचरदनेकदुष्टग्राहदुरवगाहो महासमुद्रकुक्षिरवगाढः, किमनिवारितेन्द्रियवृत्तिना बालतपस्विनेव निष्फलोऽनुभूतः शीतवातादिजनितः कायक्लेशः, कुतो ममेदमनुपदिष्टमशिक्षितमनभ्यस्तमचिन्तितमेवाद्य चापलमाविर्भूतम् [च], अहो चञ्चलस्वभावता चित्तपरिणतेः, अहो विकारबहुलता तारुण्यगतेः, अहो दुःखदायकत्वं सुखाभिलाषाणाम्, अहो व्यसनदानवैदग्ध्यमनधीनतायाः, अहो कार्यपरिणतिविचारविद्वेषो दर्पोद्रेकविलसितानाम्, अहो मतिविपर्ययप्रदानतात्पर्यं दैवप्रातिकूल्यस्य, तस्य तादृशस्य तातप्रयत्नस्य, तस्य विद्याभ्यासस्य, तस्य नीतिशास्त्रश्रवणस्य, तस्य हेयोपादेयतत्त्वपरिज्ञानस्य, तेषां वृद्धोपदेशानाम्, तस्या विदग्धजनसंगतेः, तस्य च निसर्गसिद्धस्येन्द्रियवर्गसंयमस्य कीदृशो विपाकः संवृत्तः [छ],

---

टिप्पनकम्—बालतपस्विना अज्ञानतपोधनेन [च]।

तस्मिन् क्षणे, **अधोमुखः** अवनतवदनः, **अभवं** जातः। **च** पुनः, **तस्मै** तारकाय, **अदत्तोत्तरः** अदत्तप्रतिवचनः सन्, **तदा** तस्मिन् काले, **आत्मनः** स्वस्य, **आकस्मिकम्** अकारणकं, **चापलं** चाञ्चल्यम्, **आलोच्य आलोच्य** विचार्य विचार्य, **मनसि** चेतसि, **जातहासः** उत्पन्नस्वावज्ञोचितपरिहासः सन्, **युगपत्** एककालं, **विस्मय-त्रपा-विषादानां** आश्चर्यलज्जादुःखानाम्, **आस्पदतां** स्थानताम्, **अगच्छं** प्रापम्। **च** पुनः, **जातपरमानुतापः** उत्पन्नात्यन्तपश्चात्तापः सन्, **चेतसि** चित्ते, **अकरवम्** अचिन्तयम्, किमित्याह—**हन्त** खेदः, **शिशुनेव** बालेनेव, **मिथ्याकुतूहलतरलितेन** मिथ्याभूतोत्सवचञ्चलितेन, पुनः **तूर्यरवं** वाद्यविशेषध्वनिम्, **उपसृत्य** अनुसृत्य, **सहसैव** शीघ्रमेव, **धावता** वेगेन गच्छता, मया, **अकस्मात्** अकारणमेव, **आत्मा** स्वः, **पराम्** अत्यन्तां, **लघुतां** क्षुद्रताम्, आनीतः। पुनः **किमिति** कस्मात्, **कुलिशपातभीरुणा** वज्राघातभीतेन, **शिखरिणा** पर्वतेन, इव, **अचिन्तितात्मविनिपातदुःखेन** अचिन्तितः—अनालोचितः, आत्मनः—स्वस्य, विनिपातेन—अनर्थपातेन, पक्षे समुद्रान्तःपतनेन, दुःखं येन तादृशेन, मयेति शेषः, **सञ्चरदनेकदुष्टग्राहदुरवगाहः** सञ्चरद्भिः—उच्छलद्भिः, अनेकैः—बहुभिः, दुष्टग्राहैः—हिंसकजलचरविशेषैः, दुरवगाहः—दुष्प्रवेशः, **महासमुद्रकुक्षिः** अतिविस्तृतसमुद्रोदरम्, **अवगाढः** प्रवेशकर्मतामापादितः। पुनः **किं** किमर्थं, **बालतपस्विनेव** अज्ञानतपोधनेन, **अनिवारितेन्द्रियवृत्तिना** अनियन्त्रितेन्द्रियव्यापारेण, मयेति शेषः, **निष्फलः** व्यर्थः, **शीतवातादिजनितः** शीतवाय्वातपाद्युपद्रवोत्पादितः, **कायक्लेशः** शरीरदुःखम्, **अनुभूतः** भुक्तः। पुनः **अनुपदिष्टं** न केनापि धर्माचार्येणोपदिष्टम्, **अशिक्षितं** नापि कस्माचिद् विद्यागुरोरधीतम्, **अनभ्यस्तम्** नापि स्वयमनुशीलितं मम, **इदं** प्रकृतं, चापलम्, **अचिन्तितमेव** अतर्कितमेव **कुतः** कस्माद्धेतोः, **आविर्भूतं** प्रकटितम् [च]। **अहो** विषादविषयोऽयं, यदुत—**चित्तपरिणतेः** चित्तवृत्तेः, **चञ्चलस्वभावता** प्राकृतिकचञ्चलता, पुनः **अहो** प्राग्वदर्थः, एवमुत्तरत्र, **तारुण्यगतेः** यौवनावस्थायाः, **विकारबहुलता** विकृतिविपुलता, पुनः, अहो **सुखाभिलाषाणां** सुखेच्छानां, **दुःखदायकत्वं** दुःखजनकत्वम्, पुनः **अहो अनधीनतायाः** स्वतन्त्रतायाः, **व्यसनदानवैदग्ध्यं** संकटोत्पादनपाटवम्, पुनः, अहो **दर्पोद्रेकविलसितानां** गर्वातिशयविलासानां, **कार्यपरिणतिविचारविद्वेषः** क्रियाफलविवेकवैरम्, पुनः, अहो **दैवप्रातिकूल्यस्य** भाग्यप्रतिकूलतायाः, **मतिविपर्ययप्रदानतात्पर्यं** बुद्धिवैपरीत्यापादनतत्परत्वम्। **तादृशस्य** मत्कल्याणपरिणामिनः, **तस्य** अनुभूतस्य, **तातप्रयत्नस्य** मत्पितुः प्रयासस्य, पुनः **तस्य** स्वकृतस्य, **विद्याभ्यासस्य** शास्त्रानुशीलनस्य, पुनः **तस्य** स्वकृतस्य, **नीतिशास्त्रश्रवणस्य** नीतिशास्त्राध्ययनस्य, पुनः **तस्य** स्वकृतस्य, **हेयोपादेयतत्त्वपरिज्ञानस्य** हेयं—त्याज्यम्, अनिष्टसाधनमिति यावत्, उपादेयं—ग्राह्यमिष्टसाधनमिति यावत्, तयोर्यत् तत्त्वं—याथार्थ्यं, तत्परिज्ञानस्य तन्निर्णयस्य, पुनः **तेषां** गृहीतानां, **वृद्धोपदेशानां** गुरुजनानुशासनानाम्, पुनः **तस्याः** उपासितायाः **विदग्धजनसंगतेः** विद्वज्जनसंगस्य, पुनः **तस्य** स्वसाक्षिकस्य, **निसर्ग-**

किमिदानीमस्य पृच्छतः प्रतिवचनं प्रयच्छामि, किं कर्तव्यमुपदिशामि, स्वयं च किं करोमि, कथमयमवश्यमारब्धं मया निर्वोढव्यमिति बद्धनिश्चयेनापि निरवधौ पयोधावनवधारितायां गन्तव्यभूमावनिश्चिते द्रष्टव्यवस्तुदर्शने क्लेशायासलाभाय वराकः पुरः प्रवर्तयितव्यः, कथं च गमनं निवारयतः पूर्वमस्य वचनमनादृतमिदानीं बहु मन्तव्यम्, कथं चास्थिरस्वभावतया सरभसप्रधावितेन भूमिमियतीमागत्य भग्नमनसा तीरादर्शिशकुनिनेव पश्चान्निवर्तितव्यम् [ज], निवृत्तेनापि कथमयमनेकविकटावर्तशतसंकुलः सर्वतो विशृङ्खलप्रचारैर्दुष्टजलचरैः पदे पदे प्रस्खलितयानपात्रगतिरतिमात्रदुर्गः सागरैकदेशो लङ्घयितव्यः, कथं च तत्कालमस्मत्संनिहितसैनिकावेदितवृत्तान्तं संभ्रान्तस्य समकालमेकवर्त्मना प्रातः प्रधावितस्य निरन्तरप्रचलितानेकनौसहस्रसंक्षोभिताम्बुधेरर्धपथदृष्टस्य पार्थिवलोकस्य वृथागमनलज्जाविलक्षाक्षमाननं दर्शयितव्यम्, कथं च दूरादेव दर्शितस्मितस्य पार्श्वमुपगतवतः 'क्व गताः, किमर्थं गताः, किं दृष्टं, किमनुभूतं, किमासादितम्' इत्यादि पृच्छतः प्रणयिवर्गस्य सहसा ह्रेपणं स्वचरितमावेदनीयम्, कथं चावासस्थानमुपागतेन दुर्विनयजनितोद्वेगाः स्वतन्त्र इति कृत्वा तूष्णीमेव सर्वे समर्पितस्वाधिकारमुद्राः प्रसादनीया राज्यचिन्तकाः प्रधान-

---

सिद्धस्य स्वाभाविकस्य, **इन्द्रियवर्गसंयमस्य** चक्षुरादीन्द्रियगणनियन्त्रणस्य, **कीदृशः** किंप्रकारकः, **विपाकः** परिणामः, **संवृत्तः** संजातः [छ]। **पृच्छतः** गमनपरावर्तनप्रश्नं कुर्वतः, **अस्य** तारकस्य, किं कीदृशं, **प्रतिवचनम्** उत्तरं, **प्रयच्छामि** प्रददामि, पुनः **किं** तयोः कतरत्, **कर्तव्यं** करणीयम्, **उपदिशामि** आज्ञापयामि **च** पुनः, **स्वयम्** आत्मनाऽपि, किं करोमि। मया **आरब्धं** प्रवर्तितं, तत्र गमनमित्यर्थः, **अवश्यं** नूनम्, **निर्वोढव्यं** सम्पादनीयम्, **इति** इत्थं, **बद्धनिश्चयेनापि** कृतनिश्चयेनापि, मयेति शेषः, **निरवधौ** अपारे **पयोधौ** समुद्रे, **गन्तव्यभूमौ** गन्तव्यस्थाने, **अनवधारितायाम्** अनिर्णीतायाम्, पुनः **द्रष्टव्यवस्तुदर्शने** लक्ष्यभूतवस्तुदर्शने, **अनिश्चिते** सन्दिग्धे, **वराकः** दयनीयः, **अयं** तारकः, **कथं** केन प्रकारेण, **पुरः** अग्रे, **प्रवर्तयितव्यः** प्रवर्तयितुमुचितः। **च** पुनः, **पूर्वं** प्राक्, गमनं, **निवारयतः** निषेधतः, **अस्य** तारकस्य, **अनादृतम्** उपेक्षितं, **वचनं** वाक्यम्, **इदानीम्** अधुना, **कथं** केन प्रकारेण, **बहु** चारु, **मन्तव्यं** स्वीकरणीयम्। **च** पुनः, **अस्थिरस्वभावतया** चपलस्वभावतया, **सरभसप्रधावितेन** सवेगं कृतप्रधावनेन, मयेति शेषः, **इयतीम्** एतावतीं, **भूमिं** समुद्रप्रदेशम्, आगत्य, **भग्नमनसा** भग्नमनोरथेन सता, **तीरादर्शिशकुनिनेव** तीरमपश्यता पक्षिणेव, पश्चात्, **कथं** केन प्रकारेण, **निवर्तितव्यं** परावर्तितव्यम्, [ज]। **निवृत्तेनापि** परावृत्तेनापि, मयेति शेषः, **अनेकविकटावर्तशतसंकुलः** अनेकेन–बहुना, विकटानां–भीषणानाम्, आवर्तानां, शतेन, संकुलः–व्याप्तः, **सर्वतः** परितः, **विशृङ्खलप्रचारैः** अप्रतिहतप्रचारैः, **दुष्टजलचरैः** हिंसकजलजन्तुभिः, **पदे पदे** स्थाने स्थाने, **प्रस्खलितयानपात्रगतिः** प्रस्खलिता–व्याहता, यानपात्रस्य–पोतस्य, गतिः–गमनं यस्मिंस्तादृशः, **अतिमात्रदुर्गः** अत्यन्तदुःखेन गमनीयः, अयं **सागरैकदेशः** समुद्रैकदेशः, कथं **लङ्घयितव्यः** लङ्घयितुं शक्यः। **तत्कालं** तत्क्षणम्, **अस्मत्सन्निहितसैनिकावेदितवृत्तान्तम्** अस्मत्सन्निहितसैनिकैः–अस्मत्पार्श्ववर्तिसैन्यैः, आवेदितवृत्तान्तं–निवेदितवृत्तान्तं यथा स्यात् तथा, **सम्भ्रान्तस्य** क्षुभितस्य पुनः **समकालं** युगपत्, प्रातः, **एकवर्त्मना** एकमार्गेण, **प्रधावितस्य** कृतप्रधावनस्य, **निरन्तरप्रचलितानेकनौसहस्रसंक्षोभिताम्बुधेः** निरन्तरप्रचलितैः–अनवरतप्रस्थितैः, अनेकनौसहस्रैः–अनेकसहस्रसंख्यकनौभिः, संक्षोभितः–उन्मथितः, अम्बुधिः–समुद्रो येन तादृशस्य, पुनः, **अर्धपथदृष्टस्य** अर्धमार्गावलोकितस्य, **पार्थिवलोकस्य** नृपजनस्य, तं प्रतीति यावत्, **वृथागमनलज्जाविलक्षाक्षं** वृथागमनेन–व्यर्थमेवाज्ञातस्थाने प्रयाणेन, या लज्जा तया, विलक्षं–विषण्णं निमीलितमिति यावत्, अक्षि–नेत्रं यस्मिंस्तादृशम्, **आननं** मुखमण्डलं, **दर्शयितव्यं** दर्शयितुमुचितम्। **च** पुनः, **प्रणयिवर्गस्य** स्नेहास्पदगणस्य, **सहसा** शीघ्रं, **ह्रेपणं** लज्जाजनकं, **स्वचरितं** स्वकृत्यं, **कथं** केन प्रकारेण, **आवेदनीयं** विज्ञापनीयम्, कीदृशस्य? दूरादेव **दर्शितस्मितस्य** प्रकटितमन्दहासस्य, **पार्श्वं** निकटम्, **उपगतवतः** आगतवतः, आगमिष्यत इति यावत्, **क्व** कुत्र, गताः, **किमर्थं** किंनिमित्तं, गताः, भवन्त इति शेषः। पुनः किं **दृष्टं** दृष्टिगोचरीकृतम्, पुनः किम् **अनुभूतम्** अनुभवगोचरीकृतम्, पुनः किं वस्तु **आसादितं** प्राप्तम्, इत्यादि **पृच्छतः** जिज्ञासां प्रकटयतः। **च** पुनः, **आवासस्थानं** स्वनिवासस्थानं राजधानीमिति यावत्, **उपागतेन**, समागतेन

पुरुषाः । कथं च हृदयदाहलङ्घितानुवृत्तीनामनुल्लङ्घनीयवचसां वृद्धबन्धूनामधोमुखेन सदसि सोढव्याः श्रवणपरुषा रोषतिरस्काराः, सर्वथा धिग् मां चापलोपहतमनात्मज्ञमुत्सृष्टाभिमानमसमीहितकारिणम्, अनेनाप्यदृष्टशिष्टव्यवहारेण सर्वदा प्राकृतलोकसहवासिना तारकेण तरल इति कुतूहलीति क्रीडनशील इति संभावितम्' [झ] । इत्याद्यनल्पमनेकसंकल्पकवलितचित्तवृत्तेश्चिन्तयत एव मे जगाम परिणाममप्रतर्कितैव रजनिः । ऊर्ध्वकिरणरज्जुस्तम्बलम्बमानशशिबिम्बनाङ्गरादपरदिग्भागयानपात्रादवततार सांयात्रिक इव कृताम्बरजलधियात्रः शनैः शनैरन्धकारः । किं वृथा नदसि, मथने यदि मया रत्नानि ते कक्षीकृतानि तदुत्क्षिपैतदित्यवतार्य शिरसः पुरो मन्दरक्षितिभृता क्षिप्तमुत्तरीयक्षौममिव पिण्डीकृतमिन्दुमण्डलमाकुलाकुलप्रसारितोर्मिहस्तो जग्राह जलधिः । प्रमुख एव प्रवृत्तमेषस्य ततश्चलितसरोहिणीकवृषस्य क्वापि क्वापि विभाव्यमानतुलाधनुषः

टिप्पनकम्—[**प्रवृत्तमेषस्य** मेषः—अजः,] मेषराशिश्च, **चलितसरोहिणीकवृषस्य** एकत्र रोहिणी-नक्षत्रम्, वृषः-राशिः, अन्यत्र रोहिणी-सुरभिः, वृषः-गौः । **विभाव्यमानतुलाधनुषः** एकत्र तुला-धनुषी राशी, अन्यत्र तुला-प्रसिद्धैव, धनुश्च-कार्मुकम् [ञ] ।

मयेति शेषः, **राज्यचिन्तकाः** राज्यसंचालकाः, **प्रधानपुरुषाः** मन्त्रिजनाः, **कथं** केन प्रकारेण, **प्रसादनीयाः** अनुनेतव्याः । कीदृशाः ? **दुर्विनयजनितोद्वेगाः** मदीयदुर्विनीततोत्पादितान्तःक्षोभाः, पुनः **स्वतन्त्रः** स्वेच्छाचारी, इति **कृत्वा** मत्वा, **तूष्णीमेव** किमप्यकथयित्वैव, **समर्पितस्वाधिकारमुद्राः** प्रत्यर्पितस्वस्वाधिकारज्ञापकचिह्नविशेषाः । **च** पुनः, **वृद्धबन्धूनां** वयसा श्रेष्ठबन्धुजनानां, **श्रवणपरुषाः** कर्णकठोराः, **रोषतिरस्काराः** क्रोधप्रयुक्तानादरवाक्यानि, **सदसि** सभायाम्, **अधोमुखेन** अवनतवदनेन सता, मयेति शेषः, **कथं** केन प्रकारेण, **सोढव्याः** सहनीयाः, कीदृशाम् ? **हृदयदाहलङ्घितानुवृत्तीनां** हृदयदाहेन—अन्तस्तापेन, लङ्घिता—त्यक्ता, अनुवृत्तिः—अनुसरणं यैस्तादृशानाम्, पुनः **अनुलङ्घनीयवचसाम्** अतिरस्करणीयवाक्यानाम् । **चापलोपहतं** चाञ्चल्यदूषितम्, पुनः **अनात्मज्ञम्** आत्मपरिचयरहितम्, पुनः **उत्सृष्टाभिमानं** त्यक्तस्वाभिमानम्, पुनः **असमीहितकारिणं** स्वानभिमतकारिणं, मां, **सर्वथा** सर्वप्रकारेण, **धिक्** निन्दा, **अदृष्टशिष्टव्यवहारेण** अपरिचितशिष्टाचारेण, **सर्वदा** सर्वकाले, **प्राकृतलोकसहवासिना** नीचजनसंसर्गिणा, **अनेन** प्रत्यक्षवर्तिना, तारकेणापि, **तरलः** अयं चपल इति, पुनः **कुतूहली** अयं फलनिरपेक्षलोलुप इति, **क्रीडनशीलः** अयं क्रीडाप्रकृतिक इति, **सम्भावितम्** उत्कटोक्तकोट्या शङ्कितम् [झ] । **अनेकसंकल्पकवलितचित्तवृत्तेः** भूरिभावनाक्रान्तमनोवृत्तेः, **मे** मम, **इत्यादि** अनुपदोक्तप्रभृतिकम्, **अनल्पं** प्रचुरं च, **चिन्तयतः** आलोचयतः सत एव, **अप्रतर्कितैव** अवितर्कितैव, **रजनिः** रात्रिः, **परिणामं** समाप्तिं, **जगाम** प्राप । **ऊर्ध्वकिरणरज्जुस्तम्बलम्बमानशशिबिम्बनाङ्गरात्** ऊर्ध्वात्—उपरितनात्, किरणरूपरज्जुमयस्तम्बात्, लम्बमानं—नमत्, शशिबिम्बरूपं—चन्द्रमण्डलात्मकं, नाङ्गरं यानपात्रावष्टम्भकशिला यस्य तादृशात्, **अपरदिग्भागयानपात्रात्** पश्चिमदिग्भागरूपपोतात्, **सांयात्रिक इव** पोतवणिगिव, **कृताम्बरजलधियात्रः** कृताकाशरूपसमुद्रयात्रः, अन्धकारः, **शनैः शनैः** मन्दं मन्दम्, **अवततार** अधस्तादाजगाम । **आकुलाकुलप्रसारितोर्मिहस्तः** आकुलाकुलं—विशेषेण व्यग्रं यथा स्यात् तथा, प्रसारितः—विस्तारितः, ऊर्मिरूपः—तरङ्गात्मकः, हस्तो येन तादृशः, **जलधिः** समुद्रः, **इन्दुमण्डलं** चन्द्रबिम्बं, **जग्राह** गृहीतवान्, कीदृशमिव ? '**किं** किमर्थं, **वृथा** मुधा, **नदसि** जल्पसि, **मथने** विलोडनावसरे, **ते** तव सागरस्य, रत्नानि, यदि, **मया** मेरुणा, **कक्षीकृतानि** गृहीत्वा वस्त्राञ्चले गोपितानि, **तत्** तर्हि, **एतद्** प्रत्यक्षं दीयमानं पिण्डीकृतोत्तरीयक्षौममित्यर्थः, **उत्क्षिप** ऊर्ध्वीभावेन विस्तारय' **इति** एवंधिया, **शिरसः** मस्तकाधोभागात्, **अवतार्य** अधः कृत्वा, **मन्दरक्षितिभृता** मेरुगिरिणा, **क्षिप्तं** प्रक्षिप्तम्, **पिण्डीकृतं** पिण्डाकारतां नीतं, **उत्तरीयक्षौममिव** उत्तरीयकौशेयवस्त्रमिव । **प्रमुख** एव आदावेव, **प्रवृत्तमेषस्य** प्रवृत्तः—गन्तुमुद्यतः, मेषः—मेषराशिर्यस्मिंस्तादृशस्य, पक्षे प्रवृत्ताः—गन्तुमुद्यताः, मेषाः—अजाः प्रस्थानक्रियाविशिष्टे यस्मिन् सति तादृशस्य, **ततः** तदनन्तरं, **चलितसरोहिणीकवृषस्य** चलितः—प्रस्थितः, सरोहिणीकः—रोहिणीनक्षत्रेण सहितः, वृषः—वृषराशि-

प्रभात एव प्रस्थितस्य तारकासार्थस्य चरणोत्थापितो रेणुविसर इव धूसरारुणो नभः सरणिमरुणदरुणालोकः [ञ]। ततः क्रमेण रञ्जिताम्बरे तुहिनकरविरहविदलितविभावरीहृदयरुधिर इव निपतति धरण्यामरुणरागे, तिमिरकरिरेचितेषु पांशुतल्पेष्विव स्तोकं स्तोकमुच्छ्वसत्सु दिग्भागेषु, अपरभागसंक्रान्तनक्षत्रभारावर्जित इव पूर्वभागमतिदूरमुन्नमयति व्योम्नि, विनिद्रशकुनिकुलबद्धकोलाहलासु जलनिधिप्रबोधमङ्गलानीव गायन्तीषु वेलावनावलीषु, मार्गशैलशृङ्गकृतविश्रामेष्वाहारान्वेषणाय द्वीपान्तराणि प्रस्थितेषु समुद्रोदरनिवासिषु विहङ्गेषु, पङ्कमलिनतनुषु कौपीनमात्रकर्पटावरणेष्वरुणलुण्टिततिमिरपुरलोकेष्विव समाश्रयत्सु वेलानदीपुलिनानि जालिकेषु, मुहुः स्पृष्टशैवलप्रताने मुहुरामृष्टचन्द्रकान्तमणिदृषदि मुहुर्मृदितफेनपटले मुहुराश्लिष्टसलिलवीचिसंचये संचरति वडवामुखानलसंपर्कजाततीव्रसंताप इव मन्दमन्दमौदन्वते मरुति, मुक्तमसृणमणितटीशय्येषु सवि-

---

टिप्पनकम्—रेचितं-रिक्तम्। अभ्रमुः-ऐरावणजाया। वामनः-पश्चिमा[शा]करी, [दक्षिणाशाकरीति बहवः, तस्यैवात्रौचित्यात्] [ट]।

यस्मिंस्तादृशस्य, पक्षे चलिताः, सरोहिणीकाः—रोहिणीभिः—धेनुभिः सहिताः, वृषाः—बलिवर्दाः प्रस्थानक्रियाविशिष्टे यस्मिन् सति तादृशस्य, पुनः **क्वापि क्वापि** कस्मिंश्चित् कस्मिंश्चित् प्रदेशे, **विभाव्यमानतुलाधनुषः** विभाव्यमाना—लक्ष्यमाणा, तुला—तुलाराशिः, धनुः—धनूराशिश्च यस्मिंस्तादृशस्य, पक्षे विभाव्यमानाः, तुलाः—मानानि तोलनदण्डा वा, धनूंषि—कार्मुकाणि, प्रस्थानक्रियाविशिष्टे यस्मिन् सति तादृशस्य, पुनः **प्रभात एव** प्रातरेव, **प्रस्थितस्य** कृतप्रयाणस्य, **तारकासार्थस्य** तारागणस्य, **चरणोत्थापितः** चरणोत्क्षिप्तः, **रेणुविसर इव** धूलिराशिरिव, **धूसरारुणः** किञ्चित्पाण्डुरक्तवर्णः, **अरुणालोकः** सूर्यप्रकाशः, **नभःसरणिम्** आकाशमार्गम्, **अरुणत्** रुद्धवान्, व्याप्तवानित्यर्थः [ञ]। **ततः** तदनन्तरं, **किञ्चिदुपशान्तचिन्तासंज्वरः** किञ्चिन्निवृत्तचिन्तासन्तापः सन्, **पुरस्तात्** अग्रे, **चक्षुः** नेत्रम्, **अक्षिपं** व्यापारितवानहम्, कस्मिन् कीदृशे सति ? **क्रमेण** शनैः, **रञ्जिताम्बरे** रक्तीकृतगगनमण्डले, **अरुणरागे** सूर्यबिम्बरागे, **तुहिनकरविरहविदलितविभावरीहृदयरुधिर इव** तुहिनकरस्य—शीतकिरणस्य, चन्द्ररूपनायकस्येत्यर्थः, विरहेण—विश्लेषेण, विदलितं—विदीर्णं, यत्, विभावर्याः—रात्रिरूपनायिकायाः, हृदयं, तस्य **रुधिर इव** शोणित इव, **धरण्यां** भूमौ, **निपतति** अवतरति सति। पुनः **पांशुतल्पेष्विव** धूलिमयशय्यास्विव, **तिमिरकरिरेचितेषु** अन्धकाररूपहस्तिनोज्झितेषु, दिग्भागेषु, **स्तोकं स्तोकं** किञ्चित् किञ्चित्, **उच्छ्वसत्सु** सुखमारुतमुद्वमत्सु। पुनः **अपरभागसंक्रान्तनक्षत्रभारावर्जित इव** अपरभागे-पश्चिमभागे, संक्रान्तानि-संलग्नानि, यानि नक्षत्राणि-तारकाः, तद्भारेण-तद्गुरुत्वेन, आवर्जित इव-अवनत इवेत्युत्प्रेक्षा, **व्योम्नि** आकाशे, पूर्वभागम्, **अतिदूरम्** अत्यन्तदूरम्, **उन्नमयति** उत्क्षिपति सति। पुनः **विनिद्रशकुनिकुलबद्धकोलाहलासु** विनिद्राणां-भग्ननिद्राणां, शकुनीनां-पक्षिणां, कुलेन-पुञ्जेन, बद्धः-कृतः, कोलाहलः-कलकलो यासु तादृशीषु **वेलावनावलीषु** तटवर्तिवनपङ्क्तिषु, **जलनिधिप्रबोधमङ्गलानि** समुद्रजागरणकालिकमङ्गलानि, गायन्तीषु इवेत्युत्प्रेक्षा। पुनः **मार्गशैलशृङ्गकृतविश्रामेषु** मार्गस्थपर्वतशिखरविश्रान्तेषु, **समुद्रोदरनिवासिषु** समुद्रमध्यवास्तव्येषु, **विहङ्गेषु** पक्षिषु, **आहारान्वेषणाय** स्वभक्ष्यवस्तुगवेषणाय, **द्वीपान्तराणि** अन्यद्वीपान्, **प्रस्थितेषु** गन्तुं प्रवृत्तेषु सत्सु। पुनः **पङ्कमलिनतनुषु** कर्दमकलुषितकलेवरेषु, **कौपीनमात्रकर्पटावरणेषु** कौपीनमात्रं यत् कर्पटं-पटखण्डः, तदेव आवरणं येषां तादृशेषु, **जालिकेषु** धीवरजातीयेषु, **अरुणलुण्टिततिमिरपुरलोकेष्विव** सूर्यापहृतान्धकारपुरवासिजनेष्विव, **वेलानदीपुलिनानि** तटवर्तिनदीसैकतस्थलानि, **समाश्रयत्सु** निषेवमाणेषु। पुनः **मुहुः** असकृत्, **स्पृष्टशैवलप्रताने** संस्पृष्टजलतृणराशौ, पुनः **मुहुः** अनेकवारम्, **आमृष्टचन्द्रकान्तमणिदृषदि** आमृष्टा-संस्पृष्टा, चन्द्रकान्तमणिरूपा दृषद्-प्रस्तरो येन तादृशि, पुनः **मुहुः** वारंवारम्, **मृदितफेनपटले** मृदितं-त्रोटितं, फेनपटलं-समुद्रकफराशिर्येन तादृशे, पुनः **मुहुः** असकृत्, **आश्लिष्टसलिलवीचिसंचये** आश्लिष्टः-आलिङ्गितः, सलिलवीचीनां-जलतरङ्गाणां, सञ्चयः-पुञ्जो येन तादृशे, **औदन्वते** समुद्रसम्बन्धिनि, **मरुति** पवने, **वडवामुखानलसम्पर्कजाततीव्रसन्ताप इव** वडवायाः—समुद्रोदरवर्तिन्या अश्वायाः, यो मुखानलः—मुखाग्निः, वाडवाग्निरिति यावत्, तत्सम्पर्केण—तत्संयोगेन, जातः—उत्पन्नः,

भ्रममभ्रमुकुलप्रभवाभिः करेणुभिरुपनीतसरसलवङ्गपल्लवकवलेषु सुवेलमेखलासु खेलत्सु वामनदिङ्नागवंशजेषु गजेषु [ट], सर्वतः प्रसृततापसाग्निहोत्रधूमान्धकारे कलशयोनिप्रसादनायायातविन्ध्यशिलालिङ्गित इवोपलक्ष्यमाणे रोहणगिरौ, प्रविष्टारुणालोकस्तोकतरलितद्वारपालवेतालेष्वसुरदेवतार्चनारम्भपिशुनमपूर्वसौरभं दिव्यकुसुमधूपामोदमुद्गिरत्सु विवरेषु, पातालचन्दनद्रुमोपवनक्रीडारागिणीभिः पन्नगाङ्गनाभिरापतन्तीभिरलभ्यान्तरेषु रसातलमलयान्तरालमार्गेषु, प्रभातमारुतापूरितरणन्मुखरपुलिनशङ्खमाले दलितशुक्तिमुक्तास्तबकिततीरभुवि जडितजलमानुषाध्यासितसबालातपतटे द्रवीभूतशार्वरतिमिरविभ्रममूर्मिविस्तारमुपसंहरति मत्सुखप्रचारार्थमिव चन्द्रास्तसमयविद्राणतेजसि तरङ्गिणीनाथे, दिवसकृतयुगावतारे तिमिरसागरादुन्मग्नां मेदिनीमिव द्रष्टुमुदयाद्रिशिखरमधिरूढे सहस्रदीधितौ; शनैः शनैश्च संधुक्षितसूर्यकान्ताश्महुतभुजि, मन्दितेन्दुमणि-

---

तीव्रः–अत्यन्तः, सन्तापो यस्य तथाभूत इवेत्युत्प्रेक्षा, **मन्दं मन्दं** शनैः शनैः, **सञ्चरति** प्रवहति सति । पुनः **मुक्तमसृणमणितटीशय्येषु** मुक्ता–त्यक्ता, मसृणा–चिक्कणा, मणिनिर्मिता, तटीरूपा–स्थलीरूपा, शय्या यैस्तादृशेषु, पुनः **अभ्रमुकुलप्रसूताभिः** अभ्रमुसंज्ञकहस्तिनीवंशजाभिः, **करेणुभिः** हस्तिनीभिः, **सविभ्रमं** सविलासम्, **उपनीतसरसलवङ्गपल्लवकवलेषु** उपनीतः–उपस्थापितः, सरसलवङ्गपल्लवरूपः–स्निग्धलवङ्गलतानूतनदलरूपः, कवलः–ग्रासो येभ्यस्तादृशेषु, **वामनदिङ्नागवंशजेषु** वामनाख्यदिग्गजकुलप्रसूतेषु, **गजेषु** हस्तिषु, **सुवेलमेखलासु** सुवेलपर्वतनितम्बेषु, **खेलत्सु** क्रीडत्सु सत्सु [ट] । पुनः **सर्वतः** परितः, **प्रसृततापसाग्निहोत्रधूमान्धकारे** प्रसृतः–विस्तृतः, तापसानां–तपस्विनाम्, अग्निहोत्रसम्बन्धिधूमरूपोऽन्धकारो यस्मिंस्तादृशे, **रोहणगिरौ** रोहणाचले, **कलशयोनिप्रसादनाय** अगस्त्यमुनेरनुरञ्जनाय, **आयातविन्ध्यशिलालिङ्गित इव** आयातस्य–आगतस्य, विन्ध्यस्य–विन्ध्याचलस्य, शिलाभिः–प्रस्तरैः, आलिङ्गित इव संश्लिष्ट इव, **उपलक्ष्यमाणे** प्रतीयमाने सति । पुनः **प्रविष्टारुणालोकस्तोकतरलितद्वारपालवेतालेषु** प्रविष्टाः कृतप्रवेशाः, अरुणालोकेन–सूर्यतेजसा, स्तोकम्–ईषत्, तरलिताः–चञ्चलिताः, द्वारपालाः–प्रतीहाररूपाः, वेतालाः–पिशाचविशेषा येषु तादृशेषु, **विवरेषु** गुहासु, **असुरदेवतार्चनारम्भपिशुनम्** असुराणां–देवजातिद्विषां राक्षसानां, देवतार्चनस्य–स्वेष्टदेवत्वेन कल्पितदेवपूजायाः, आरम्भस्य, पिशुनं–सूचकम्, पुनः **अपूर्वसौरभम्** असाधारणसौगन्ध्यम्, **दिव्यकुसुमधूपामोदं** दिव्यानां–सुन्दराणां, कुसुमानां–पुष्पाणां, धूपानाम् अग्नितप्तसुगन्धिद्रव्याणां च, आमोदं–परिमलम्, **उद्गिरत्सु** उद्वमत्सु सत्सु । पुनः **रसातलमलयान्तरालमार्गेषु** पातालमलयगिरिमध्यवर्तिमार्गेषु, **पातालचन्दनद्रुमोपवनक्रीडारागिणीभिः** पाताले यत् चन्दनद्रुमाणां–चन्दनवृक्षाणाम् उपवनं, तस्मिन्, क्रीडानुरागवतीभिः, **आपतन्तीभिः** आगच्छन्तीभिः, **पन्नगाङ्गनाभिः** सर्पस्त्रीभिः, **अलभ्यान्तरेषु** अप्राप्यावकाशेषु सत्सु । पुनः **प्रभातमारुतापूरितरणन्मुखरपुलिनशङ्खमाले** प्रभातमारुतेन–प्रातःकालिकपवनेन, आपूरिता–परिपूर्णविवरा, अत एव रणन्ती–ध्वनन्ती पुलिनशङ्खमाला–सैकतस्थलस्थितशङ्खसमूहो यस्मिंस्तादृशे, पुनः **दलितशुक्तिमुक्तास्तबकिततीरभुवि** दलितानां–स्फुटितानां, शुक्तीनां–तादृशशुक्तिसम्बन्धिनीभिः, मुक्ताभिः–मुक्तामणिभिः, स्तबकिताः–संजातस्तबकाः, तीरभूः–तीरभूमिर्यस्य तादृशे, पुनः **जडितजलमानुषाध्यासितसबालातपतटे** जडितैः–जाड्यमापादितैः, जलमानुषैः–जलीयमनुष्यैः, अध्यासितम्–अधिष्ठितं, सबालातपं–बालातपेन–अपरिपक्वातपेन रक्तातपेनेति यावत् सहितं, तटं–तीरं यस्य तादृशे, पुनः **चन्द्रास्तसमयविद्राणतेजसि** चन्द्रास्तसमये चन्द्रतिरोभावकाले, विद्राणं–विलीनं, तेजः–प्रभावः समृद्धिरिति यावत्, यस्य तादृशे, **तरङ्गिणीनाथे** समुद्रे, **मत्सुखप्रचारार्थमिव** सुखेन–अक्लेशेन, मत्सञ्चारार्थमिवेत्युत्प्रेक्षा, **द्रवीभूतशार्वरतिमिरविभ्रमं** द्रवीभूतस्य–स्यन्दितस्य, शार्वरतिमिरस्य–रात्रिसम्बन्ध्यन्धकारस्य, विभ्रमं-विलासभूतम्, **ऊर्मिविस्तारं** तरङ्गसन्तानम्, **उपसंहरति** संक्षिपति सति, पुनः **दिवसकृतयुगावतारे** दिवसे–दिने, कृतः, युगावतारः–युगारम्भो येन तादृशे, यद्वा दिवसरूपस्य कृतयुगस्य–सत्यनामकप्रथमयुगस्यावतारे समागते सति, **सहस्रदीधितौ** सहस्रकिरणे, सूर्ये इति यावत्, **तिमिरसागरात्** अन्धकारसमुद्रात्, **उन्मग्नाम्** ऊर्ध्वमागतां, **मेदिनीं** पृथ्वीं, **द्रष्टुमिव** अवलोकितुमिव, **उदयाद्रिशिखरम्** उदयाचलशिखरम्, **अधिरूढे** आरूढे सति । **च** पुनः, **सन्धुक्षितसूर्यकान्ताश्महुतभुजि** सन्धुक्षितः–उद्दीपितः, सूर्यकान्ताश्महुतभुक्–सूर्यकान्तमणि-

निर्झरस्यन्दे, निष्प्रभीकृतदवदहनतेजसि, विस्तारिततरुणतरुलतापल्लवलावण्ये, मुकुलितोलूकचक्षुरालोकसंपदि, विकासितदरीगृहद्वारोदरे, प्रकीर्ण इव गुञ्जाफलेषु, अङ्कुरित इव राजशुकचञ्चुकोटिषु, पल्लवित इव कृकवाकुचूडाचक्रेषु, मञ्जरित इव सिंहकेसरसटासु, फलित इव कपिकुटुम्बिनीकपोलकूटेषु, प्रसारित इव हरितालस्थलीषु, क्षुण्ण इव शबरराजसुन्दरीसान्द्रनखदन्तक्षतेषु, राशीकृत इव पद्मरागसानुप्रभोल्लासेषु, निपतति सति पयोधिमध्यशिखरिणां शिखासु बन्धूककुसुमस्तबकभासि बालातपे; जाते स्फुटालोके जगति, किञ्चिदुपशान्तचिन्तासंज्वरः पुरस्ताच्चक्षुरक्षिपम् [ठ]।

अथ नातिदूरं दरीभृतस्तस्य परिसरादुज्जिहानं धातुधूलीपटलमिव विलुलितं वेलानिलेन, समन्ततः समुद्भासितनभोमार्गमर्घरत्नाञ्जलिमिव क्षिप्तमुदयसंध्यायाः सागरेण, क्वचिद् विद्रुमरसद्रवारुणरागम्, क्वचित् तरुणहारीतपक्षहरिताभोगम्, क्वचित् कर्णिकारकुसुमपुञ्जपिञ्जरसन्निवेशम्, क्वचिद् दह्यमानकृष्णागुरुधूमधूस-

---

सम्बन्धी अग्निर्येन तादृशि; पुनः **मन्दितेन्दुमणिनिर्झरस्यन्दे** मन्दितः–मान्द्यमापादितः, इन्दुमणेः–चन्द्रकान्तमणिसम्बन्धिनः, निर्झरस्य–सुधाप्रवाहस्य, स्यन्दः–प्रस्रवणं येन तादृशे; पुनः **निष्प्रभीकृतदवदहनतेजसि** निष्प्रभीकृतं मन्दीकृतं, दवदहनस्य–दावाग्नेः, तेजः–दीप्तिर्येन तादृशि; पुनः **विस्तारिततरुणतरुलतापल्लवलावण्ये** विस्तारितं–वर्धितं, तरुणानां–परिणतानां, तरूणां–वृक्षाणां, लतानां च, पल्लवानां–नूतनपत्राणां, लावण्यं–सौन्दर्यं येन तादृशे; **मुकुलितोलूकचक्षुरालोकसम्पदि** मुकुलिता–उपसंहृता, उलूकानां–दिवान्धपक्षिणां, चक्षुषोः–नयनयोः, आलोकसम्पत्–तेजस्सम्पत्तिर्येन तादृशे; पुनः **विकासितदरीगृहद्वारोदरे** विकासितं–प्रकाशितं, दरीगृहद्वारोदरं–गुहागृहद्वारमध्यं येन तादृशे; पुनः **गुञ्जाफलेषु** कृष्णलाख्यलताफलेषु, **प्रकीर्ण इव** प्रसृत इव; पुनः **राजशुकचञ्चुकोटिषु** प्रशस्तशुकतुण्डाग्रभागेषु, **अङ्कुरित इव** सञ्जाताङ्कुर इव; पुनः **कृकवाकुचूडाचक्रेषु** कुक्कुटशिखामण्डलेषु, **पल्लवित इव** संजातपल्लव इव; पुनः **सिंहकेसरसटासु** सिंहसम्बन्धिस्कन्धकेशजटासु, **मञ्जरित इव** संजातमञ्जरीक इव; पुनः **कपिकुटुम्बिनीकपोलकूटेषु** मर्कटस्त्रीगण्डस्थलोर्ध्वभागेषु, **फलित इव** सञ्जातफल इव; पुनः **हरितालस्थलीषु** हरितालाख्यवृक्षमयप्रदेशेषु, **प्रसारित इव** विस्तारित इव; पुनः **शबरराजसुन्दरीसान्द्रनखदन्तक्षतेषु** शबरराजसुन्दरीणां–शबरजातीयनृपतिसुन्दरस्त्रीणां, सान्द्रनखदन्तखतेषु–निबिडनखदन्ताघातजनितव्रणेषु, **क्षुण्ण इव** पिष्ट इव; पुनः **पद्मरागसानुप्रभोल्लासेषु** पद्मरागाणां–रक्तमणीनां, यः सानुः–समस्थली, तत्सम्बन्धिद्युतिततिषु, **राशीकृत इव** पुञ्जित इव; पुनः **बन्धूककुसुमस्तबकभासि** बन्धूकसंज्ञकं यत् कुसुमं–रक्तपुष्पं, तस्य स्तबकस्येव–गुच्छस्येव, भाः–छविर्यस्य तादृशे, **बालातपे** रक्तातपे, **पयोधिमध्यशिखरिणां** समुद्रमध्यवर्तिपर्वतानां, **शिखासु** शिखरेषु, **निपतति सति** अवतरति सति; पुनः **जगति** भूमण्डले, **स्फुटालोके** स्फुटप्रकाशे, **जाते** सम्पन्ने सति [ठ]।

अथ अनन्तरम्, **अत्युद्भुतम्** अत्याश्चर्यविहम्, **प्रभाराशिं** द्युतिपुञ्जम्, **अपश्यं** दृष्टवानहम्, कीदृशम्? **तस्य** प्रकृतस्य, **दरीभृतः** पर्वतस्य, **परिसरात्** प्रान्तप्रदेशात्, **नातिदूरं** किञ्चिन्निकटं, **वेलानिलेन** तटमारुतेन, **विलुलितं** विक्षिप्तं, **उज्जिहानम्** उद्गच्छन्तम्, **धातुधूलीपटलमिव** "सुवर्णरूप्यताम्राणि हरितालं मनःशिला। गैरिकाञ्जनकासीससीसलोहं सहिङ्गुलं। गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः।" इत्युक्ता ये धातवः, तेषां या धूल्यः–रेणवः, तासां पटलमिव समूहमिव। पुनः **समन्ततः** सर्वतः, **समुद्भासितनभोमार्गम्** उद्दीपितगगनमार्गम्, पुनः **उदयसन्ध्यायाः** सूर्योदयकालिकसन्ध्यायाः, **सागरेण** समुद्रेण, **क्षिप्तम्** अर्पितम्, **अर्घरत्नाञ्जलिमिव** अर्घरूपरत्नपूर्णाञ्जलिमिव, पुनः **क्वचित्** कस्मिंश्चिद् भागे, **विद्रुमरसद्रवारुणरागम्** विद्रुमरसस्य–प्रवालरसस्य, यो द्रवः–पङ्कः, तस्येव अरुणः–रक्तः, रागः–वर्णो यस्य तादृशम्, पुनः **क्वचित्** कुत्रचिदंशे, **तरुणहारीतपक्षहरिताभोगं** तरुणः–युवा, यः हारीतः–पक्षिविशेषः, तत्पक्षवद् हरिताभोगः–हरितकान्तिविस्तारो यस्मिंस्तादृशम्, पुनः **क्वचित्** कुत्रचित् प्रदेशे, **कर्णिकारकुसुमपुञ्जपिञ्जरसन्निवेशम्** कर्णिकारसंज्ञकं यत् पुष्पं तत्पुञ्जवत्, पिञ्जरः–पीतः, सन्निवेशः–संस्थानं यस्य तादृशम्, **क्वचित्** कुत्रापि सन्निवेशे, **दह्यमानकृष्णागुरुधूमधूसरोद्देशम्** दह्यमानस्य–तप्यमानस्य, कृष्णागुरोः–कालागुरुद्रव्यस्य, धूमेन धूसरः–ईषत्पाण्डुवर्णः, उद्देशः–

रोद्देशम्, अतिभास्वरतया दुरालोकम्, आकुलाकुलेक्षणैरुत्थाय सर्वैः समकालमौर्वानलार्चिःशङ्कया निभालितं भालतटविनिहिताग्रहस्तच्छत्रकैः कैवर्तैः संवर्तकालसंध्यासदृशमत्यद्भुतं प्रभाराशिमपश्यम् [ड] ।

दृष्ट्वा चोपजातकौतुकः किमेतदिति वितर्कयन्नेव तस्मादर्कमण्डलादिव मयूखनिवहमेकहेलया विनिर्गतम्, आगच्छदभिमुखमाकाशमार्गेण, संतानकनमेरुमन्दारकुसुमप्रायशेखरं, हरिचन्दनरसप्रायाङ्गरागं, कल्पद्रुमांशुकप्रायनिवसनम्, अनेकदिव्याभरणभूषितम्, आभरणमणिकिरणप्रभासंतर्पितेन प्रसर्पता सर्वतस्तप्ततपनीयद्रवाकारेण देहद्युतिप्राग्भारेण पिङ्गलीकृताखिलदिगन्तरालं सदावानलमिवान्तरिक्षमादधानम्, उज्ज्वालदावानलानुलग्नदग्धस्थलाभेन जलनिधिवेलावनान्यपहाय युगपत्प्रधावितेन पृष्ठतो वहता विलेपनामोदाकृष्टेन मधुलिहां पटलेन पश्चात्प्रयायिभिरुन्नीयमानगतिमार्गम् [ढ], आदराकृष्टवल्गैर्वारंवारमुच्छलज्जलच्छटास्पर्शपरिहाराय तरुणवारिदानामन्तरालेन नीयमानैरनुद्धूतधूलीपटलमश्रूयमाणमुखरखुरपुटारवमतिवल्गु वल्गद्भिः

ऊर्ध्वदेशो यस्य तादृशम्। पुनः **अतिभास्वरतया** अतिदीप्ततया, **दूरालोकं** दुर्दर्शम्। पुनः **और्वानलार्चिःशङ्कया** वाडवाग्निज्वालाशङ्कया, **आकुलाकुलेक्षणैः** अत्यन्तचकितनयनैः, पुनः **भालतटविनिहिताग्रहस्तच्छत्रकैः** भालतटे-ललाटतटे, विनिहितं-स्थापितम्, अग्रहस्तच्छत्रं-हस्ताग्रभागरूपं छत्रं यैस्तादृशैः, सर्वैः, **कैवर्तैः** धीवरैः, उत्थाय, **समकालमेव** युगपदेव, **निभालितं** विलोकितम्, पुनः **संवर्तकालसंध्यासदृशं** प्रलयकालिकसन्ध्यातुल्यम् [ड]।

च पुनः, **दृष्ट्वा** निरुक्तप्रभाराशिं दृष्टिगोचरीकृत्य, **उपजातकौतुकः** उत्पन्नौत्सुक्यः सन्, **एतत्** तेजः, **किम्** कीदृशम्, इति **वितर्कयन्नेव** विचिन्तयन्नेव, **खेचरनरेन्द्रवृन्दं** विद्याधरेन्द्रगणम्, **अद्राक्षं** दृष्टवानहम्, कीदृशम्? **अर्कमण्डलात्** सूर्यमण्डलात्, **मयूखनिवहमिव** किरणकलापमिव, **तस्मात्** प्रभामण्डलात्, **एकहेलया** युगपत्, **विनिर्गतं** विनिःसृतम्। पुनः आकाशमार्गेण, **अभिमुखं** सम्मुखम्, **आगच्छत्** अवतरत्। पुनः **सन्तानक-नमेरु-मन्दारकुसुमप्रायशेखरं** संतानक-नमेरु-मन्दाराः—देववृक्षविशेषाः, तेषां यानि कुसुमानि—पुष्पाणि, तत्प्रायं—तत्प्रचुरं, शेखरं—शिरोमाल्यं यस्य तादृशम्। पुनः **हरिचन्दनरसप्रायाङ्गरागम्** हरिचन्दनरसप्रायः—चन्दनविशेषरसप्रचुरः, अङ्गरागः—अङ्गलेपो यस्य तादृशम्। पुनः **कल्पद्रुमांशुकप्रायनिवसनम्** कल्पद्रुमांशुकप्रायं—कल्पद्रुमसम्बन्धिसूक्ष्मश्लक्ष्णवस्त्रप्रचुरं, निवसनं—वस्त्रं यस्य तादृशम्। पुनः **अनेकदिव्याभरणभूषितं** विविधोत्कृष्टालङ्कारालङ्कृतम्। पुनः **देहद्युतिप्राग्भारेण** शरीरकान्तिकलापेन, **पिङ्गलीकृताखिलदिगन्तरालं** पिङ्गलीकृतं—पिशङ्गीकृतम्, अखिलानां—समस्तानां, दिशाम्, अन्तरालं—मध्यं येन तादृशम्, कीदृशेन? **आभरणमणिकिरणप्रभासन्तर्पितेन** आभरणमणीनाम्—अलङ्करणमणीनां, ये किरणाः—रश्मयः, तत्प्रभाभिः, सन्तर्पितेन—संवर्धितेन, पुनः **सर्वतः** परितः, **प्रसर्पता** प्रसरता, **तप्ततपनीयद्रवाकारेण** तप्तं यत् तपनीयं—सुवर्णं, तस्य यो द्रवः—पङ्कः, तदाकारेण, अत एव **अन्तरिक्षं**—गगनमण्डलं, **सदावानलमिव** दावाग्निसहितमिव, **आदधानं** कुर्वाणम्। पुनः **पश्चात्प्रयायिभिः** पश्चात्प्रगामिजनैः, **उन्नीयमानगतिमार्गम्** उन्नीयमानः—अनुमीयमानः, गतिमार्गः—गमनमार्गो यस्य तादृशम्, केन? **मधुलिहां** भ्रमराणां, पटलेन—समूहेन, कीदृशेन? **उज्ज्वालदावानलानुलग्नदग्धस्थलाभेन** उत्—ऊर्ध्वं, ज्वाला यस्य तादृशेन, दावानलेन—दावाग्निना, अनुलग्नं—संबद्धं, दग्धं च यत् स्थलं—स्थानं, तस्येव आभा—कान्तिर्यस्य तादृशेन, पुनः **जलनिधिवेलावनानि** समुद्रतटवर्तिवनानि, **अपहाय** त्यक्त्वा, **युगपत्** एककालं, **प्रधावितेन** कृतसत्वरगतिकेन, पुनः **पृष्ठतः** पृष्ठभागे, **वहता** गच्छता, पुनः **विलेपनामोदाकृष्टेन** विलेपनस्य—अङ्गोपलेपनद्रव्यस्य, आमोदेन—अतिसौरभेण, आकृष्टेन—वशीकृतेन [ढ]। पुनः **प्रधानवाजिभिः** मुख्यभूताश्वैः, **उह्यमाननायकम्** उह्यमानः—देशान्तरं नीयमानः, नायको यस्य तादृशम्, कीदृशैः? **आदराकृष्टवल्गैः** आदरेण आकृष्टा वल्गा—मुखरज्जुर्येषां तादृशैः, पुनः **वारंवारम्** अनेकवारम्, **उच्छलज्जलच्छटास्पर्शपरिहाराय** उच्छलन्त्याः—उद्वेलन्त्याः, जलच्छटायाः—जलधारायाः, स्पर्शपरिहाराय- स्पर्शवर्जनाय, **तरुणवारिदानां** परिणतमेघानाम्, **अन्तरालेन** मध्येन, **नीयमानैः** गम्यमानैः, पुनः **अनुद्धूतधूलीपटलम्** अनुद्धूतम्—अनुत्क्षिप्तं, धूलीपटलं—धूलीसमूहो यस्मिंस्तादृशं यथा स्यात् तथा, पुनः **अश्रूयमाणमुखरखुरपुटारवम्** अश्रूयमाणः, मुखरयोः—शब्दायमानयोः, खुरपुटयोः—सम्पुटितखुरयोः, आरवः—ध्वनिर्यस्मिंस्तादृशं

स्वभावचञ्चलैः प्रधानवाजिभिरुह्यमाननायकम्, अदृश्यमानहरितच्छायामण्डलैश्चलद्भिरुद्दण्डैरातपत्रखण्डैरभिनवतापसलिलनिर्झरे नभःसरसि मूलभागनिर्लूननलिनीपलाशप्रकराणि पङ्कजवनानीव संचारयमाणम्, अचिरांशुतेजःस्तबकचन्द्रकितैरिन्द्रनीलकान्तिभिः तरुणजलदैरध्यासितोर्ध्वकदलिकाशिखरेषु समुच्छ्रितोद्दण्डमायूरातपत्रेष्विव द्विरदसारिसदनेषु निद्रायमाणकुमारम्, अच्छिन्नसंतानपवनप्रसारिताभिरतिभास्वरतया दिवापि प्रेङ्खदुल्कादण्डमिव व्योम दर्शयन्तीभिः कल्पतरुरत्नांशुकवैजयन्तीभिः समन्ततो ज्वलद्रथविमानकेतनम्, उदारनेपथ्यधारिणा गृहीतनानाप्रहरणेन विद्यानुभावसिद्धत्वाद् गतेरकृतपदविक्षेपमग्रतः प्रसर्पता समपादस्थितेन पदातिसंदोहेन कृतकलकलं [ण], पृष्ठतश्च वरकरेणुकारूढाभिरुपरिधृतकुन्दधवलातपत्रिकाभिः पुरःप्रधावमानकनकदण्डोड्डामरमायूरच्छत्रमण्डलाभिरुभयतः प्रचलितभुजलतारत्नवलयेन वाराङ्गनाजनेन सलीलमुद्धूयमानचामरकलापाभिराप्रपदीनचीनकञ्चुकावच्छन्नवपुषा निजनिजवाहनाधिरूढेन वृद्धान्तर्वंशिक-

---

यथा स्यात् तथा, **अतिवल्गु** अतिमनोहरं, **वल्गद्भिः** गच्छद्भिः। पुनः **स्वभावचञ्चलैः** प्रकृतिचपलैः। पुनः **अदृश्यमानहरितच्छायामण्डलैः** अदृश्यमानम्–अप्रतीयमानम्, हरितच्छायामण्डलं-हरितकान्तिकलापो येषां तादृशैः, **उद्दण्डैः** ऊर्ध्वदण्डैः, **आतपत्रखण्डैः** छत्रमण्डलैः, **अभिनवातपसलिलनिर्झरे** अभिनवः-नवीनः, आतपात्मकानां सलिलानां–जलानां, निर्झरः-प्रवाहो यस्मिंस्तादृशे, **नभःसरसि** आकाशरूपसरसि, **मूलभागनिर्लूननलिनीपलाशप्रकराणि** मूलभागे–मूलप्रदेशे, निर्लूनः–छिन्नः, नलिनीपलाशप्रकरः–पद्मिनीपत्रसमूहो येषु तादृशानि, **पङ्कजवनानि** कमलवनानि, **सञ्चारयमाणमिव** संवाहयमानमिव, पुनः **द्विरदसारिसदनेषु** द्विरदानां-गजानां, ये सारयः–पर्याणानि, तद्रूपगृहेषु, **निद्रायमाणकुमारं** निद्रायमाणः-शयानः, कुमारः–युवराजो यस्मिंस्तादृशम्, कीदृशेषु? **तरुणजलदैः** परिणतमेघैः, **अध्यासितोर्ध्वकदलिकाशिखरेषु** अध्यासितम्–अधिष्ठितम्, ऊर्ध्वकदलिकानाम्-उपरितनवैजयन्तीनां, शिखरं–शिरोभागो येषां तादृशेषु, कीदृशैः? **अचिरांशुतेजःस्तबकचन्द्रकितैः** अचिरांशुतेजःस्तबकेन–विद्युत्तेजोगुच्छेन, चन्द्रकितैः–सञ्जातमयूरपक्षस्थचन्द्राकारचिह्नैः, पुनः **इन्द्रनीलकान्तिभिः** मरकतमणितुल्यकान्तिभिः, अत एव, **समुच्छ्रितोद्दण्डमायूरातपत्रेष्विव** समुच्छ्रितं–समुन्नमितम्, उद्दण्डम्-ऊर्ध्वदण्डं, मायूरं–मयूरसम्बन्धि, आतपत्रं छत्रं येषु तादृशेष्विवेत्युत्प्रेक्षा। पुनः **कल्पतरुरत्नांशुकवैजयन्तीभिः** कल्पतरुसम्बन्धिरत्नमयवस्त्ररूपपताकाभिः, **समन्ततः** सर्वतः, **ज्वलद्रथविमानकेतनं** ज्वलद्–दीप्यमानं, रथस्य विमानस्य च, केतनं–पताकादण्डो यस्य तादृशम्, कीदृशीभिः? **अच्छिन्नसन्तानपवनप्रसारिताभिः** अच्छिन्नसन्तानेन–अविरतसन्ततिकेन, पवनेन–वायुना, प्रसारिताभिः–विस्तारिताभिः, पुनः **अतिभास्वरतया** अतिदीप्तिमत्तया, **दिवापि** दिनेऽपि, **प्रेङ्खदुल्कादण्डमिव** प्रेङ्खन्–प्रचलन्, उल्कादण्डः–निर्गच्छज्ज्वालारूपदण्डो यस्मिंस्तादृशमिवेत्युत्प्रेक्षा, **व्योम** गगनमण्डलं, **दर्शयन्तीभिः** प्रत्याययन्तीभिः, पुनः **पदातिसन्दोहेन** पादगामिगणेन, **कृतकलकलं** कृतकोलाहलम्, कीदृशेन? **उदारनेपथ्यधारिणा** उज्ज्वलकृत्रिमवेषधारिणा, पुनः **गृहीतनानाप्रहरणेन** धृतविविधास्त्रेण, पुनः **गतेः** गमनस्य, **विद्यानुभावसिद्धत्वात्** विद्याप्रभावसिद्धत्वात्, **अकृतपदविक्षेपम्** अकृतपादप्रक्षेपणं यथा स्यात् तथा, **अग्रतः** अग्रे, **प्रसर्पता** प्रचलता, पुनः **समपादस्थितेन** अन्यूनानधिकदेशवर्तिपादावलम्बितेन [ण]। **च** पुनः **पृष्ठतः** पृष्ठभागे, **प्रधानावरोधसुन्दरीभिः** प्रधानान्तःपुरसुन्दरस्त्रीभिः, **अनुगम्यमानम्** अनुस्रियमाणम्, कीदृशीभिः? **वरकरेणुकारूढाभिः** उत्तमहस्तिनीमारूढवतीभिः; पुनः **उपरिधृतकुन्दधवलातपत्रिकाभिः** उपरि धृता–गृहीता, कुन्दपुष्पवद् धवला–शुभ्रा, आतपत्रिका–लघुच्छत्रं याभिस्तादृशीभिः; पुनः **पुरःप्रधावमानकनकदण्डोड्डामरमायूरच्छत्रमण्डलाभिः** पुरः–अग्रे प्रधावमानं, कनकदण्डेन–सुवर्णमयदण्डेन, उड्डामरम्–उद्भटं, मायूरच्छत्रमण्डलं–मयूरपक्षमयच्छत्रवृन्दं यासां तादृशीभिः; पुनः **उभयतः** पार्श्वद्वये, **प्रचलितभुजलतारत्नवलयेन** प्रचलितम्–उद्वेलितं, भुजलतयोः–बाहुलतयोः, रत्नमयं वलयं–कङ्कणं यस्य तादृशेन, **वाराङ्गनाजनेन** वेश्याजनेन, **सलीलं** सविलासं, यथा स्यात् तथा, **उद्धूयमानचामरकलापाभिः** उद्धूयमानः–उत्क्षिप्यमाणः, चामरकलापः–चामरसमूहो यासां तादृशीभिः; पुनः **वृद्धान्तर्वंशिकसमूहेन** वृद्धान्तःपुराधिकारिगणेन, **सर्वतः** परितः,

समूहेन सर्वतः परिवृताभिरालोहितापाङ्गतरङ्गैर्मन्दतारकापरिस्पन्दैर्लोचनारविन्दैरनुभूतदीर्घरजनिजागराभिरिव विभाव्यमानाभिरलम्बितालकश्रेणिभिरलुप्तललाटतिलकैरग्लपितौष्ठमुद्रालक्तकैराननेन्दुभिरसंपादितमनोभवाज्ञाभिरिव ज्ञायमानाभिः प्रधानावरोधसुन्दरीभिरनुगम्यमानम्, अनतिभूरिपरिवारपरिच्छदम्, उच्चलितमध्वना सुवेलाद्रेः खेचरनरेन्द्रवृन्दमद्राक्षम् [त]।

दृष्ट्वा चाग्रतस्तं प्रभाराशिमत्यन्तदुरालोकं तं चापतन्तमभिमुखं खेचरलोकमुल्लसच्चित्तवृत्तिः प्रवर्तय पुरस्तान्नावमिति नियुज्य तारकं तत्क्षणमेव चलितस्तेन विस्मयस्तिमितचक्षुषा समस्तेनापि गगनचारिणां गणेन 'कोऽयं? कुतोऽयं? किमर्थमायातः? कथमिहातिदुर्गमायां नगोपकण्ठभूमावेकाकी प्रविष्टः? क यास्यति?' इति जल्पता परस्परमवलोक्यमानो गत्वा स्तोकमन्तरमधस्तात् तस्य भूधरस्य झटिति दृष्टवानष्टापदाद्रिशिखरभास्वराकारम्, उत्पातपवनधूननोपजातखेदानां गर्भपातमिव संवर्तकाभ्रविद्युताम्, अनवरतवारिधिसलिलशोषणोत्पन्नजाड्यस्य दाहशक्तिभ्रंशमिव वाडवाग्नेः, अमृतमथनोत्फालमन्दरास्फालितस्य रुधिरच्छटोद्गार-

---

परिवृताभिः परिवेष्टिताभिः, कीदृशेन? **आप्रपदीनचीनकञ्चुकावच्छन्नवपुषा** आप्रपदीनः–पादाग्रान्तं यावत् लम्बमानो यः, चीनकञ्चुकः–चीनदेशीयवस्त्रनिर्मितः कञ्चुकः, तेन अवच्छन्नम्–आच्छादितम्, वपुः–शरीरं यस्य तादृशेन, पुनः **निजनिजवाहनाधिरूढेन** स्वस्ववाहने कृताधिरोहणेन; पुनः **आलोहितापाङ्गतरङ्गैः** आलोहितः–आरक्तः, अपाङ्गतरङ्गः–नेत्रप्रान्तभागकान्तिप्रवाहो येषां तादृशैः, पुनः **मन्दतारकापरिस्पन्दैः** मन्दः, तारकापरिस्पन्दः–कनीनिकासञ्चारो येषु तादृशैः, **लोचनारविन्दैः** नयनकमलैः, **अनुभूतदीर्घरजनिजागराभिरिव** अनुभूता–प्राप्ता, दीर्घायाम्–आयतायां, रजन्यां–रात्रौ, जागरा–जागरणं याभिस्तादृशीभिरिव, **विभाव्यमानाभिः** प्रतीयमानाभिः; पुनः **अलम्बितालकश्रेणीभिः** बद्धकुटिलकेशपङ्क्तिभिः; पुनः **अलुप्तललाटतिलकैः** अध्वस्तभालस्थालक्तकबिन्दुभिः, पुनः **अग्लपितौष्ठमुद्रालक्तकैः** अग्लपितम्–अप्रच्यावितम्, ओष्ठे, मुद्रालक्तकं–मुद्रात्मकम्, आलक्तकम्–रक्तद्रवो येषु तादृशैः, **आननेन्दुभिः** मुखचन्द्रैः, **असम्पादितमनोभवाज्ञाभिरिव** न सम्पादिता–अपरिपालिता, मनोभवस्य–कामदेवस्य, आज्ञा–अनुशासनं याभिस्तादृशीभिरिव, **ज्ञायमानाभिः** उत्प्रेक्ष्यमाणाभिः। पुनः कीदृशम्? **अतिभूरिपरिवारपरिच्छदम्** अतिभूरि–अत्यधिकः, परिवारः–अमात्यादिपरिजनः, परिच्छदः–उपकरणं च यस्य तादृशम्। पुनः **सुवेलाद्रेः** सुवेलसंज्ञकपर्वतस्य, **अध्वना** मार्गेण, **उच्चलितम्** ऊर्ध्वं चलितम् [त]।

च पुनः, **अग्रतः** अग्रे, **अत्यन्तदुरालोकम्** अतिदुर्दर्शं, **तं** प्रकृतं, **प्रभाराशिं** तेजःपुञ्जं, **च** पुनः, **अभिमुखं** सम्मुखम्, **आपतन्तम्** आगच्छन्तं, **खेचरलोकं** विद्याधरजनं, **दृष्ट्वा** दृष्टिगोचरीकृत्य, **उल्लसच्चित्तवृत्तिः** प्रमोदमानमनोवृत्तिः सन्, **पुरस्तात्** अग्रे, नावं, **प्रवर्तय** प्रेरय, **इति** इत्थं, **तारकं** तत्संज्ञकं नाविकं, **नियुज्य** आज्ञाप्य, **तत्क्षणमेव** तत्कालमेव, **चलितः** प्रस्थितः, **विस्मयस्तिमितचक्षुषा** विस्मयेन–आश्चर्येण, स्तिमितं–निश्चलं, चक्षुः–नेत्रं यस्य तादृशेन, **समस्तेनापि** समग्रेणापि, **तेन** प्रकृतेन, **गगनचारिणां** खेचराणां, **गणेन** समूहेन, **अयं** प्रत्यक्षवर्ती, कः?, अयं **कुतः** कस्मात् स्थानात्, **किमर्थं** किमुद्देश्यकम्, **आयातः** आगतः? **कथं** केन प्रकारेण, **अतिदुर्गमायाम्** अतिदुःखेन गम्यायाम्, **इह** अस्यां, **नगोपकण्ठभूमौ** पर्वतप्रान्तभूमौ, **एकाकी** अद्वितीयः, **प्रविष्टः** कृतप्रवेशः सन्, **क्व** कुत्र, **यास्यति** गमिष्यति? इति **परस्परम्** अन्योऽन्यम्, **जल्पता** ब्रुवता, **अवलोक्यमानः** निरीक्ष्यमाणः, **स्तोकं** किञ्चित्, **अन्तरं** दूरं, **तस्य** प्रकृतस्य, **भूधरस्य** पर्वतस्य, **अधस्तात्** अधोदेशं, **झटिति** शीघ्रं, गत्वा, एकं **दिव्यं** मनोहरम्, **आयतनं** गृहं, देवमन्दिरमित्यर्थः, दृष्टवान्, कीदृशम्? **अष्टापदाद्रिशिखरभास्वराकारम्** अष्टापदनामकपर्वतस्य शिखरवत्, भास्वरः–दीप्तः, आकारो यस्य तादृशम्। पुनः **उत्पातपवनधूननोपजातखेदानाम्** उत्पातपवनेन–शुभाशुभावेदकाकस्मिकभूकम्पादिकालिकवायुना, यत् धूननं–कम्पनं, तेन उपजातः–उत्पन्नः, खेदः–वेदना यासां तादृशीनां, **संवर्तकाभ्रविद्युतां** संवर्तकनामकमेघसम्बन्धितडितां, **गर्भपातमिव** गर्भस्रावमिवेत्युत्प्रेक्षा। पुनः **अनवरतवारिधिसलिलशोषणोत्पन्नजाड्यस्य** अनवरतं–निरन्तरं, वारिधेः समुद्रस्य, सलिलशोषणेन–जलशोषणेन उत्पन्नं, जाड्यं–शैत्यं यस्य तादृशस्य, **वाडवाग्नेः** समुद्रस्थिताग्नेः, **दाहशक्तिभ्रंशमिव** दाहशक्तिध्वंसमिवेति चोत्प्रेक्षा। पुनः **अमृतमथनोत्फालमन्दरा-**

मिव पारावारस्य, प्रलयपर्जन्यगर्जितोपजनितप्रौढभेदायाः कन्दलोद्भेदमिव पातालस्वर्गवैडूर्यभूमेः, अतुलगारुडग्रावघटितोदग्रविकटपीठम्, अध्यासितपीठबन्धमध्यया रसातलत्रिपथगातरङ्गमालयेव गगनमवलोकयितुमुत्पतितया चन्द्रकान्तमणिशिलासोपानमालया विराजितोदारमण्डपद्वारावतारमार्गम्, अनेकमाणिक्यमत्तवारणकभूषितम् [थ], अनिमेषलोचनाभिरतिशयितविश्वकर्मकौशलं शिल्पनिर्माणमवलोकयितुममरलोकादुपागताभिः स्वर्गरमणीभिरिव मणिशिलाशालभञ्जिकाभिरध्यासिताभ्रंकषपुष्परागपाषाणस्तम्भशिखरम्, उपरि घूर्णन्तीभिरर्णवोदकपानकालीभिर्बालजलधरलेखाभिरापादिताञ्जनवर्तिकल्पैर्ज्वलद्भिरुच्छिखैः पद्मरागकलशैः प्रकाशिताकालदीपोत्सवविलासम्, अविरलोद्गीर्णसुरचापचक्रकृतकलापापलापेषु वज्रमणिशलाकाजालकेषु कूजितानुमितनिलीननीलकण्ठम्, आशामुखव्यापिनि महानीलाश्मयोनेरामलसारकस्य घनदुर्दिनश्यामले प्रभाचक्रवाले बलाकायमानपवनलोलसितपताकम्, आभोगदूरोत्सारितदिशा तपनमण्डलमिवात्मनः कलशतां

स्फालितस्य अमृतमथने–समुद्रादमृतोद्धरणे, उत्फालः–उद्धतः, यो मन्दरः–मन्दराचलः, तेन आस्फालितस्य–संक्षोभितस्य, **पारावारस्य** समुद्रस्य, **रुधिरच्छटोद्गारमिव** रुधिरधारोद्गमनमिवेति चोत्प्रेक्षा। पुनः **प्रलयपर्जन्यगर्जितोपजनितप्रौढभेदायाः** प्रलयपर्जन्यस्य–प्रलयकालिकमेघस्य, गर्जितेन–गर्जनेन, उपजनितः–उत्पादितः, भेदः–विदारणं यस्यास्तादृश्याः, **पातालस्वर्गवैडूर्यभूमेः** पातालस्वर्गसम्बन्धिमणिविशेषक्षेत्रभूतभूमेः, **कन्दलोद्भेदमिव** नवाङ्कुरोद्गममिवेति चोत्प्रेक्षा। पुनः **अतुलगारुडग्रावघटितोदग्रविकटपीठम्** अतुलेन–अनुपमेन, यद्वा अपरिमितेन, गारुडग्राव्णा–मरकतमणिना, घटितं–खचितम्, उदग्रम्–उन्नतं, विकटं–विशालं च, पीठम्–ऊर्ध्वभूमिर्यस्य तादृशम्। पुनः **अध्यासितपीठबन्धमध्यया** ऊर्ध्वभूमिबन्धमध्यवर्तिन्या, **गगनम्** आकाशम्, **अवलोकितुं** द्रष्टुम्, **उत्पतितया** उच्छलितया, **रसातलत्रिपथगातरङ्गमालयेव** पातालगङ्गातरङ्गावल्येवेत्युत्प्रेक्षा, **चन्द्रकान्तमणिशिलासोपानमालया** चन्द्रकान्तमणिरूपप्रस्तरमयाधिरोहणीपङ्क्त्या, **विराजितोदारमण्डपद्वारावतारमार्गं** विराजितः–उद्भासितः, उदारस्य–महतः, मण्डपस्य गृहविशेषस्य, द्वारे, अवतारमार्गः–प्रवेशमार्गो यस्य तादृशम्। पुनः **अनेकमाणिक्यमत्तवारणकभूषितम्** अनेकैः–बहुभिः, माणिक्यस्य मणिनिर्मितैः, मत्तवारणकैः–वरण्डकैः, वरण्डि इति ख्यातैर्गृहावयवैः, भूषितं–शोभितम् [थ]। पुनः **अनिमेषलोचनाभिः** अनिस्पन्दनयनाभिः, अत एव **अतिशयितविश्वकर्मकौशलम्** अतिशयितं–तिरस्कृतं, विश्वकर्मणः–तदाख्यशिल्पिदेवस्य, कौशलं–नैपुण्यं येन तादृशं, **शिल्पनिर्माणं** शिल्परचनाम्, **अवलोकयितुं** द्रष्टुम्, **अमरलोकात्** देवलोकात्, **उपागताभिः** समीपमागताभिः, **स्वर्गरमणीभिरिव** स्वर्गसम्बन्धिसुन्दरीभिरिवेत्युत्प्रेक्षा, **मणिशिलाशालभञ्जिकाभिः** मणिरूपप्रस्तररचितशिलापुत्रिकाभिः, **अध्यासिताभ्रङ्कषपुष्परागपाषाणस्तम्भशिखरम्** अध्यासितम्–अधिष्ठितम्, अभ्रङ्कषस्य–मेघस्पर्शिनः, पुष्परागपाषाणस्तम्भस्य–पद्मरागमणिरूपप्रस्तरमयस्तम्भस्य, शिखरम्–उपरिभागो यस्य तादृशम्। पुनः **उपरि** ऊर्ध्वं, **घूर्णन्तीभिः** भ्रमन्तीभिः, **अर्णवोदकपानकालीभिः** समुद्रजलपानकृष्णवर्णाभिः, **बालजलधरलेखाभिः** नवीनमेघपङ्क्तिभिः, **आपादिताञ्जनवर्तिकल्पैः** सम्पादिताञ्जनात्मकदीपदशाकारैः, **ज्वलद्भिः** दीप्यमानैः, **उच्छिखैः** ऊर्ध्वशिखैः, **पद्मरागकलशैः** पद्मरागाख्यमणिमयकुम्भैः, **प्रकाशिताकालदीपोत्सवविलासं** प्रकाशितः–प्रकटितः, अकाले–स्वोचितकालाभावेऽपि, दीपानां–दीपावल्याः, उत्सवविलासः–उत्सवशोभा यस्मिंस्तादृशम्। पुनः **अविरलोद्गीर्णसुरचापचक्रकृतकलापापलापेषु** अविरलोद्गीर्णेन–निरन्तरमुद्भासितेन, सुरचापचक्रेण–इन्द्रधनुर्गणेन, कृतः, कलापस्य–मयूरशिखायाः, अपलापः–अपह्नवो येषु तादृशेषु, **वज्रमणिशलाकाजालकेषु** हीरकमणिमयशलाकासमूहेषु, **कूजितानुमितनिलीननीलकण्ठं** कूजितेन–अव्यक्तशब्देन, अनुमितः, निलीनः–प्रच्छन्नः, नीलकण्ठः–मयूरो यस्मिंस्तादृशम्। पुनः **आशामुखव्यापिनि** दिगन्तव्यापके, **घनदुर्दिनश्यामले** सान्द्रमेघच्छन्नदिनवत् कृष्णवर्णे, **महानीलाश्मयोनेः** महानीलाश्मा–महानीलमणिः, योनिः–उत्पत्तिस्थानं यस्य तादृशस्य, **आमलसारकस्य** शिखरावयवविशेषस्य, **प्रभाचक्रवाले** प्रभामण्डले, **बलाकायमानपवनलोलसितपताकं** बलाकायमाना–बकपङ्क्तिवदाचरन्ती, पवनेन–वायुना, लोला–चञ्चला, सिता–श्वेता, पताका यस्मिंस्तादृशम्। पुनः **आभोगदूरो-**

नेतुमुत्थितेन चुम्बिताम्बरशिखमतिप्रांशुना शिखरेण, विततशिखरश्रेणिना सागरवीचिमालास्फालवाचालतलशिलासोपानमालेन मूलदेशासीननानारूपजलचरजातिना स्वच्छतातिरेकादात्मकरतलस्थितवदवलोक्यमानापरभागावस्थितपदार्थजातेन शुद्धजातिस्फाटिकनिर्मितेन स्फुटस्फातिना प्राकारमण्डलेन कुण्डलितम्, अमलप्राकारभित्तिलग्नैः प्रतिबिम्बकैरिव निजैरनिलवेल्लितपताकापल्लवतया प्राप्तुमुन्नतिप्रकर्षमारब्धसेवासमुचितोत्तरीयाञ्चलवीजनैरमरगिरिशृङ्गैरिव सर्वतः परिवृतं हिरण्मयैः सुरप्रासादैः [द], छन्दोविचितिशास्त्रमिव बृहत्या जगत्या भ्राजितं, युगान्तदिवसमिव विलसदनेकरूपकालिकान्तं, हेमन्तमिव समासन्नशिशिरवातायनालंकृतं,

---

टिप्पनकम्—**छन्दोविचितिशास्त्रमिव बृहत्या जगत्या** छन्दोजात्या, अन्यत्र महत्या देवकुलिकाधरया। **युगान्तदिवसमिव विलसदनेकरूपकालिकान्तम्** एकत्र विलासवन्नानारूपशङ्करम्, अन्यत्र देदीप्यमाननानारूपैकपङ्क्तिकमनीयम्। **हेमन्तमिव समासन्नशिशिरवातायनालङ्कृतम्** एकत्र निकटशीतलगवाक्षभूषितम्,......। **प्रौढवादिनमिवातिविषमपत्रभङ्गविस्मायितप्रेक्षकजनम्** एकत्र दुर्विजेयपत्रकभञ्जनाश्चर्यितावलोककलोकम्, अन्यत्र दुर्लेखनीयपत्रवल्लीरचनाभेदाश्चर्यितप्रेक्षकजनम् [ध]।

त्सारितदिशा** आभोगेन-विस्तारेण, दूरम्, उत्सारिता-उत्क्षिप्ता, दिक् येन तादृशेन, अतः **तपनमण्डलं** सूर्यबिम्बम्, **आत्मनः** स्वस्य, **कलशतां** कुम्भतां, **नेतुं** प्रापयितुम्, **उत्थितेनेव** उद्गतेनेव, **अतिप्रांशुना** अत्युन्नतेन, **शिखरेण** शृङ्गेण, **चुम्बिताम्बरशिखं** चुम्बिता-स्पृष्टा, अम्बरशिखा-आकाशोपरिभागो येन तादृशम्। पुनः **प्राकारमण्डलेन** प्राकारसमूहेन मण्डलाकारप्राकारेण वा, **कुण्डलितं** परिवेष्टितम्, कीदृशेन ? **विततशिखरश्रेणिना** विस्तृतशिखरसमूहकेन, पुनः **सागरवीचिमालास्फालवाचालतलशिलासोपानमालेन** सागरवीचिमालायाः-समुद्रतरङ्गश्रेण्याः, य आस्फालः-आस्फालनं, तेन वाचालतला-शब्दायमानाधःस्थला, शिलासोपानमाला-प्रस्तरमयी रोहिणीश्रेणी यस्य तादृशेन, पुनः **मूलदेशासीननानारूपजलचरजातिना** मूलदेशे-अधोदेशे, आसीनाः-उपविशन्त्यः, नानारूपाः-अनेकरूपाः, जलचरजातयः-जलजन्तुजातीया जीवा यस्मिंस्तादृशेन, पुनः **स्वच्छतातिरेकात्** उज्ज्वलतोत्कर्षात्, **आत्मकरतलस्थितवत्** स्वकरतलवर्तिवस्तुवत्, **अवलोक्यमानापरभागावस्थितपदार्थजातेन** अवलोक्यमानं-दृश्यमानम्, अपरभागावस्थितम्-उत्तरभागावस्थितं, पदार्थजातं-वस्तुसमूहो यस्मिंस्तादृशेन, पुनः **शुद्धजातिस्फाटिकनिर्मितेन** शुद्धजाति-स्वच्छजातीयं, यत् स्फाटिकं-स्फटिकमणिगणः, तद्रचितेन, पुनः **स्फुटस्फातिना** स्फुटा स्फातिः-विस्तारो यस्य तादृशेन। पुनः **हिरण्मयैः** सुवर्णमयैः, **सुरप्रासादैः** देवमन्दिरैः, **सर्वतः** सर्वभागेषु, **परिवृतं** परिवेष्टितम्, कैरिव ? **अमलप्राकारभित्तिलग्नैः** उज्ज्वलप्राकारकुड्यसंक्रान्तैः, **निजैः** स्वकीयैः, **प्रतिबिम्बकैरिव** प्रतिच्छायाभिरिव, पुनः **अनिलवेल्लितपताकापल्लवतया** पवनोद्धूतपताकारूपपल्लवतया हेतुना, **उन्नतिप्रकर्षम्** उच्छ्रायोत्कर्षं, **प्राप्तुमिव** लब्धुमिव, **आरब्धसेवासमुचितोत्तरीयाञ्चलवीजनैः** आरब्धं-प्रवर्तितं, सेवासमुचितं-सेवायोग्यम्, उत्तरीयाञ्चलवीजनम्-उत्तरीयवस्त्राग्रभागेन वीजनं-पवनान्दोलनं यैस्तादृशैः, **अमरगिरिशृङ्गैरिव** सुमेरुशिखरैरिव [द]। पुनः कीदृशम् ? **छन्दोविचितिशास्त्रमिव** छन्दोविचितिः-छन्दःसन्दोहः, तत्सम्बन्धिशास्त्रमिव, यद्वा छन्दसां या विचितिः-अन्वेषणं, तत्सम्बन्धिशास्त्रमिव, **बृहत्या** विस्तृतया, **जगत्या** आयतनाधारभूम्या, पक्षे बृहती-जगतीसंज्ञकछन्दोभ्यां, **भ्राजितं** शोभितम्, पुनः **युगान्तदिवसमिव** प्रलयदिनमिव, **विलसदनेकरूपकालिकान्तं** विलसन्तीभिः-विराजमानाभिः, अनेकरूपाभिः-नानाकाराभिः, आलिभिः-पङ्क्तिभिः, कान्तं-सुन्दरम्, पक्षे विलसन्-विराजन्, नानारूपाभिः-नानाकाराभिः, कालिकाभिः-चण्डिकाभिः, अन्तः-क्षयो यत्र, यद्वा विलसद्भिः, नानारूपकैः, अलिभिः-भ्रमरैः, [मार्कण्डेयपुराणान्तर्गतदुर्गासप्तशतीस्तुत्यन्तः एकादशाध्याये] "तदाऽहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम्" इत्यन्यत्रोक्तदिशा भ्रमराकारधारणीभिश्चण्डीभिरिति यावत्, कान्तं-मनोहरम्, यद्वा विलसन् क्रीडन् नानारूपः काल्याः कान्तः-शिवो यत्र तादृशम्। पुनः **हेमन्तमिव** हेमन्तऋतुमिव, **समासन्नशिशिरवातायनालङ्कृतं** समासन्नैः-अतिसमीपवर्तिभिः, शिशिरैः-शीतलैः, वातायनैः-गवाक्षैः, पक्षे

प्रौढवादिनमिवातिविषमपत्रभङ्गविस्मायितप्रेक्षकजनम्, अनेकमाणिक्यखण्डखचितकाञ्चनशिलासंघातम्, एकं दिव्यमायतनम् [ध]।

उपजातविस्मयश्च विस्मृतनिमेषनिश्चलेन चक्षुषा तदवलोक्य सुचिरमकरवं मनसि—'फलाभिलाषिणा पुरुषेण नैकान्तो नीतिनिष्ठेन भवितव्यम्, अभिमते वस्तुनि दैवं प्रमाणीकृत्य सर्वात्मना प्रवर्तितव्यम्, अनुकूलविधिविहितसाहायकस्य साहसिकस्य सर्वदा शस्यसंपदिवानीतिरनीतिरपि फलति, येन सकलबुधजनोपहासपात्रमेषोऽपि यात्राविधिरीदृशस्य मे निर्वृतिलाभस्य कारणं संवृत्तः, यद्यपायभीरुतया नीतिमनुसरन्नाहमेतां भूमिमागमिष्यं कथमिदं कथापथोत्तीर्णरूपगुणलुप्तसुरपतिविमानकमनीयताप्रवादं प्रासादरत्नमद्रक्ष्यम् [न]। यदवलोकनेनाद्य विनिवृत्तमिवाह्लादकरपदार्थदर्शनकुतूहलं दृष्टेः, उपरत इवाद्भुतकथाकर्णनादरः कर्णयोः, नृत्यतीव हृदयमन्तः प्रहर्षेण, पुण्यभाजो जगति, यैः परित्यज्य राज्यमपि, गृहीत्वा पारिव्राज्यमपि, भुक्त्वा फलमूलमयमाहारलेशमपि, विषह्य दुःसहं वनवासक्लेशमपि, अङ्गीकृत्य बान्धवसुहृद्वियोगमपि, प्राप्य

टिप्पनकम्—**शस्यसम्पदिवानीतिरनीतिरपि फलति** अनीतिः-अनयोऽपि, अन्यत्र अनीतिः-ईतिरहिता [न]।

समासन्नानां शिशिराणां वातानां-वायूनाम्, आयनैः-आगमनैः, अलङ्कृतं-भूषितम्। पुनः **प्रौढवादिनमिव** निपुणं वक्तारमिव विवादकर्तारमिव वा, **अतिविषमपत्रभङ्गविस्मायितप्रेक्षकजनम्** अतिविषमैः-दुर्लेखनीयैः, पत्रभङ्गैः-पत्रवल्लीरचनाभिः, पक्षे अतिविषमस्य-दुर्विजेयस्य, पत्रस्य-पत्रलिखितविचारस्य, भङ्गेन-भञ्जनेन खण्डनेनेति यावत्, विस्मायिताः-आश्चर्यमनुभाविताः, प्रेक्षकजनाः-दर्शकलोका येन तादृशम्। पुनः **अनेकमाणिक्यखण्डखचितकाञ्चनशिलासंघातम्** अनेकेषां-नानाविधानां, माणिक्यानां-रत्नानां, खण्डैः खचितः-व्याप्तः, काञ्चनशिलासंघातः-सुवर्णशिलासमूहो यस्मिंस्तादृशम् [ध]।

च पुनः, **उपजातविस्मयः** उत्पन्नाश्चर्यः, **विस्मृतनिमेषनिश्चलेन** विस्मृतः-आश्चर्यव्यग्रतया स्मृतिपथादपसृतः, निमेषः-स्पन्दो यस्य तादृशेन, अत एव निश्चलेन-स्थिरेण, **चक्षुषा** नेत्रेण, **तत्** आयतनं, **सुचिरं** दीर्घकालम्, **अवलोक्य** दृष्ट्वा, **मनसि** हृदि, **अकरवं** विचारितवानहम्, किमित्याह—"**फलाभिलाषिणा** फलेच्छुना, **पुरुषेण** जनेन, **एकान्ततः** नियमेन, **नीतिनिष्ठेन** नीत्यवलम्बिना, न **भवितव्यं** भवितुमुचितम्, प्रत्युत **अभिमते** इष्टे, वस्तुनि, **दैवं** भाग्यं, **प्रमाणीकृत्य** प्रमाणतयाऽऽस्थाय, **सर्वात्मना** सर्वतोभावेन, **प्रवर्तितव्यं** प्रवर्तितुमुचितम्, **अनुकूलविधिविहितसाहायकस्य** अनुकूलेन, विधिना-दैवेन, विहितं-कृतं, साहायकं-साहाय्यं, यस्य तादृशस्य, **साहसिकस्य** साहसशालिजनस्य, **सर्वदा** सर्वकाले, **अनीतिः** अतिवृष्ट्यादिषडीतिरहिता, **शस्यसम्पदिव** धान्यसमृद्धिरिव, **अनीतिरपि** नीतिविरुद्धकृतिरपि, **फलति** फलं ददाति। **येन** यस्मात् कारणात्, **सकलबुधजनोपहासपात्रम्** अशेषविज्ञजनोपहासास्पदम्, **एषोऽपि** अयमपि, **यात्राविधिः** प्रयाणकार्यं, **मे** मम, **ईदृशस्य** एतादृशस्य, **निर्वृतिलाभस्य** सुखप्राप्तेः, कारणं, **संवृत्तः** सम्पन्नः, यदि अहम्, **अपायभीरुतया** विनाशभीरुतया, नीतिम्, **अनुसरन्** आश्रयन्, **एताम्** इमां, भूमिं न **आगमिष्यम्** आगतवानभविष्यम्, तर्हि **कथापथोत्तीर्णरूपगुणलुप्तसुरपतिविमानकमनीयताप्रवादं** कथापथोत्तीर्णैः-वर्णनमार्गातिगामिभिः, रूपगुणैः-स्वरूपसौष्ठवैः, लुप्तः-निवारितः, सुरपतिविमानस्य-इन्द्रसम्बन्धिव्योमयानस्य, कमनीयतायाः-सौन्दर्यस्य, प्रवादो येन तादृशम्, इदं **प्रासादरत्नं** प्रासादश्रेष्ठं, **कथं** केन प्रकारेण, **अद्रक्ष्यं** दृष्टवानभविष्यम् [न]। **अद्य** अस्मिन् दिने, **यदवलोकनेन** यद्दर्शनेन, **दृष्टेः** नेत्रस्य, **आह्लादकरपदार्थदर्शनकुतूहलम्** आनन्दजनकवस्तुदर्शनौत्सुक्यं, **विनिवृत्तमिव** विध्वस्तमिव; पुनः **कर्णयोः** श्रोत्रयोः, **अद्भुतकथाकर्णनादरः** आश्चर्यजनककथाश्रवणप्रीतिः, **उपरत इव** निवृत्त इव; पुनः **प्रहर्षेण** प्रकृष्टहर्षवशेन, हृदयम्, **अन्तः** अन्तर्देशे, **नृत्यतीव** नृत्यं करोतीवेति सर्वत्रोत्प्रेक्षा। **जगति** लोके, **पुण्यभाजः ते** पुण्यशालिनः, सन्तीति शेषः, यैः, **राज्यमपि** लोकाधिपत्यमपि, परित्यज्य, प्रत्युत **पारिव्राज्यमपि** संन्यासमपि, गृहीत्वा, पुनः **फलमूलमयम्** फलमूलात्मकम्, **आहारलेशमपि** भक्ष्यलवमपि, **भुक्त्वा** भक्षित्वा, पुनः **दुस्सहं** दुरशकं, **वनवासक्लेशमपि** वनवासदुःखमपि, **विषह्य** विशेषेण सोढ्वा,

पक्षिजातियोगमपि, कृतस्थितिभिरत्र कालः प्रेर्यते । वन्द्यवैभवः स कोऽपि भगवान् देवो वा दानवो वा येन सुकृतकर्मणा निर्मापितमिदम् । अस्य हि प्रारम्भसमये प्रवर्तितः प्रथममादरात् तेन संख्यातीतानां विश्वकर्मणां सर्गनिर्माणाय भगवान् प्रजापतिः, तदनु गत्वाऽलकापुरीमाबद्धवर्मणा रणपराजितस्य मनुष्यधर्मणः कृतं कार्त्स्न्येन कोशापहरणम्, अथ कदर्थितत्रयस्त्रिंशत्रिदशकोटिना समूल एवोत्पाटितः सुरशैल इति निश्चयो मे, नह्येकविश्वकर्मसमारब्धकर्मणा प्रकारान्तरोपार्जितधनेन स्थानादन्यतः समाहृतमणिशिलादारुणा कारयितुमतिभूयसापि कालेन कीर्तनमीदृशं शक्यम् । शङ्के चात्र निष्पाद्यमाने त्रिदिवशिल्पिनामभीक्ष्णमतितीक्ष्णकोटिभिष्टङ्किकाभिस्तक्ष्यमाणाभ्यः शिखरमणिशिलाभ्यः समन्ततः समुच्छलितानि यानि स्थूलशकलानि तैरेष लम्भितो रत्नाकराभिधानं लवणसिन्धुः [प]। इति चिन्तयत्येव मयि तत्कालसत्वरकैवर्तरभसप्रेरिता क्षणेनैव दक्षिणामायतनप्राकारभित्तिमाससाद नौः । आक्रम्य च क्रमेणातिरमणीयमस्याः पर्वतनितम्बसङ्गिनं पूर्वभागमवस्थितायां तत्र क्षणमात्रमतिवाहिताध्वखेदो दिव्यदेवतायतनदर्शनप्रीतमनसमदृश्यमानुषप्रचारेषु मदमत्तविविधपक्षिकुलबद्धकोलाहलेषु नित्यविकचदेवद्रुमवनामोदवासितदिक्षु रत्नकूटाद्रिकटकदेशेष्वनुक्षण-

---

पुनः **बान्धवसुहृद्वियोगमपि** बन्धुमित्रविरहमपि, **अङ्गीकृत्य** स्वीकृत्य, पुनः **पक्षिजातियोगमपि** पक्षिजातीयैः सम्पर्कमपि, प्राप्य, **अत्र** अस्मिन् स्थाने, **कृतस्थितिभिः** कृतनिवासैः, कालः, **प्रेर्यते** व्यतीयते । **वन्द्यवैभवः** स्तुत्यैश्वर्यः, **कोऽपि** अविज्ञातनामा, **भगवान्** ऐश्वर्यशाली, स देवो वा, **दानवो वा** राक्षसो वा, अस्तीति शेषः, **सुकृतकर्मणा** पुण्यकर्मणा, येन, **इदम्** आयतनं, **निर्मापितं** कारितम् । **हि** यतः, **अस्य** आयतनस्य, **प्रारम्भसमये** प्रारम्भावसरे, **तेन** निर्मापकेण भगवता, **प्रथमं** पूर्वं, **संख्यातीतानाम्** असंख्यानां, **विश्वकर्मणां** शिल्पकुशलदेवानां, **सर्गनिर्माणाय** सृष्टिरचनार्थं, **भगवान्** सर्वैश्वर्यवान्, **प्रजापतिः** ब्रह्मा, **प्रवर्तितः** प्रेरितः; **तदनु** ततः पश्चात्, **अलकापुरीं** कुबेरसम्बन्धिनीमलकानाम्नीं पुरीं, गत्वा, **आबद्धवर्मणा** धृतकवचेन सता तेन, **रणपराजितस्य** रणे–युद्धे, पराजयं प्रापितस्य, **मनुष्यधर्मणः** कुबेरस्य, **कार्त्स्न्येन** साकल्येन, **कोशापहरणं** कोशलुण्टनं कृतम्, **अथ** अनन्तरं, **कदर्थितत्रयस्त्रिंशत्रिदशकोटिना** कदर्थिताः–पराजिताः, त्रिदशानां–देवानां, त्रयस्त्रिंशत्–त्र्यधिका त्रिंशत्, कोटयो येन तादृशेन सता, **समूल एव** मूलसहित एव, **सुरशैलः** सुमेरुः, **उत्पाटितः** उत्खातः, **इति** अयं, **मे** मम, **निश्चयः** विश्वासः, वर्तत इति शेषः । **हि** यतः, **एकविश्वकर्मसमारब्धकर्मणा** एकेन, विश्वकर्मणा–शिल्पिदेवविशेषेण, समारब्धं–प्रवर्तितं, कर्म–निर्माणव्यापारो येन तादृशेन, पुनः **प्रकारान्तरोपार्जितधनेन** प्रकारान्तरेण–उक्तादन्येन साधारणप्रकारेण, उपार्जितं धनं येन तादृशेन, पुनः **अन्यतः** उक्तादन्यस्मात्, स्थानात्, **समाहृतमणिशिलादारुणा** समाहृताः–सञ्चिताः, मणिशिलाः–मणिरूपाः शिलाः, दारूणि–काष्ठानि च, येन तादृशेन, पुरुषेण, **अतिभूयसापि** अत्यधिकेनापि, कालेन, **ईदृशम्** एवंविधं, **कीर्तनं** मन्दिरं, **कारयितुं** निर्मापयितुं, न **शक्यं** शक्तिसाध्यम् । **च** पुनः, **शङ्के** सम्भावयामि, **अत्र** अस्मिन् आयतने, **निष्पाद्यमाने** निर्मीयमाणे, **त्रिदिवशिल्पिनां** स्वर्लोकशिल्पिनां, विश्वकर्मणामिति यावत्, **अतितीक्ष्णकोटिभिः** अत्यन्ततीक्ष्णाग्रभागाभिः, **टङ्किकाभिः** शिलातक्षणलौहशलाकाभिः, **तक्ष्यमाणाभ्यः** तनूक्रियमाणाभ्यः, **शिखरमणिशिलाभ्यः** शिखरवर्तिमणिरूपप्रस्तरेभ्यः, **समुच्छलितानि** समुत्पतितानि, यानि **स्थूलशकलानि** स्थूलखण्डानि, तैः, एष **लवणसिन्धुः** लवणसमुद्रः, **रत्नाकराभिधानं** रत्नाकरेति सार्थकसंज्ञां, **लम्भितः** प्रापितः" [प] । मयि, **इति** इत्थं, **चिन्तयत्येव** आलोचयति सत्येव, **तत्कालसत्वरकैवर्तरभसप्रेरिता** तत्कालं–तत्क्षणं, सत्वरेण–त्वरान्वितेन, कैवर्तेन–कर्णधारेण, रभसेन–वेगेन, प्रेरिता–प्रचारिता, नौः, दक्षिणाम्, **आयतनप्राकारभित्तिं** प्रकृतप्रासादप्राकारकुड्यम्, **आससाद** आजगाम । **च** पुनः, **अस्याः** दक्षिणप्राकारभित्तेः, **अतिरमणीयम्** अत्यन्तसुन्दरम्, **पर्वतनितम्बसङ्गिनं** पर्वतमध्यभागसंपृक्तं, पूर्वभागं, क्रमेण, **आक्रम्य** अधिष्ठाय, अवस्थितायां, **तत्र** नावि, क्षणमात्रम्, **अतिवाहिताध्वखेदः** निवारितमार्गश्रमः, **तारकं** तत्संज्ञकप्रकृतकैवर्तम्, **अवोचम्** उक्तवानहम्, कीदृशम्? **आयतनदर्शनप्रीतमनसं** निरुक्त-

क्षिप्तविस्मयस्मेरलोचनं तारकमवोचम्—'सखे! तारक! लङ्घितो निर्विघ्नमेवास्माभिरेष जलनिधिशैलान्तरालवर्ती सर्वद्वीपसांयात्रिकाणाममार्गो मार्गः, समाक्रान्ता सुखेन दिव्यजनसंचारपूतेयं भूमिगोचराणामभूमिर्भूमिः, आसादितमिदं सर्वसुन्दरपदार्थानामधिष्ठानं स्थानम्, अवलोकितं लोकत्रयतिलकमेतत् सकलकौतुकानामायतनमायतनम्, सर्वथा पुण्यभाजो वयम्, जातं जन्म सफलम्, उत्तिष्ठ तूर्णम्, अनुतिष्ठ सांप्रतं कालोचितं कृत्यम्, उपसृत्य पर्वतनितम्बादितः समाहर प्रत्यग्रविकसितानि संतानकप्रभृतीनां पुण्यपादपानां कुसुमानि, पानीयं च निर्झरादानय स्वादु, येन संपादितपाणिपादशौचाः प्रविश्य पश्यामः पूजयामश्च भगवन्तमन्तः प्रतिष्ठितमस्य देवतायतनस्य देवम्। अत्र हि विलोकिते साक्षादभ्यर्चिते स्वहस्तेन स्तुते च परमया भक्त्या महार्थाभिः स्तुतिभिरेषा विशेषतो नः फलवती भविष्यति यात्रा' इति [फ]। स एवमुक्तो विहस्य मां प्रत्यभाषत—'कुमार! सर्वं संपाद्यते, किं[तु] पुनरिदं विज्ञापयामि, कथमिह प्रवेष्टव्यं, यत्तावदिदमवलोक्यते पुरस्तादस्य गोपुरप्रतिबद्धमम्बरोत्तम्भिना मणिस्तम्भतोरणेन तिरस्कृततरणिरथसंचारं द्वारम्, अनेन योऽवतारः

प्रासाददर्शनप्रसन्नहृदयम्, पुनः **रत्नकूटाद्रिकटकदेशेषु** रत्नकूटाख्यपर्वतनितम्बप्रदेशेषु, **अनुक्षणक्षिप्तविस्मयस्मेरलोचनम्** अनुक्षणं–प्रतिक्षणं, क्षिप्ते–प्रेरिते, विस्मयस्मेरे–आश्चर्यविकस्वरे, लोचने येन तादृशम्, कीदृशेषु तेषु? **अदृश्यमानुषप्रचारेषु** अदृश्यमनुष्यगमनागमनेषु, पुनः **मदमत्तविविधपक्षिकुलबद्धकोलाहलेषु** मदमत्तैः–मदान्वितैः, विविधपक्षिकुलैः–नानाविधपक्षिगणैः, बद्धः–निरन्तरं कृतः, कोलाहलो येषु तादृशेषु, पुनः **नित्यविकचदेवद्रुमवनामोदवासितदिक्षु** नित्यम्–अनवरतं, विकचाः–पुष्पिताः, ये देवद्रुमाः–देववृक्षाः, तद्वनसम्बन्धिना, आमोदेन–अत्युत्कृष्टसौरभेण, वासिताः–सुरभिताः, दिशो यैस्तादृशेषु। किमवोचदित्याह—**सखे!** मित्र!, तारक!, **जलनिधिशैलान्तरालवर्ती** समुद्रपर्वतमध्यवर्ती, **सर्वद्वीपसांयात्रिकाणां** सर्वेषां द्वीपमार्गेण पौतिकानाम्, **अमार्गः** अगम्यः, एष मार्गः, निर्विघ्नमेव, **लङ्घितः** अतिक्रान्तः। पुनः **दिव्यजनसञ्चारपूता** दिव्यानां–दिवि–स्वर्गे भवानां, जनानां, सञ्चारेण–प्रचारेण, पूता–पवित्रिता, **भूमिगोचराणां** भूतलवर्तिनाम्, **अभूमिः** संचाराविषयभूता, इयं, **भूमिः** पृथ्वी, **सुखेन** आनन्देन, **समाक्रान्ता** समधिष्ठिता। पुनः **सर्वसुन्दरपदार्थानाम्** अशेषमनोहरवस्तूनाम्, **अधिष्ठानं** क्षेत्रभूतम्, इदं स्थानं, **समासादितं** प्राप्तम्, पुनः **लोकत्रयतिलकं** त्रिभुवनश्रेष्ठं, **सकलकौतुकानाम्** अशेषोत्सवानाम्, अशेषाश्चर्याणां वा, **आयतनम्** आस्पदम्, एतत्, **आयतनं** प्रासादः, **अवलोकितं** दृष्टम्। वयं, **सर्वथा** सर्वप्रकारेण, **पुण्यभाजः** पुण्यवन्तः, स्म इति शेषः। **जन्म** अस्माकम् उत्पत्तिः, **सफलं** सार्थकं, **जातम्** अभूत्। **तूर्णं** शीघ्रम्, **उत्तिष्ठ** व्याप्रियस्व। **सांप्रतम्** अधुना, **कालोचितम्** एतत्कालयोग्यं, **कृत्यं** कार्यम्, **अनुतिष्ठ** कुरु। **इतः** अस्मात्, **पर्वतनितम्बात्** पर्वतमध्यभागात्, **अपसृत्य** बहिर्गत्वा, **प्रत्यग्रविकसितानि** अचिरविकसितानि, **सन्तानकप्रभृतीनां** सन्तानकादीनां, **पुण्यपादपानां** पुण्यवृक्षाणां, दिव्यवृक्षाणामिति यावत्, **कुसुमानि** पुष्पाणि, **समाहर** सञ्चिनु; **च** पुनः, **निर्झरात्** प्रवाहात्, **स्वादु** मिष्टं, **पानीयं** जलम्, आनय, **येन** पानीयेन, **सम्पादितपाणिपादशौचाः** कृतहस्तपादप्रक्षालनाः सन्तः, **प्रविश्य** प्रकृतायतनाभ्यन्तरं गत्वा, **भगवन्तम्** ऐश्वर्यशालिनम्, अस्य **देवतायतनस्य** देवमन्दिरस्य, **अन्तः प्रतिष्ठितं** मध्ये प्रतिष्ठितं, देवं, **पश्यामः** दृष्टिगोचरीकुर्मः, **च** पुनः, **पूजयामः** आराधयामः, **हि** यतः, **अत्र** अस्मिन् देवे, **साक्षात्** प्रत्यक्षरूपेण, **विलोकिते** दृष्टे सति, पुनः **स्वहस्तेन** निजकरेण, **अभ्यर्चिते** सम्यक् पूजिते सति, **च** पुनः, **परमया** उत्कृष्टया, **भक्त्या** प्रीत्या, **महार्थाभिः** उत्कृष्टार्थाभिः, **स्तुतिभिः** स्तोत्रैः, **स्तुते** सति, **एषा** इयं, **नः** अस्माकं, यात्रा, **विशेषतः** अत्यन्तं, **फलवती** सफला भविष्यति, इति [फ]। **एवम्** अनेन प्रकारेण, **उक्तः** कथितः, **सः** तारकः, **विहस्य** विशेषेण हसित्वा, **मां प्रत्यभाषत** प्रत्युक्तवान्, किमित्याह–कुमार! **सर्वं** भवदुपदिष्टं समस्तं कार्यं, **सम्पाद्यते** अनुष्ठीयते, **किं** किन्तु, इदं पुनः, **विज्ञापयामि** आवेदयामि, **इह** अस्मिन् आयतने, **कथं** केन प्रकारेण, **प्रवेष्टव्यं** प्रवेष्टुं शक्यम्, **अस्य** आयतनस्य, **पुरस्ताद्** अग्रे, **गोपुरप्रतिबद्धं** पुरद्वारावृतम्, **अम्बरोत्तम्भिना**

स दूरमुभयतः प्रसृतेन टङ्कच्छिन्नपर्वतकटकसङ्गिना प्राकारेणैव वारितः, यानि त्वस्य पार्श्वतः संभवन्ति प्रतोलिकासु क्षुद्रद्वारकाणि तान्यपि नभस्तलनिर्विशेषभित्तेरस्यैव प्राकारस्य प्रकर्षप्राप्तेन स्वच्छतागुणेन दुरुपलक्ष्यतां नीतानि, तदेतदधुना प्राप्तकालम्—अत्रैव स्थिताः प्रतिपालयामः क्षणमात्रं, यावदस्माद् देवतायतनात् कोऽपि भूगोचरः खेचरो वा निर्याति, योऽस्मभ्यमस्मिन्नवतरणमार्गमुपदिशति, अस्य चावश्यमभ्यन्तरे केनापि भवितव्यम् अचिरनिर्वृत्तयात्रोत्सवं हीदमुद्भाव्यते लिङ्गैः, तथाहि—अत्र तुङ्गत्वादधिकसंसृज्यमानसमीरणेष्वपि द्वारतोरणेषु सान्द्ररुचयश्चन्दनप्रवालवन्दनमालाः, प्रत्यग्ररचिताभिश्चीनांशुकपताकाभिः पल्लवितशिखराणि चामीकरचक्रदोलायन्त्राणि [ब], गुणनिकाप्रासादस्य च पृष्ठवेदिकायामिन्द्रनीलमय्यामासादितप्रकटपरभागानि पिशुनयन्ति वारसुन्दरीवृन्दस्य रासविभ्रमभ्रमणमभिनवमम्लानयावकपङ्काङ्कानि पदमुद्रापरिपाटिमण्डलानि, सततमास्फालितानां च वादित्राणामारवेण विद्रावितानि त्रासात् समासन्नतरुशाखाशिखासु कृतस्थितीनि नाद्यापि निकटीभवन्ति शिखराग्रकोटरकुलायशाय्यीनि पारापतपतत्रिकुलानि,

---

टिप्पनकम्—**प्रकटपरभागानि** प्रकाशितशोभानि। **प्रततं** विस्तीर्णं सन्ततं वा। **कुलायः**-पक्षिगृहम्। **चञ्चूर्यमाणानि** अत्यर्थं गच्छन्ति, **व्यात्युक्षी** परस्परसेचनम् [भ]।

गगनमण्डलावरोधिना, **मणिस्तम्भतोरणेन** मणिमयस्तम्भावलम्बिबहिर्द्वारेण, **तिरस्कृततरणिरथसञ्चारं** तिरस्कृतः—निवारितः, तरणिरथसञ्चारः—सूर्यरथप्रचारो येन तादृशम्, **यत्** यतः, **तावद्** वाक्यालङ्कारे, इदं, **द्वारं** निरुक्तायतनप्रवेशनिर्गमस्थानम्, **अवलोक्यते** दृश्यते। **अनेन** द्वारेण, यः, **अवतारः** प्रवेशः, स **दूरं** दूरपर्यन्तम्, **उभयतः** भागद्वये, **प्रसृतेन** विस्तृतेन, **टङ्कच्छिन्नपर्वतकटकसङ्गिना** टङ्केन-तक्षणशलाकया, छिन्नं—नष्टं, यत् पर्वतकटकं-पर्वतनितम्बः, तत्सङ्गिना-तत्सङ्गतेन, प्राकारेणैव, **वारितः** अवरुद्धः। **अस्य** द्वारस्य, **पार्श्वतः** पार्श्वे, **प्रतोलिकासु** रथ्यासु, यानि तु **क्षुद्रद्वारकाणि** लघुद्वाराणि, **सम्भवन्ति** सम्भावनागोचरीभवन्ति, तान्यपि, **नभस्तलनिर्विशेषभित्तेः** गगनतलाविशेषकुड्यस्य, अस्यैव प्राकारस्य, **प्रकर्षप्राप्तेन** उत्कर्षमापन्नेन, **स्वच्छतागुणेन** उज्ज्वलतागुणेन, **दुरुपलक्ष्यतां** दुःखेनोपलक्षणीयतां, **नीतानि** प्रापितानि। **तत्** तस्माद्धेतोः, अधुना, **एतत्** इदमेव कार्यं, **प्राप्तकालं** प्राप्तावसरं, वर्तत इति शेषः, यत्, **अत्रैव** अस्मिन्नेव स्थाने, स्थिताः सन्तः, क्षणमात्रं, **प्रतिपालयामः** प्रतीक्षामहे, यावत् **अस्मात्** प्रत्यक्षभूतात्, **देवतायतनाद्** देवमन्दिरात्, कोऽपि, **भूगोचरः** भूमिवास्तव्यः, मानव इत्यर्थः, **खेचरो वा** देवो वा, **निर्याति** निर्गच्छति, यः, अस्मभ्यम्, **अस्मिन्** आयतने, **अवतरणमार्गं** प्रवेशमार्गम्, **उपदिशति** उपदेक्ष्यति, **च** पुनः, **अस्य** आयतनस्य, **अभ्यन्तरे** मध्ये, केनापि, **अवश्यं** निश्चितं, **भवितव्यं** भवितुं स्थातुमुचितम्। **हि** यतः, **लिङ्गैः** वक्ष्यमाणलक्षणैः, **इदम्** आयतनम्, **अचिरनिर्वृत्तयात्रोत्सवम्** अचिरं—शीघ्रमेव, निर्वृत्तः—सम्पन्नः, यात्रोत्सवः—लोकयात्राप्रयुक्त उत्सवो यस्मिंस्तादृशम्, **उद्भाव्यते** प्रत्याय्यते। तथाहि-**अत्र** अस्मिन् आयतने, **तुङ्गत्वात्** उच्चत्वात्, **अधिकसंसृज्यमानसमीरणेष्वपि** अधिकं यथा स्यात् तथा, संसृज्यमानः-संश्लिष्यमाणः, समीरणः—पवनो येषु तादृशेष्वपि, **द्वारतोरणेषु** द्वारप्रदेशवर्तिबहिर्द्वारेषु, **सान्द्ररुचयः** अमन्दद्युतयः, **चन्दनप्रवालवन्दनमालाः** चन्दनपल्लवमयद्वारपूजाङ्गमालाः; पुनः **प्रत्यग्ररचिताभिः** अभिनवनिर्मिताभिः, **चीनांशुकपताकाभिः** चीनदेशीयसूक्ष्मवस्त्रपताकाभिः, **पल्लवितशिखराणि** व्याप्तोर्ध्वदेशानि, **चामीकरचक्रदोलायन्त्राणि** सुवर्णसमूहमयान्दोलनयन्त्राणि [ब]। **च** पुनः, **गुणनिकाप्रासादस्य** नृत्यगृहस्य, **इन्द्रनीलमय्यां** मरकतमणिमय्यां, **पृष्ठवेदिकायां** पृष्ठवर्तिवेद्याम्, **आसादितप्रकटपरभागानि** प्राप्तस्फुटोत्कर्षाणि, **अम्लानयावकपङ्काङ्कानि** उज्ज्वलालक्तकद्रवचिह्नितानि, **पदमुद्रापरिपाटिमण्डलानि** चरणप्रतिकृतिपरम्परापटलानि, **वारसुन्दरीवृन्दस्य** वेश्यागणस्य, **अभिनवं** नवीनं, **रासविभ्रमभ्रमणं** रासविभ्रमेण—नृत्यलीलया, भ्रमणं, **पिशुनयन्ति** सूचयन्ति। **च** पुनः, **सततं** विस्तीर्णं संततं वा, **आस्फालितानाम्** आहतानां, **वादित्राणां** वाद्यानाम्, **आरवेण** ध्वनिना, **विद्रावितानि** अपसारितानि, पुनः **त्रासात्** भयाद्धेतोः,

झङ्कारमुखरितमण्डपद्वारदेशानि च सूचयन्त्यवचूलकुसुमस्रजां प्राचुर्यमग्रतश्चञ्चूर्यमाणानि चञ्चरीकचक्रवालानि, क्रीडारसाक्षिप्तेन च कुर्वता व्यात्युक्षीमितस्ततः कनकशृङ्गैर्भुजङ्गलोकेन क्षिप्तमेतान्यपि क्षरन्ति विरलविरलैर्बिन्दुभिः कुङ्कुमारुणं केलिपुष्करिणीनां वारि प्राकारमूलमरकतप्रणालानि' [भ] । इति व्याहरत्येव तस्मिन्नकस्मादग्रतो दिगन्तसर्पी, तर्पयन्निव सुधारसस्रोतसा श्रुतिविवरमग्रचञ्चुनिश्चलधृतार्धोपभुक्तशैवालप्रवालैर्युगपदावलितकण्ठनालमाकर्णितः सोत्कण्ठैरायतनवापीकलहंसैः, सत्वरोपसृतवेलासरित्सारसरसितसंभिन्नेन विस्तारितस्तारेण जघनपुलिनसारसीनां रसनानां शिञ्जितेन, दोलायमानभुजलतोल्लासितेन प्रबलीकृतः प्रतिवेलविघटमानसंनिवेशानां कनककङ्कणानां क्वणितेन, मेखलागुणस्खलनविशृङ्खलेन मुखरितो वल्गदुच्चकुचमण्डलान्दोलितानामायामिना मुक्ताहाराणां रणितेन, तारतरोच्चारेण गतिरभसविच्युतानामासाद्यासाद्य

टिप्पनकम्—तारतरोच्चारेण दीर्घतरोच्चारणेन । तलीनं–कृशम् । संक्रमः–मार्गः । **स्त्रैणस्य** स्त्रीसमूहस्य । **मसृणतारः** कोमलोच्चः [म] ।

समासन्नतरुशाखाशिखासु समीपवर्तिवृक्षविटपाग्रभागेषु, **कृतस्थितीनि** कृतनिवासानि, **शिखराग्रकोटरकुलायशायीनि** निरुक्तायतनशिखरदेशाग्रवर्तिरन्ध्रनिर्मितनीडाधिकरणकशयनशीलानि, **पारापतपतत्रिकुलानि** कपोतजातीयपक्षिगणाः, **अद्यापि** अधुनापि, न **निकटीभवन्ति** निकटमुपसर्पन्ति । पुनः **झङ्कारमुखरितमण्डपद्वारदेशानि** झङ्कारैः–ध्वनिविशेषैः, मुखरितः–वाचालितः, मण्डपस्य द्वारदेशो यैस्तादृशानि, **अग्रतः** अग्रभागे, **चञ्चूर्यमाणानि** पुनः पुनरतिशयेन वा भ्रमन्ति, **चञ्चरीकचक्रवालानि** भ्रमणमण्डलानि, **अवचूलकुसुमस्रजां** द्वारदेशाधोऽवनतपुष्पमालानां, **प्राचुर्यम्** आधिक्यं, **सूचयन्ति** प्रत्याययन्ति । **च** पुनः, **क्रीडारसाक्षिप्तेन** क्रीडाकौतुकाकृष्टेन, **इतस्ततः** अत्र तत्र, **व्यात्युक्षीम्** अन्योऽन्यं सेचनं, कुर्वता, **भुजङ्गलोकेन** विटजनेन, **कनकशृङ्गैः** सुवर्णमयजलोत्क्षेपणयन्त्रैः, **क्षिप्तं** प्रकीर्णं, **केलिपुष्करिणीनां** जलक्रीडाक्षेत्रभूतसमचतुरस्रखातजलाशयानां, **कुङ्कुमारुणं** कुङ्कुमरक्तं, **वारि** जलं, **प्राकारमूलमरकतप्रणालानि** प्राकाराधस्तनेन्द्रनीलमणिमयप्रणाल्यः, **विरलविरलैः** विरलप्रकारकैः, विच्छिन्नधारैरिति यावत्, **बिन्दुभिः** जलकणरूपैः, **क्षरन्ति** स्यन्दयन्ति [भ] । **इति** इत्थं, **तस्मिन्** तारके, **व्याहरत्येव** कथयति सत्येव, **अकस्मात्** अतर्कितम्, **अग्रतः** अग्रभागे, **मसृणतारः** कोमलोच्चः, **प्रतिक्षणं** क्षणे क्षणे, **अधिगताधिकाधिकव्यक्तीनां** प्राप्तात्यन्तप्राकट्यानां, **नूपुराणां** पादभूषणानां, **झात्कारः** झणत्कारः, **उच्चचार** उच्चरितवान्, कीदृशः ? **दिगन्तसर्पी** दिगन्तविस्तारी । पुनः **सुधारसस्रोतसा** अमृतरसप्रवाहेण, **श्रुतिविवरं** कर्णकुहरं, **तर्पयन्निव** प्रीणयन्निव, **अग्रचञ्चुनिश्चलधृतार्धोपभुक्तशैवालप्रवालैः** अग्रचञ्चुना–चञ्च्वग्रभागेन, धृतानि–गृहीतानि, अर्धोपभुक्तानि–अर्धचर्वितानि, शैवालप्रवालानि–जलीयतृणनूतनपत्राणि यैस्तादृशैः, **सोत्कण्ठैः** उत्सुकैः, **आयतनवापीकलहंसैः** निरुक्तगृहदीर्घिकाकादम्बैः, **युगपदावलितकण्ठनालं** युगपत्–एककालावच्छेदेन, आवलितम्–ईषद्वक्रितं, कण्ठनालं–कण्ठकाण्डं यस्मिंस्तादृशं यथा स्यात् तथा, **आकर्णितः** श्रुतः, पुनः **सत्वरोपसृतवेलासरित्सारसरसितसम्भिन्नेन** सत्वरं–शीघ्रम्, उपसृतैः–उपगतैः, वेलासरित्सारसानां–तटवर्तिनदीसम्बन्धिनां पक्षिविशेषाणां, रसितैः–कूजितैः, सम्भिन्नेन–संमिश्रणेन, **जघनपुलिनसारसीनां** कटिपुरोभागात्मकसैकतवर्तिसारस्याख्यपक्षिणीरूपाणां, **रसनानां** काञ्चीनां, **तारेण** उच्चेन, **शिञ्जितेन** ध्वनिना, **विस्तारितः** वर्धितः । पुनः **दोलायमानभुजलतोल्लासितेन** आन्दोल्यमानबाहुरूपलतोपजनितेन, **प्रतिवेलविघटमानसन्निवेशानां** प्रतिक्षणविश्लिष्यमाणसंस्थानानां, **कनककङ्कणानां** सुवर्णमयकरभूषणानां, **क्वणितेन** झणत्कारेण, **प्रबलीकृतः** प्रचुरीकृतः । पुनः **मेखलागुणस्खलनविशृङ्खलेन** काञ्चीरज्जुस्खलनतः परिपाटीशून्येन, **वल्गदुच्चकुचमण्डलान्दोलितानां** वल्गता–उद्वेलता, उच्चकुचमण्डलेन–उन्नतस्तनमण्डलेन, आन्दोलितानां–कृतान्दोलनानां, **मुक्ताहाराणां** मुक्तामणिमालानां, **आयामिना** दीर्घेण, **रणितेन** ध्वनितेन, **मुखरितः** वाचालः । पुनः **गतिरभसविच्युतानां** गमनवेगस्खलितानाम्, पुनः **सोपानमणिफलकम्** अधिरोहिणीमणिपट्टकम्, आसाद्य आसाद्य, **आबद्धफालानां** धृतोत्प्लुतीनां, **सीमन्तकालङ्कारमाणिक्यानां** केशवेशालङ्करणरत्नानां, **जवावतरणजन्मना** जवेन–वेगेन, यत् अवतरणम्–अधस्तादागमनं, तज्जन्मना–तज्जन्येन, **तारतरोच्चारेण** दीर्घतरोच्चारणेन, **स्वनसन्तानेन** ध्वनिसमूहेन,

सोपानमणिफलकमाबद्धफालानां सीमन्तकालंकारमाणिक्यानां जवावतरणजन्मना स्वादूकृतः स्वनसंतानेन, तलिनताडिततन्त्रीध्वनिकलेन च बहलितः विलोलकुसुमापीडहेलोत्पतितानां गुञ्जतां वियति बद्धमण्डलानामलिगणानां गुङ्कृतेन, प्रत्यासन्न एव प्राकारान्तरितदर्शनस्य प्रतिक्षणमधिगताधिकाधिकव्यक्तीनां मधुरगम्भीरेण चरणपातधमधमारवेण संवर्धितः सविधमागच्छतः सोपानसंक्रमेण स्त्रैणस्य मसृणतारो नूपुराणामुच्चचार झात्कारः [म] ।

तदनुसारप्रहितलोचनश्च पुरः प्राकरशिखरे पुञ्जीभूताः, नातिदूरवर्तिनीः, अतिभास्वरतया कार्तस्वरपताका इव पातालादुद्यतो रविरथस्योल्लसिताः, विद्युत इवोदधिजलमवगाहमानैर्घनैरपघनेभ्यो विश्लेषिताः, दिव्यौषधीरिव मथनोत्थितस्य धन्वन्तरेर्विस्मृताः, कल्पलता इव पारिजातजन्मभूमिमवलोकयितुममरकाननादागताः, दीधितीरिवास्तसमये गभस्तिमालिनो विगलिताः, कुलिशार्चिष इव सपक्षपर्वतान्वेषणाय समुद्रमायाताः, कनककमलिनीमृणालिका इवानिर्वाणसुरवारणकवलदानार्थमिन्द्राधोरणैरुपसंगृहीताः, समुद्रजलदेवता इव प्रभातमारुतोद्वेगादातपं सेवितुमुत्थिताः, हस्तदीपिका इव धनदाधिराजस्य, अवचूलरत्नमालिका इव नभस्तल-

---

टिप्पनकम्—अपघनः-अङ्गम् । अनिर्वाणः-मत्तः [य] ।

स्वादूकृतः श्रोत्रास्वाद्यतामापादितः । **च** पुनः, **तलिनताडिततन्त्रीध्वनिकलेन** तलिनं-स्तोकं यथा स्यात् तथा, ताडिता या तन्त्रीः-वीणागुणः, तस्या यो ध्वनिस्तेन, कलेन-मधुरेण, **विलोलकुसुमापीडहेलोत्पतितानां** विशेषेण लोलं-चञ्चलं यत्, कुसुमापीडं-पुष्पशिरोमाल्यं, तस्मात् हेलया-लीलया, उत्पतितानाम्-उड्डीनानां, **गुञ्जतां** शब्दायमानानां, **वियति** आकाशे, **बद्धमण्डलानां** बद्धश्रेणीनाम्, **अलिगणानां** भ्रमरवृन्दानां, **गुङ्कृतेन** ध्वनिविशेषेण, **बहलितः** वर्धितः । पुनः **प्रत्यासन्न एव** निकटस्थ एव, **प्राकारान्तरितदर्शनस्य** प्राकारावरुद्धदर्शनस्य, **सोपानसंक्रमेण** सोपानमार्गेण, **सविधं** निकटम्, आगच्छतः, **स्त्रैणस्य** स्त्रीसमूहस्य, **मधुरगम्भीरेण** मधुरसान्द्रेण, **चरणपातधमधमारवेण** पादप्रक्षेपणजनितध्वनिविशेषेण, **संवर्धितः** सम्यग्वर्धितः [म] ।

च पुनः, **तदनुसारप्रहितलोचनः** तदनुसारेण-तदनुसन्धानेन, व्यापारितनयनः, **पुरः** अग्रे, **झटिति** शीघ्रं, **कन्यकाः** कुमारिकाः, **अद्राक्षं** दृष्टवानहम्, कीदृशीः ? **प्राकारशिखरे** प्राकारोपरि, **पुञ्जीभूताः** संहताः । पुनः **नातिदूरवर्तिनीः** किञ्चिन्निकटवर्तिनीः । पुनः **अतिभास्वरतया** अत्युज्ज्वलतया, पातालाद्, **उद्यतः** उद्गच्छतः, **रविरथस्य** सूर्यरथसम्बन्धिनीः, **उल्लसिताः** उच्छ्रिताः, **कार्तस्वरपताका इव** सुवर्णपताका इव । पुनः **उदधिजलं** समुद्रजलम्, **अवगाहमानैः** प्रविशद्भिः, **घनैः** मेघैः, **अपघनेभ्यः** स्वशरीरावयवेभ्यः, **विश्लेषिताः** विमुक्ताः, **विद्युत इव** तडिल्लता इव । पुनः **मथनोत्थितस्य** सागराऽऽलोडनोद्भूतस्य, **धन्वन्तरेः** स्ववैद्यस्य, **विस्मृताः** स्मृतिपथच्युताः, **दिव्यौषधीरिव** दिव्याः-मनोहराः स्वर्गीयाः, औषधीरिव । पुनः **पारिजातजन्मभूमिं** पारिजातस्य-तदाख्यदिव्यवृक्षस्य, जन्मभूमिं-समुद्ररूपमुत्पत्तिक्षेत्रम्, **अवलोकयितुं** द्रष्टुम्, **अमरकाननात्** नन्दनवनात्, आगताः, कल्पलता इव । पुनः **अस्तसमये** अस्तकाले, **गभस्तिमालिनः** सूर्यात्, **विगलिताः** भ्रष्टाः, **दीधितीरिव** कान्तीरिव । पुनः **सपक्षपर्वतान्वेषणाय** पक्षविशिष्टावशिष्टपर्वतान्वेषणोद्देशेन, समुद्रम्, **आयाताः** आगताः, **कुलिशार्चिष इव** वज्राग्निज्वाला इव । पुनः **अनिर्वाणसुरवारणकवलदानार्थम्** अनिर्वाणस्य-मज्जनरहितस्य मत्तस्य वा, सुरवारणस्य-इन्द्रगजस्य, ऐरावतस्येति यावत्, कवलदानार्थं-ग्राससमर्पणार्थम्, **इन्द्राधोरणैः** इन्द्रहस्तिपकैः, **उपसंगृहीताः** सञ्चिताः, **कनककमलिनीमृणालिका इव** सुवर्णकमलिनीबिसलता इव । पुनः **प्रभातमारुतोद्वेगात्** प्रातःकालिकपवनोपद्रवाद्धेतोः, **आतपं** सूर्यमरीचिं, सेवितुम्, **उत्थिता** ऊर्ध्वमागताः, **समुद्रजलदेवता इव** समुद्रजलाधिष्ठानदेवता इव । पुनः **धनदाधिराजस्य** कुबेरनृपतेः, **हस्तदीपिका इव** हस्ततलावलम्बितदीपिका इव । पुनः **नभस्तलवितानकस्य** गगनतलरूपस्योल्लोचस्य, **अवचूलरत्नमालिका इव** अधोमुखरत्नमाला इव । **सुवर्णचम्पककलिकासवर्णाः** सुवर्णमयं यच्चम्पकं-पुष्पविशेषः, तत्कलिकायाः-

वितानकस्य, काश्चित् सुवर्णचम्पककलिकासवर्णाः [य], काश्चिदसितोत्पलदलश्यामावदातत्विषः कस्तूरिकातिलककलङ्कितैराननेन्दुभिः शतचन्द्रमिव गगनतलमादधानाः, विकासिभिर्नयनविक्षेपैरुच्छलच्छफरसहस्रानिव सागरोद्देशानुपदर्शयन्तीः, आशामुखव्यापिना मुखामोदेन प्रवृत्तामृतमथनमिव तं प्रदेशमादधानाः, विलेपनपरिमलेनान्यमिव पारिजातोद्गममातन्वतीः, आभोगशालिभिः पयोधरोत्सेधैः पर्वतमयमपरमिव सेतुमासूत्रयन्तीः, विभ्रमावलोकितैरुदधिमिव मर्यादालङ्घनमध्यापयन्तीः, भ्रूविभ्रमैर्मन्मथमिव धनुर्वेदं शिक्षयन्तीः, अखिलजगदाक्षेपकारिरूपाः कन्यका झगित्यद्राक्षम [र]। तासां च मध्ये शब्दविद्यामिव विद्यानाम्, कौशिकीमिव रसवृत्तीनाम्, उपजातिमिव छन्दोजातीनाम्, जातिमिवालंकृतीनाम्, वैदर्भीमिव रीतीनाम्, प्रसत्तिमिव काव्यगुणसंपदाम्, पञ्चमश्रुतिमिव गीतीनाम्, रसोक्तिमिव भणितीनाम्, अधिकमुद्भासमानाम्, अबहुदिवसोपारूढयौवनामूर्धस्थिताम्, आसन्नवेत्रधारीस्कन्धविन्यस्तवामहस्तकिसलयाम्, उभयतः सलीलमुद्धूयमानचामरकलापाम्, अवलम्बमानस्थूलमुक्ताफलावचूलेन जलधिफेनपटलेनेव परस्परानुलग्नविगलज्जलबिन्दुना गगनमुत्पतितेन श्वेतातपत्रेण वारितातपाम्, अशोकतरुपल्लवाताम्रतलस्य चरणपङ्कजयुगलस्य

तत्कोरकस्य, समानवर्णाः–तुल्यवर्णाः, एवंविधाः, **काश्चित्** कतिपयाः [य]। पुनः **असितोत्पलदलश्यामावदातत्विषः** असितं–कृष्णं, यत् उत्पलं–कमलं, तद्दलस्येव–तत्पत्रस्येव, श्यामा–कृष्णा, अवदाता–उज्ज्वला च, त्विट्–कान्तिर्यासि तादृशीः, **काश्चित्** कतिचित् तु, **कस्तूरिकातिलककलङ्कितैः** मृगनाभिस्निग्धचूर्णतिलकलाञ्छितैः, **आननेन्दुभिः** मुखचन्द्रैः, **गगनतलम्** आकाशमण्डलं, **शतचन्द्रमिव** शतसंख्यकचन्द्रोद्भासितमिव, **आदधानाः** जनयन्तीः, **विकासिभिः** विस्तारिभिः, **नयनविक्षेपैः** नेत्रविस्फारणैः, उन्मीलितनेत्रैरिति यावत्, **सागरोद्देशान्** समुद्रोर्ध्वदेशान्, **उच्छलच्छफरसहस्रानिव** उच्छलत्–उत्सर्पत्, शफराणां–मत्स्यविशेषाणां, सहस्रं येषु तादृशानिव, **उपदर्शयन्तीः** प्रत्याययन्तीः। पुनः **आशामुखव्यापिना** दिगन्तविस्तारिणा, **मुखाऽऽमोदेन** मुखोत्कटसौरभेण, **तं** समुद्रसम्बन्धिनं, **प्रदेशं**, **प्रवृत्तामृतमथनमिव** प्रारब्धामृतमन्थनमिव, **आदधानाः** आपादयन्तीः। पुनः **विलेपनपरिमलेन** अङ्गोपलेपनद्रवसौरभेण, **अन्यम्** अभिनवं, **पारिजातोद्गममिव** पारिजातवृक्षाङ्कुरमिव, **आतन्वतीः** विस्तारयन्तीः सूचयन्तीरिति यावत्। पुनः **आभोगशालिभिः** विस्तारशालिभिः, **पयोधरोत्सेधैः** स्तनोन्नतिभिः, **पर्वतमयं** पर्वतात्मकम्, **अपरम्** अन्यं, **सेतुमिव** समुद्रबन्धमिव, **आसूत्रयन्तीः** आबध्नतीः। पुनः **विभ्रमावलोकितैः** सविलासविलोकनैः, **उदधिं** समुद्रं, **मर्यादालङ्घनमिव** स्वमर्यादातिक्रममिव, **अध्यापयन्तीः** शिक्षयन्तीः। पुनः **भ्रूविभ्रमैः** भ्रूविलासैः, **मन्मथं** कामदेवं, **धनुर्वेदमिव** धनुर्विद्यामिव, शिक्षयन्तीः। पुनः **अखिलजगदाक्षेपकारिरूपाः** समस्तजगत्तिरस्कारिस्वरूपाः [र]।

च पुनः, **तासां** कन्यकानां, मध्ये, **द्विरष्टवर्षवयसम्** द्विगुणिताष्टवर्षवयस्कां, षोडशवर्षवयस्कामित्यर्थः, **दिव्यरूपां** मनोहराकारां, **कन्यकां** कुमारिकाम्, **अद्राक्षं** दृष्टवानहम्, कीदृशीम्? **विद्यानां** चतुर्दशविद्यानां, मध्ये, **शब्दविद्यामिव** व्याकरणविद्यामिव, पुनः **रसवृत्तीनां** "भारती सात्वती चैव, कौशिक्यारभटी तथा। चतस्रो वृत्तयश्चैता, यासु नाट्यं प्रतिष्ठितम्"। इति भरतोक्तनाट्यरसरीतीनां, मध्ये, **कौशिकीमिव** कौशिकीं रीतिमिव, पुनः **छन्दोजातीनां** छन्दःसामान्यमध्ये, **उपजातिमिव** तत्संज्ञकं छन्दोविशेषमिव, पुनः **अलङ्कृतीनाम्** अलङ्काराणां मध्ये, **जातिमिव** जातिनामालङ्कारमिव, पुनः **रीतीनां** गौडीपाञ्चालीवैदर्भीरूपाणां श्रव्यकाव्यसम्बन्धिसङ्घटनानां मध्ये, **वैदर्भीमिव** तदाख्योत्तमरीतिमिव, पुनः **काव्यगुणसम्पदां** काव्यसम्बन्धिगुणसम्पत्तीनां मध्ये, **प्रसत्तिमिव** प्रसादरूपोत्तमगुणमिव, पुनः **गीतीनां** स्वराणां मध्ये, **पञ्चमश्रुतिमिव** पञ्चमाख्यस्वरविशेषमिव, पुनः **भणतीनां** वाचां मध्ये, **रसोक्तिमिव** रसविशिष्टवाचमिव, **अधिकम्** अत्यन्तम्, **उद्भासमानाम्** उज्ज्वलन्तीम्। पुनः **अबहुदिवसोपारूढयौवनामूर्धस्थितां** अचिरोत्पन्नयौवनानां–नवयौवनानामित्यर्थः, मूर्धनि–सर्वेत उपरि निषण्णाम्। पुनः **आसन्नवेत्रधारीस्कन्धविन्यस्तवामहस्तकिसलयाम्** आसन्नायाः–पार्श्वस्थितायाः, वेत्रधार्याः–चेट्याः, परिचारिकाया इति यावत्, स्कन्धे विन्यस्तं–स्थापितं, वामहस्तरूपं किसलयं–पल्लवं यया तादृशीम्। पुनः **उभयतः** पार्श्वद्वये, **सलीलं** सक्रीडं यथा स्यात् तथा, **उद्धूयमानचामरकलापाम्** उद्धूयमानः–वीज्यमानः, चामरकलापः–चामरगणो यस्यास्तादृशीम्। पुनः **श्वेतातपत्रेण** श्वेतच्छत्रेण, **वारितातपां** वारितः–

विलासचलनेषु सर्वतः प्रसरतातिसंनिहितमुखरमणिनूपुरस्वनेन प्रभासंतानेन श्रूयमाणराजहंसरवमाकाशकमलिनीवनमिवोद्विकासमुपदर्शयन्तीम् [ल], अङ्गुलिप्रणयिपद्मरागोर्मिकारागसंवर्धितप्रभासमृद्धिभिः समन्ततः प्रसरन्तीभिरभिनवातपताम्राभिरङ्घ्रिनखमयूखलेखासंततिभिर्दाशरथिशरकृशानुकर्शितत्विषामुदधिविद्रुमलतावनानामुज्जीवनाय कुङ्कुमरसवारिकुल्यासहस्राणीव प्रवर्तयन्तीम्, अच्छकुङ्कुमरसपिञ्जरेण मसृणमाणिक्यवलयश्रेणिना जङ्घाकाण्डयुगलेन गिरितटाघातकुण्ठितमणिप्रतिममनङ्गकरिकलभदन्तद्वितयमाक्षिपन्तीम्, उभयथापि परिमण्डलोरुणा द्विधापि निबिडकक्षाबन्धबन्धुरेण नितम्बिना जघनबिम्बेन प्रयत्ननिवसितमप्यदृश्यत्वादविद्यमानकल्पं कल्पपादपांशुकं कलयन्तीम् [व], आच्छादितोदरवलित्रयस्य हसितहारीतपक्षहरितिम्नः कञ्चुका-

---

टिप्पनकम्—ऊर्मिका-मुद्रिका। कुल्या-सारणिः। **उभयथापि परिमण्डलोरुणा** द्वाभ्यां प्रकाराभ्याम्, परिमण्डलोरुणा-वृत्तबृहज्जङ्घेन वृत्तविस्तीर्णेन च। **द्विधापि निचितकक्षाबन्धबन्धुरेण** घनकाञ्चीबन्धचारुणा निबिडपुरुषकक्षाबन्धमनोज्ञेन च। **नितम्बिना** प्रशस्तपश्चात्कटीभागेन [व]।

अवरुद्धः, आतपो यस्यास्तादृशीम्, कीदृशेन? **अवलम्बमानस्थूलमुक्ताफलावचूलेन** अवलम्बमानः-अवनमन्, स्थूलमुक्ताफलानां-स्थूलमुक्तामणीनाम्, अवचूलः-प्रान्तविलम्बिजालको यस्मिंस्तेन, केनेव?, **परस्परानुलग्नविगलज्जलबिन्दुना** परस्परानुलग्नाः-परस्परसंश्लिष्टाः, विगलन्तः-क्षरन्तः, जलबिन्दवः-पानीयकणा यत्र तादृशेन, **गगनम्** आकाशम्, **उत्पतितेन** उड्डीनेन, **जलधिफेनपटलेनेव** समुद्रफेनपुञ्जेनेवेत्युत्प्रेक्षा। पुनः **अशोकतरुपल्लवाताम्रतलस्य** अशोकवृक्षपल्लववत्, आताम्रम्-आरक्तं, तलम् अधःप्रदेशो यस्य तादृशस्य, **चरणपङ्कजयुगलस्य** पादपद्मद्वयस्य, **विलासचलनेषु** सविलासविक्षेपेषु, **सर्वतः** परितः, **प्रसरता** व्याप्नुवता, पुनः **अतिसन्निहितमणिनूपुरस्वनेन** अतिसन्निहितः-अतिनिकटः, मणिनूपुरस्वनः-मणिमयनूपुरध्वनिर्यस्य तादृशेन, **प्रभासन्तानेन** द्युतिराशिना, **श्रूयमाणराजहंसरवं** श्रूयमाणः, राजहंसरवः-राजहंसशब्दो यस्मिंस्तादृशम्, **आकाशकमलिनीवनम्** आकाशस्थकमलिनीकाननम्, **उद्विकासमिव** उत्-उत्कृष्टो विकासो यस्य तादृशमिव, **उपदर्शयन्तीं** दृष्टिगोचरतां नयन्तीम् [ल]। पुनः **अङ्घ्रिनखमयूखलेखासन्ततिभिः** पादसम्बन्धिनखकिरणपङ्क्तिसमूहैः, **कुङ्कुमरसवारिकुल्यासहस्राणीव** कुङ्कुमरसरूपं यद्वारि-जलं, तत्कुल्यानां-तत्प्रणालिकानां, सहस्राणीव **प्रवर्तयन्तीं** प्रवाहयन्तीम्, कीदृशीभिस्तत्सन्ततिभिः? **अङ्गुलिप्रणयिपद्मरागोर्मिकारागसंवर्धितप्रभासमृद्धिभिः** अङ्गुलिप्रणयिन्याः-अङ्गुलिस्नेहिन्याः, पद्मरागोर्मिकायाः-पद्मरागमणिमयाङ्गुलीयकस्य, रागेण-रक्ततया, संवर्धिता-सम्यग्वर्धिता, प्रभासमृद्धिः-द्युतिसम्पत्तिर्यासां तादृशीभिः, पुनः **समन्ततः** परितः, **प्रसरन्तीभिः** स्फुरन्तीभिः, पुनः **अभिनवातपताम्राभिः** बालातपवद् रक्ताभिः, कस्मै फलाय? **दाशरथिशरकृशानुकर्शितत्विषां** दाशरथेः-रामस्य, शरकृशानुना-बाणाग्निना, कर्शिता-कृशतामापादिता, त्विट्-कान्तिर्येषां तादृशानाम्, **उदधिविद्रुमलतावनानां** समुद्रसम्बन्धिप्रबाललतावनानाम्, उज्जीवनाय। पुनः **अच्छकुङ्कुमरसपिञ्जरेण** उज्ज्वलकुङ्कुमद्रववत् पीतवर्णेन, **मसृणमाणिक्यवलयश्रेणिना** मसृणा-स्निग्धा, माणिक्यवलयश्रेणिः-रत्नमयकङ्कणपङ्क्तिर्यस्मिन् तादृशेन, **जङ्घाकाण्डयुगलेन** काण्डाकारजङ्घाद्वयेन, **गिरितटाघातकुण्ठितमणिप्रतिमं** गिरितटाघातेन-पर्वतप्रदेशाघातेन, कुण्ठिता-प्रतिहता, मणिप्रतिमा-मणिनिर्मितो गजदन्तबन्धो यस्य तादृशम्, **अनङ्गकरिकलभदन्तद्वितयं** कामदेवहस्तिशावकदन्तद्वयम्, **आक्षिपन्तीं** निन्दयन्तीम्। पुनः **उभयथापि** उभयप्रकारेणापि वक्ष्यमाणरूपेण, **परिमण्डलोरुणा** परिमण्डलौ-वर्तुलौ, ऊरू-जानूपरिभागौ यस्य तादृशेन, परिमण्डलं-वर्तुलम्, उरु बृहच्च, तादृशेन च, पुनः **द्विधापि** प्रकारद्वयेनापि, भागद्वयेऽपीत्यर्थः, **निबिडकक्षाबन्धबन्धुरेण** सान्द्रपरिधानपश्चादञ्चलपल्लवबन्धचारुणा घनकाञ्चीबन्धनशोभिना च, **नितम्बिना** प्रशस्तकटिपश्चाद्भागद्वयस्थौल्यशालिना, **जघनबिम्बेन** कटिपुरोभागमण्डलेन, **प्रयत्ननिवसितमपि** प्रयत्नपरिहितमपि, **कल्पपादपांशुकं** कल्पवृक्षसूक्ष्मवस्त्रम्, अदृश्यत्वाद्धेतोः, **अविद्यमानकल्पम्** अविद्यमानतुल्यं, **कलयन्तीं** धारयन्तीम् [व]। पुनः **आच्छादितोदरवलित्रयस्य** आच्छादितम्, उदरसम्बन्धिवलित्रयं-रेखात्रयं येन तादृशस्य,

ग्रपल्लवस्य चञ्चलतया प्रतिक्षणमवेक्ष्यमाणविपुलनाभिमण्डलां प्रसृततनुतरङ्गपर्यायोत्क्षिप्तपद्मिनीदलोपलक्ष्यमाणसुकुमारावर्तामिवोद्याननदिकाम्, अनन्यजनिवासवेश्मनो जघनमण्डलस्योपरि परिस्फुरन्तीमायतारुणां नाभिचक्रचुम्बिनो हारनायकस्यांशुलेखां विभ्रमपताकामिव रोमराजिमरकतदण्डिकाशिखरलग्नामुद्वहन्तीम् [श], मेरुमत्सरिणा दूरदर्शिताभोगसंक्षोभितसुरासुरेण विन्ध्यगिरिणेव प्रतिदिनं प्रवर्धमानेन स्तनभरेण निरुद्ध्यमानवदनचन्द्रालोकाम्, अचिरावतीर्णेन निर्भरमदभृता यौवनवनगजेनेव दूरविक्षिप्तस्य लावण्यपयसो वीचिवलयैरिव सबुद्बुदैरविरलप्रत्युप्तवज्रोपलगणैः कनककङ्कणैरधिष्ठितकोमलप्रकोष्ठकन्दलाम् [ष], सुदर्शनोपेतेन वैकुण्ठेनेव कण्ठनालेन तुलितशङ्खाम्, प्रकटितादभ्रविभ्रमेण प्रथमयौवनावतारमरुता तरलितायतापाङ्गतरङ्गयोरन्तस्तरच्चारुतारकयोः क्षीरधवलयोरीक्षणमहानदीप्रवाहयोर्जलतुषारजालकमिवोच्छलितमच्छमुक्ताफलस्तम्बमुभय-

---

टिप्पनकम्—सुकुमारः-चारुः । अनन्यजः-कामः [श] । **सुदर्शनोपेतेन वैकुण्ठेनेव कण्ठनालेन तुलितशङ्खाम्** एकत्र चक्रोपेतेन, अन्यत्र शोभनदर्शनयुक्तेन, तुलितशङ्खाम्–अनुकृतशङ्खाम् [ष] ।

पुनः **हसितहारीतपक्षहरितिम्नः** हसितः-तिरस्कृतः, हारीतस्य–पक्षिविशेषस्य, पक्षस्य पक्षसम्बन्धी हरितिमा–हरितवर्णो येन तादृशस्य, **कञ्चुकाग्रपल्लवस्य** चोलकाञ्चलरूपपल्लवस्य, चञ्चलतया, प्रतिक्षणम्, **अवेक्ष्यमाणनाभिमण्डलाम्** अवेक्ष्यमाणं-दृश्यमानं, नाभिमण्डलं यस्यास्तादृशीम्, अत एव **प्रसृततनुतरङ्गपर्यायोत्क्षिप्तपद्मिनीदलोपलक्ष्यमाणसुकुमारावर्तां** प्रसृतेन–चञ्चलितेन, तनुतरङ्गपर्यायेण–अनुद्धततरङ्गक्रमेण, उत्क्षिप्तैः- उद्वेलितैः, पद्मिनीदलैः–कमलिनीपत्रैः, उपलक्ष्यमाणः–दृश्यमानः, सुकुमारः–चारुः, आवर्तः-जलभ्रमो यस्यास्तादृशीम्, **उद्याननदिकामिव** क्रीडाकानननदीमिव । पुनः **अनन्यजनिवासवेश्मनः** अनन्यजस्य–स्वयमेवोत्पादिनः कामदेवस्येत्यर्थः, निवासवेश्मनः–निवासगृहरूपस्य, जघनमण्डलस्य, उपरि **स्फुरन्तीम्** उल्लसन्तीम्, पुनः **आयतारुणाम्** आयतां-विस्तृताम्, अरुणां–रक्तां च, **नाभिचक्रचुम्बिनः** नाभिमण्डलस्पर्शिनः, **हारनायकस्य** हारमध्यवर्तिमणेः, **अंशुमालां** किरणश्रेणीं, **उद्वहन्तीं** धारयन्तीम्, कीदृशीमिव **रोमराजिमरकतदण्डिकाशिखरलग्नां** रोमराजिरूपा–रोमावलीरूपा, या मरकतदण्डिका–इन्द्रनीलमणिस्तम्भः, तच्छिखरलग्नां–तदुपरिस्थितां, **विभ्रमपताकामिव** विलासवैजयन्तीमिव [श] । पुनः **मेरुमत्सरिणा** सुमेरुस्पर्धिना, पुनः **दूरदर्शिताभोगसंक्षोभितसुरासुरेण** दूरदर्शितेन–दूरादेव दृष्टिगोचरतां नीतेन, आभोगेन–विस्तारेणसंक्षोभितौ–सम्भ्रमितौ, सुरासुरौ–देवदानवौ येन तादृशेन, पुनः **विन्ध्यगिरिणेव** विन्ध्याचलेनेव, **प्रतिदिनं** दिने दिने, **प्रवर्धमानेन** अतिवृद्धिमापद्यमानेन, **स्तनभरेण** स्तनभारेण, **निरुध्यमानवदनचन्द्रालोकां** निरुध्यमानः–निवार्यमाणः, वदनचन्द्रस्य–मुखरूपचन्द्रस्य, आलोकः–प्रकाशो यस्यास्तादृशीम् । पुनः **अचिरावतीर्णेन** अचिरं-शीघ्रमेव, अवतीर्णेन–प्रविष्टेन, **निर्भरमदभृता** अत्यन्तमदशालिना, **यौवनवनगजेनेव** तारुण्यरूपवनहस्तिनेव, **दूरविक्षिप्तस्य** दूरमुत्पातितस्य, **लावण्यपयसः** सौन्दर्यजलस्य, **सुबुद्बुदैः** विकृतबिन्दुविशिष्टैः, **वीचिवलयैरिव** तरङ्गसन्तानैरिवेत्युत्प्रेक्षा **अविरलप्रत्युप्तवज्रोपलगणैः** अविरलं-निरन्तरं यथा स्यात् तथा, प्रत्युप्तः–सन्निवेशितः वज्रोपलगणः–हीरकमणिगणो येषु तादृशैः, **कनककङ्कणैः** सुवर्णवलयैः, **अधिष्ठितकोमलप्रकोष्ठकन्दलाम्** अधिष्ठितं–व्याप्तं, कोमलयोः प्रकोष्ठयोः–मणिबन्धयोः, कन्दलं मूलं यस्यास्तादृशीम् [ष] । पुनः **वैकुण्ठेनेव** विष्णुनेव, **सुदर्शनोपेतेन** सुन्दरदर्शनेन, पक्षे सुदर्शनाख्यचक्रवता, **कण्ठनालेन** कण्ठकाण्डेन, **तुलितशङ्खाम्** उपमितशङ्खाम्, पक्षे धृतशङ्खाम् । पुनः **प्रकटितादभ्रविभ्रमेण** आविष्कृतबहुविलासेन, **प्रथमयौवनावतारमरुता** प्रथमयौवनप्रवेशपवनेन, **तरलितायतापाङ्गतरङ्गयोः** तरलितौ चञ्चलितौ, आयतौ दीर्घौ, अपाङ्गावेव–नेत्रप्रान्तभागावेव, तरङ्गौ ययोस्तादृशयोः पक्षे तरलितापाङ्गवत् कल्लोला ययोस्तादृशयोः, पुनः **अन्तस्तरच्चारुतारकयोः** अन्तः–मध्ये, तरन्त्यौ–प्लवमाने, चारुतारके–सुन्दरकनीनिके, पक्षे चारु–सुन्दरं, तारम्–उज्ज्वलं, कं–जलं ययोस्तादृशयोः, **क्षीरधवलयोः** दुग्धवत् स्वच्छयोः, पक्षे क्षीरेण–जलेन, शुक्लयोः, **ईक्षणमहानदीप्रवाहयोः** नयनगङ्गाप्रवाहयोः, **उच्छलितम्** उत्पतितं, **जलतुषारजालकमिव** जलनिर्मितहिमगवाक्षमिव **उभयश्रवण-**

श्रवणशिखरावलम्बिनं बिभ्राणाम् [स], अविरलावदातदन्तकुड्मलममलगण्डफलकमनिलविलुलितविनीलालकालिकमनीयमनिभृतभ्रूलताविलासमुन्नतनासावंशमभिनवप्रवालपाटलाधरमुत्कलितकालागुरुतिलकशोभमाबद्धनिबिडपुष्पापीडमाक्रीडमिव रतिपतेरुभयकर्णपाशदोलायमानमाणिक्यदन्तपत्रं वदनशतपत्रमुद्वहन्तीम्, उदधिनापि तरङ्गचलिततनुशीकरक्षोदजालकेन करविधूतश्वेतचामरेणेवोपवीज्यमानाम्, प्रत्युषसापि गगनमरकतस्थालनिहितदिनकरप्रदीपेन प्रस्तुताराात्रिकेणेव कृतोपस्थानाम्, दिगन्तैरपि दूरमुल्लसितैः साभिलाषैरिव

तरलितायतापाङ्गतरङ्गयोः अन्तस्तरच्चारुतारकयोः क्षीरधवलयोः [ईक्षणमहानदीप्रवाहयोः] ईक्षणे-नेत्रे एव महानदीप्रवाहौ तयोः, कीदृशोः? तरलितायतापाङ्गतरङ्गयोः-चञ्चलीकृतौ दीर्घनेत्रत्रिभागावेव तरङ्गौ ययोस्तौ तथोक्तौ तयोः, अन्यत्र तरलितापाङ्गवत् कल्लोला ययोस्तौ तथोक्तौ तयोः, तथा अन्तस्तरच्चारुतारकयोः-एकत्र मध्यचलच्छोभनतारिकयोः, अन्यत्रमध्यतरन्मनोज्ञोज्ज्वलजलयोः, क्षीरधवलयोः समानविशेषणम् [स]। अविरलावदातदन्तकुड्मलं दन्ता एव दन्तवत्त कुड्मलानि-अविकसितकुसुमानि यत्र तत् तथोक्तम्। अमलगण्डफलकम् एकत्र निर्मलप्रशस्तकपोलम्, अन्यत्र निर्मलकपोलवत् फलानि यत्र तत् तथोक्तम्। अनिलविलुलितनीलालकालिकमनीयं वातचलितकृष्णकुटिलकेशा एव अलयः-भ्रमराः, तैरेकत्र, अन्यत्र अलकवद् ये भ्रमराः, तैः कान्तम्। अनिभृतभ्रूलताविलासं चञ्चलभ्रूबिब्बोकम्, चञ्चलभ्रूलतावद् वीनां-पक्षिणां, लासः-लसनं यत्र तत् तथोक्तम्। उन्नतनासावंशम् उच्चप्रशस्तनासिकम्, उन्नतवंशं च। अभिनवप्रवालपाटलाधरं नूतनपत्रवद् रक्तोऽधरो यत्र तत् तथोक्तम्, अन्यत्र प्रवाला एव रक्ताधरो यत्र तत्र तत् तथोक्तम्। [उत्कलितकालागुरुतिलकशोभं] उत्कलितकालागुरुविशेषकविभूषम्, अन्यत्र उत्कलितकालागुरुतिलकवृक्षशोभम्। आबद्धनिबिडपुष्पापीडम् एकत्र रचितगाढकुसुमसंघात [......म्, आ] क्रीडमिव क्रीडापर्वतमिव[ह]॥

शिखरावलम्बिनं कर्णद्वयोर्ध्वदेशावलम्बिनम्, अच्छमुक्ताफलस्तबकं विमलमुक्तामणिगुच्छं, बिभ्राणां दधानाम्[स]। पुनः कीदृशीम्? वदनशतपत्रं मुखकमलम्, उद्वहन्तीं धारयन्तीम्, कीदृशमिव? रतिपतेः कामदेवस्य, आक्रीडमिव सर्वोपभोग्योद्यानमिव, कीदृशं वदनकमलं, कीदृशं चोद्यानम्? अविरलावदातदन्तकुड्मलम् अविरलाः-निरन्तराः, अवदाताः-स्वच्छाः, दन्तकुड्मलाः-दन्तरूपा विकाशोन्मुखकलिका यस्मिंस्तादृशम्, पक्षे अविरलावदातदन्ता इव कुड्मला यस्मिंस्तादृशम्, पुनः अमलगण्डफलकं अमलं-निर्मलं, गण्डफलकं-कपोलरूपं पट्टकं, प्रशस्तकपोलमित्यर्थः, यत्र तादृशम्, पक्षे निर्मलकपोलवत् फलानि यत्र तादृशम्, पुनः अनिलविलुलितविनीलालकालिकमनीयम् अनिलविलुलितैः-वायुविचलितैः, विनीलैः-अतिश्यामैः, अलकालिभिः-कुटिलकेशरूपभ्रमरैः, यद्वा अनिलविलुलितानां विनीलानाम्, अलकानां-कुटिलकेशानाम्, आल्या-पङ्क्त्या, कमनीयं-मनोहरम्, पक्षे अनिलविलुलितविनीलालकसदृशैः, अलिभिः-भ्रमरैः, कमनीयम्, पुनः अनिभृतभ्रूलताविलासम् अनिभृतः-चञ्चलः, भ्रूलतायाः-नेत्रोपरितनरोमराज्याः, विलासः-विभ्रमो यत्र तादृशम्, पक्षे अनिभृतभ्रूलतावत् वीनां-पक्षिणां, लासः-लसनं क्रीडनं यत्र तादृशम्, पुनः उन्नतनासावंशम् उन्नतः-उच्चः, नासावंशः-नासिकारूपवंशः प्रशस्तनासिका यत्र तादृशम्, पक्षे उन्नतनासाः-उच्चशब्दाः, वंशाः-वेणवो यत्र तादृशम्, पुनः अभिनवप्रवालपाटलाधरम् अभिनवप्रवालवत्-नूतनपल्लववद् नूतनप्रवालाभिधरक्तमणिवत्, पाटलाधरः-रक्तवर्णं ओष्ठो यस्मिंस्तादृशम्, पक्षे नूतनपल्लवयुक्तपाटलाभिधवृक्षधारकम्, पुनः उत्कलितकालागुरुतिलकशोभम् उत्कलिता-उद्भासिता, कालागुरुतिलकेन-सुरभिद्रव्यविशेषकृततिलकेन, शोभा-चारुता यत्र तादृशम्, पक्षे उत्कलिताः-विकसिता ये कालागुरुवृक्षाः, ये च तिलकवृक्षाः, तैः शोभा यत्र तादृशम्, पुनः आबद्धनिबिडपुष्पापीडम् रचितघनपुष्पशिरोमाल्यम्, पक्षे आबद्धानि-वृक्षाप्रसंबद्धानि, निबिडानि पुष्पाणि एव, आपीडः-शिरोमाल्यं यस्य तादृशम्, पुनः उभयकर्णपाशदोलायमानमाणिक्यदन्तपत्रम् उभयकर्णपाशयोः-शोभनोभयकर्णयोः, दोलायमानं-दोलनं कुर्वत्, माणिक्यदन्तपत्रं-माणिक्यमयं दन्तपत्रं-कुन्दपुष्पं यस्य तादृशम्। पुनः उदधिनापि समुद्रेणापि, तरङ्गचलिततनुशीकरक्षोदजालकेन तरङ्गोच्छलितेन सूक्ष्मजलकणचूर्णपुञ्जेन, करविधूतश्वेतचामरेणेव हस्तोत्क्षिप्तशुभ्रचामरेणेव, उपवीज्यमानां पवनेन संयोज्यमानाम्। पुनः

प्रतीष्यमाणपटुविलेपनामोदाम् [ह], वेलावनतरुभिरपि विबुद्धशकुनिकृतकोलाहलैरुद्भूतमदनोन्मादैरिव परिवृताम्, अन्तरिक्षेणापि गलदवश्यायबिन्दुना बद्धस्मरस्वेदेनेवोत्सङ्गिताम्, निशान्तमरुताप्याकृष्टकमलकेसरचयेन रोमाञ्चिताङ्गेनेवालिङ्गिताम्, मदशक्तिमिव मन्दरान्दोलनात् पलायितां मदिरायाः, निष्यन्दधारामिव मुष्टिनिपीडनाद् विगलितामनङ्गेक्षुचापयष्टेः, द्विरष्टवर्षवयसं दिव्यरूपां कन्यकामद्राक्षम् [क्ष]। इति कथारसाक्षिप्तचेतसि स्ववृत्तान्तमावेदयति समरकेतौ निश्चलपक्ष्मलेखे लिखित इव पश्यति तदीयमुखमभिमुखप्रहितदृशि सभ्यलोके श्लथीकृतान्तरकथेष्वाकर्णयत्सु सकुतूहलमन्तरान्तराविस्तारितहर्षकोलाहलेषु कमलगुप्तप्रभृतिषु प्रधानराजपुत्रेषु प्रचलितशिरसि सप्रपञ्चमाकर्णयति सरसतां कथापञ्जरस्य मञ्जीरमुख्ये बन्दिवृन्दे सहसैव हर्षोत्फुल्ललोचना प्रविश्य प्रतीहारी हरिवाहनं व्यजिज्ञपत—'कुमार! युवराजवार्ताद्भुतश्रवणेन पीतमतिचिरं कर्णामृतम्, इदानीमीक्षणामृतं क्षणमेकमास्वाद्यताम्।' इत्युदीर्य दूरावनतपूर्वकाया दक्षिणेन करेणादाय सादरमुपरितनवसनपल्लवप्रान्तसंयतं दिव्यं चित्रपटमुपनिन्ये [ज्ञ]॥

प्रत्युषसापि प्रभातेनापि, **गगनमरकतस्थालनिहितदिनकरप्रदीपेन** गगनरूपम्–आकाशरूपं, यत् मरकतस्थालम्–इन्द्रनीलमणिमयं स्थालं, तत्र निहितेन–धृतेन, दिनकररूपेण–सूर्यरूपेण, प्रदीपेन, **प्रस्तुताराात्रिकेणेव** प्रवर्तितनीराजनेनेव, **कृतोपस्थानां** कृताराधनाम्। पुनः दूरम्, **उल्लसितैः** उत्थितैः, **दिगन्तैरपि** दिङ्मुखैरपि, **साभिलाषैरिव** सस्पृहैरिव, **प्रतीष्यमाणपटुविलेपनामोदां** प्रतीष्यमाणः–अभिलष्यमाणः, गृह्यमाण इत्यर्थः, पटुः–उत्कटः, विलेपनामोदः–विलेपनगन्धो यस्यास्तादृशीम् [ह]। पुनः **विबुद्धशकुनिकृतकोलाहलैः** विबुद्धैः–प्रबुद्धैः, शकुनिभिः–पक्षिभिः, कृतः कोलाहलो येषु तादृशैः, **वेलावनतरुभिरपि** तटस्थवनवृक्षैरपि, **उद्भूतमदनोन्मादैरिव** आविर्भूतकामोन्मादैरिव, **परिवृतां** परिवेष्टिताम्। पुनः **अन्तरिक्षेणापि** आकाशेनापि, **गलदवश्यायबिन्दुना** स्रवत्तुषारबिन्दुना, **बद्धस्मरस्वेदेनेव** धृतकामविकारात्मकघर्मोदकेनेव, **उत्सङ्गितां** क्रोडीकृताम्। पुनः **मन्दरान्दोलनात्** मन्दराचलालोडनात्, **पलायिताम्** अपसृताम्, मदिरायाः, **मदशक्तिमिव** मनोविकारताशक्तिमिवेत्युत्प्रेक्षा। पुनः **मुष्टिनिपीडनात्** मुष्ट्या निष्कर्षणात्, **अनङ्गेक्षुचापयष्टेः** अनङ्गसम्बन्धीक्षुरूपधनुर्यष्टेः, **विगलितां** च्युतां, **निष्यन्दधारामिव** रसप्रस्रवणधारामिव [क्ष]। **इति** इत्थं, **कथारसाक्षिप्तचेतसि** कथाकौतुकाकृष्टहृदये, **समरकेतौ** तदाख्यप्रकृतनृपकुमारे, **स्ववृत्तान्तं** स्वकीयवार्ताम्, **आवेदयति** विज्ञापयति सति, **लिखित इव** चित्रित इव, **निश्चलपक्ष्मलेखे** निर्निमेषनयनरोमावलीके, पुनः **अभिमुखप्रहितदृशि** अभिमुखव्यापारितलोचने, **सभ्यलोके** सभासज्जने, **तदीयमुखं** समरकेतुमुखं, पश्यति सति, पुनः **श्लथीकृतान्तरकथेषु** शिथिलितमध्यवर्तिकथानकेषु, पुनः **सकुतूहलं** सौत्सुक्यम्, **अन्तरा अन्तरा** मध्ये मध्ये, **विस्तारितहर्षकोलाहलेषु** विस्तारितहर्षजन्यकलकलेषु, **कमलगुप्तप्रभृतिषु** कमलगुप्तप्रमुखेषु, **आकर्णयत्सु** तत्कथां शृण्वत्सु, **प्रचलितशिरसि** प्रकम्पितमस्तके, **मञ्जीरमुख्ये** मञ्जीरप्रभृतौ, **बन्दिवृन्दे** बन्दिगणे, **कथापञ्जरस्य** कथाविस्तारस्य, **सप्रपञ्चं** सविस्तरं, **सरसतां** रसवत्ताम्, **आकर्णयति** श्रवणेनास्वादयति सति, **हर्षोत्फुल्ललोचना** आनन्दोल्लसितनयना, **प्रतीहारी** द्वारपालिका, **सहसैव** अकस्मादेव, अतर्कितमेवेत्यर्थः, **प्रविश्य** प्रवेशं कृत्वा, **हरिवाहनं** तदाख्ययुवराजं, **व्यजिज्ञपत्** विज्ञापितवती, किमित्याह–कुमार! **युवराजवार्ताद्भुतश्रवणेन** समरकेतुवृत्तान्ताश्चर्यश्रवणेन, **कर्णामृतं** श्रवणेन्द्रियास्वाद्यामृतरसः, **अतिचिरम्** अतिदीर्घकालम्, **पीतम्** आस्वादितम्, **इदानीम्** अधुना, एकं क्षणम्, **ईक्षणामृतं** नेत्रास्वाद्यामृतरसः, आस्वाद्यताम्, **इत्युदीर्य** इत्युक्त्वा, **दूरावनतपूर्वकाया** दूरम् अवनतम्–आनतं, पूर्वकायं–शरीरपूर्वभागो यस्यास्तादृशी, **उपरितनवसनपल्लवप्रान्तसंयतम्** उपरितनेन पल्लवकोमलवस्त्राञ्चलेन बद्धं दिव्यं–मनोहरं **चित्रपटं** चित्राधारवस्त्रं, दक्षिणेन **करेण** हस्तेन, **आदाय** गृहीत्वा, **सादरम्** आदरसहितम् **उपनिन्ये** उपजहार [ज्ञ]।